श्रीभगवद् बादरायणप्रणीतम्

श्रीमद् भागवतम्

अष्टमः स्कन्धः (अनुवृत्तः)

॥ अथ षष्ठोऽध्यायः ॥

श्रीशुक उवाच–

एवं स्तुतः सुरगणैर्भगवान् हरिरीश्वरः ।
तेषामाविरभूद् राजन् सहस्रार्कोदयद्युतिः ॥ १ ॥

सत्यधर्मीया — स्तुतिस्तु ज्ञानपूर्वं कृताऽर्थजननीति प्रपञ्चयंस्तत्रादौ प्रस्तुतस्तुतितो हरिराविरासीदुदासीनः किं किं वाऽवादीदिति क्षितिपतिसन्देहमाद्यान्तिमौ पक्षावङ्गीकृत्य समाधत्ते ॥

श्रीशुक इति । एवं । ब्रह्मादिभिरिति शेषः । स्तुतः ब्रह्मणः साक्षात्स्तावकस्य कण्ठतोऽत्राननुवादः सुरगणैरित्यप्रस्तुतोक्तिश्च उत्तरत्र प्रोच्यमानप्रतिहतेक्षणत्वं, विरिञ्चो भगवान्दृष्ट्वेति तदवलोकयितृत्वं विशेषतः संभवत इति ज्ञेयम् । उदयकालिकी द्युतिरुदयद्युतिः । सहस्रं सहस्रसङ्ख्याश्च तेऽर्काश्च तेषामुदयद्युतिर्यस्य सः । अभूतोपमेयम् । सहस्रलक्षामितभानुदीधितिमित्याद्युक्तेरिदमपि मध्यमसुर-गणग्रहण इवोत्तमविध्याद्यग्रहणे च निमित्तम् ॥ १ ॥

छलारी — हरेराविर्भावप्रकारं वर्णयति ॥ एवमिति । सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य सः ॥ १ ॥

लिङ्गेरी — परमात्मज्ञानमिव परमात्मविषयस्तुतिरपि तत्प्रसादाद्यशेषपुरुषार्थहेतुरिति सूच्यतेऽस्मिन्नध्याये । अत्रापि प्रथमं हरेः प्रकटनप्रकारमाह ॥ एवमित्यादिना । हे राजन् । सहस्रसंख्याकानामर्काणां सूर्यानामुदये सति यादृशी द्युतिः कान्तिः स्यात्तादृक्कान्त्युपेतः सन् हरिराविरभूत् प्रकटो बभूव । प्राकट्ये निमित्तमाह ॥ एवं स्तुत इति । चतुर्मुखादिसुरगणैरेवम् । प्रकटितस्य हरेः सुरकार्यकरणसामर्थ्यसूचनाय भगवान्नीश्वर इति विशेषणद्वयम् ॥ १ ॥

तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ।
नापश्यन् खं दिशः क्षोणीमात्मानं चाग्रतो विभुम् ॥ २ ॥

सत्यधर्मीया — महसा तेनैव तावतैव तेजसा । प्रतिहतानि चाकचक्येनेक्षणानि नेत्राणि येषां ते तथा । खमाकाशम् । क्षोर्णी भूमिम् । आत्मानं स्वं स्वदेहम् । विभुमग्रतोऽग्रगं ब्रह्माणं च नापश्यन् । कुतो विभुमिति पाठे परमात्मानं वा । धातारं कुतः पश्येयुरित्यर्थः ॥ २ ॥

छलारी — महसा तेजसा प्रतिहतानि तिरस्कृतानीक्षणानि चक्षूंषि येषां ते । खमन्तरिक्षं क्षोर्णी भूमिमात्मानम् । जातावेकवचनम् । स्वान् । अग्रतः पुरतः स्थितं विभुं विष्णुं च ॥ २ ॥

लिङ्गेरी — सर्वे देवा ब्रह्मादयस्तेनाविर्भूतहरिसंबन्धिना महसा कान्त्या प्रतिहतानि तिरस्कृतानीक्षणानि नेत्राणि येषां ते तथा सन्तः खमाकाशं, दिशः, क्षोर्णी भूमिमात्मानं स्वं स्वदेहमग्रतः पुरतः स्थितं विभुं स्वस्वामिनं हरिं च नापश्यन् । कांत्युत्सवे तु महसीति नानार्थरत्नमाला ॥ २ ॥

विरिञ्चो भगवान् दृष्ट्वा सह शर्वेण भारत ।
स्वच्छं मरकतश्यामं कञ्जगर्भारुणेक्षणम् ॥ ३ ॥

सत्यधर्मीया — सह शर्वेणेत्यनेन सूचिताप्राधान्येन दर्शनेऽपि तरतमभावो ध्वन्यते । कञ्जगर्भवदरुणे ईक्षणे यस्य तम् ॥ ३ ॥

छलारी — आविर्भूतं परं पुरुषं विरिञ्चो दृष्ट्वा तुष्टावेति सप्तमश्लोकेनान्वयः । स्वच्छं निर्मलं कंजगर्भवदरुणे लोहिते ईक्षणे यस्य तम् ॥ ३ ॥

लिङ्गेरी — भगवान् । विरचयति सृजति सनकादीनिति विरिञ्चश्चतुर्मुखः शर्वेण देवगणेन सह स्वच्छं निर्मलं मरकतवच्छ्यामवर्णं कञ्जस्य कमलस्य गर्भवदुदरभागवदरुणे रक्ते ईक्षणे यस्य तम् ॥ ३ ॥

तप्तहेमावदातेन लसत्कौशेयवाससा ।
प्रसन्नचारुसर्वाङ्गं सुमुखं सुन्दरभ्रुवम् ॥ ४ ॥

सत्यधर्मीया — तप्तं हेम । निष्टापिताष्टापदं तद्वदवदातेन निर्मलेन पीतेन च । अवदातः सिते पीते विशुद्धे प्रवरेऽपि चेति विश्वः । लसद्भासुरं कौशेयम् । कोशाड्ढञिति ढञ् । कौशेयं

कृमिकोशोत्थमित्यमरः । तद्रूपं यद्वासो वस्त्रं तेन सहितम् । वृद्धो यूनेत्यादिनिर्देशादनिर्देशेऽपि सहेति लभ्यते । वाससा करणेन । प्रसन्नं चारु सर्वाङ्गमित्यन्वयो वा । प्रसन्नानि चारूणि सर्वाङ्गानि यस्य तम् । एतेन वाससः सौक्ष्म्यमङ्गानां चासृण्यं सूचितं भवतीति मन्तव्यम् । सुमुखम् । सुन्दरे भ्रुवौ यस्य तम् । प्रसन्नचारुसर्वाङ्गमित्यनेनैव सुमुखस्य भ्रुवोश्च चारुत्वे लब्धे पुनरुक्तिस्तु कार्योन्मुखी-भवनरूपसौमुख्यस्यैतत्कार्यस्यापि यद्भ्रूविभ्रममात्रसाध्यतेति विशेषद्योतनायेति ज्ञेयम् ॥ ४ ॥

छलारी — तप्तहेमवदवदातेन पीतेन । अवदातोऽरुणे पीते श्वेते श्यामे च कथ्यत इत्यभिधा-नात् । लसत्कौशेयवाससा युक्तेन । प्रसन्नानि पुष्टानि चारूण्यंगानि करचरणाद्यवयवा यस्य तम् । सुमुखं प्रसन्नवदनम् ॥ ४ ॥

लिङ्गेरी — तप्तहेमवत् सुवर्णवदवदातेन शुद्धेन, किरीटेन शिरोभूषणेन । केयूराभ्यां बाहुभूषणाभ्यां च भूषितं, कर्णाभरणाभ्यां कुण्डलाभ्यां निर्भातावतिप्रकाशितौ कपोलौ गण्डस्थले, श्रिया युक्तं मुखांबुजं च यस्य तम् ॥ ४,५ ॥

महामणिकिरीटेन केयूराभ्यां च भूषितम् ।
कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजम् ॥ ५ ॥

सत्यधर्मीया — केयूराभ्यामङ्गदाभ्यां भुजगाभ्यां कपोलश्रीमुखाम्बुजम् ॥ ५ ॥

छलारी — महान्तो मणयो यस्मिंस्तेन किरीटेन । कर्णाभरणाभ्यां मकरकुण्डलाभ्यां निर्भान्तौ दैदीप्यमानौ कपोलौ ताभ्यां श्रीः कान्तिः मुखाम्बुजं यस्य तम् ॥ ५ ॥

काञ्चीकलापवलयहारनूपुरशोभितम् ।
कौस्तुभाभरणं लक्ष्म बिभ्रतं वनमालिनम् ॥ ६ ॥

सत्यधर्मीया — काञ्ची मेखला तदात्मा कलापो भूषणम् । काञ्ची स्यान्मेखला दाम्नि, कलापो भूषणे बर्ह इति विश्वौ । नूपुरं पादभूषणम् । तैश्च शोभितम् । कौस्तुभाभरणं लक्ष्मीचिह्नं श्रीवत्सनामकं च बिभ्रतमित्यन्वयः ॥ ६ ॥

छलारी — काञ्च्याख्यकलापेन कटिभूषणेन । वलयाभ्यां कङ्कणाभ्यां पादभूषणाभ्यां करभूषणाभ्याम् । हारैर्मुक्तावलिभिः कण्ठभूषणैः । नूपुराभ्यां च शोभितम् । कौस्तुभ आभरणं यस्य

कण्ठे तम् । लक्ष्म श्रीवत्साख्यं लक्षणं दक्षिणस्तनादूर्ध्वं बिभ्रतम् । लक्ष्मीमिति पाठे लक्ष्मीं वक्षसि बिभ्रतमित्यर्थः । वैजयन्तीवनमालया युक्तम् ॥ ६ ॥

लिङ्गेरी — काञ्चीकलापेन कटिभूषणेन वलयाभ्यां करभूषणाभ्यां महाहारेण मुक्तामालया नूपुराभ्यां पादभूषणाभ्यां शोभितं, कौस्तुभाख्याभरणं, लक्ष्म श्रीवत्साख्यलक्षणं च बिभ्रतं, वैजयन्त्याख्यवनमालिनम् ॥ ६ ॥

सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितम् ।
तुष्टाव देवप्रवरः सर्वेशं पुरुषं परम् ।
सर्वामरगणैः सार्धं सर्वाङ्गैरवनिं गतैः ॥ ७ ॥

सत्यधर्मीया — अस्त्रैरायुधैः । अस्त्रं प्रहरणे चाप इति विश्वः । मूर्तिमद्भिः शरीरवद्भिः । देवप्रवरो ब्रह्मा । इदमपि वृन्दारकवृन्दाक्षिमन्दीभवन इवैतस्य सम्यग्दर्शनं च निमित्तमिति ध्येयम् । सर्वाङ्गैरष्टाङ्गैः अवनिं गतैः । उरसा शिरसेत्यादेः, नत्वा, तुष्टाव स्तोत्रं कृतवानित्यर्थः ॥ ७ ॥

छलारी — सुदर्शनादिभिः सुदर्शनचक्रादिभिः स्वास्त्रैः स्वायुधैः । अस्त्रं प्रहारे चापे इत्यभिधानम् । मूर्तिमद्भिः शरीरधारिभिः कामादिभिः । देवप्रवरो ब्रह्मा सर्वाङ्गैरुरसा शिरसेत्युक्तांगैरवनिंगतैर्भूमौ पतितैः साष्टाङ्गप्रणामैरित्यर्थः ॥ ७ ॥

लिङ्गेरी — सुदर्शनादिभिश्चक्रप्रभृतिभिर्मूर्तिमद्भिः शरीरधारिभिः स्वास्त्रैः कामादिभिः सुदर्शनाद्यभिमानिभिरुपासितं सेवितम् । सर्वेषां रमाब्रह्मादीनामीशं स्वामिनं परं सर्वोत्तमं पुरुषं नारायणं दृष्ट्वा सर्वाङ्गैरवनिं भूमिं गतैर्दण्डप्रणामं कुर्वद्भिः सर्वामरगणैः सार्धं तुष्टाव स्तुतवान् । यतः स्वयं देवानां प्रवरः श्रेष्ठः ॥ ७ ॥

ब्रह्मोवाच–

अजाय जन्मस्थितिसंयमाय गुणाय निर्वाणसुखार्णवाय ।
अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥

सत्यधर्मीया — अजायोत्पत्तिरहिताय । जन्मस्थितिभ्यां सहितः संयमः संहारो जगतो येन स तथा । गुणाय विज्ञानमानन्दं ब्रह्मेत्यादेस्तदात्मकाय । जन्म च स्थितिश्च संयमश्च तानाययन्त्यवगमयन्ति त आयास्ते गुणा यस्य तस्मा इति पदमेकं वा । नास्मत्तुलोऽभिमानेन भगवन्

भवानित्याह ॥ निर्वाणेति । निर्वाणसुखं शरीराभिमतिव्यतिरेकोत्थसुखम् । तेनार्णव इवार्णवः । अणोरणुवस्तुनोऽपि सकाशादणिम्ने । अणिमानं न निभालयसे इत्यादाविव भाविभवित्रोरभेदादणिमाऽणुस्तस्मै । इमनजन्तः शब्दः । अणोरणीयानिति श्रुतेः । परिगणयितुं योग्यं परिगण्यम् । तन्न भवतीत्यपरिगण्यम् । अनन्तमिति यावत् । धाम तेजो यस्य तस्मै । अपरिच्छिन्नतेजस्त्वमणोरणीयस्त्वं नासम्भावितमित्यत्र हेतुमाह ॥ महानुभावायेति । महाननुभावः अघटघटनापाटवं यस्य स तस्मै । यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्तीत्यादेर्महानुभावत्वादचिन्त्यशक्तित्वात्सर्वं सुघटं त्वयीति । ते नमो नमः । आदराद्विरुक्तिः । अस्त्विति शेषः ॥ ८ ॥

छलारी — हे विष्णो । तव ते नमो नमः । कथंभूताय । उत्पत्तिस्थितिशून्याय । जन्मस्थितिसंयमाय जन्मादिकारणायेत्यर्थः । जन्मादीनां तदेकाधीनत्वादभेदव्यपदेशः । अजातजन्मस्थितिसंयमायेति पाठे न जातास्ते जन्मादयो यस्येत्यर्थः । गुणाय ज्ञानादिरूपाय । विज्ञानमानन्दं ब्रह्मेति श्रुतेः । निर्वाणसुखार्णवाय निर्वाणसुखस्य शरीराजन्यरूपसुखस्य समुद्राय । अणोरप्यतिसूक्ष्मादपि वस्तुनोऽणिम्नेऽतिसूक्ष्मरूपाय । अपरिगण्यमियत्तारहितं धाम देहो यस्य तस्मै । अनेन महतो महीयस्त्वमुक्तं भवति । न चैकस्यैव युगपदणुत्वं महत्वं चासंभावितमिति वाच्यम् । महान् अघटितघटकोऽनुभावः सामर्थ्यं यस्य तस्मै । अचिन्त्यैश्वर्यादित्यर्थः । अगण्यप्रभवायेति वा ॥ ८ ॥

लिङ्गेरी — अजायोत्पत्तिशून्याय जन्मस्थितिसंयमा उत्पत्तिस्थितिसंहारनियमनादयो जगतो यस्माद्भवन्ति तस्मै । गुणायानन्दादिगुणस्वरूपाय । आनन्दो ब्रह्मेति श्रुतेः । निर्वाणसुखार्णवाय अप्राकृतशरीरजन्यसुखसमुद्राय । अणोः सकाशादप्यणिम्नेऽतिसूक्ष्मपरिमाणाय । अणोरणीयानिति श्रुतेः । अपरिगण्यं परिगणयितुमशक्यं धाम पराक्रमादिरूपं तेजो यस्य तस्मै । विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादेः । महाननन्तोऽनुभावः सामर्थ्यं यस्य तस्मै ते नमो नमोऽस्तु ॥ ८ ॥

रूपं तवैतत् पुरुषर्षभेड्यं श्रेयोर्थिभिर्वैदिकतान्त्रिकैश्च ।
योगेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन् भुवि विश्वमूर्ते ॥ ९ ॥

सत्यधर्मीया — पुरुषर्षभ क्षराक्षरपुरुषश्रेष्ठ । उत्तमः पुरुषस्त्वन्य इत्यादेः । तवैतद्रूपमीड्यं स्तुत्यम् । तदीडनाधिकारिण आह । वैदिकतान्त्रिकैर्वेदावेदितकर्मकर्तारः पञ्चरात्र्याद्युक्तानुष्ठातारस्तैः । उभयत्रापि तदधीते तद्वेदेत्यर्थे ठक् । श्रेयोऽर्थिभिः । हे धातः । भुव्याधारभूतेऽमुष्मिंस्तस्मिन् रूपे ।

योगेन समाध्याद्युपायेन । नोऽस्मांस्त्रिलोकांश्च । विशेषणसमासः । सह युगपत्पश्यामि । न भ्रमो ममायमित्युपपत्तिमाह ।। विश्वमूर्त इति । विश्वं जगन्मूर्तौ तनौ यस्य तस्मै । स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः । भवेति पाठे मङ्गलात्मकेत्यर्थः । ते नम इत्यन्वयः । अतो न वाक्यभेदाध्याहारादिदोषः ।। ९ ।।

छलारी — हे पुरुषर्षभ । तवैतद्रूपं श्रेयोर्थिभिर्मोक्षादिपुरुषार्थाकाङ्क्षिभिः पुरुषैर्वैदिकैर्वेदोक्तेन तान्त्रिकेण पञ्चरात्राद्यागमोक्तेन च योगेन साधनेनेज्यं पूज्यम् । हे धातः । भुवि सर्वाधारेऽमुष्मिन् रूपे नोऽस्मांस्त्रिलोकांश्च सह युगपत्पश्यामि । तत्र हेतुः । हे विश्वमूर्ते विश्वं जगन्मूर्तौ देहे यस्य स तथा ।। ९ ।।

लिङ्गेरी — हे पुरुषर्षभ क्षराक्षरपुरुषोत्तम । तवैतद्रूपं श्रेयोर्थिभिः सर्वपुरुषार्थकांक्षिभिर्वैदिकतान्त्रिकैः श्रुतिपञ्चरात्र्यादिवाक्यैरीड्यं स्तुत्यम् । हे धातर्विश्वमूर्ते । जगल्लक्षणशरीरवान् अमुष्मिंस्तस्मिंस्ते शरीरे त्रिलोकांस्त्रिलोकस्थितजनैः सह नोऽस्मान् अहं योगेन त्वध्यानादिजपुण्येन पश्यामि । त्वमस्माकं सर्वाभिष्टप्रदो भव ।। ९ ।।

त्वय्यग्र आसीदिदमात्मतन्त्रे त्वमादिरन्तो जगतोऽस्य मध्यम् ।
घटस्य मृत्स्नेव परः परस्मात् त्वमेव चाशेषविशेषनामा ।। १० ।।

सत्यधर्मीया — आत्मतन्त्रे स्वतन्त्रे । अग्रे सृष्टिकाले । इदं जगदासीत् । यदस्य जगतस्त्वमादिरुत्पादकः अन्तो नाशकश्च मध्यं पालनकर्ता च । यद्यपि क्रमप्राप्तस्य मध्यस्य मध्ये निबन्धः कार्यस्तथाऽप्यार्याऽनार्याऽनुभवतस्तद्धर्म्येकनिष्ठतया सिद्धमिति यत्र क्वापि निबन्धे न दोष इति कर्ता धाता हर्ता हर इति प्रथा शैथिल्यायां ते निवेशस्याप्येतस्य मध्यतो निबन्धः ततस्तत्त्रिकमपि भगवदायत्तमित्यवगमितं भवतीति ज्ञेयम् । न किञ्चिदुदञ्चयितुं कश्चिदपि समर्थ इत्यत्रानुरूपं निदर्शनं दर्शयति ।। घटस्येति । इव यथा । घटस्य मृत्स्ना प्रशस्ता मृत् । सति कुलालकीलालादौ मृदोऽभावे यथा न घटघटना तथेश्वर त्वद्व्यतिरेकेण जगज्जननं दुर्घटमिति भावः । प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिकेत्यमरः । सस्नौ प्रशंसायामिति मृच्छब्दात्स्नः । मूलकृदेव घटस्य मृत्स्नेवेत्यापातत आयातोपादानभ्रमं भ्रंशयति । आत्मतन्त्रे । परः परस्मादित्यादिना । परस्मादुभयविधप्रकृतेः पर उत्तमः । तर्हि तत्तच्छब्दानां का गतिरित्यत आह ।। त्वमेव चाशेषविशेषनामेति । सामान्यतोऽशेषनामविशेषनामा चेत्यर्थः । अशेषाणां विशेषनामानि कर्ता हर्तेत्येवमादीनि यस्य स इति वा । नामानि सर्वाणि यमाविशन्ति । यो देवानां नामधा एक एवेत्यादेः । चशब्दो न चेतनविकारः स्याद्यत्र क्वापि

ह्यचेतनम् । नाचेतनविकारोऽपि चेतनः स्यात्कदाचनेत्यनुव्याख्यानव्याख्यासुधायाम् । यत्र क्वापि देशे काले वाऽचेतनं चेतनविकारो दृष्टः स्यात्तदेयं व्याप्तिर्भज्येत । न चैवमित्यर्थ इत्यादिना । योऽतिप्रसङ्गोऽभिहितस्तत्सूचक इति मन्तव्यम् । विस्तरस्तु ततोऽनुसन्धेयः । त्वमेव चाशेषमशेष-नामेति क्वचित्पाठः । त्वमेवेदमशेषं जगत् । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादेरेवमुक्तिः। अशेषनामा चेति तत्रार्थः ॥ १० ॥

छलारी — विश्वमूर्तित्वमुपपादयति ॥ त्वयीति । इदं जगदात्मतन्त्रे स्वतन्त्रे त्वय्यग्रे सृष्टिकाले मध्ये स्थितिकालेऽन्ते प्रलयकाले आसीदस्ति । यथा मृत्तिका घटस्यादिरन्तो मध्यं च । आद्यन्तमध्यावयवेषु मुख्यं कारणम् । तथा त्वमेवास्य जगत आदिरन्तो मध्यं चाद्यन्तमध्यभागेषु मुख्यं कारणम् । नान्यः यथा महत्येकस्मिन्कार्येऽनेककर्तारो भवन्ति । यथा जगद्रूपे महाकार्ये त्वां विनाऽन्यो मुख्यकारणं नेत्याशयः । तत्र हेतुः परस्मात्प्रकृतेरपि पर उत्तम इति ॥ १० ॥

लिङ्गेरी — हे पुरुषर्षभ हरे । अग्रे महाप्रलये इदं जगदात्मतन्त्रे स्वतन्त्रे त्वयि त्वदुदरे स्थितमासीत् । त्वमस्य जगतो घटस्य मृत्स्नेव मृत्तिकेवादिरुत्पादको मध्यं स्थितिहेतुरन्तः संहारकः । तत्त्वं परस्माद्ब्रह्मादिचेतनराशेः पर उत्तमः । अग्निर्वै देवानामवमो विष्णुः परमः । विष्णुमुखा वै देवा इत्यादिश्रुतेः । अत एवाशेषाणां निःशेषाणां विशेषाणां ब्रह्मादीनां नामानि मुख्यतो यस्य सोऽशेष-विशेषनामा । अनेन हिरण्यगर्भः समवर्तताग्रे, एको रुद्रो न द्वितीयोऽवतस्थ इत्यादिश्रुतिस्थ-हिरण्यगर्भरुद्रादिशब्दवाच्योऽपि त्वमेवेति विष्णुरेव सर्वजगत्सृष्ट्यादिकर्तेत्यस्य न ब्राह्मपाशुपतादि-विरोध इत्युक्तं भवति । नामानि सर्वाणि यमाविशन्ति । यो देवानां नामधा एक एव । यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु । एवं च वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकजनैरित्यादि श्रुतिस्मृतिभ्यः । मृत्स्ना च मृत्तिकेत्यमरः ॥ १० ॥

त्वं माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः ।
पश्यन्ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥ ११ ॥

सत्यधर्मीया — घटस्य मृत्स्नेवेत्यत्र निभृतनिर्भरः पूर्वपक्षी विना नासिकाकर्षणं न समाहितमानस इति पृथक् प्रकृतिमुपादानीभूतां निरूप्य निमित्तत्वनिमित्तानि मूलकृल्पति ॥ त्वमिति । आत्माश्रयया आत्मा स्वयं हरिराश्रयो यस्याः सा तया । अत एव स्वमायया । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादेः । प्रकृत्योपादानकतया । इदं विश्वं जगन्निर्माय सृष्ट्वा । तद्विश्वं

प्रवृत्तयेऽनुप्रविष्टः । तत्सृष्ट्वा तदेवानुप्राविशदित्यादेरैन्द्रजालिकी सृष्टिरिव सृष्टिस्तयेति संबोधयति । निर्मायेति इति वा । यस्त्वं तं त्वां मनीषिणो बुद्धिमन्तः । नोपलक्षणमित्याह ।। मनसा युक्ता इति । मननयुक्ता इत्यर्थः । गुणव्यवाये सति गुणसम्बन्धेऽपि अगुणं तत्कार्याज्ञानादिरहितम् । चित्तः नैजाज्ज्ञानात् । विपः स्वयं सर्वपालो विगतपालकस्त्वमिति पश्यन्ति । अनेन बहु बहुज्ञदर्शनं मानमत्रेति दर्शितं भवति । मनसा पश्यन्ति युक्ता योगसम्पन्नाः शोभना इति वा । युक्तशब्दः शोभनपर्याय इति कर्मनिर्णयटीकोक्तेः मनश्च साक्षी । ज्ञान्यज्ञानिदर्शने ते इत्याह ।। अमनीषिण इति । घटस्य मृत्स्नेवेत्यनेनोपादानतैवोक्तेति ये मन्वते तेऽमनीषिणः । मनसा युक्ता विपश्चितो ज्ञानिनस्तु । उर्वरितं पूर्ववत् ।। ११ ।।

छलारी — अत्र मृत्तिकादृष्टान्तो मुख्यकारणत्वे एव न तूपादानकारणत्वे । ब्रह्मणो जगन्निमित्तकारणत्वस्य ज्ञानिप्रत्यक्षसिद्धत्वादित्याशयेनाह ।। त्वमिति । हे हरे । त्वमात्मैवाश्रयो यस्याः सा तथा । अत एव स्वया स्वाधीनमाययोपादानभूतया प्रकृत्येदं विश्वं निर्माय तदनुप्रविष्टस्तन्नियमनार्थं तस्मिन् जगति प्रविष्टः । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । इति मनीषिणो विवेकिनो विपश्चितः शास्त्रज्ञा युक्ता ध्यानयुक्ताः सन्तः त्वां मनसा पश्यन्ति । ननु गुणकार्ये प्रवेशे तन्निमित्तदोषः स्यादित्यत आह । गुणेति । गुणानां व्यवाये कार्ये स्थितमप्यगुणं गुणनिमित्तदोषरहितमित्यर्थः ।। ११ ।।

लिङ्गेरी — हे हरे । त्वमात्माश्रयया स्वाधारस्वकीयया स्वाधीनया जडप्रकृत्यात्मकया मायया स्वया स्वरूपभूतमायया जडप्रकृतिनियामकशक्त्या चेदं विश्वं जगन्निर्माय सृष्ट्वा तदनुप्रविष्टो भवसि । अनेन तत्सृष्ट्वा तदेवानुप्राविशत् । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्तीत्यादि-श्रुतिप्रतिपाद्यं जगज्जन्मादिकर्तृपरं ब्रह्म विष्णुरेवेति चतुर्मुखेनाविष्कृतम् । नन्वेवं हरिर्जडप्रकृत्या जगत्सृष्ट्यादिकर्ता चेत्तद्गुणसत्त्वादि सृष्ट्वा तत्र प्रविष्टः सन् तथाभूत इति वक्तव्यम् । न चैतद्युक्तम् । गुणप्रविष्टस्य गुणशक्तिविषयतया देवदत्तादिवदस्वातन्त्र्यादिदोषप्रसक्तेरित्याशङ्क्य चतुर्मुखो, ज्ञानिनो युक्ताः परमात्मन्येव मनोयोगयुक्ताः सन्तो गुणव्यवाये सत्त्वादिगुणसमूहे स्थितमप्यगुणं सत्त्वादिगुणशक्त्यविदया तद्रहितं विपश्चितः श्रुत्यादिना परोक्षतो ज्ञानवन्तः सन्तो मनसाऽपि तादृग्रूपं हरिं पश्यन्तीत्यतो न विरोध इति समाधत्ते ।। पश्यन्तीत्यादिना । अवश्यं चैतदेवं विज्ञेयम् । एवं द्रष्टृणां मोक्षयोग्यत्वोक्तेस्तत्साक्षात्कारस्य भ्रमत्वशङ्काऽनवकाशात् । हृदा मनीषा मनसाऽभिक्लृप्तो य एवं विदुरमृतास्ते भवन्तीत्यादिश्रुतेः ।। ११ ।।

यथाऽग्निमेधस्यमृतं च गोषु भुव्यन्नम्बूत्खनने तथोर्व्याः ।
योगैर्मनुष्या अधियन्ति हित्वा गुणेषु बुध्या कवयो वयन्ति ।। १२ ।।

सत्यधर्मीया — मननं तेषां मनस्विनामेवमिति सदृष्टान्तमाचष्टे ।। यथेति । यथाऽग्निमेधसि मरणौ अमृतं क्षीरं घृतं वा गोषु । भुव्यन्नं धान्यादिरूपम् । योगैर्मथनदोहनबीजावापादिभिरुपायैः । यथोर्व्या उत्खनने अम्बूदकं च मनुष्या अधियन्ति अधिगच्छन्ति । तथा कवयो ज्ञानिनो बुद्ध्या गुणेषु स्थितं त्वां निरनिष्टं निरवद्यमानयन्ति । अवोपसर्गपूर्वादिण् गतावित्यस्येदं रूपम् । तत्त्वप्रकाशिकाछायाव्याकृतौ जानन्तीत्युक्तेः । ये गत्यर्थन्यायेन जानत इत्यर्थः । गुणान्हित्वा गुणेषु विद्यमानमवयन्तीति वा । उपादानतावासनां विवासयितुं बहु दृष्टान्तोक्तिः । यथाऽग्निरेधश्च गौरमृतमन्नं भूरम्बु च दृश्यन्ते कारणकार्यतापन्नानि भिन्नान्येवं जगदीश्वरजगती इत्यवयन्ति कवय इति भावः । यद्वा । कविष्वेव तरतमभावेन योग्यतानुरोधेनाज्ञानमिति दर्शयितुमियदुक्तिः । उत्खननेन वृत्तिमिति पठित्वा वृत्तिं वाणिज्यादिकमिति व्याचक्षते । परन्तु न स सरलोऽसार्वत्रिकश्च । बुद्धिपूर्वकं गुणगमनं नेतरस्येव कर्मवशत इत्याह ।। बुद्ध्या हित्वा । हि गतौ वृद्धे चेति स्मृतेः । गुणान् गुणेषु विद्यमानमिति वा ।। १२ ।।

छलारी — गुणकार्ये प्रविष्टत्वेनैव पश्यन्ति नोपादेयत्वेनेत्येतत्सदृष्टान्तमाह ।। यथेति । यथाऽग्निमेधसि काष्ठे मथनेनामृतं क्षीरं घृतं वा गोषु दोहनादिना भुव्यन्नं व्रीह्यादिकर्षणादिना तथा भुव्येवाम्बुखननेनोद्यमेन पुरुषप्रयत्नवृत्तिजीविकां वाणिज्यादिना योगैः पूर्वोक्तमथनाद्युपायैर्मनुष्या अधियन्ति प्राप्नुवन्ति । काष्ठादिषु विद्यमाना एवाग्न्यादयः साधनेनोपलब्धा इति जानन्ति । तथा कवयो विवेकिनो बुध्या साधनेन त्वां गुणेषु गुणकार्येषु विद्यमानमेवाधियन्ति जानन्ति तथा वदन्ति । अत्र भेदस्य दोषलेपराहित्यस्य ज्ञानायाग्निनिदर्शनं सर्वस्मात्सारः स्वभक्तमुक्तिदश्चेति प्रदर्शनायामृतदृष्टान्तम् । उपजीव्यत्वं दर्शयितुमन्ननिदर्शनम् । तापहरत्वद्योतनायांबुदृष्टान्तः ।। १२ ।।

लिङ्गेरी — हे हरे! यथा मनुष्या एधसि काष्ठेऽग्निं, गोषु धेनुष्वमृतं क्षीरादि, भुव्यन्नमुर्व्याः पृथिव्या उत्खनने कृते सत्यंबूदकमधियन्ति जानन्ति तथा कवयो ब्रह्मादिज्ञानिनो योगैः सच्छास्त्रादिरूपैरुपायैर्गुणेषु सत्त्वादिषु त्वामवयन्ति जानन्ति हि । अग्निदृष्टान्तेन हरेर्गुणलेपराहित्यं काष्ठाद्यथाग्नेर्भेदः काष्ठस्यानारोपितत्वं तथा गुणानामपि सूचितम् । अमृतदृष्टान्तेन परमात्मनो नित्यमुक्तत्वं सारत्वरूपमुत्तमत्वं मुक्तिदत्वं च ध्वनितम् । अन्नदृष्टान्तेन सर्वोपजीव्यत्वमंबुदृष्टान्तेन सन्तापपरिहारकत्वं च हरेर्ज्ञापितमिति ज्ञातव्यम् ।। १२ ।।

तं त्वा वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थम् ।
दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गाङ्गमम्भः ॥ १३ ॥

सत्यधर्मीया — अविक्रियमित्यादि कवयो वयन्तीत्येतदन्तपद्यैः किञ्चित् सूचितत्वादेकदर्शनोचितबहुगुणो यस्तं त्वाम् । सरोजनाभ । सरोजं पद्मं नाभौ यस्य स तत्सम्बोधनम् । अचूप्रत्यन्वयेत्यत्र अच् इति योगविभागादच् । नाथ सर्वस्वामिन्मम स्वामिन् । अतिचिरेप्सितार्थमतिचिरेणातिचिरं वा ईप्सितो वाञ्छितः स चासावर्थश्च तम् । समुज्जिहानमाविर्भवन्तम् । नाथेनास्मत्प्रार्थनया समुज्जिहानमिति पदमेकं वा । नाथृ नाधृ याच्ञोपतापैश्वर्याशीष्विति स्मरणात् । यव्हा इव प्रवयमुज्जिहाना इति तृतीयाष्टकाष्टाध्यायद्वादशवर्गाद्या या ऋचो व्याख्याने परेण स्वाधिष्ठानं त्यजन्त इति व्याख्याततत्वात्प्रादुर्भावोऽत्र स्वस्थानत्यागस्थानान्तरलाभात्मा ग्राह्यः । ओ हाङ् गतावस्माल्लटः शानचि लौ श्लाविति द्वित्वे सृजामित्यभ्यासेत्वे स्नाभ्यस्तयोरात इत्याकारलोपे कुहोश्चुरिति चुत्वेनाभ्यासे चर्चेति झलो जस्त्वेन जकारे जिहान इति भवति । सर्वे वयं दृष्ट्वाऽद्य । निर्वृतिं सुखं गताः । अभिलषितसिद्धौ सन्देहाभावादिति भावः । दावो दाव इति ख्यातौ वनाग्निवनयोरपीति विश्वात् दवेन वनानलेनार्ता गजाः । गाङ्गं गङ्गासम्बन्धि कबन्धमम्भो दृष्ट्वेव ते यथा निर्वृतिं गता भवन्ति तथा वयं निर्वृतिं गता इत्यन्वयः ॥ १३ ॥

छलारी — हे नाथ सरोजनाभ पद्मनाभ । अतिचिरेण बहुतरकालेनेप्सितार्थं समुज्जिहानं भक्तैर्बहुजन्मसु प्रार्थितं मोक्षादिपुरुषार्थप्रदमित्यर्थः । यद्वा । अतिचिरेण वाञ्छितार्थभूतम् उक्तगुणसंपन्नत्वात्सम्यगुज्जिहानमाविर्भवन्तं प्रत्यक्षतो दृष्ट्वाऽद्य वयं निर्वृतिं सुखं गताः प्राप्ताः । तत्र दृष्टान्तः । दवार्ता वनवह्निना पीडिता गजा यथा गाङ्गं गङ्गासम्बन्ध्यम्भः प्राप्य सुखभरिता भवन्ति तद्वत् ॥ १३ ॥

लिङ्गेरी — हे सरोजनाभ नाथ स्वामिन् । सर्वे वयं समुज्जिहानं भक्ताभीष्टप्रदानाय सन्नद्धमानं भक्तानामभिवृद्धिकरं चात एव चिरेप्सितं चिरं बहुकालमपेक्षितम् । अथ बहुकालापेक्षितपुरुषार्थरूपं यं त्वां दृष्ट्वाऽद्य दवेनारण्याग्निनाऽऽर्ता दुःखिता गजा गांगं भागीरथिस्थमंभो जलं प्राप्येव निर्वृतिं सुखं गताः स्म ॥ १३ ॥

स त्वं विधत्स्वाऽखिललोकपाला वयं यदर्थास्तव पादमूलम् ।
समागतास्ते बहिरन्तरात्मन् किं वाद्य विज्ञाप्यमशेषसाक्षिणः ॥ १४ ॥

सत्यधर्मीया — यदर्थाः । योऽर्थो येषां ते यदर्थाः । अखिललोकपालाः वयं तव पादमूलं समागतास्तमर्थं स त्वं विधत्स्व कुरु । न कृतमिदमिति विज्ञापनमविज्ञोऽहं किं करवाणीति वाणी प्रवीण तव नोचितेति विज्ञापयन्ति । हे आत्मन् । बहिरन्तश्चाशेषसाक्षिणोऽशेषं साक्षात्पश्यतीति स तथा । साक्षाद्द्रष्टरि सञ्ज्ञायामिति स्मरणात् । अद्य किं वा विज्ञाप्यम् । न कृत्यं विदितसर्व सम्प्रति पुनर्वचनेनेति भावः । बहिरन्तश्च व्याप्तेति वा ॥ १४ ॥

छलारी — यत्कर्तव्यं तत्कथयेत्याह ॥ स त्वमिति । योऽर्थो येषां ते यदर्था यत्प्रयोजना अखिललोकपाला वयं तव पादमूलं समागतास्तमर्थमस्मभ्यो विधत्स्व कुरुष्व । असावर्थः क इत्यत आह ॥ ते बहिरिति । हे आत्मन् स्वामिन् । बहिरन्तोऽशेषसाक्षिणः सर्वं पश्यतस्ते तवाद्यास्माभिर्विज्ञाप्यं किं वा प्रमेयमस्ति ॥ १४ ॥

लिङ्गेरी — हे बहिरन्तरात्मन् नियामकतया सर्वजगत्स्वामिन् । स पूर्वोक्तगुणविशिष्टस्त्वं अखिललोकपाल । वयं यदर्था यत्प्रयोजनापेक्षाः सन्तस्तव पादमूलं समागताः प्राप्तास्तद्विधत्स्व कुरुष्व । तत्प्रयोजनस्य भवद्भिरनुक्तत्वान्मम तज्ज्ञानं कथं स्यादिति परिहारः कर्तुं न शक्य (इति न) इत्यभिप्रायेणाह चतुर्मुखः ॥ अशेषसाक्षिणः इति ॥ सर्वं साक्षात्कुर्वतस्तवाद्येदानीं विज्ञाप्यं किमस्तीति ॥ १४ ॥

अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते ।
किं वा विधेमेश पृथग्विभाविता विधत्स्व शं नो द्विजदेवमित्र ॥ १५ ॥

सत्यधर्मीया — गिरित्रः गिरिं कैलासं त्रायत इति स तथा । शिवः । सुरादयो देवाद्याः प्रजेशो दक्ष आदिर्येषां ते तथा । अग्नेः केतवो विस्फुलिङ्गा इव यथा तथा भिन्नांशास्त्वयैव पृथग्विभाविता-स्त्वत्प्रोक्तकारितयोत्पादिताः । किं वा विधेम । कां त्वदाज्ञां कुर्मः । ईशेति सम्बोधनेन स्वकार्यकारितामुपजहसुरिति ज्ञेयम् । न किमपि कर्तुं शक्ता इति भावः । तर्हि मया वा किं कार्यं वदतेत्यत्राह । हे द्विजदेवमित्र । द्विजानां देवानां मित्रानिमित्तबन्धो । शं विधत्स्व । द्विजानां यजनयाजनाद्यभावात्तत एवं देवानामाहुत्याद्यं विरहात्सुखं चैतल्लभ्यमेव विधत्स्वेति द्विजदेवमित्रेत्यनेन सूच्यते । द्विजदेवमन्त्र इति पाठे । हे द्विजदेव । शं हविरादिसुखं नास्ति । अतो मन्त्रम् । तत्प्राप्त्युपायं गुप्तभाषणं विधत्स्वेत्यर्थः । यत् शं नः तद्विधत्स्व । भीरुभिः किमिति न वदत् तव स्वभावोऽयमिति विज्ञापयन्ति ॥ हे उद्विजदेवमित्रेति । उद्विजन्मित्र एवेति पदनिष्पत्तिः । उद्विजन्त

एव मित्राणि यस्य स तत्सम्बुद्धिः । न चैवकारव्यवधानात्कथं तत्पदनिष्पत्तिर्विग्रह इति वाच्यम् । तामिस्रश्चान्धतामिस्रौ द्वौ नित्यौ सम्प्रकीर्तिताविति पठित्वा तामिस्रश्चान्धतामिस्रश्चेति तामिस्रश्चान्धतामिस्रौ चेति स्वयं विगृह्य मध्येपदं चशब्दः कथं द्वन्दः कृत इत्याशङ्क्य नरावाशं शुनश्चिपेत्यादिवचान्वयोऽनन्तरं सम्भवीति काऽत्र कथन्तेति व्याकृतवन्तः । तद्वदत्रेति न मनो विनोदनीयम् ॥१५॥

छलारी — अग्नेः सकाशात्केतवो विस्फुलिङ्गा यथोत्पद्यन्त तथाऽहं गिरिशः शिवः सुरादयः । आदिशब्देन ऋष्यादयो दक्षादयः प्रजेश्वराश्च । ते मदादयः सर्वे । हे ईश । त्वत्तः पृथग्विभाविता उत्पन्ना ये । किं वा शं सुखोपायं विधेम विद्मः । अग्निस्फुलिङ्गदृष्टान्तकथनेन यतो बहुप्रकाशाग्निवत्त्वं सर्वज्ञत्वं तव, वयं त्वल्पप्रकाशस्फुलिङ्गवदल्पज्ञा अतो यं सुखोपायं न जानीम इत्युक्तं भवति । अतस्तवैव सर्वज्ञत्वात्त्वमेव नः शं सुखोपायं विधत्स्व । इदं कुरुतेति सुखोपायमुपदिशेत्यर्थः । हे द्विजानां ऋषीणां देवानां मित्रानिमित्तबन्धो । द्विजदेवमन्त्रमिति पाठे द्विजदेव त्वं ब्रह्मण्यदेव मन्त्रमुपायं विधत्स्वेत्यर्थः ॥ १५ ॥

लिङ्गेरी — हे द्विजदेवमित्र ईश स्वामिन् । अहं गिरित्रश्च रुद्रोऽपि ये च सुरादयो दक्षादयश्चाग्नेः केतवो ज्वाला इव तव सकाशादुत्पन्नास्त्वामाश्रिताश्च । अस्वतन्त्राः किंकरा यतोऽतोऽसुरपीडितानामिन्द्रादीनां किं वा साधनं विधेम करिष्याम । इन्द्रादिभिर्विभाविताः ध्यानादिना सेविता अपि वयं तदिष्टकरणासमर्थाः । नन्वग्नेः केतव एव मत्सकाशोत्पन्नमत्स्यकूर्मवद्भवतामपि सुरकार्यसाधकत्वं किं न स्यादित्याशङ्क्याह । वयं त्वत्तः पृथगत्यन्तभिन्नाश्च मत्स्यादिवदभिन्ना अतो नोऽस्माकं शं सुखं यथा स्यात्तथा त्वं विधत्स्व ज्ञापय । पृथगुपदेशात् । पृथग्भूतान्यनेकशः । भिन्नोऽचिंत्यः परमो जीवसंघादित्यादिश्रुत्येत्युक्त एवार्थः ॥ १५ ॥

श्रीशुक उवाच–

एवं विरिञ्च्यादिभिरीडितस्तद् विज्ञाय तेषां हृदयं यथैव ।
जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन् संवृतसर्वकामान् ॥ १६ ॥

सत्यधर्मीया — सुरैरिति शेषः । यथा तथैव तेषां विध्यादीनाम् । हृदयमभिप्रायम् । विज्ञाय तेषां वाक्यानां हृदयम् । ईशपृथग्विभाविताः ईशस्य रुद्रस्य पृथक् पृथङ्निःसृतोंऽशो दुर्वासास्तस्य शापेन विभाविता असम्भाविता इत्यन्तर्लापिताप्राप्याभिप्रायं च विज्ञायेति वर्णयन्ति । बद्धाञ्जलीन् संवृतसर्वकामान् अनाविर्भावितसमस्तस्वकामान् । एवमपदेशाच्छादितस्वाभिप्रायानिति तत्पक्षेऽर्थः । जीमूता घनास्तद्ध्वनिवद्गभीरा गम्भीरा तया । गभीरगम्भीराविति निपातितः शब्दः । जगाद ॥१६॥

छलारी —— तद्धृदयं यथैव यथावद्विज्ञाय जगाद । सुरकार्यसाधनोपायमुपदिदेशेत्यर्थः जीमूतवन्मेघवद्गंभीरया । संवृतानि गृहीतानि सर्वाणि कार्याणीन्द्रियाणि यैस्तान् भगवत्येव निष्ठायुक्तानित्यर्थः । संवृतसर्वकामानिति पाठेऽप्रकाशितस्वाभिप्रायानित्यर्थः ।। १६ ।।

लिङ्गेरी —— एवमुक्तरीत्या विरिञ्चादिभिरीडितः स्तुतो हरिस्तेषां विरिञ्चादीनां हृदयं मनो यथा वर्तते तथैव तद्विज्ञाय बद्धांजलीन्संवृता आच्छादिताः सर्वकामा सर्वापेक्षा येषां ते तथा तान् ब्रह्मादीन्प्रति जीमूतगभीरया मेघध्वनिवद्गंभीरया गिरया वाचा जगाद ।। १६ ।।

एक एवेश्वरस्तस्मिन् सुरकार्ये सुरश्वेरः ।
विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ।। १७ ।।

सत्यधर्मीया —— तस्मिन्सुरकार्ये तत्सम्पादनविषये । एक एवेश्वरः समर्थ इति, समुद्रोन्मथ-नादिभिर्विहर्तुकामो विहर्तुं काम इच्छा यस्य सः । तुं काममनसोरपीत्युक्तेर्मलोपः । अनेन न साम-र्थ्याभावप्रयुक्तो वक्ष्यमाणोपायोपदेशः किन्तु लीलालालसतामूल इति द्योत्यते । तान्प्रत्याह ।।१७।।

छलारी —— ननु हरेरेव सुरकार्यसमर्थत्वाद्देवान्प्रति समुद्रमथनादिरूपोपायोपदेशः किमर्थमित्यत आह ।। एक एवेति । सुरेश्वरो हरिरेवैकः परापेक्षारहितः सन् सुरकार्यविषये ईश्वरः समर्थो यद्यपि तथा समुद्रमथनादिभिरमृतार्थं देवदैत्यैः सहामृतरूपेण समुद्रमथनं कूर्मरूपेण मन्दरोद्धारणं नारायणीरूपेण दैत्यमोहनमित्यादिभिर्विहर्तुकामः क्रीडाकर्तुकाम एव तान् प्रत्याह । उपायमुपदिदेश न त्वसमर्थ-त्वादित्यर्थः ।। १७ ।।

लिङ्गेरी —— सुराणां ब्रह्मादीनामीश्वरः स्वामी नारायणस्तस्मिन्सुरकार्ये विषये यद्यपि स्वयमेक एवान्यसहायरहित एव कर्तुमीश्वरः समर्थः तथाऽपि ब्रह्मादिभिः समुद्रोन्मथनादिभिर्विहर्तुकामः संस्तान्प्रत्याह । पुरा यथा तथा वः श्रेयः स्यात् ।। १७ ।।

श्रीभगवानुवाच–

हन्त ब्रह्मन्नहो शम्भो हे देवा मम भाषितम् ।
श्रुणुतावहिताः सर्वे श्रेयो वः स्याद् यथा पुरा ।। १८ ।।

सत्यधर्मीया —— अवहिता एकमनस्काः । मम भाषितं भाषणं श्रुणुत इत्याहेत्यन्वयः ।। १८ ।।

छलारी — उपायमुपदेष्टुं ब्रह्मादीन्स्वाभिमुखीकरणाय संबोध्य फलेन हर्षयति ॥ हन्तेति । भाषितं वचनमवहिताः सावधानाः । मदुक्तप्रकारेणोपायमनुतिष्ठेत । पूर्ववद्वो युष्माकं श्रेयः संपत्तिः स्यात् । अतो मम भाषितं श्रुणुतेत्यन्वयः ॥ १८ ॥

लिङ्गेरी — हे ब्रह्मन् चतुर्मुख! शम्भो महादेव! हे देवा इन्द्रादयः । यूयं सर्वे, वो युष्माकं यथा येन प्रकारेण श्रेयः पुरुषार्थः स्यात्तथा मम भाषितमवहिताः स्वस्थान्तःकरणाः सन्तः श्रुणुत । तच्छ्रवणाद्वो हन्त हर्ष एव स्यादतः पुरा प्रथमं तच्छ्रुणुतेति ॥ १८ ॥

यातुधानैश्च दैतेयैस्तावत् सन्धिर्विधीयताम् ।
कालेनानुगृहीतैस्तैर्यावद् वो भव आत्मनः ॥ १९ ॥

सत्यधर्मीया — कालेनानुगृहीतैर्मयैवानुगृहीतैः । इदानीं बलकालस्तेषामिति भावः । तैर्यातुधानै राक्षसैर्दैतेयैर्बल्यादिभिश्च । व आत्मनो मम सकाशाद्भवो मङ्गलं भवेत्तावत्कालपर्यन्तं तैः सन्धिः सन्धानं विधीयताम् । काव्येनानुगृहीतैरिति यात दानवदैतेयैरिति च पाङ्क्तौ पाठौ स्फुटार्थौ च । अधुना बोधनीयबोधनस्योत्तरत्र बहुलस्यावगतेर्यातेत्यवक्तव्यत्वाच्च ॥ १९ ॥

छलारी — इदानीमुपायमुपदिशति ॥ यातुधानैरिति । हे देवाः । बलिचक्रगृहं प्रति यात गच्छत । गत्वा दानवैर्दैतेयैश्च तावत्पर्यन्तं सन्धिं विधीयताम् । कुतः । कालेन कालनामकहरिणाऽनुगृहीतैरस्मिन्काले हर्यनुग्रहेण प्रबलैरित्यर्थः । कियत्पर्यन्तं सन्धिं विधीयताम् । कालेन फलानुसारेणानुगृहीतैरनुकूलत्वेनैकमत्येन गृहीतैः स्वीकृतैरसुरैर्यावद्वो युष्माकं सुराणामात्मनः स्वामिन इन्द्रस्य भवो वृद्धिः स्यात्तावदित्यर्थः ॥ १९ ॥

लिङ्गेरी — हे ब्रह्मादयः । वो युष्माकमात्मनः परमात्मनः सकाशाद्भवः कल्याणं स्वस्थतया स्थितिश्च यावत्स्यात्तावत्कालेन सत्यसंकल्पतो विष्णुना अन्यार्था तु करिष्यतीत्यादि प्रमाणसिद्धसंकल्पेन हरिणा प्रेरितप्रसिद्धकालेनानुगृहीतैः प्रबलीकृतैर्यातुधानै राक्षसैर्दैतेयैश्च सन्धिं संधानं विधीयतां क्रियताम् । भवो भद्रे च सन्तापमिति नानार्थमुक्तमाला । कालाख्यरूपिणस्तवेति दशमस्कन्धोक्तेः कालशब्दवाच्यत्वं हरेरपि ज्ञेयम् ॥ १९ ॥

अरयोऽपि हि सन्धेयाः सति कार्यार्थगौरवे ।
अहिमूषकवद् देवा ह्यर्थस्य पदवीं गतैः ॥ २० ॥

सत्यधर्मीया — हे अरिधर! अरिभिः सन्धानविधानं कथं कथयेत्यतः काञ्चन किंवदन्तीं तान्प्रति सूचयित्वोचिततां स्वोक्तस्यानुसृत्य कालं लपति । अरय इति ॥ हि यतः कार्यार्थगौरवे सम्पाद्यप्रयोजनगुरुत्वे । स्वकार्यस्यार्थो नाशस्तद्गौरवे आगमिष्यत्स्वप्रयोजननाशगौरव इति वा । सति। अरयोऽपि सन्धेयाः सन्धानार्हाः । अर्थस्य पदवीं स्वार्थसिद्धिं गतैर्भवद्भिरहिमूषकवत्तयोरिव वर्तितव्यमिति शेषः । यावन्मयूरसन्त्रस्तः सर्पो मूषिकवेश्मना । निलीय निर्भयः पश्चाद्भक्षित्वा मूषकं गत इति तान्त्रिका इति पूर्वे । सा चेत्थं किं वदन्तीति वदन्ति । केनचिद्विषभिषजा मञ्जूषायां सर्पो मूषकश्च स्थापितौ । तदा स लोचनश्रवा आलुलोच । यदीममद्य भक्षिष्ये चेत्कनीयोऽन्नं न श्वश्चातोऽनेन सन्धिर्मम बन्धुरिति । तत आजुहावाहिरहितमपि । मूषकसखे मम फणोपरि तिष्ठन् रन्ध्रं कुरु ततस्तद्द्वारत उभावपि निर्भीतौ गच्छावः क्षेमिणाविति बभाषे । तत ओमित्युक्त्वा सुषिरं कृतवति मूषके स्वनिःसरणं भवेदिति निरीक्ष्य तं भक्षयित्वा बहिरहिर्निःससारेति । तर्हि पद्मनाभेन छद्मोपदेशः कथं कृत इति तु निराकुर्वन् निकृत्या निकृतिं हन्यादित्यादिमानिकतामेवैतदर्थस्य हिराहेति मन्तव्यम् ॥ २० ॥

छलारी — ननु वैरिभिर्दैत्यैः सह दैन्येन संधानं कथं कार्यमित्यत आह ॥ अरयोऽपीति । हे देवाः । कार्यस्यार्थस्य कर्तव्ये प्रायो जनस्य गौरवे महत्वे सति । अरयोऽपि हि सन्धेयास्ततोऽर्थस्य प्रयोजनस्य पदवीं सिद्धिं गतैः कार्यसिद्ध्यनन्तरमित्यर्थः । अहिमूषकवत् । वध्यघातुन्तकभावेन वर्तितव्यमिति शेषः । यावन्मयूरसंत्रस्तः सर्पो मूषकवेश्मनि निलीय निर्भयः पश्चाद्भक्षित्वा मूषकं गत इति तान्त्रिकोक्तेः । यद्वा । अर्थस्य पदवीं गतैः कार्यं साधयितुं प्रवृत्तैः पुरुषैः प्रथममरयोऽपि संधेयाः कथम् । अहिमूषकवत् । सर्पग्राहिणा पट्टिकायां सर्पमूषकौ निरुद्धौ । तत्र सर्पो बहिर्निर्गमनार्थं मूषकं प्रथमं संबोध्यते । हे मूषक । आवयोर्बहिर्निर्गमनार्थं पेटिकायाश्छिद्रं कुरु तेन रंध्रेण बहिर्निर्गच्छाव इति । ततस्तत्कृतेन छिद्रेण ततो निर्गत्य मूषकं भक्षितवान्सर्प इति किंवदन्ती ॥ २० ॥

लिङ्गेरी — हे देवाः! स्वेषां कार्यार्थगौरवे कर्तव्यप्रयोजनस्य महत्वे सति अर्थस्य प्रयोजनस्य पदवीं मार्गं गतैर्जनैररयः शत्रवोऽपि अहिमूषकवत्सन्धेयास्तात्कालिकसमाधानवचनैर्वशीकर्तव्याः ।

'यावन्मयूरसंत्रस्तः सर्पो मूषकवेश्मनि । निलीय निर्भयः पश्चाद्भक्षित्वा मूषकं गतः' ॥

इति तान्त्रिकोक्तोऽहिमूषकन्यायो ज्ञेयः । अथ च सर्पग्राहेण केनचित्पुरुषेण सर्पमूषकौ गृहीत्वा कस्यांचिन्मंजूषायां स्थापितौ । तत्रातिक्षुधितसर्पोऽत्रैकमूषकभक्षणादप्यस्माद्बन्धनाद्बहिर्गत्वाऽनेक-तद्भक्षणमेवोचितं मत्वा स्वसहायमूषकेणालोचनमकरोत् । रे मूषक त्वं मे शिरसि स्थित्वा तदूर्ध्वभागं

खादि च छिद्रं कुरु । तेनावां बहिः सुखवन्तौ स्याव इति यथाऽहिर्मूषकेन संधानमकरोत्तथेत्यप्यहि-मूषकन्यायमाहुः ।। २० ।।

अमृतोत्पादने यत्नः क्रियतामविलम्बितम् ।
यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ।। २१ ।।

सत्यधर्मीया — पीतस्य यस्य सकाशान्मृत्युग्रस्तो जन्तुः । अविलम्बितमिति यत्नपदेनेवाम-रोऽविलम्बितं शीघ्रं भवेदित्यप्यन्वेति ।। २१ ।।

छलारी — ततस्तैः सह यत्कार्यं तदाह ।। अमृतोत्पादन इति । अविलंबितं शीघ्रं यस्यामृतस्य पीतस्य सतो मृत्युग्रस्तो जन्तुरमरो मरणरहितो भवेत् ।। २१ ।।

लिङ्गेरी — हे देवाः । युष्माभिरमृतस्योत्पादने यत्नोऽविलंबितं शीघ्रं क्रियताम् । पीतस्य यस्यामृतस्य बलान्मृत्युग्रस्तः संभावितमरणोऽपि जन्तुः प्राण्यमरो मरणरहितो भवेत् ।। २१ ।।

क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।। २२ ।।

सत्यधर्मीया — वीरुत्तृणलतौषधीः क्षीरोदधौ क्षिप्त्वा प्रक्षिप्य । बीजावापरूपं प्रक्षेपणम् । विना किञ्चिद्बीजं कार्यानिष्पादात् । वीरुत्तृणादेः सहकारिभगवदिच्छासमवधानाद्दावदहनदग्धवेत्रबीजानां कदलीकाण्डजनकत्ववद्विचित्रफलोपलम्भकत्वोपपत्तेस्तद्युक्तमिति ज्ञेयम् । नेत्रं मन्थनरज्जु । नेत्रं मन्थगुणे वस्त्रे तरुमूले विलोचन इति विश्वः ।। २२ ।।

छलारी — मन्दरं पर्वतम् । नेत्रं रज्जुम् । रज्जौ च चक्षुषि नेत्रं स्यादित्यभिधानम् । वासुकिं तन्नामकं सर्पम् ।। २२ ।।

लिङ्गेरी — हे देवाः । यूयं क्षीरस्योदधौ समुद्रे सर्ववीरुधो भूम्यामेव प्रसरंत्यो लतातृणानि लतावृक्षाद्यारूढवल्लीः क्षिप्त्वा मन्दरं पर्वतं मंथानं मथनसाधनकाष्टसंमितं कृत्वा वासुकिं सर्पं नेत्रं मथनकाष्टपरिवेष्टनरज्जुं कृत्वा दैत्यैः सहातन्द्रिता आलस्यरहिताः सन्तः क्षीरोदधिं निर्मथध्वम् । तत्र दैत्याः क्लेशभाजो भविष्यन्ति यूयं तु मया सहायेन निमित्तेन फलग्रहाः फलभागिनो भविष्यथ ।। २२,२३ ।।

सहायेन मया देवा निर्मथध्वमतन्द्रिताः ।
क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहाः ॥ २३ ॥

सत्यधर्मीया — परस्परं मार्गान्तरं यापयसि किं दयापयोध इत्यत आह ॥ मया सहायेन तद्रूपेणेति । सन्धिस्तन्मथनकरणे तदभिसन्धिरपि स्यादित्यत आह ॥ दैत्याः क्लेशभाजो दुःखपात्रं भविष्यन्तीति । इतरानिष्टमेवास्मदिष्टं किमित्यत आचष्टे । यूयं फलग्रहाः पीयूषरूपफलस्य ग्रहो येषां ते तथा ॥ २३ ॥

छलारी — ननु दैत्यैः सह मथने तेऽप्यमृतपानेनामराः स्युः । तत्राह ॥ क्लेशभाज इति ॥२३॥

यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः ।
न संरम्भेण सिद्ध्यन्ति सर्वेऽर्थाः सान्त्वया यथा ॥ २४ ॥

सत्यधर्मीया — हे सुराः । असुरा यदिच्छन्ति तदेवानुमोदध्वम् । तदनुमोदने युक्तिमाह । सान्त्वया समाधानक्रियया यथाऽर्था सिद्ध्यन्ति तथाऽकाले संरम्भेण आरभट्या न सिद्ध्यन्ति । अतः सोऽसमयत्वान्न कार्य इति ॥ २४ ॥

छलारी — बलिभिः सहकारिभिः साध्या येऽर्थास्तदनुसारिणं विना न सिध्यतीति कृत्वा सामादिकमुपदिशति ॥ यूयमिति द्वाभ्याम् । असुरा मथनेन समुद्रोत्पन्नवस्तुषु यदिच्छन्ति । हे सुराः । यूयं तदनुमोदध्वमङ्गीकुरुध्वम् । संरम्भेण कोपेन । सांत्वया मार्गेण यथा सिद्ध्यन्ति ॥ २४ ॥

लिङ्गेरी — हे सुराः । यूयं असुरा यदिच्छन्ति तदनुमोदध्वम् । सर्वेऽर्थाः पुरुषार्थाः सांत्वया समाधानेन यथा सिध्यन्ति न तथा संरम्भेणासमाधानेन सिद्ध्यन्ति ॥ २४ ॥

न भेतव्यं कालकूटाद् विषाज्जलधिसम्भवात् ।
लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ॥ २५ ॥

सत्यधर्मीया — भावि चोक्त्वा जाग्रद्भिर्भवद्भिर्भाव्यमिति निर्जरान्विजरांस्तनोति ॥ न भेतव्यमिति । जलधिः प्राक् क्षीराब्धिः । यथोक्तमादिपर्वणि । ततस्तस्य समुद्रस्य तज्जातमुदकं पयः । रसोत्तमैर्विमिश्रं च ततः क्षीरादभूद्धृतमिति । कालकूटात्तन्नामकाद्युष्माभिर्जात्वपि रोषः कोपस्तेषु न कार्यः । येषु मथनोद्भूतेषु वस्तुषु कामस्तेषामिच्छा भवेत्तेषु लोभ आकाङ्क्षा न कार्य इत्यन्वयः । लोभो दीनता वा न कार्य इति वा ॥ २५ ॥

छलारी — तद्वो युष्माभिर्जातु कदाऽपि वस्तुषु मथनादुत्पन्नेषु काम इच्छा रोषः कोपः ।।२५।।

लिङ्गेरी — हे सुराः । वो युष्माभिर्जलधिसंभवात्कालकूटाद्विषान्न भेतव्यम् । जातु कदाचिदपि समुद्रोत्पन्नवस्तुषु लोभो न कार्यः । रोषः–कोपः, कामस्तु–कामोऽपि न कार्यः ।। २५ ।।

श्रीशुक उवाच–

इति देवान् समादिश्य भगवान् पुरुषोत्तमः ।
तेषामन्तर्दधे राजन् स्वच्छन्दगतिरीश्वरः ।। २६ ।।

सत्यधर्मीया — स्वच्छन्दगतित्वं नासम्भवीति दर्शयितुमीश्वर इति विपरीतहेतुहेतुमद्भावः ।।२६।।

छलारी — स्वच्छन्दगतिरिच्छानुसारप्रवृत्तिः ।। २६ ।।

लिङ्गेरी — हे राजन् । भगवान्पुरुषोत्तमो देवान्प्रतीति सामादिश्याज्ञाप्य यतः स्वयं स्वच्छन्दगतिः स्वेच्छाधीनप्रवृत्तिरत ईश्वरो हरिस्तेषां देवानामन्तर्दधेऽदृश्योऽभूत् ।। २६ ।।

अथ तस्मै भगवते नमस्कृत्य पितामहः ।
भवश्च जग्मतुः स्वं स्वं धाम चेयुर्बलिं सुराः ।। २७ ।।

सत्यधर्मीया — तस्मै अन्तर्धानमीयुषे । स्वं सत्यलोकम् । स्वं कैलासं च । सुरा इतरे ।। २७ ।।

छलारी — सुरास्तु बलिमुपेयुर्जग्मुः । गम्लृ गतौ लिट् ।। २७ ।।

लिङ्गेरी — अथ हरेरदर्शनानन्तरं पितामहश्चतुर्मुखो भवो रुद्रश्च तस्मै भगवते नारायणाय नमस्कृत्य स्वं स्वं धाम सत्यलोककैलासरूपमाश्रयं जग्मतुः । सुराश्चेन्द्रादयो बलिमीयुः प्राप्ताः ।। ।।२७ ।।

दृष्ट्वाऽरीनप्यसम्पन्नान् जातक्ष्वेलान् स्वनायकान् ।
न्यषेधद् दैत्यराडुच्चैः सन्धिविग्रहकालवित् ।। २८ ।।

सत्यधर्मीया — जातक्षोभान् सञ्चलच्छरीरान् । जातक्ष्वेलान् । जातः क्ष्वेलोदर्पः सिंहनादो वा येषां ते तथेति पाठान्तरेत्यर्थः । ञिक्ष्विदास्नेहनमोहनयोरस्मादच् । क्ष्वेलते मोहयति । क्ष्वेलोध्वनौ सिंहनादे च योषितीति भानुः । अरीन् सुरान् असम्पन्नान् आयुधादिसम्पद्रहितान्दृष्ट्वाऽपि ।

स्वनायकान् । स्व आत्मा नायको येषां तान् । दैत्यराड्बलिः । उच्चैरिति योग्यसर्वान्वयि । न्यषेधत् । निषेधः कुत इत्यत आह । सन्धिः समाधानं विग्रहो विरोधस्तयोर्यः कालस्तं वेत्तीति स तथा । असंयतानिति पाठः स्फुटार्थः । अरींस्तदरीन् । असुरानित्यप्यर्थः । आज्ञाऽनवज्ञाने निमित्तं स्वनायकान्दैत्यराडिति । स्वनायकानिति अरिसुरविशेषणं वा । सु अत्यन्तमनायकान्निःस्वामिकान् । अतो नैकतरव्यर्थतेति ज्ञेयम् ।। २८ ।।

छलारी — दैत्यराट् बलिररीन्सुरान् असंयतानपि युद्धसामग्रीरहितानपि दृष्ट्वा जातक्षोभान् जातः क्षोभः कोपाटोपो येषां तान्स्वः नायको येषां तान् स्वभृत्यान्न्यषेधत् । शस्त्रादिकं परित्यज्यागच्छमानानपि सुरान्दृष्ट्वा जातकोपेन तन्निवारणे प्रयतमानान्स्वभृत्यान् सर्वेषामपि ज्ञानार्थमुच्चैर्ध्वनिना निवारयामासेति भावः । निवारणे हेतुः संधिविग्रहयोः कालं वेत्तीति स तथोक्त इति । सन्धिकालं विरोधिकालं च जानातीत्यर्थः ।। २८ ।।

लिङ्गेरी — सन्धिविग्रहकालवित् सन्धानविरोधकालज्ञो दैत्यराड् बलिरथ स्वसमीपगमनानन्तरं संपन्नान्स्वसमीपप्राप्तान् अरीन् शत्रून् देवान्दृष्ट्वा जातक्ष्वेलान् जातदर्पान् जनितसिंहध्वनींश्च स्वनायकान्स्वसेनानायकान् स्वः स्वयं नायकः स्वामी येषां ते तथा तान् स्वभृत्यान्दैत्यान् दृष्ट्वोच्चैरत्यन्तं न्यषेधत्क्ष्वेलादि मा कुरुध्वमिति न्यवारयत् । दृष्ट्वाऽरीनप्यसंपन्नानिति पाठेऽसंपन्ना-नैश्वर्यरहितानरीन्दृष्ट्वाऽपीति योजना । शेषं पूर्ववत् । क्ष्वेलोदर्पे सिंहनादे आस्फोटे भुजसक्थिनोरिति मुक्तमाला ।। २८ ।।

ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ।
श्रिया परमया जुष्टं जिताशेषमुपागमन् ।। २९ ।।

सत्यधर्मीया — जिता अशेषाः स्वादयो येन स तम् ।। २९ ।।

छलारी — वैरोचनिं विरोचनपुत्रं बलिम् । जितमशेषं त्रैलोक्यं येन तम् ।। २९ ।।

लिङ्गेरी — ते इन्द्रादयो देवाः स्वसभायामासीनमुपविष्टं सुराणां यूथपैः समूहरक्षकैर्गुप्तं रक्षितं परमयोत्कृष्टया श्रिया संपदा जुष्टं सेवितम् । जिता अशेषाः सर्वलोका येन स तथा । तं वैरोचनिं विरोचनाख्यासुरसुतं बलिमुपागमन् ।। २९ ।।

महेन्द्रः श्लक्ष्णया वाचा सान्त्वयित्वा महामतिः ।
अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ।। ३० ।।

सत्यधर्मीया — यत्पुरुषोत्तमाच्छिक्षितं तत्सर्वं स्वहिंसकं प्रतीति वाऽभ्यभाषतेत्यन्वयः । एवं सर्वपदार्थवर्णनेनानुवृत्तिक्लेश इति ज्ञेयम् ।। ३० ।।

छलारी — श्लक्ष्णया मधुरया । तत्सर्वममृतमथनादिकम् । शिक्षितमुपदिष्टम् ।। ३० ।।

लिङ्गेरी — तत्र महेन्द्रः शचीपतिः पुरुषोत्तमाद्यत्स्वशिक्षितं तदेव सर्वमभ्यभाषत । यतः स्वयं महामतिरत एव श्लक्ष्णयाऽक्षरतः सूक्ष्मया मृदुभूतया च वाचा बल्यादीन्सांत्वयित्वाऽभ्यभाषत ।।३०।।

तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः ।
शम्बरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ।। ३१ ।।

सत्यधर्मीया — तदरोचतेति पाङ्कः पाठः । आत्यन्तिकप्रीयमाणत्वाभावात् शैषिकी षष्ठी तस्येति। तत्र सभायां येऽसुराधिपा अन्ये ये च शम्बरोऽरिष्टनेमिस्त्रिपुरवासिनश्च तेषामप्यरोचत सम्मतमभूत् । अन्वरोचन्तेति पाठे दैत्यस्य भृत्या इत्यन्वये मुख्यायारोचतेति मुखतो न प्रतीयते । आर्थिकः सोऽर्थ इति भाति ।। ३१ ।।

छलारी — तन्महेन्द्राद्दैत्यस्य बलेररोचन्त । तत्र समीपे येऽन्येऽसुराधिपाः पौलोमादयः शम्बरादयश्च ये च त्रिपुरवासिनस्तेषामप्यरोचन्तेत्यन्वयः । महेन्द्रोक्तं बल्यादयः सर्वेऽप्यङ्गीकुर्वन्निति भावः ।। ३१ ।।

लिङ्गेरी — दैत्यस्य बलेर्भृत्यास्तथा तत्र सभायामुपविष्टशंबरारिष्टनेमित्रिपुरवासिप्रभृतयो येऽन्येऽसुराधिपास्ते सर्वे तन्महेन्द्रोक्तमन्वरोचन्त प्रीत्याऽङ्गीचक्रुः ।। ३१ ।।

ततो देवासुराः कृत्वा संविदं कृतसौहृदाः ।
उद्यमं परमं चक्रुरमृतार्थे परन्तप ।। ३२ ।।

सत्यधर्मीया — देवासुराः । अविरोधस्य तात्कालिकत्वादेषां शाश्वतिको विरोध इत्यनेन देवासुरमिति भावीति शङ्काऽनवकाशः । देवैः सहिताश्च तेऽसुराश्चेति वोत्तरपदलोपी समासः । संविदमेकान्तभाषणम् ।। ३२ ।।

लिङ्गेरी — ततोऽङ्गीकारानन्तरं देवासुराः परस्परं कृतं सौहृदं स्नेहो यैस्ते तथा सन्तः संविदं 'यूयं वयं च मिलित्वा समुद्रमथनं कुर्मः' इति संकेतं कृत्वाऽमृतार्थे परममुद्यममुद्योगं चक्रुः । हे परन्तपेति शुकः परीक्षितं संबोधयति ।। ३२ ।।

ततस्ते मन्दरगिरिमञ्जसोत्पाट्य दुर्मदाः ।
नदन्त उदधिं निन्युः शक्ताः परिघबाहवः ।। ३३ ।।

सत्यधर्मीया — दुर्मदा अचलतोलनातुलावलेपसहिताः । नदन्तः सिंहनादं कुर्वंतो नदवत्समुद्रवदाचरन्तः । सङ्घबाहुल्यादिति भावः ।

तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा ।
विष्णुमभ्येत्य ब्रह्माणं चेदमब्रुवन् ।
भवन्तावत्र कुर्वीतां बुद्धिर्नैश्रेयसीं पराम् ।
मन्दरोद्धरणे यत्नः क्रियतां च हिताय नः ।
तथेति चाब्रवीद्विष्णुर्ब्रह्मणा परिनोदितः ।
नारायणेन चाप्युक्तस्तस्मिन्कर्मणि वीर्यवान् ।
अथ पर्वतराजानं तमनन्तो महाबलः ।

उज्जहार बलाद्ब्रह्मन् सवनं सवनोकसम् । इत्यादिपर्वोक्तेः कथमत्र शक्ता इत्याद्युक्तिरिति चेन्न । अत्र प्रथमतो वक्तव्यस्य भगवदुत्कर्तनस्य गरुडस्थापनादेर्मध्येऽध्वपुनर्वहनं तदुत्कलनकरतो भरतश्च चूर्णतेत्यादिकथानुसन्धानेनाविरोधसम्भवात् । उक्तं चाचार्यैः ।

वृन्दारका मन्दरमेत्य बाहुभिर्न शेकुरुद्धर्तुमिमे समेताः ।
तदा त्वया नित्यबलत्वहेतुतो योऽनन्तनामा गरुडस्तदंसके ।
उत्पाट्य चैकेन करेण मन्दरो निधापितस्तं स सह त्वयाऽवहत् ।
पुनः परीक्षद्भिरसौ महागिरिः सहासुरैरुन्नमतस्तदंसतः ।
व्यचूर्णयत्तानखिलान्पुनश्च ते त्वदीक्षया पूर्ववदुत्थिताः प्रभो ।
पुनश्च वामेन करेण वीश्वरे निधाय तं स्कन्धगतस्त्वमस्य ।
अगाः पयोब्धिमिति ।। ३३ ।।

लिङ्गेरी — अन्येषां दुःशकः प्राप्तुमशक्यो मदो येषां ते दुर्मदास्ते देवासुरास्ततः संकेतानन्तरं मन्दरगिरिमंजसा सम्यगनायासेनोत्पाट्य यतः परिघवद्दृढतरबाहवः शक्ताश्चातस्तं गृहीत्वाऽपि नदन्तः सन्त उदधिं क्षीरसमुद्रं निन्युः प्रापितवन्तः ।। ३३ ।।

दूरभारोद्वहश्रान्ताः शक्रवैरोचनादयः ।
अपारयन्तस्तं वोढुं विवशा विजहुः पथि ।। ३४ ।।

सत्यधर्मीया — दूरं भारोद्वहो भारवहनं तेन श्रान्ताः श्रमं प्राप्ताः । अपारयन्तः क्लृप्तस्थानेऽवस्थापयितुं वोढुमशक्नुवानाः । पथि विजहुस्तत्यजुः । पारयन्तीति इण् गतौ पारयन्तस्ते न भवन्तीत्यपारयन्तः ।। ३४ ।।

छलारी — दूरदेशे प्रतिभारभूतस्य गिरेरुद्वहनेन श्रान्ता अपारयन्तः पारं गन्तुमशक्नुवन्तः सन्तो विजहुरपातयत् ।। ३४ ।।

लिङ्गेरी — शक्रवैरोचनादयो देवेन्द्रबलिप्रभृतयो दूरं भारोद्वहन भारभूतमन्दरपर्वतधारणेन श्रान्ताः सन्तोऽत एव विवशाः परवशाः सन्तस्तं मन्दरं वोढुं धर्तुमपारयन्तोऽसमर्थाः सन्तः पथि मार्गे तं मन्दरं जहुस्त्यक्तवन्तः ।। ३४ ।।

निपतन् सगिरिस्तावद् बहूनमरदानवान् ।
चूर्णयामास महता भारेण कनकाचलः ।। ३५ ।।

सत्यधर्मीया — कनकाचलः सुवर्णगिरिः । निपतन्हस्तच्युतो यावत्तावन्महता स्वभारेणामरदानवान्देवदैत्यांश्चूर्णयामास । यः कोऽपि धाष्ण्यर्त्सिगिरिर्धृतपर्वतः सोऽपि पतन्स्वपार्श्ववर्तिनः कांश्चिदमरदानवांश्चूर्णयामासेत्यन्वयः । अतो न गिरिपदेन भाव्यं कनकाचल इति वचनादिति निरस्तम् ।। ३५ ।।

छलारी — चूर्णने हेतुमाह ।। महता भारेणेति । बहुभाररूपत्वादित्यर्थः ।। ३५ ।।

लिङ्गेरी — कनकाचलः स गिरिर्मन्दरस्तावत्तदा निपतन्सन् महता भारेण निमित्तेन बहूनमरदानवांश्चूर्णयामास ।। ३५ ।।

तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान् ।
विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ।। ३६ ।।

सत्यधर्मीया — अत्र गिरिपातस्थले । भगवान् गरुडध्वजो बभूव प्रादुर्बभूव ।। ३६ ।।

छलारी — भगवान् गरुढध्वज इति नामा सन् प्रादुर्बभूव ।। ३६ ।।

लिङ्गेरी — तत्र तदा भगवान्नारायणस्तानमरदानवांस्तथा तेन प्रकारेण भग्नबाहूरुकंधरान् अत एव कर्तव्ये भग्नमनसश्चाज्ञाय नाम्ना गरुडध्वज इति रूपवानाविर्बभूव ॥ ३६ ॥

गिरिपातविनिष्पिष्टान् विलोक्यामर दानवान् ।
ईक्षया जीवयामास निर्जरान् निर्व्रणान् यथा ॥ ३७ ॥

सत्यधर्मीया — हे अमर द्रौण्यस्त्रमरणशून्य । एतेन हर्यनुग्रहमहिमा त्वदनुभूतः । द्रौण्यस्त्र-विप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् । जुगोप कुक्षिं गत आत्तचक्र इति त्वदुक्तेरेवेति द्योत्यते । परीक्षित् । दानवान्निर्जरान्देवांश्च यथा पूर्वं तथाए सम्यगिति वा । ईक्षयाऽऽलोकमात्रेण निर्व्रणान्कृत्वोज्जीवयामास । अमरदानवान् जरारहितान्निर्व्रणान्निःक्षतानिति केचिद्वर्णयन्ति ॥ ३७ ॥

छलारी — ईक्षया स्वदर्शनेन निर्जरान् जरारहितान्निर्व्रणान् क्षतरहितान् यथा सम्यगित्यर्थः ॥ ॥ ३७ ॥

लिङ्गेरी — स गरुडध्वजो गिरिपातविनिष्पिष्टानमरदानवान्विलोक्येक्षया स्वकृपादृष्ट्या जीवयामास । तत्रापि निर्जरान्देवान्यथा पूर्वं व्रणरहितास्तथा विव्रणान् पर्वताभिघातजक्षततच्चिन्हर-हितान् । चकारेति शेषः ॥ ३७ ॥

गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ।
आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ ३८ ॥

सत्यधर्मीया — गिरिमारोप्य स्वयं चारुह्य ॥ ३८ ॥

छलारी — गिरिं चेति । चशब्दः समुच्चये । स्वयं गरुडे आरुह्य ॥ ३८ ॥

लिङ्गेरी — गरुडध्वजो गिरिं मन्दरमेकेन हस्तेन लीलयाऽनायासेन गरुडे आरोप्य स्थापयित्वा स्वयमप्यारुह्य सुरासुरगणैर्वृतः सन् अब्धिं क्षीरसमुद्रं प्रति प्रययावगच्छत् ॥ ३८ ॥

अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः ।
ययौ जलान्त उत्सृज्य हरिणा स विवर्जितः ॥ ३९ ॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे षष्ठोऽध्यायः ।

तात्पर्यम् – 'अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम् ।
अमृतार्थं सुपर्णोढो रैवतस्यान्तरे मनोरि'ति ब्राह्मे ।। ३९ ।।

सत्यधर्मीया —— अवरोप्य गिरिमिति श्लोके पूर्वमारोप्य गरुड इति । अत्र च स्कन्धात्सुपर्ण इति वैचित्र्यमानुपूर्व्याः किं कृतमित्यत्रार्थविशेषमशेषसंविन्मानेनाह ।। अनन्तोढ इति । द्विवारं वारिनिधिमथनम् । वैवस्वतेऽन्तरे रैवतेऽन्तरे चेति । अमृतार्थं तत्प्राप्त्यर्थं वैवस्वतेऽन्तरे मन्दरोऽनन्तोढः । अनन्तश्च । योऽनन्तनामा गरुडस्तदंसक इत्याचार्यैर्विवृतत्वाद्गरुडः । रैवतस्य मनोरन्तरे सुपर्णनामगरुडोढ इति । अतो नानन्तोढ इति ग्रन्थान्तरविरोध इव सुपर्णनामग्रहणासङ्गत्यं च ब्रह्माण्डवचनतः परिहृतेति ज्ञेयम् ।। अथ मूलार्थः ।। सुपर्णोऽनन्तनामा गरुडो हरिणा विसर्जितः कृतकार्यत्वाद्धिनाऽमृतपानमजरामरणवरदानाच्च । कृतकार्यः गच्छेत्याज्ञप्तः । यद्यपि सति पतगेशे, ईशः सर्जने विषस्य वासुकिसमानयने च । तथाऽपि कृतकार्यस्य तस्य संमानार्थं विससर्जेति तात्पर्यं ज्ञेयम् ।। ३९ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे षष्ठोऽध्यायः ।। ८-६ ।।

छलारी —— पततां वरः पक्षिश्रेष्ठः सुपर्णसंज्ञः । गिरिं स्कन्धादवरोप्य जलान्ते समुद्रजलमध्ये उत्सृज्य प्रक्षिप्य । हरिणा विसर्जितः । इतः परं त्वं गच्छेति प्रस्थापित इत्यर्थः । सुपर्णे तत्र स्थिते वासुकेरागमनाभावोऽत्र गरुडेति वक्तव्ये सुपर्ण इति विशेषेण संज्ञाग्रहणेनायमर्थः सूचितः । चाक्षुषमन्वन्तरेऽमृतार्थं मथनं भवति । तत्र वैवस्वतमन्वन्तरेऽनन्तनाम्ना सुपर्णेन मन्दरः पर्वत ऊढश्चाक्षुषमन्वन्तरे सुपर्णनाम्ना गरुडेनोढ इति । अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम् । अमृतार्थे सुपर्णोढ इति तात्पर्योदाहृतवचनात् ।। ३९ ।।

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे षष्ठोऽध्यायः ।। ८-६ ।।

लिङ्गेरी —— पततां पतनं कुर्वतां पक्षीणां श्रेष्ठः सुपर्णनामा गरुडः स्वस्य स्कन्धाद्गिरिं मन्दरमवरोप्यावतारयित्वा जलान्ते क्षीरसमुद्रोदकमध्ये उत्सृज्य हरिणा गरुडध्वजेन विसर्जितस्त्वं गच्छेति त्यक्तः सन् स्वस्थानं ययौ । अनन्तोढो मन्दरस्तु यदा बैवस्वतेऽन्तरे । अमृतार्थे सुपर्णोढो रैवतस्यान्तरे मनोरित्यत्र तात्पर्यसूचनाय सुपर्ण इत्युक्तम् । एवं च वैवस्वतमन्वन्तर इव रैवतमन्वन्तरेऽप्यमृतार्थं क्षीरसमुद्रमथनं कृतम् । तत्र रैवतमन्वन्तरे सुपर्णनामकेन गरुडेन मन्दरो धृतः । वैवस्वतान्तरे त्वनन्तनाम्ना गरुडेनेति विशेषो ज्ञातव्यः ।। ३९ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे षष्ठोऽध्यायः ।। ८-६ ।।

॥ अथ सप्तमोऽध्यायः ॥

श्रीशुक उवाच–

ते नागराजमामन्त्र्य फलभागेन वासुकिम् ।
परिधाय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः ॥ १ ॥

आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह ।
हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥ २ ॥

सत्यधर्मीया — नागराजं वासुकिम् । फलभागेन । तवापि पीयूषं दास्याम इति फलभागेनामन्त्रयित्वा । नेत्रं तद्रूपं गिरौ परिधाय संवेष्ट्य । अमृतार्थे सुरा यत्ताः सन्त आरेभिरे । मथितुमिति शेषः । पुरस्तान्मुखभागे पूर्वं ततस्तद्भागे देवा अभवन् ॥ १,२ ॥

छलारी — इदानीं मथनप्रकारं वर्णयति ॥ त इति । ते सुराः फलभागेन तवाप्यमृतभागो भविष्यतीति । आमन्त्र्य वासुकिं नेत्रं रज्जुं कृत्वा गिरौ परिधाय संवेष्ट्याब्धिं मथितुमारेभिरे । यत्ताः सन्नद्धाः ॥ वासुकेर्मुखं तीक्ष्णं दैत्यान् ग्राहयितुमेव पूर्वं प्रथमं हरिः पुरस्तादग्रभागं मुखं जग्रहे । देवा अभवन् मुखं जगृहुः ॥ १,२ ॥

लिङ्गेरी — ते देवासुरा नागराजं वासुकिनामसर्पं फलभागेन भागशः फलदानप्रतिज्ञयाऽऽमन्त्र्य कथयित्वा तं वासुकिं नेत्रं रज्जुरूपं तस्मिन्गिरौ मन्दरे परिधाय वेष्टयित्वा मुदान्विताः सन्तोऽब्धिं क्षीरसमुद्रम् । ममंथुरिति शेषः ॥

लिङ्गेरी — हे कुरूद्वह । सुरा असुराश्च यत्ता सन्नद्धाः सन्तोऽमृतार्थे एवमब्धिं मथितुमारेभिरे उपक्रान्तवन्तः । तस्मिन्समये हरिर्गरुडध्वजो वासुकेः पुरस्तान्मुखभागं जगृहे यतस्ततो देवाश्च तद्भागग्रहा अभवन् ॥ १, २ ॥

तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितम् ।
न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम् ॥ ३ ॥

सत्यधर्मीया — अहेरमङ्गलमङ्गं पुच्छं वयं न गृह्णीम इति दैत्यपतयः । महापुरुषो हरिस्तच्चेष्टितं मुखभागधारणव्यापारं नैच्छन्नानुमेनिरे ॥ ३ ॥

छलारी — महापुरुषस्य विष्णोश्चेष्टितं नैच्छन्नाङ्गीचक्रुः । अमङ्गलमहेरंगं पुच्छं बालं न गृण्हीम इत्यात्मस्तुत्या स्वेषां पुच्छग्रहणायोग्यत्वमुपपादयति ॥ स्वाध्यायेति । वेदाध्ययनेन शास्त्रश्रवणेन च संपन्नाः सत्कुलजन्मना सदाचारेण प्रख्याताः प्रसिद्धाः ॥ ३,४ ॥

लिङ्गेरी — दैत्यपतयो महापुरुषस्य गरुडध्वजस्य तत् देवैः सह वासुकिमुखभागग्रहणरूपचेष्टितं व्यापारं नैच्छन्न संमतिं चक्रुः । वयमहेर्वासुकेरमङ्गलं पुच्छं बालं न गृह्णीमः । सर्पदशनभयेन बालं जगृहुरित्यपयशशङ्कया तद्बालस्यामङ्गलत्वमाहुर्दैत्या इति ज्ञेयम् ॥ ३ ॥

स्वाध्यायश्रुतसम्पन्नाः प्रख्याता जन्मकर्मभिः ।
इति तूर्ष्णीं स्थितान् दैत्यान् विलोक्य पुरुषोत्तमः ॥ ४ ॥

स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ।
कृतस्थानविभागास्ते एवं कश्यपनन्दनाः ॥ ५ ॥

सत्यधर्मीया — स्वाननुरूपतां पुच्छविधृतेर्दर्शयितुं स्वगुणान्वर्णयन्ति ॥ स्वाध्यायेति । स्वाध्याध्यो वेदाध्ययनम् । श्रुतं श्रवणं शास्त्रस्य ताभ्यां सम्पन्नाः । जन्म च कश्यपादित्याम् । कर्माणि च यज्ञादीनि तैः प्रख्याताः सत्कुलीनाः सदाचारा इति । नैतदाचारयोग्या इति तूर्ष्णीं मथनं विहाय स्थितान्दैत्यान्पुरुषोत्तमो विलोक्य स्मयमानः । भावितापापरिस्फूर्तिरेषामिति विस्मयो हरेरिति भावः । सामरोऽग्रं विसृज्य पुच्छं जगृहे । स्वयमशिक्षयत्प्राग्देवान्स सामावहदिति नाश्चर्यमिति भावः । साम रातीति देवान्प्रत्युपदिशतीति वा । साम्नि रमत इति वा । सामर इत्यपि विग्रहलभ्यार्थविशेषो ज्ञेयः ॥ ४,५ ॥

छलारी-अग्रं मुखं परित्यज्य । कृतो धारणास्थानभागो यैस्ते कश्यपनन्दनाः कश्यपपुत्राः ॥५॥

लिङ्गेरी — यतो वयं स्वाध्यायश्रुतेन ऋगादिवेदश्रवणेन संपन्ना गुणकर्मभिः प्रख्याताश्च तदेतन्न गृह्णीम इति तूर्ष्णीं स्थितान्दैत्यान्पुरुषोत्तमो विलोक्य स्मयमानो मन्दहासं कुर्वन्सन् अमरैः सहितः सन् अग्रं मुखं विसृज्य पुच्छं जग्राह । कश्यपनन्दनास्ते देवासुरा एवं कृतस्थानस्य मुखपुच्छादि-रूपस्य विभागो यैस्ते तथा सन्तः परमायत्ताः सन्तोऽमृतार्थं पयोनिधिं ममंथुः । एवमर्णवे मथ्यमाने सति सोऽद्रिर्मन्दरो यतोऽधस्तादाधाररहितस्ततोऽपोचलनादपोऽविशत् जलेष्वमज्जत ॥ ४-६ ॥

ममन्थुः परमायत्ता अमृतार्थे पयोनिधिम् ।
मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ६ ॥

सत्यधर्मीया — अनाधारोऽधस्तादाधाररहितोऽपोऽविशन्निमग्न इत्यर्थः ॥ ६ ॥

छलारी — अपो जलान्यविशज्जलमध्ये मग्नोऽभूदित्यर्थः । कुतः । हि यस्मादनाधारः गौरवाद्गुरुनिमित्तेन स्वपौरुषे नष्टे सति ॥ ६ ॥

ध्रियमाणोऽपि बलिभिर्गौरवात् पाण्डुनन्दन ।
ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ।
आसन् स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥

सत्यधर्मीया — परिम्लाना क्षीणहर्षा मुखश्रीर्येषां ते ॥ ७ ॥

लिङ्गेरी — हे पाण्डुनन्दन । यदा मन्दरो बलिभिर्बलिष्ठैर्देवासुरैर्ध्रियमाणो धार्यमाणोऽपि गौरवाद्दुर्भरत्वादेवमपोऽविशत् तदा ते देवासुराः स्वपौरुषेऽतिबलीयसा दैवेन स्वादृष्टप्रेरकेण हरिणा नष्टे भग्ने सति सुनिर्विण्णमतिविभ्रान्तं मनो येषां तथा सन् परिम्लानं मुखवर्चोलक्षणरसरहितं यन्मुखं या च श्रीस्तत्कान्तिस्तद्वन्त आसन् ॥ ७ ॥

विलोक्य विघ्नेशगतिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत् प्रविश्य तोयं गिरिमुज्जहार ॥ ८ ॥

सत्यधर्मीया — विघ्नेशगतिमपूजितगजवक्त्रव्यापारम् । अवितथाभिसन्धिरवितथो यथार्थोऽभि-सन्धिरभिप्रायो यस्य स तथा । काच्छपं कौर्मम् । महद्वपुः कृत्वा । एतदुपपत्तये ईश्वर इति । तोयं जलं प्रविश्य गिरिमुज्जहारोद्दधार ॥ ८ ॥

छलारी — विघ्नेशस्य गणेशस्य गतिं तेन विरचितं विघ्नं दुरन्तवीर्योऽपारशक्तिः । अवितथा-भिसन्धिः सत्योऽभिसन्धिः संकल्पो यस्य सः । काच्छपं कच्छपस्य विद्यमानं वपुः कृत्वा कूर्मावतारो भूत्वा ॥ ८ ॥

लिङ्गेरी — दुरन्तवीर्योऽवितथाऽव्यर्थाऽभिसन्धिरिच्छा यस्य स ईश्वरो हरिर्विघ्नेशस्य गतिं मन्दरपर्वतस्य जलमज्जनहेतुभूतां गतिं प्रवृत्तिं विलोक्य महत्काच्छपं कूर्मसंबन्धि वपुः कृत्वा तोयं

क्षीरोदजलं प्रविश्य गिरिं मन्दरमुज्जहार । हरेः सामर्थ्यातिशयप्रकटनाय हरिप्रेरणयैव विघ्नराजेन मन्दरमज्जनमकारीति तात्पर्यं ज्ञेयम् ॥ ८ ॥

तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ।
दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥

सत्यधर्मीया — लक्षयोजनप्रस्तारिणा लक्षयोजनमभिव्याप्य प्रस्तारो विस्तारोऽस्यास्तीति स तथा तेन । अपर इतरो महान्द्वीप इवोत्थितः ॥ ९ ॥

छलारी — कुलाचलं मन्दरम् । सः कूर्मरूपी भगवान् लक्षयोजनप्रस्तारो विस्तारोऽस्यास्तीति तथा तेन । पृष्ठेन द्वीप इव दधार ॥ ९ ॥

लिङ्गेरी — सुरासुरा उच्छ्रितमुद्धृतं कुलाचलं तं मन्दरं वीक्ष्य क्षीरसमुद्रं निर्मथितुं समुत्थिताः । स कूर्मरूपी हरिरपरो महान्द्वीप इव लक्षयोजनप्रस्तारिणा विस्तारवता स्वपृष्ठेन मन्दरं दधार ॥ ९ ॥

सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्ग पृष्ठतः ।
बिभ्रत् तदावर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ॥ १० ॥

सत्यधर्मीया — अङ्ग हे परीक्षित् । पृष्ठतः पृष्ठे बिभ्रदादिकच्छप(पुरुष)स्तदावर्तनं गिरिपरिवर्तनमङ्गकण्डूयनं तत्समं मेने । अनायासोऽस्यानेन द्योत्यते ॥ १० ॥

छलारी — भुजवीर्येण वेपितं कंपितम् । हे अङ्ग । तदा वर्तमानं तस्य गिरेरावर्तनं परिभ्रमणमादिकच्छप आदिकूर्मोऽङ्गस्य देहस्य कण्डूयनं मेनेऽमन्यत । कूर्मस्य पृष्ठे गिरिभ्रमणं क्षतादिपीडाकरं नाभूदिति भावः । तत्र हेतुः ॥ अप्रमेयोऽचिन्त्य इति ॥ १० ॥

लिङ्गेरी — हे अङ्ग प्रिय । सुरासुरेन्द्रैः स्वभुजवीर्येण वेपितं कंपितं स्वपृष्ठतः पृष्ठे परिभ्रमन्तं गिरिं मन्दरं बिभ्रत्, साकल्येन प्रमातुमशक्यतयाऽप्रमेय आदिकच्छप आदिकूर्मस्तस्य मन्दरस्यावर्तनं परिभ्रमणमङ्गस्य शरीरस्य कण्डूयनं कण्डूतिपरिहाराय कृतनखादिस्पर्शतुल्यं मेने ॥ १० ॥

तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ।
उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः ॥ ११ ॥

सत्यधर्मीया — सर्वेऽपि विना सर्वेश्वरावेशं नेशा अल्पमपि कल्पयितुमिति तेषु तदावेशं शंसति ॥ तथेति । असुरानासुरेण घोरकाराकारेण । असुररूपसुरैरित्याचार्यवचनात् । तेषाम् । बलवीर्यं बलेन सहितं वीर्यम् । बले गिरिपरिवर्तनविषये वीर्यमीरयन्प्रेरयन् । किञ्चिद्रजो बहु तमः । कार्यप्रवर्तकाकारेण वा । दैवेन सत्त्वगुणप्रवर्तकेन । अबोधरूपस्तमोगुणकार्याज्ञानप्रदं रूपं यस्य सः ॥ ११ ॥

छलारी — विष्णुं विना कस्यापि व्यापारो न संभवतीत्याशयेन विष्णोः सुरासुरादिषु सर्वत्र प्रवेशमाह ॥ तथेति । आसुरेणासुराकारेणेरयन्देवानामपि बलं वीर्यमभिवर्धयन् दैवेन देवाकाररूपेण नागेन्द्रं वासुकिमबोधरूपस्तिर्यग्रूपः सर्पाकार इत्यर्थः ॥ ११ ॥

लिङ्गेरी — न विद्यते बोधस्तत्तत्कार्यज्ञानं येषां ते तथा तान् रूपयति तत्तदुपायं बोधयतीत्यबोधरूपोऽबोधोऽज्ञानं भवत्यस्मादित्यबोधस्तमोगुणस्तत्प्रेरयतीत्यबोधरूपो विष्णुस्तेषाम-सुराणां बलं शारीरं वीर्यं पराक्रमं चेरयन्प्रेरयन्नसुराणामिदं नियामकमित्यासुरं तेन रूपेणासुराना-विशत् । तथा देवगणांश्चोद्दीपयन् बलवीर्यतयाऽभिवर्धयन् दैवनियामकतया दैवेन रूपेणाविशन्नागेन्द्रं वासुकिं नागरूपेणाविशत् । तत्तन्नाम्नोच्यते विष्णुः सर्वशास्त्रत्वहेतुत इत्यादेः ॥ ११ ॥

उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ।
तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोभिवृष्टः ॥ १२ ॥

सत्यधर्मीया — अन्यो गिरिराडिवागेन्द्रं पर्वतम् । हस्तेनोपर्याक्रम्यानुड्डीनं यथा स्यात्तथा । सहस्रबाहुर्बहुभुजः । सुमनोभिः पुष्पैः । वर्षणकर्तॄनाह ॥ दिवीति ॥ १२ ॥

छलारी — हरिः सहस्रबाहुस्तादृशरूपः सन् गिरिराडिवागेन्द्रं हस्तेन हस्तसहायेनाक्रम्योपरि पर्वतपृष्ठे तस्थौ । कथम्भूतः। दिव्यभिष्टुवद्भिः स्तुतिं कुर्वद्भिर्ब्रह्मादिभिः। सुमनोभिः पुष्पैरभिवृष्टः ॥ ॥ १२ ॥

लिङ्गेरी — दिव्यन्तरिक्षे ब्रह्मा चतुर्मुखो भवो रुद्र इन्द्रस्त एव मुख्या येषां तैरभिष्टुवद्भिः संस्तुवद्भिः सुमनोभिः पुष्पैरभिवृद्धः सहस्रबाहुरन्यो रूपान्तरधारी अगेन्द्रं पर्वतश्रेष्ठं मन्दरमुपर्यूर्ध्वभागं हस्तेनाक्रम्यान्यो गिरिराडिव तस्थौ । शैलवृक्षौ नगावगौ । स्त्रियां सुमनसः पुष्पमित्यमरः ॥ १२ ॥

उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः ।
ममन्थुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम् ॥ १३ ॥

सत्यधर्मीया — आत्मनि मध्ये । मनसि यत्ने वा । गोत्रे पर्वते । नेत्रे मथनरज्जौ । प्राविशता प्रकृष्टतया सम्यग्विशता समेधिता अभिवृद्धाः । नक्राणां तदादीनां चक्रं समूहः क्षोभितो नक्रचक्रो यस्मिन्स तम् । चक्रो गण इति विश्वः । गोत्रः क्षोणीधरः स्मृत इति विश्वः ॥ १३ ॥

छलारी — आत्मनि देवदैत्यमध्ये पर्वतमध्ये च गोत्रे गिरौ दार्ढ्यरूपेण नेत्रे रज्जावभेद्यरूपेण प्राविशता प्रविष्टेन परमेण परमात्मना समेधिता अभिवृद्धास्तरसा वेगेन मदेनोत्कृष्टाः क्षोभितं चलितं नक्राणां जलजन्तुविशेषाणां चक्रं समूहो यस्मिंस्तमब्धिं समुद्रं ममन्थुः ममन्थ ममन्थतुः ममन्थुः । लिट् ॥ १३ ॥

लिङ्गेरी — नेत्रगोत्रयो रज्जुभूतवासुकिमन्दरपर्वतयोराविशता, मन्दरस्योपर्यधश्च स्थितेनात्मनि स्वस्य, शरीरे चाविशता परेण हरिणा समेधिता अभिवर्धिता अत एव मदोत्कटा देवासुरा महाद्रिणा मन्दरेण क्षोभितं चलीकृतं नक्राणां ग्राहादिजलचराणां चक्रं समूहो यस्मिंस्तमब्धिं तरसा वेगेन ममन्थुः ॥ १३ ॥

अहीन्द्रसाहस्रकरालदिङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ।
पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् ॥ १४ ॥

सत्यधर्मीया — अहीन्द्रस्य वासुकेः साहस्राणि सहस्राणि । शतमानसहस्रेण । करालानि दृशश्च नेत्राणि च मुखानि च फणाश्च । तेभ्यो निःसृताः श्वासा एवाग्नयो धूमाश्च तैराहतं वर्चो येषां ते तथा । पौलोमकालेया गणा बलिश्चेल्वलश्चादयो येषां ते तथा । मुख्यो बलिः कुतो नादौ गृहीत इति चेत् । सत्यम् । मुखोद्भवदग्निधूमाहतवर्चस्त्वेन कश्चिद्विशेष इति द्योतयितुं वा । केचन दनुजा दक्षभागे । वामे केचन मध्ये बलिरिति विशेषं ध्वनयितुं सर्वोपजीव्यतामेतस्य बलेर्द्योतयितुं वा कीर्तनं मध्य इति ज्ञेयम् । दावाग्निदग्धाः । सरलाः पूतिकाष्ठानि । सरलः पूतिकाष्ठे स्यादुदारावक्रयोरपीति विश्वः । शलभा इति पाठे पतङ्गा इत्यर्थः । तयोश्च सरलपाठः सरलः । द्रुमाणामङ्गरागानां दर्शनस्य सम्भवादसम्भवादणूनां दावदग्धानां शलभानां दर्शनस्येति ॥ १४ ॥

छलारी — अहीन्द्रस्य साहस्राणि करालानि दिश इव विशालानि च यानि मुखानि तेषां श्वासा इवाग्नयस्तेषां धूमैराहतं वर्चः कान्तिर्येषां ते तथा । सरला द्रुमविशेषाः ॥ १४ ॥

लिङ्गेरी — पौलोमकालेयबलील्वलादयोऽसुरा अहीन्द्रस्य सर्पश्रेष्ठस्य वासुकेः करालानि क्रूराणि दिक्षु स्थितानि यानि मुखानि तेभ्यो श्वासद्वारा निस्सृतो योऽग्निस्तद्धूमेनाहतं वर्चः कान्तिर्येषां ते तथा सन्तो दावाग्निदग्धा सरला इवाभवन् ॥ १४ ॥

देवांश्च तच्छ्वासशिखाहतप्रभान् धूम्राम्बरस्रग्वरकञ्चुकाननान् ।
समभ्यवर्षन् भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः ॥ १५ ॥

सत्यधर्मीया — शिखा अस्य सन्तीति शिखः । शिखावान् । तच्छ्वासाग्र्याहता प्रभा येषां ते तथा । तान् । अम्बरं वस्त्रं च कञ्चुकश्च । कञ्चुको वारवाणे स्यान्निर्मोके कवचेऽपि चेति विश्वः । कवचं चाननानि च धूम्राणि येषां ते तान् । किञ्चिद्दूरभागवर्तित्वेऽपि मथनकाले पार्श्वद्वयरज्जुसमासज्जनस्य न्यायसिद्धत्वाद्देवानामपि शिखाहतप्रभवत्वादिकं युक्तमिति ज्ञेयम् । घना मेघाः देवोपरि समभ्यवर्षन् । भगवद्वशा इति वारिदवायुपक्षेऽप्यन्वेति । समुद्रस्योर्मयस्तदुपगूढास्तदालिङ्गिता वायवः । अनेन शीतलत्वं वायूनां सूच्यते ॥ १५ ॥

छलारी — चस्त्वर्थः । देवास्तु भगवद्वशाः । हरिप्रेरिता इति यावत् । घना मेघाः समभ्यवर्षन् । समुद्रस्योर्मिभिस्तरङ्गैरुपगूढाः संस्पृष्टाः । शीतला इति यावत् । वायवश्च ववुर्वान्ति स्म । कथम्भूतान् । तस्याहीन्द्रस्य श्वासाग्नीनां शिखाभिर्ज्वालाभिर्हता प्रभा येषां ते तान् । धूम्रवर्णान्यंबरादीनि येषां तान् । अंबरं वस्त्रं कंचुकं कवचमित्यभिधानम् ॥ १५ ॥

लिङ्गेरी — भगवद्धरेर्वशा घना मेघाः समुद्रस्योर्मिभिस्तरंगैरुपगूढाः संबद्धाः शैत्यगुणोपेता वायवश्च मेघवायुनियामकदेवाः समुद्रोन्मथनोद्युक्तान्देवांश्च तस्य वासुकेः श्वासाग्निशिखाहतप्रभान् अत एव धूम्राणि धूमवर्णान्यंबराणि वस्त्राण्युष्णीषादीनि स्रजः पुष्पमालिका वराणि कंचुकानि च कंचूरूपवस्त्राणि येषां तान् दृष्ट्वा तेषु क्रमेणाभ्यवर्षन् ववुश्च । समित्युपसर्गेणाभिवर्षणस्य देवानुकूलतामाह ॥ १५ ॥

मथ्यमानात् तथा सिन्धोर्देवासुरवरूथपैः ।
यदा सुधा न जायेत निर्ममन्थाजितः स्वयम् ॥ १६ ॥

सत्यधर्मीया — न जायेत न जायत यदा तदा स्वयमजितो निर्ममन्थ ॥ १६ ॥

छलारी — देवासुरवरूथपैर्देवासुरश्रेष्ठैर्यदा सुधा न जायेत नोत्पन्ना तदाऽजितो नाम चाक्षुषमन्वन्तरे प्रादुर्भूतो हरिः स्वयं निर्ममन्थ। लिट्॥ १६॥

लिङ्गेरी — देवासुराणां वरूथानि सैन्यानि पातीति पास्तैर्मथ्यमानात्सिंधोः क्षीरसमुद्राद्यदा सुधाऽमृतं न जायेत नोत्पन्नं नोत्पत्स्यति चेति देवासुराणां बुद्धिरभूत्तदाऽजितनामा भगवान् स्वयं साक्षादब्धिं निर्ममन्थ॥ १६॥

मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्-
मूर्ध्नि भ्राजद्विलुलितकचस्रग्धरो रक्तनेत्रः।
जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा
मथ्नन् मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः॥ १७॥

सत्यधर्मीया — तदाकारो ध्येयोऽधिकारिभिरिति तं वर्णयति॥ मेघश्याम इति। कनकपरिधिः परितो धीयतेऽनेन कटिरिति। करणे किः। सुवर्णवदवभासमानवस्त्रः। पीताम्बर इति यावत्। परिधिर्यज्ञियतरौ काञ्चायां चेति रभसात्तदात्मककाञ्चीगुण इति वा। कर्णविद्योतविद्युत्। कर्णयोर्विशिष्टो द्योतो द्योतनं याभ्यां ते कर्णविद्योते कुण्डले। ते एव विद्युत्तटित्तद्वच्चञ्चले यस्य। कर्णविद्योतयोरितरत्र कुण्डलयोर्विद्युद्विद्योतक इति वा। विद्योतत इति विद्युत्। भ्राजभ्रासेति क्विप्। चपला कमला विद्युत्पुंश्चली पिप्पलीषु च। नपुंसकं तु शीघ्रे स्याद्वाच्यवत्तरलेऽपि चेत्यभिधानात् कर्णविद्योते विद्युती तरले कुंडले यस्येति वा भावः। भ्राजद्विलुलितकचस्रग्धरः भ्राजन्विलुलितो यः कचः केशपाशस्तत्र स्रजो मालायाः। धरतीति धरः। भ्राजद्विलुलितेति स्रग्विशेषणं वा। कस्मिन्मूर्ध्नि शिरसि। वनस्रग्धर इति पाठे। गले माला चेन्मथनकाले बहुविलोला भवेदिति शिरोधारणमिति ज्ञेयम्। जगदभयदैर्जैत्रैर्जयशीलैः। जेतैव जैत्रः। तृनन्तात्प्रज्ञाद्यण्। जेतुरयमिति वा। फलतस्तौल्यम्। जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रतीत्यमरः। दोर्भिर्हस्तैर्दन्दशूकः सर्पस्तं गृहीत्वा। मथ्ना तद्रूपेण मन्दरेण। मथ्नन्मथनं कुर्वन्। धृताद्रिः प्रतिगिरिर्द्वितीयपर्वत इवाशोभतेत्यन्वयः। गर्हितं दशतिलुपसदेति यङ्। यजजपेत्यूकः। जपजभेत्यनुस्वारः। दन्दशूको बिलेशय इत्यमरः। दन्दशूकस्तु पुल्लिङ्गो राक्षसे च सरीसृप इति भानुः॥ १७॥

छलारी — धृतोऽद्रिर्येन धृताद्रिरजितो नाम भगवान् अथो गिरिधारणानन्तरं अशोभतेत्यत्वयः। कथम्भूतः। कनकवत्परिधिः परिधानरूपं वस्त्रं यस्य सः। पीतांबरः कनकमयः परिधिः काञ्ची यस्य

स इति वा । कर्णयोर्विद्यमाना विद्युन्मकरकुण्डललक्षणा यस्य स तथा कर्णयोर्विद्युद्वत्प्रकाशमान-कुण्डलयुक्त इत्यर्थः । मूर्ध्नि भ्राजन्तो विलुलिताश्चलिताः कचाः केशाः यस्य स तथा । कयाः केशाः शिरोरुहा इत्यभिधानात् ।' स्रग्धरो वनमालाधरः । पुनः कथम्भतः । जैत्रैर्जयशीलैर्दोर्भिर्भुजैर्दन्दशूकं सर्पं गृहीत्वा मथ्ना मन्दरेणाब्धिं मथ्नन् । कं इवाशोभत । प्रतिगिरिरिव प्रतिद्वन्द्वसर्प इव ॥ १७ ॥

लिङ्गेरी — मथनसमयेऽजितशोभाविशेषमाह ॥ मेघश्याम इत्यादिना । नीलमेघवच्छ्यामः कनकस्य सुवर्णस्य परिधिः काञ्ची यस्य स तथा । परिधिः परिधाने स्यात्कांच्यां चेति रत्नमाला । कर्णयोर्विशिष्टो द्योतः प्रकाशो ययोस्ते कर्णविद्योते कुंडले तर्योर्विशिष्टा द्युत्प्रकाशो यस्य स तथा । मूर्ध्नि शिरसि किरीटेन प्रकाशमानविलुलिता वनस्रक् वनमाला तां धरतीति तथोक्तो गमनचलितवैजयन्तीधरो रक्तनेत्रान्तो जगतामभयदैर्जैत्रैर्जयशीलैर्दोर्भिर्हस्तैर्दन्दशूकं सर्पं वासुकिं गृहीत्वा मथ्ना मथनसाधनकाष्ठायितेन मन्दरेणाब्धिं मथ्नन् धृतोऽद्रिर्मन्दरो येन तथा सन् प्रतिगिरिरिव अशो भत । दंदशूको बिलेशय उरग इत्यमरः ॥ १७ ॥

निर्मथ्यमानादुदधेरभूद् विषं महोल्बणं हालहलाह्वमग्रतः ।
संभ्रान्तमीनोन्मकराहिकच्छपोत्तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥ १८ ॥

सत्यधर्मीया — हालाहलेत्याह्वाऽऽख्या । आख्याऽह्वे इत्यमरः । हलत्याहलति चेत्युदरमिति । हलं च तदाहलं च हालाहलम् । पूर्वस्य प्रज्ञाद्यण् । हालाहलं हालहलं वदन्त्यपि हलाहलमिति द्विरूपकोश इति भानुः । पुंसि क्लीबे च काकोलकालकूटहलाहल इत्यमरः । कालमपि कूटयति । कूट परिदाहे । चुरादिः कर्मण्यण् । पूर्वत्र वक्तव्यस्यात्रोक्तिर्द्वयोरपि श्लोकार्थ एकस्मिन्नुक्तेरुक्तिलाघवेनेति मन्तव्यम् । प्रथममुदधिं वर्णयति । मीना अणुमत्स्याः । उत्पतन्तो मकरा यादोविशेषाः । मकरो यादसीति विश्वः । अहयः सर्पाः कच्छपाः कूर्माः उत्तिमयो महामीनास्तिमिङ्गला अतिमहामीनाः । ताम्यन्ति । तमु ग्लानौ । कृमिततीन् । तिमिं गिरति । गृ निगिरणे । मूलविभुजेति कः । अचि विभाषेति लः । गिरेर्गिलस्येति मुम् । मत्स्यविशेषाणां संज्ञेति भानुः । मीनातीति मीनः । मीङ् हिंसायाम् । फेनमीनाविति निपातितः । द्विपो जलगजो ग्राहा नक्रास्तिमिङ्गिलाश्च तैराकुलस्तस्मात् ॥ १८ ॥

छलारी — महोल्बणं केनाप्यवार्यं हालाहल इत्याह्वं नाम यस्य तत् । अग्रतः प्रथमं संभ्रान्ता मीना उत्पतिताः सर्पाः कूर्माश्च यस्मिंस्तस्मात्तिमिर्नाम बहुयोजनमीनो मत्स्यविशेषः । द्विपाः

जलस्थगजाः । ग्राहा नक्राः । तिमिं पूर्वोक्तमत्स्यविशेषं गिलिति ग्रसतीति तिमिङ्गिलः । तिम्यपेक्षया बहुयोजनो मीनविशेषः ॥ १८ ॥

लिङ्गेरी — देवासुरैर्निर्मर्थ्यमानात् संभ्रान्ता मीना उत्कृष्टमकराः, अहयः सर्पाः, कच्छपाः कूर्मास्तिमयो दशयोजनपरिमिता मीनाः, द्विपा गजाः, ग्राहा नक्रास्तिमीन् गिलन्ति ग्रसन्तीति तिमिंगिलाः शतयोजनपरिमिता मीनास्तैराकुलाच्चञ्चलादुदधेः क्षीरसमुद्रादग्रतः प्रथमं महोल्बणं हालाहलाख्यं विषमभूदुत्पन्नम् ॥ १८ ॥

तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यवीर्यम् ।
भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥

तात्पर्यम् – **'रुद्रस्य यशसेऽर्थाय स्वयं विष्णुर्विषं विभुः ।**
न सञ्जह्रे समर्थोऽपि वायुं चोचे प्रशान्तय' इति च ॥ १९-२२ ॥

सत्यधर्मीया — ननु सति भगवति किमिति दुद्रुवू रुद्रं प्रति प्रजा इत्यतस्तात्पर्यं प्रमाणेनाह ॥ रुद्रस्येति । दिशि दिशि प्रतिदिशम् । विसर्पद्विसारि । उत्सर्पदूर्ध्वमागच्छत् । उग्रवेगमसह्यवीर्यम् । तद्विषं विलोक्य अरक्ष्यमाणाः सदागतिसदाशिवयोः कीर्त्यर्थमुदासीनेन हरिणाऽरक्ष्यमाणाः प्रजा भीताः । अङ्ग हे राजन् । सेश्वराः सहेन्द्राः सदाशिवं शरणं रक्षकं विलोक्य ध्यात्वा तं दुद्रुवुर्जग्मुः ॥ १९ ॥

छलारी — उत्सर्पत्समुद्रादुद्गच्छद्विषमप्रतिमं प्रतिक्रियाशून्यमिति वा । कुतः । उग्रो वेगो यस्य तत् । तदेवाह ॥ दिशीति । सर्वदिक्षूपर्यधश्च विसर्पदत एवासह्यं विलोक्य भीता अन्येन केनाप्यरक्षमाणाः प्रजाः सदाशिवं शरणं दुद्रुवुर्जग्मुः ॥ १९ ॥

लिङ्गेरी — अंग हे प्रिय । सेश्वराः स्वस्वस्वामिसहिताः प्रजा जना असह्यवीर्यमुग्रवेगमत एव दिशि दिशि विसर्पत्प्रसरन् उपर्युत्सर्पदधश्चेति सर्वतो गच्छत्तद्विषं वीक्ष्य भीताः सत्यः केचिदरक्ष्यमाणाः सत्यः सदाशिवं शरणं दुद्रुवू रक्षकत्वेन तं प्राप्ताः ॥ १९ ॥

विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभियुतं मुनीनाम् ।
आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥

सत्यधर्मीया — त्रयाणां लोकानां समाहारस्त्रिलोकी । तस्या भवाय मङ्गलाय । देव्या पार्वत्याऽभियुतम् । अद्रौ पर्वते अपवर्गहेतोर्मोक्षमुद्दिश्य । मुनीनां तपस्तद्योग्यं तपो जुषाणं सेवमानं स्तुतिभिः सह प्रणेमुः 1 बहुवचनेन स्तुतिभिरिति एतत्सम्भाव्यभगवत्सम्भाव्यगुणयुक्ततां ज्ञापयति ग्रन्थकृदिति ज्ञेयम् ॥ २० ॥

छलारी — त्रिलोक्या भवायैहिकश्रेयसेऽपवर्गहेतोर्मोक्षार्थं च देव्योमया सहाद्रौ कैलास आसीनं मुनीनामभिहितं हरिप्रीत्यर्थमेव तपोजुषाणं तपः कुर्वन्तम् । ननु समर्थस्य हरेर्विद्यमानत्वात्कथमरक्ष्यमाणा इति चेन्न । रुद्रस्य यशो दातुमेव हरेरुपेक्षया स्थितिः स्यात् । रुद्रस्य यशसेऽर्थाय स्वयं विष्णुर्विषं प्रभुः । न संजह्रे समर्थोऽपि वायुं चोचे प्रशान्तये इति वचनादिति ज्ञेयम् ॥ २० ॥

लिङ्गेरी — प्रजास्त्रिलोक्या भवाय मङ्गलायाभिमुखं देव्या पार्वत्याऽभियुतमद्रौ कैलासे मुनीनां मध्ये आसीनं स्वस्यापवर्गहेतोर्मोक्षार्थं तपो जुषाणं कुर्वाणं देवानामिन्द्रादीनां वरमुत्तमं महादेवं स्तुतिभिर्महादेवाय धीमहीत्यादिभिः स्तुवन्त्यः प्रणेमुर्नमश्चक्रुः ॥ २० ॥

प्रजा ऊचुः—

देवदेव महादेव भूतात्मन् भूतभावन ।
त्राहि नः शरणापन्नान् त्रैलोक्यदहनाद् विषात् ॥ २१ ॥

सत्यधर्मीया — भूतात्मन् प्रमथनाथ । भूतानि स्वाधमानि भावयतीति स तथा । नैरवध्यं भगवद्विषये ज्ञेयम् । एवमुत्तरत्रार्थोऽनुसन्धेयः । त्रैलोक्यदहनाद्विषान्नस्त्राहि त्रायस्व अद्यात्वन्तरस्येदं रूपम् । विस्तृतं चास्माभिः सप्तमस्कन्धव्याख्यायामवलोकनीयम् ॥ २१ ॥

छलारी — भूतात्मन् भूतानां स्वामिन् भूतानां भावयतीति भूतभावन ॥ २१ ॥

लिङ्गेरी — अत्र प्रजाः श्रीपार्वतीपतिं तदन्तर्यामिणं शिवाख्यं नारायणं च मोक्षायोग्यानां संसारिणां तमोयोग्यानां च हरिहरयोर्भेदविषये संदेहविपर्ययजननाय संकलय्य स्तुवन्ति । अत्र चान्तरंगाद्युपपत्तिभिरयमेवार्थ इति विज्ञायेत । तथा हि । हे देवानामिन्द्रादीनां देव ! भूतानां प्रमथानामात्मन् स्वामिन् । भूतानि स्वावरप्राणिनो भावयत्युत्पादयतीति भूतभावन । हे महादेव पार्वतीपते ! त्वच्छरणापन्नान्नस्त्रैलोक्यदहनाद्विषात्त्राहीत्यधिष्ठानभूतरुद्रस्तुतिः ॥ २१ ॥

त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः ।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥

सत्यधर्मीया — जगतो बन्धमोक्षयोरीश्वरः स्वामी । कुशलाः शिक्षिताः साधवः । कुशलः शिक्षित इति विश्वः ॥ २२ ॥

छलारी — सर्वजगतो बन्धमोक्षयोस्त्वमेक ईश्वरः कर्ता । कुशलाः पुण्यवन्तो मोक्षार्थिनो वा ॥ ॥ २२ ॥

लिङ्गेरी — तदन्तर्यामिदृष्ट्या स्तुवन्ति ॥ त्वमेक इत्यादिना । हे शिवान्तर्यामि नारायण । त्वमेकः एव सर्वजगतो ब्रह्मरुद्रादिलक्षणस्य बन्धमोक्षदाने ईश्वरः समर्थः । अत एव कुशलाः स्वपुरुषार्थेष्वभिनिविष्टाः प्रपन्नार्तिहरं गुरुं श्रुत्यादिभिर्हितोपदेष्टारं तं पूर्वोक्तगुणविशिष्टं त्वामर्चयन्ति । न हीयं स्तुतिः पार्वतीपतौ संभवति । तस्य नारायणादिस्वातिरिक्तसर्वचेतनबन्धमोक्षदातृत्वस्य स्वमोक्षार्थं तपःकरणादिना बाधितत्वात् । न हि स्वातिरिक्तसर्वमोक्षादिदः स्वमोक्षार्थं तपः कुर्यात् ।

सृष्टिः स्थितिः संहृतिश्च नियमोऽज्ञानबोधने ।
बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट् ॥ इति स्कान्दपुराणवचनात् ।

अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः ।

आनन्ददश्च मुक्तानां स एवैको जनार्दनः । इति वचनाच्च । यत्तच्छिवाख्यं परमात्मतत्त्वं देवः स्वयंज्योतिरवस्थितिस्त इत्युत्तरग्रन्थे । हे देव महारुद्र । यद्यस्मात्ते तव चावस्थितिरवस्थानं तत्परमात्मतत्त्वं शिवाख्यं स्वयंज्योतिः स्वप्रकाशो नारायण इति । न ते गिरित्रेत्यत्र च हे गिरित्र गिरिश । ते हृदि यत्परंज्योतिर्नारायणाख्यं ब्रह्म वर्तते तदखिला ये लोकपाला इन्द्रादयो विरिंचश्चतुर्मुखो वैकुण्ठाख्याः सुरेन्द्राः शुभ्राख्याद्दषेर्विकुण्ठायां जाताः वैकुण्ठैः सुरसत्तमैरेतत्स्कन्ध-प्राक्तनपञ्चमाध्यायोक्तैश्च गम्यं साकल्येन ज्ञातुमशक्यमिति च विस्पष्टं रुद्रान्तर्यामिहरिस्तुतिप्रतीतेश्च प्रजानामभिमुखतया स्थितरुद्रान्तर्यामिण्यपि । अन्तर्यामिणमीशेशमहेक्ष्याहं त्वमित्यपि, सर्वे शब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुष्वित्यादिप्रमाणैस्त्वमित्याद्युपपत्त्याऽस्मदुक्तार्थो युक्त इत्यास्तां तावत् ॥ ॥ २२ ॥

गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान् विभो ।
धत्से यदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥

सत्यधर्मीया — स्वदृक् स्वप्रकाशः । भूमन् पूर्ण । गुणमय्या स्वशक्त्या । सर्गस्थित्यप्ययान् यदा जगतो धत्से तदा ब्रह्मविष्णुशिवाभिधां धत्स इत्यन्वयः । भावस्तु पूर्वकः ॥ २३ ॥

छलारी — सदेहमानिहरये प्रणमेत्केवलाय वेति वचनाद्रुद्रान्तर्यामिणमपि स्तुवन्ति ॥ गुणमय्येति । हे प्रभो रुद्रान्तर्यामिन् । गुणमय्या त्रिगुणात्मिकया स्वशक्त्या स्वाधीनप्रकृत्या ज्ञानादिगुणात्मिकया स्वरूपशक्त्याऽस्य जगतो यदा सर्गादीन् धत्से । तदा हे भूमन् स्वदृक् सिद्धज्ञानो ब्रह्मादिसंज्ञां धत्से धारयसि ॥ २३ ॥

लिङ्गेरी — हे भूमन्पूर्ण । रुद्रान्तर्यामिन्विष्णो । यदाऽस्य जगतः सत्त्वादिगुणमय्या सत्त्वगुण-नियामिकया स्वशक्त्या सर्गस्थित्यप्ययान् उत्पत्तिस्थितिसंहारान् धत्से विधत्से करोषि तदा स्वयमेव स्वं साकल्येनैक्षत इति स्वदृक् क्रमेण ब्रह्माविष्णुशिवाभिधां धत्से धारयसि । अत्रायं विवेकः । चतुर्मुखे ब्रह्मरूपेण स्थित्वा सर्गं करोषि । विष्ण्वभिधेन साक्षाद्रूपेण स्थितिं, शिवनामकेन रुद्रे प्रविष्टरूपेण संहारमिति ।

ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः । अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः । आत्ममायां समाविश्य सोऽहं गुणमयी द्विज ।
सृजन् रक्षन्हरन्विश्वं दध्रे संज्ञाः क्रियोचिताः ।

इत्यादि समाख्यानात् । सत्त्वादिगुणनियामकशक्त्या जगज्जन्मस्थितिसंहारकर्तृत्वं विष्णोरेव मुख्यम् । निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः । ब्रह्मा च शर्वश्च, कालाख्या रूपिणस्तवेति दशमस्कन्धे चतुर्मुखरुद्रयोरीश्वरं प्रति तयोः प्रत्येकं सृष्टिसंहारमात्रकरणयोर्मध्ये शिवस्येश-शब्दितहरिणा क्रियमाणजगत्संहारनिमित्तमात्रत्वस्य विस्पष्टत्वाच्च भूमा संप्रसादादध्युपदेशादिति सूत्रभाष्यादौ भूमशब्दस्य विष्ण्वेकनिष्ठत्वावगमाच्चात्र स्तूयमानो विष्णुरेव न तु पार्वतीशः इत्यविवादम् ॥ २३ ॥

त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनम् ।
नानाशक्तिभिराभासस्त्वमात्मा जगदीश्वरः ॥ २४ ॥

सत्यधर्मीया — सद्भावा देवाः । असद्भावा दानवाः । सदसद्भावा मिश्रास्तान् भावयत्युत्पाद-यतीति स तथा । नानाशक्तिभिर्विचित्राभिः शक्तिभिराभासत इत्याभास आभासनं यस्य स वा ॥ ॥ २४ ॥

छलारी — सदसतः सुरासुरतिर्यगादिरूपान् भावान् जीवान् भावयत्युत्पादयतीति तथा । नानाशक्तिभिर्विचित्रशक्तिभिः आ समन्ताद्भासो भासमानं यस्य स तथा । त्वं जगतामादानादिकर्ता जगदीश्वरो जगन्नियामकः ॥ २४ ॥

लिङ्गेरी — तमेव विष्णुं स्तुवन्ति । हे भूमन् विष्णो । गुह्यमतिरहस्यं परमं ब्रह्म त्वमेव । नारायणपरं ब्रह्म, परंधाम, परमं यो महद्ब्रह्म इत्यादिप्रत्यक्षश्रुतिस्मृतिभ्यः । सदसतां पृथिव्यादि-पञ्चभूताख्यानां भावानां भावनमुत्पादकम् । आत्मन आकाशः संभूत इत्यादेः । यदन्यद्वायोश्चान्तरिक्षं चैतदिति माध्यन्दिनश्रुत्यादेः । नानाशक्तिभिः सृष्ट्यादिहेतुभिराभासः प्रकाशमान आत्माऽन्तर्यामी जगदीश्वरः ॥ २४ ॥

त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः ।
कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत् त्रिवृदामनन्ति ॥२५॥

सत्यधर्मीया — शब्दो योनिर्ज्ञप्तिकारणं यस्य स तथा । आत्माऽहंकारतत्त्वं जगदादिर्महत्तत्त्वम् । प्राणेन्द्रियद्रव्यगुणस्वभावः । प्राणा इन्द्रियाणि भूतानि गुणाश्च शब्दादय एतदादिस्वभावप्रवर्तकः । कालो हर्ता । क्रतुः स क्रतुर्ज्ञानरूपत्वादित्यादेर्ज्ञानात्मा । सत्यं सत्यशब्दवाच्यम् । ऋतम् ऋ गताविति धातोस्तु पूर्वावगतवत्सदा । स्थिते ब्रह्मर्तमित्युक्तमिति वचनाच्छश्वदेकप्रकारम् । धर्मो धारकत्वात् । यत्त्रिवृत् अकारोकारमकारांस्त्रीन्वर्णान्वृणोतीति त्रिवृत् । अक्षरं प्रणवात्मकम् । त्वयि वाचकतया वर्तत इत्यामनन्ति । ओमित्येकाक्षरं ब्रह्म । ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादि वेदान्ताः ॥ २५ ॥

छलारी — शब्दः सदागमो योनिर्ज्ञप्तिकारणं यस्य शब्दयोनिर्जगदादिः महत्तत्त्वं आत्माऽहंकारः प्राण इन्द्रियाणि द्रव्याणि भूतानि गुणाः शब्दादयः त्वमेव महदादिसत्ताप्रदस्तत्स्वभावप्रवर्तकः । क्रतुः संकल्पः सत्यं सच्चिदानन्दरूपं ऋतं सर्वदैकप्रकारम् । ऋ गताविति धातोस्तु पूर्वावगतवत्सदा । स्थितं ब्रह्मर्तमित्युक्तमिति वचनात् । धारकत्वाद्धर्मः । अकारोकारमकाराख्यवर्णत्रयात्मकमक्षर-मक्षराख्यं तत्त्वयि त्वद्वाचकत्वेन प्रवर्तत इत्यामनन्ति पठन्ति । ओमित्येकाक्षरमित्यादि वेदान्ताः । यद्वा । त्रिवृत्त्रिगुणात्मकं यदक्षरं प्रकृतिस्तत्त्वयि त्वदाश्रयमामनन्ति । त्वं जगदादिरित्यादिना हरेर्महत्तत्त्वाद्यैक्येनोक्तिः तत्तत्सत्तायास्तदधीनत्वेनेति ज्ञेयम् । यदधीनं यस्य सत्ता तत्तदित्येव भण्यत इत्युक्तेः । एवं सर्वं ज्ञेयम् ॥ २५ ॥

लिङ्गेरी — त्वमेव शब्दयोनिः पूर्वोक्तानेकगुणविशिष्टतया ऋगादिशास्त्रप्रतिपाद्यो, जगतः आदिकालस्थितः, आत्मशब्दवाच्यस्त्वमेव । आत्मा वा इदमेक एवाग्र आसीदित्यादेः । प्राणेन्द्रिय-द्रव्यगुणः स्वाधीनो भावः सत्तावतो यत्स्मात्स तथोक्तः । त्वमेव कालः, क्रतुः सत्यसंकल्पो यज्ञात्मा च, सत्यं चिदानन्दरूपं, ऋतं सर्वदैकप्रकारेण स्थितं, धारकत्वाद्धर्मः । यत्त्रिवृत् अकारउकारमकाररूपवर्णत्रयवद्यदक्षरमोङ्काररूपं तत्प्रतिपाद्यं च त्वमेवेति । ॐ इत्येकाक्षरं ब्रह्मेति वेदे वेदान्त आमनन्ति ॥ २५ ॥

अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम् ।
कालो गतिस्तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशः ॥ २६ ॥

सत्यधर्मीया — युष्मद्धितं करोमीति भगवता सङ्कल्पितत्वात्तदसाधारणलक्षणैस्तदन्तर्यामिणमेव लक्षीकृत्य स्तुवन्ति ॥ अग्निरिति । अखिलदेवतात्मा अखिलानां देवानामात्माऽऽहुत्याद्यादानकर्ताऽग्निस्ते मुखमिति विदुः । हे लोकभव जगन्मङ्गल । क्षितिं ते अङ्घ्रिपङ्कजं विदुः । कालस्ते गतिर्गमनमिति । अखिलदेवतात्मनस्ते दिशः कर्णौ । जलेशो वरुणो रसनम् । रसना जिह्वेति ॥२६॥

छलारी — अखिलदेवतात्माऽखिलदेवताभ्यो हविर्भागदाताऽग्निस्ते मुखं विदुः । हे लोकभव जगत्कर्तः । द्वितीयान्तेषु विदुरित्यस्य सम्बन्धः । कालः ते गतिः गमनमखिलदेवतानामन्तर्यामिणः ॥ २६ ॥

लिङ्गेरी — अखिलानां देवतानां हरिराधारतयाऽऽत्मदेहस्थानां योऽग्निस्ते मुखं मुखाज्जातस्तदाश्रितश्च । मुखादिन्द्रश्चाग्निश्चेत्यादिश्रुतेः । हे लोकभव सर्वलोकोत्पादक हरे! क्षितिं तवाङ्घ्रिपङ्कजं, पद्भ्यां भूमिरित्यादिश्रुतय आमनन्ति । अखिलदेवतानामात्मनः स्वामिनस्ते कालो, गतिः । दिशश्च कर्णौ, जलेशो वरुणो रसनं जिह्वाम् ॥ २६ ॥

नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः ।
परावरात्मा द्रुहिणस्तवात्मा सोमो मनो द्यौर्भगवंच्छिरस्ते ॥ २७ ॥

सत्यधर्मीया — नभो नाभिरिति । श्वसनं प्राणं नभस्वान्वायुरिति विदुः । श्वस प्राणधारणेऽस्माल्ल्युट् । श्वसनः स्पर्शनः । नभस्वान्नभ आश्रयत्वेनास्ति । तसौ मत्वर्थ इति भत्वाद्रुत्वाभावः । नभस्वद्वातेति चामरैः । सूर्यश्च चक्षूंषि । जलं रेतः स्म । परावरात्मा । नीचोचोत्तमः ।

द्रुहिणो द्रुह्यति दुष्टेभ्य इति द्रुहिणः । द्रुहक्षिभ्यामिनान्निति तु नांद्रुदक्षिभ्यामिति तत्र पाठात् । द्रविणदक्षिणेत्युदाहरणात् । अतो बहुलमन्यत्रापीतीनच् । बाहुलकादेव गुणो न । ब्रह्मात्मभूः स्याद्द्रुहिणो द्रुघणश्च पितामह इति भागुरिः । तवात्मा स्वामी च । तं वा । सोमो मनः । हे भगवंस्ते द्यौः शिर आमनन्ति ॥ २७ ॥

छलारी — नभोऽन्तरिक्षं श्वसनं श्वासं नभस्वान् वायुरात्मा मध्यदेहः परेऽपरे च ये आत्मानो जीवास्तेषामाश्रयणम् । द्यौः स्वर्गलोकः ॥ २७ ॥

लिङ्गेरी — हे भगवन् । नभोऽन्तरिक्षं ते नाभिः । नाभ्या आसीदन्तरिक्षमिति श्रुतिः । नभस्वान्वायुस्ते श्वसनं श्वासलक्षणप्राणजन्यः । प्राणाद्वायुरजायतेति श्रुतिः । सूर्यस्ते चक्षूंषि । चक्षोः सूर्योऽजायतेति श्रुतेः । जलं ते रेतो वीर्यस्थानीयम् । तवात्मा देहः परावरात्मा मुक्तामुक्तचेतनानामाश्रयः । मुक्तानां परमा गतिरित्यादेः । सोमश्चन्द्रस्ते मनः । चन्द्रमा मनसो जात इति श्रुतेः । द्यौस्ते शिरः । शीर्ष्णो द्यौः समवर्तत इति श्रुतेः । यथा हि पौरुषं सूक्तं नित्यं विष्णुपरायणमित्यादिप्रमाणेन विष्ण्वेकविषयतया प्रमितपुरुषसूक्तसमाख्यया चात्र विष्णुरेव स्तूयत इत्यविवादम् ॥ २७ ॥

कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते ।
छन्दांसि साक्षात् तव सप्तधातवस्त्रयीमयात्मन् हृदयं स धर्मः ॥ २८ ॥

सत्यधर्मीया — कुक्षिरुदरम् । छन्दांसि गायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तीत्रिष्टुप्जगत्याख्यानि सप्त छन्दांसि । ते सप्त धातवस्त्वक्चर्ममेदोमांसरुधिरमज्जास्थ्याख्याः । त्रयीमयात्मन् सकलवेदप्रतिपाद्यमूर्ते ॥ २८ ॥

छलारी — कुक्षिरुदरं छन्दांसि गायत्र्युष्णिगनुष्टुप्बृहती पङ्क्तीस्त्रिष्टुप् जगत्याख्यानि सप्त छन्दांसि ते सप्त धातवः । त्वक्चर्ममेदोमांसरुधिरमज्जास्थ्याख्याः । त्रयीमयात्मन्वेदत्रयप्रतिपाद्यमूर्ते ॥ २८ ॥

लिङ्गेरी — हे त्रयीमयात्मन् ऋगादिवेदत्रये प्रधानचेतनतया प्रतिपाद्य, शिवान्तर्यामिन् । वेदैश्च सर्वैरहमेव वेद्यः । नारायणपरा वेदा इत्यादिस्मृत्या वेदे हरेरेव मुख्यप्रतिपाद्यतावगमात् । ते समुद्राः सप्त, कुक्षिरुदरं गिरयः पर्वता अस्थिसङ्घाः सर्वे ओषधयः फलपाकान्ता व्रीहियवादयो वीरुधो लता रोमाणि तनुरुहस्थानीयाः । गायत्र्यादिसप्तछन्दांसि तव सप्तत्वगादिधातवः । धर्मदेवता यमस्तव हृदयम् ॥ २८ ॥

मुखानि पञ्चोपनिषत् तवेश यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः ।
यत् तच्छिवाख्यं परमात्मतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते ॥ २९ ॥

सत्यधर्मीया — पञ्चोपनिषदुपनिषदस्तव मुखानि । ध्येयः पञ्चमुखो रुद्रः स्फटिकामलमूर्तिमानित्यादेः । पञ्चमन्त्राः । सद्यो जातं प्रपद्यामि । वामदेवाय नमो ज्येष्ठाय । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । तत्पुरुषाय विद्महे । ईशानः सर्वविद्यानामिति । यैर्मन्त्रैस्त्रिंशदष्टोत्तरवर्गोऽष्टोत्तरत्रिंशन्मन्त्राणां वर्गस्तेषामेव पञ्चमन्त्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मन्त्रा जाता इत्यर्थः । यत्तत्तच्छिवाख्यं ते तव स्वयंज्योतिःशब्दवाच्यम् । परमात्मतत्त्वं त्वदन्तर्यामित्वेन रहस्यम् । अवस्थितिराश्रयः परमार्थतत्त्वमित्यपि पठन्ति । तच्छिवाख्यविष्ण्वाश्रयको भव भवानिति भावः ॥ ॥ २९ ॥

छलारी — हे ईश रुद्र । पञ्चोपनिषदः सद्योजातं प्रपद्ये वामदेवाय नमो जेष्ठायाघोरेभ्यस्तत्पुरुषाय विद्महे ईशानः सर्वविद्यानामिति मन्त्राः । तव मुखानि तव मुखेभ्यो जाताः । यैः मन्त्रैस्त्रिंशदष्टोत्तरमन्त्रवर्गोऽष्टोत्तरत्रिंशन्मन्त्राणां वर्गः तेषामेव पञ्चमन्त्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मन्त्रा उत्पन्ना इत्यर्थः । यच्छिवाख्यं परमात्मतत्त्वं तदन्तर्यामित्वेन विद्यमानं परमात्मरूपं वस्तु तदेव तत्स्वयंज्योतिशब्दवाच्यं तत्तवावस्थितिरवस्थानमाश्रयम् ॥ २९ ॥

लिङ्गेरी — इदानीमधिष्ठानभूतपार्वतीपतिं स्तुवन्ति । हे ईश पार्वतीपते । उपनिषत् ईशानः सर्वविद्यानामित्यादिरूपा, तव पञ्चमुखानि मुखेभ्यो जाता । यैः । ईशानः सर्वविद्यानाम् । वामदेवाय नमो ज्येष्ठाय । अघोरेभ्यः । सद्यो जातं प्रपद्यामीत्यादि पञ्चमन्त्रैरष्टोत्तरात्त्रिंशन्मन्त्रसमुदायः कलारूपो जात इति शेषः । हे महादेव । यद्यस्मात्ते तवावस्थितिः कैलासाधिवासादिपदं प्राप्तं तत्ते हृद्यवस्थितं ज्योतिः शिवाख्यं परमात्मनो विष्णोस्तत्त्वं स्वरूपम् । विष्णुरिति यावत् । अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदेहि रुद्रो रुद्रियं महित्वमिति श्रुतौ, रुद्रो विष्णोर्देवस्य प्रभृथे पूजने कृते सति रुद्रियं रुद्रसंबन्धिमहित्वं कैलासाधिपत्त्यादिरूपं विदे विविदे हि इति स्पष्टत्वात् । सर्वस्य चाहं हृदि संनिविष्टः । ज्योतिर्हृदयमाहितं यत् । यो वेद निहितं गुहायाम् । नारायणः परं ज्योतिरित्यादिश्रुत्यर्थपर्यालोचनायां प्रस्तुतस्वयंज्योतिषो विष्णुत्वावगमात् । आत्मा नारायणः परः । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराडित्यादिश्रुतिस्मृतिषूच्यमानपरमात्मनः, द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यस्मात्क्षरमतीतोऽहमित्यादिना क्षराक्षरशब्दितरमाब्रह्मादिचेतनान्यचेतनस्य विष्णुत्वावगमात् । अयमेवैतच्छ्लोकार्थः । न तु पार्वतीपतिरत्र

शिवपरमात्मादिशब्दाभिधेयः । तस्य, मुक्त्वा भवद्भवदुदीरितकालवेगध्वस्ताशिषोऽब्जभवनाकपतीन् कुतोऽन्यानिति दशमोत्तरार्धे रुग्मिण्या, अद्भिः संभूतो हिरण्यगर्भ इति श्रुत्याऽजशब्दवाच्यतया संभावितेन चतुर्मुखेन सह भवशब्दवाच्यस्य नश्वरैश्वर्यत्वेनैतत्स्तुत्ययोग्यत्वात् ॥ २९ ॥

छाया त्वधर्मो मृड यैर्विसर्गो नेत्राणि ते सत्वरजस्तमांसि ।
साक्षान्मनुः शास्त्रकृतस्तवेक्षा छन्दोमयो देवऋषिः पुराणः ॥ ३० ॥

सत्यधर्मीया — छाया व्याख्यातचरमिदम् । यैर्विसर्गो विविधव्यापारः ते सत्त्वादयो गुणास्तव नेत्राणि नयनरूपाणि । हे मृड शास्त्रकृतः पौरुषेयापौरुषेयागमोत्पत्तिव्यक्तिकर्तुस्तवेक्षातो जातः साक्षान्मनुर्ज्ञानजनकः पुराणो देवर्षिर्गायित्र्याद्यभिमानी । छन्दोमय इच्छाजात इत्यर्थः । ऋत्यक इति देवऋषिरिति प्रकृतिभावः । पुराणः पुराणानि । इतिहासपुराणः पञ्चमो वेदानां वेद इत्येतद्विवृतौ तत्त्वनिर्णये । नपुंसकत्वं तु नाश्रितम् । पुराणशब्दस्य विशेष्यलिङ्गत्वात् । ग्रन्थविशेषणत्वेन पुल्लिङ्गत्वमेवाश्रितमित्युक्तेरत्रापि साक्षान्मनुपदेनान्वयाद्वा न दोषः । पुराण इति देव ऋषिपदेनान्वितं सद्व्यक्तिव्यवस्थापकं भवतीति वा ज्ञेयम् ॥ ३० ॥

छलारी — मृड ! यैः सत्त्वादिभिर्विसर्गो विविधः सर्गस्तानि सत्त्वादीनि तव नेत्रत्रयम् । हे देव। साक्षान्मनुर्मुख्यतो बोधस्वभावः पुराणोऽपौरुषेयश्छन्दोमयो गायत्र्यादिछन्दोरूपो ऋषिर्वेदशास्त्रकर्तुस्तवेक्षेक्षणेनाभिव्यक्ता इति ॥ ३० ॥

लिङ्गेरी — हे मृड रुद्र । अधर्मो निर्ऋतिस्ते छायाऽऽश्रितः। यैः सत्त्वादिभिर्विसर्गो जगत्स्थितिसृष्टिसंहारास्तानि सत्त्वरजस्तमांसि ते नेत्रत्रयम् । साक्षान्मुख्यो मनुः स्वायंभुवः शास्त्रकृतः पाशुपतादिकर्तुस्तवेक्षा दृष्ट्याश्रयः । देव ऋषिर्नारदस्ते तव छन्दोमय इच्छानुसारी ॥ ३० ॥

न ते गिरित्राखिललोकपाल विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ।
ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद् ब्रह्म निरस्तभेदम् ॥ ३१ ॥

सत्यधर्मीया — गिरिं त्रायत इति स तथा तत्सम्बुद्धिः । ते तवान्तर्गतं यत्तत्परंज्योतिरूपम् । यच्च रजस्तमःसत्त्वं तत्कार्यं नेत्यर्थः । यच्च निरस्तभेदम् । नेह नानाऽस्ति किञ्चनेत्यादेर्गुणकर्मावयवभेदरहितम् । अखिललोकपालाश्च ते । विरिञ्चो ब्रह्मा । वैकुण्ठेति काकाक्षिन्यायेन विरिञ्चपदेन सुरेन्द्रपदेनाप्यन्वेति । वैकुण्ठो मुक्तो ब्रह्मा च । मुक्ताः सुरेन्द्राश्च तदादिगम्यं ब्रह्म न

साकल्येन नेत्यर्थः । न च प्रतियत्ने विपूर्वकादस्मात्स्वार्थण्यन्तादच इः । पृषोदरादित्वादकारस्येकारः। नुमागमोऽपि तत एवं विरिञ्चश्च पचाद्यचीति ज्ञेयम् । विरिञ्चो द्रुहिणः सिञ्चो विरिञ्चिर्द्रुहिणो मत इति शब्दार्णवः ।। ३१ ।।

छलारी — हे गिरित्र ते तव परंज्योतिरूपमखिललोकपालैर्विरिञ्चादि वैकुण्ठसुरेन्द्रैर्वैकुण्ठस्थितदेवश्रेष्ठैश्च मुक्तामुक्तैरित्यर्थः । गम्यं साकल्येन ज्ञेयं न भवति । किन्तु तस्य ज्योतिः । यस्य रज आदिकं नास्ति । यच्च ब्रह्म निरस्तभेदो अवताराणां गुणक्रिया हस्ताद्यवयवानां च यस्मात्तथा ।।३१।।

लिङ्गेरी — हे गिरित्र कैलासपालक पार्वतीश । ते हृदि स्थितं परंज्योतिः शिवाख्यं नारायणः । नारायणः परं ज्योतिरिति श्रुतेः । विरिञ्चो ब्रह्मा अखिललोकपाला निःशेषलोकपालका अष्टदिक्पालकैश्च, वैकुण्ठसुरेन्द्रः शुभ्राख्याद्विजाद्विकुण्ठायामुत्पन्नास्तैश्च साकल्येन गम्यं न किमस्माभिः । यत्र परंज्योतिषि रजस्तमः सत्त्वं च गुणत्रयं च बाधकतया नास्ति । न हि द्वितीयो गुणसंगवर्जितः सृजत्यवत्यत्ति न बध्यतेऽजः । यद्ब्रह्म गुणपूर्णम् । यच्च निरस्तभेदम् । स्वावतारेष्वन्योन्याभावरूपपृथक्त्वशून्यम् । अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणाः । मय्यनन्तगुणे । नेह नानाऽस्ति किञ्चन । न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीत्यादेः ।। ३१ ।।

कामाध्वरत्रिपुरकालहराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत् ते ।
यत्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं तवेश ।। ३२ ।।

सत्यधर्मीया — कामो मन्मथः अध्वरो दक्षयज्ञस्त्रिपुरं च तेषां काल । यमरूप । संहारकेति यावत् । हे हर । आद्यनेकभूतद्रुहः अनेकानि च तानि भूतानि च तेभ्यो द्रुह्यन्तीति । ते आदिनो राक्षसाश्च ते भूतद्रुहाश्च तान्क्षपयतो नाशयतः । आदिनो राक्षसाः प्रोक्ता इति तात्पर्यान्तरात् । कालो हरश्च दैत्यविशेषाविति वेति केचित् । हरतीति हरः । कालश्चासौ हरश्चेति केचित् । ते स्तुतये तज्जगन्न शक्तम् । गिरेति पठित्वा गरभक्षणस्याप्यवश्यंभावित्वेन सिद्धवन्निर्देश इति व्याकरणमन्तःकरणं आनेयं सम्भवदसम्भवद्वेति विद्वद्भिः । यदि दृश्येत सोऽनेकेषु कोशेषु सर्पकल्पत्वेन गरनिगरणस्याभावेऽपि भवस्य तत्परिभावनं सम्भवतीति गरगीरुपपन्नेत्यर्थापनं सम्भवत् । तत्स्वरूपं निरूप्याशक्ततां द्रढयति ।। यदिति । अन्तकाले प्रलयकाले । आत्मकृतं स्वनिर्मितं स्वनेत्रं तृतीयं नयनम् । स्वशब्देन तस्यामायिकता द्योत्यते । तत्स्थो यो वन्हिस्तस्य विस्फुलिङ्गाः । वन्हिपदसमभिव्याहाराद्विस्फुलिङ्गस्य केवलकरणपरता ज्ञेया । तेषां शिखा ज्वाला । तया भसितम् । हे ईश । तव

स्वनेत्रवन्हिस्फुलिङ्गशिखया भसितमिति न शक्तमित्यन्वयार्थः । एतत्कामादिक्षपणं ते जगत्क्षपकस्य कियदिति भावः । हरं प्रति कालहरेत्युक्त्या हरिविषयता स्तुतेः प्रस्तुताया ज्ञापितेति भावोऽवसेयः ॥ ॥ ३२ ॥

छलारी — कामश्च दक्षश्च यज्ञश्चाध्वरश्च तथा त्रिपुरकालहराद्यनेकप्राणिहिंसकाश्च तान्क्षपयतः कालगरमतिश्यामं विषकामाध्वरौ सर्वभूतहिंसकान् त्रिपुरविषादींश्च नाशयत इत्यर्थः । गरभक्षणस्याप्यवश्यंभावित्वेन सिद्धवन्निर्देशः । तत्कामादिनाशनं स्तुतये नालमित्यर्थः । स्तुतये नालमित्यत्र हेतुमाह ॥ यदिति ॥ यस्मादात्मकृतमिदं जगदन्तकाले प्रलयकाले तव स्वनेत्रान्मुख्यात्तृतीयनेत्राज्जातवन्हेः स्फुलिङ्गस्य शिखया ज्वालया भसितं भस्मीभूतं तस्माल्लोकत्रयनाशकस्य तवैकदेशत्रिपुरादिनाशनं नाश्चर्यमिति भावः ॥ ३२ ॥

लिङ्गेरी — हे ईश रुद्र । कामो मदनोऽध्वरो यज्ञस्त्रिपुरा दैत्याः कालहराख्याद्या येऽनेकभूतद्रूहो बहुप्राणिद्रोहिणस्तान् क्षपयतः संहरतस्ते यच्चरितं तत्ते स्तुतये नालम् । यद्यस्मात्त्वमन्तकाले प्रलयकाले आत्मकृतं स्वनिर्मितं जगत् स्वनेत्रवन्हेः स्फुलिङ्गैरग्निकणैः सहितया शिखया ज्वालया भसितं भस्मीकृतम् ॥ ३२ ॥

ये त्वात्मरामगुरुभिर्हृदि चिन्तिताङ्घ्रि-
द्वन्द्वं चरन्तमुमया तपसाऽभितप्तम् ।
कत्थन्त उग्रवपुषं निरतं श्मशाने
ते भूतभूतिमविदस्तव हीनलज्जाः ॥ ३३ ॥

सत्यधर्मीया — निवासनिलयश्रिता तव शिरस्ततिर्मालिका कपालमपि ते करे त्वमशिवोऽस्यनन्तर्धियामित्यादेस्तदनन्तर्धीचर्यां दर्शयन्ति ॥ ये त्विति । आत्मारामाश्च ते गुरवो महान्तश्च । आत्मारामेषु गुरवस्तैर्वा । हृदि मनसि । चिन्तिताङ्घ्रिद्वन्द्वम् । तदपि चिन्तनमेतत्कारणकमितीरयन्ति ॥ तपसेति । उमया सह चरन्तं त्वामुग्रवपुषं श्मशाने निरतमभितप्तं कण्ठाग्निना । हीनलज्जाः निर्लज्जाः भूतभूतिं भूता प्रभूता भूतिरैश्वर्यं यस्य । तमविदः कत्थन्ते हे अविदस्तव । अविद्भिः न विद्यते स्तवः यस्य तत्सम्बुद्धिरिति वा । हीनलज्जा इति वा । अविद इति वाऽन्वेति ॥ ॥ ३३ ॥

छलारी — एतादृशं त्वां ये निन्दन्ति ते मूर्खा इत्याहुः ॥ ये त्विति । ये उमया सह चरन्तं त्वां तस्यां निरतमत्यासक्तं कामिनं कत्थन्ते प्रलपन्ति । तथा स्मशाने चरन्तमुग्रं वपुषं क्रूराकारं कत्थन्ते । कथम्भूतं त्वाम् । आत्मारामो गुरवो हितोपदेष्टारस्तैर्हृदि चिन्तितमङ्घ्रिद्वन्द्वं यस्य स तथाभूतमपि तपसाभितप्तमपि तपः कुर्वन्तमपि ते जनास्तव भूतभूतिं पूर्णैश्वर्यमविदः न जानन्तीत्यर्थः । मूर्खा इति भावः । अत एव हीनलज्जास्त्यक्तलज्जाः कथमात्मारामैः सेवितचरणयुगलस्य कामित्वसम्भवः । कथं वा शान्तस्य तपस्विन उग्राकारत्वं संभवतीत्यविचार्यैव प्रलपन्तीत्यर्थः ॥ ३३ ॥

लिङ्गेरी — हे ईश । येऽविवेकिन आत्मारामे स्वरमणे नारायणेऽभिविष्टान्तःकरणतया गुरुभिः सनकादिभिः स्वहृदि चिन्तिताङ्घ्रिद्वन्द्वमुमया सह तपसाऽभितप्तं धर्मान्तरं च चरन्तं त्वा त्वां स्मशाने निरतमुग्रवपुषमस्थिमालादिना भयंकरदेहं कत्थन्तेऽतिक्रम्य वदन्ति निन्दन्ति । ते भूतभूतिं प्राणिनामैश्वर्यप्रदं त्वामविदोऽज्ञानिनस्तव सकाशाज्जायमानभूतभूतिं न जानन्ति । ये ज्ञात्वाऽपि निन्दन्ति ते हीनलज्जा लज्जाहीनाः ॥ ३३ ॥

तत् तस्य ते सदसतोः परतः परस्य
नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः ।
ब्रह्मादयः किमुत संस्तवने वयं तु
तत्सर्गसर्गविषया अपि भक्तिमात्रम् ॥ ३४ ॥

सत्यधर्मीया — ब्रह्मादयः । भगवत्पक्षे ब्रह्मा विरिञ्च आदिर्येषामिति तद्गुणसंविज्ञानो बहुव्रीहिः । त्र्यक्षपक्षे ब्रह्माऽऽदिः कारणं येषां सनकादीनामिति तद्ग्रहः । अतद्गुणसंविज्ञानं ब्रह्मा बृहस्पतिर्वेति ज्ञेयम् । तेऽपि सदसतोः परतः परस्योत्तमोत्तमस्य प्रकृतेः परस्येति वा । भूम्नस्तव । स्वरूपगमने साकल्येन तदवगमे न प्रभवन्ति । तत्सर्गसर्गविषयाः तत्सृष्टसृष्टिविषयाः वयं संस्तवने सम्यक्कीर्तने न प्रभवाम इति किं वक्तव्यम् । तर्हीयता कृतं किमित्यत आह ॥ भक्तिमात्रमिति । केवलं भक्तिरेवैतत्प्रयोजिकेति भावः । तुस्तु हरिपक्षे हरपक्षे चार्थविशेषद्योतकः ॥ ३४ ॥

छलारी — आस्तां तावन्निन्दकानां वार्ता महतोऽपि तव स्वरूपं न जानन्तीत्याहुः ॥ तत्तस्येति । यतस्तव चर्या दुर्बोधा । तत्तस्मात्सदसतोः मूर्त्तामूर्त्तजगतोः । मूर्त्तं सदिति संप्रोक्तममूर्त्त-मसदुच्यत इत्युक्तेः । परतो विलक्षणायाः प्रकृतेः परस्य भूम्नः पूर्णस्य ते तवांजः साकल्येन स्वरूपगमने स्वरूपज्ञानेऽपि ब्रह्मादयो न प्रभवन्ति न समर्थाः संस्तवने न शक्ता इति किमु

वाच्यम् । यदा ब्रह्मादयोऽप्यसमर्थास्तदा वयं संस्तवने न शक्ता इति किमु । कुतः । यतो वयं तेषां ब्रह्मादीनां सर्गे सृष्टिप्रवाहे सर्गविषया उत्पन्ना अत्यन्तावार्चीनाः । अपि तथाऽपि अस्मत्कृतस्तवनं भक्तिमात्रं भक्तिप्रकटनमात्रमित्यर्थः । शक्तिमात्रमिति पाठे एतत्स्तवनमात्मशक्तिपरिमितमात्रमित्यर्थः ॥ ३४ ॥

लिङ्गेरी — हे ईश । यस्मात्सदसतोः पञ्चमहाभूताभिमानिदेवेभ्यः परत उत्तमस्य तस्य ते हृदिस्थनारायणस्यांजः सम्यक् स्वरूपगमने ज्ञाने, न ते गिरित्रेत्याद्युक्तरीत्या ब्रह्मादयोऽपि न प्रभवन्ति । तत्सर्गसर्गविषया ब्रह्मसृष्टस्वायंभुवादिसृष्टिविषया वयं न प्रभवाम इति किमुत । यद्यपीत्थं वयं स्तुतावशक्तास्तथाऽपि येयं स्तुतिः सा भक्तिमात्रं केवलं भक्तिः । न चात्र किञ्चिद्गुणोत्कर्ष-ख्यापनं तदुचितमस्तीति भावः । नन्वत्र रुद्रस्वरूपमेव ब्रह्माद्यगम्यमित्युच्यते, इति किं न स्यादिति चेन्न । अप्रामाणिकत्वात् । प्रत्युतास्मिन्स्कन्ध एव रुद्रेण 'नाहं परायू ऋषयो न मरीचमुख्याः । जानन्ति यद्विरचितं खलु सत्वसङ्घाः । यन्मायया मुषितचेतस एत्ये'त्यादिना स्वेन चतुर्मुखाद्यैश्च विष्णोरत्राज्ञेयत्वमुच्यते । अजशक्रशङ्कराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मीत्यादि दशमस्कन्धादौ च ॥ ॥ ३४ ॥

एतत्परं प्रपश्यामो न परं ते महेश्वर ।
मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥

तात्पर्यम् – 'तत्र तत्र स्तुतिपदैर्हरिरेव तु तद्गतः ।
स्तूयतेऽतो युक्तमेव गुणाधिक्यवचोऽपि त्वि'ति च ॥ ३५ ॥

सत्यधर्मीया — अव्यक्तकर्मकत्वादिकं कथं प्रमथनाथस्येत्यत अन्तर्यामिविवक्षया सम्भवि सर्वं विभाव्य योज्यमिति मानेनाह ॥ तत्र तत्रेति । तद्गतः शिवादिगतो हरिरेव स्तुतिपदैरसम्भावितैः स्तूयते । अतो गुणाधिक्यवचः । त्वमेकः सर्वभूतानामित्यारभ्य श्रीशुक इत्येतत्पर्यन्तं यदेतद-सम्भावितगुणाधिक्यवचनं तद्युक्तमेवेत्यन्वयः ॥ अथ मूलार्थः ॥ हे मृड । मृडयति सुखयतीति मृडः । मृड सुखनेऽस्मादिगुपधः कः । तत्सम्बुद्धिः । अव्यक्तकर्मणः । साकल्येनाव्यक्तव्यापृतेस्ते तव । व्यक्तिः प्रादुर्भावो लोकस्य जनस्य मृडनाय सुखनाय । एतत् अन्यसुखनमेव । परं मुख्यम् । प्रयोजनं पश्यामः । हे महेश्वर । परं स्वप्रयोजनरूपं न पश्यामः । तदेतद्रूपमात्रपरं त्वदन्तर्गतं भगवद्रूपं वस्तु न पश्याम इति । त्वदन्तर्यामिरूपमिति च निरूपयन्ति ॥ ३५ ॥

छलारी — असामर्थ्यमेवाहुः ॥ एतदिति । एतत्पुरतः स्थितं तव वपुः परं केवलं प्रपश्यामः । परं केवलं सर्वोत्कृष्टं तवैतदन्तर्यामिरूपं न पश्यामः । तथाऽपि त्वद्दर्शनादेव कृतार्था इत्याशयेनाहुः ॥ मृडनाय हीति । अव्यक्तकर्मणस्ते व्यक्तिः प्रादुर्भावो लोकस्य मृडनाय पालनायेत्येतत्परं केवलं प्रपश्यामो विद्मः । परमन्यत्ते तव प्रयोजनं न प्रपश्यामः । तस्मादस्माद्विषाद्रक्षेति भावः । अत्र देवदेवेत्यारभ्य रुद्रस्तुतौ रुद्रेऽसंभाव्यमानप्रकृतिपरत्वब्रह्माज्ञेयत्वादिगुणाधिक्यकथनं रुद्रान्तर्यामि-विषयत्वेन । न तु हरिहरयोरभेदाभिप्रायेण । सर्वात्मप्रीतये हरिरित्युक्तम् । यत्र रुद्रेणैव विषपानेन मम हरिः प्रीतो भवतीति भवार्नी प्रत्युक्तत्वेन भेदस्यैव प्रतीतेः ॥ ३५ ॥

लिङ्गेरी — हे महेश्वर । तव हृदि स्थितमेतच्छिवाख्यं नारायणं परं सर्वोत्तमं पश्यामः । तस्मात्परमुत्तमं न प्रपश्यामः । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । पुरुषान्न परं किञ्चित् । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यादेः । अव्यक्तकर्मणोऽविचारेऽप्रतीतचरित्रस्य ते व्यक्तिर्जन्म लोकस्य जनस्य मृडनाय सुखाय । भवतीति शेषः । अनेन मदुत्तमत्वान्मदन्तर्यामि-नारायणस्तुतिवन्नारायणादुत्तमस्तुतिः किं न क्रियत इति निरस्तम् । तदुत्तमाभावस्य प्रमापनात् ॥ ॥ ३५ ॥

श्रीशुक उवाच–

तद् वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ।
सर्वभूतसुहृद् देव इदमाह सतीं प्रियाम् ॥ ३६ ॥

सत्यधर्मीया — तत्स्तुतिमिति मतिपूर्वकं श्रुत्वा किं तूष्णीकः किं वा पर्यायत उत्तरयाश्चक्रेऽथापिबदिति श्रोतृशङ्कामपाकर्तुमन्तिमपक्षं स्वीकृत्य तत्रेतिकर्तव्यं कैश्चिच्छलोकैः शुक आहेत्याह ॥ श्रीशुक इति । तासां प्रजानाम् । व्यसनं दुःखम् । विना भगवताऽसनं तदौदासीन्यं च वीक्ष्य । रुद्रस्य यशसे अर्थाय स्वयं विष्णुर्विषं प्रभुः । न सञ्जह्रे समर्थोऽपि वायुं प्रोचे प्रशान्तय इत्यादेः । स्वयशोदानार्थमिति वीक्ष्य । सतीं प्रियां भार्याम् ॥ ३६ ॥

छलारी — तासां प्रजानां व्यसनं क्लेशं भृशपीडितो द्रवीभूतचित्तः सन् ॥ ३६ ॥

लिङ्गेरी — एवं प्रजाभिः स्तुतः सर्वेषां भूतानां प्राणिनां सुहृदुपकारी देवो रुद्रस्तासां प्रजानां तद्व्यसनं क्लेशं वीक्ष्य जनितया कृपया भृशपीडितो भृशमत्यन्तं पीडितः सञ्जातक्लेशः सतीं प्रतिव्रतां स्वस्य प्रियां पार्वतीं प्रतीदं वक्ष्यमाणमाह ॥ ३६ ॥

शिव उवाच–

अहो बत भवान्येतत् प्रजानां पश्य वैशसम् ।
क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ॥ ३७ ॥

सत्यधर्मीया — भवानि । काव्यप्रकाशकादिविरोधमादौ प्रदर्श्य षष्ठविवृतौ समाधिरभिहितोऽनुसन्धेयः । बतेत्यव्ययं खेदार्थकं सदत्र खिन्नार्थकम् । तेन च बत भवानि । खिन्नोऽहं भवानि । तत्र हेतुरितरदिति वा । बत भवानि हे भवानीति वा । बतामन्त्रणसन्तोषखेदसंबोधनेऽपि चेति विश्वः । वैशसं नाशनमुपस्थितं पश्य ॥ ३७ ॥

छलारी — विषपाने प्रवृत्तं मां मत्प्रभावमविचार्य कथंचिदियं प्रिया वारयेदिति शङ्कया तामनुमोदयन्नाह ॥ अहो बतेति । हे उमे । वैशसं दुःखमुपस्थितं प्राप्तम् ॥ ३७ ॥

लिङ्गेरी — हे भवानि पार्वति! प्रजानामेतद्वैशसं क्लेशं त्वं पश्य । एतद्वैशस्यमहो आश्चर्यम् । बत खेदो जायते । द्रष्टॄणामिति शेषः । उक्तक्लेशनिमित्तमाह । क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं वैशसमिति ॥ ३७ ॥

आसां प्राणपरीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यद् दीनपरिपालनम् ॥ ३८ ॥

सत्यधर्मीया — प्राणं परीप्सवो हि प्राणपरीप्सव इति विग्रहः । नलोकेति षष्ठीनिषेधात् । आसामभयं विधेयम् । कृत्यानां कर्तरि वेति स्मरणान्म इति सम्भवति । सामान्यार्थान्तरमुखेनाह ॥ एतावानिति ॥ ३८ ॥

छलारी — प्राणपरिप्सूनां प्राणरक्षणेच्छूनाम् । विधेयं कर्म । मे मया । कुतः । हि यस्मात्प्रभोः समर्थस्यैतावानर्थः प्रयोजनम् ॥ ३८ ॥

लिङ्गेरी — हे भवानि । प्राणपरिपालनेच्छूनामासां प्रजानामभयं भयपरिहरणं मे मया विधेयम् । हीत्यस्य प्रामाणिकत्वं दर्शयन्नाह । प्रभोः समर्थस्य दीनपरिपालनं यत् एतावान्हि इयानेवार्थः प्रयोजनम् । हिर्हेताववधारणे इत्यमरः ॥ ३८ ॥

प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः ।
बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥

सत्यधर्मीया — आत्ममायया भगवदिच्छातः । मोहितेषु , परस्परं बद्धवैरेषु । भूतेषु जिघांसत्सु । क्षणभङ्गुरैः स्वत एव गच्छन्तीति ते तथा तैर्नश्वरैरिति यावत् । स्वैः प्राणैः साधवः । प्राणिन इति प्रथमा द्वितीया बहुवचनं च । प्राणिनः कर्म । प्राणिनः कर्तृ । पान्ति । साधुताऽसाधुता न भवेदिति भवानि भवानि तत्पातेति भवभावः ॥ ३९ ॥

छलारी — दीनपरिपालनविषये शिष्टाचारोऽप्यस्तीत्याह ॥ प्राणैरिति । आत्ममाययेश्वरमोहकशक्त्या मोहितेषु भूतेषु बद्धवैरेषु सत्सु परस्परं जिघांसुषु सत्सु क्षणभंगुरैः प्राणैः पान्ति रक्षन्ति । लोके हि साधवः प्राणिषु केनचिन्निमित्तेन मिथो हन्तुमिच्छत्सु स्वप्राणं दत्वाऽपि तान् आपत्सु मोचयन्ति । तद्वदहमप्येतान्प्राप्तापदो मोचयिष्यामीति भावः ॥ ३९ ॥

लिङ्गेरी — अस्मिन्नर्थे सदाचारमाह । साधवः प्राणिन आत्मनो नारायणस्य मायया मोहनस्य मोहनशक्त्या भ्रान्तेष्वत एव स्वेषु बद्धवैरेष्वपि क्षणभंगुरैः स्वैः स्वकीयैः प्राणैर्भूतानि पान्ति संरक्षन्ति ॥ ३९ ॥

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ।
प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ।
तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥ ४० ॥

सत्यधर्मीया — स्वासम्भावितगुणोपन्यसनबीभत्सुः भवश्चिकित्सां सर्वस्य तात्पर्यरूपिणीं स्वयं दर्शयति ॥ पुंस इति । कृपयतः । सर्वात्मा सर्वस्वामी हरिः प्रीयते । तत्प्रीत्या तव किमित्यत आह ॥ प्रीत इति । तद्दासत्वान्ममैव मद्दासत्वाच्चराचरस्येति भावः । फलितमभिलपति ॥ तस्मादिति । मे मम । सकाशात्स्वस्त्यस्तु । गरं विषम् । भुञ्जे भोक्ष्यामि । तस्मात्सर्वात्महरेः सकाशान्मे ममापि स्वस्तिरस्त्वित्यान्तरङ्गिको भावः ॥ ४० ॥

छलारी — कृपयतः कृपां कुर्वतः सर्वात्मा सर्वान्तर्यामी सर्वस्वामी वा प्रीयतेऽहं चराचरसहितः सन् ॥ ४० ॥

लिङ्गेरी — हे भद्रे । भूतेषु कृपयतो दयां कुर्वतः पुंसः, सर्वेषां भूतानामात्मा स्वामी हरिः प्रीयते प्रीतो भवति । भगवति हरौ प्रीते सति सचराचरो जंगमस्थावरचेतनसहितोऽहं प्रीतः सन्तुष्टो भवामि । मदादिसर्वचेतनानां सर्वैः स्वधर्मैः सर्वपुरुषार्थसाधनहरिप्रीतिरेव संपाद्या । तत्कर्म हरितोषं यत् । किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन इत्यादेः । अत्र सर्वात्मा हरिरित्यनेनान्तर्यामी बृहदारण्ये पृथिव्याद्यन्तर्यामितयोक्तो विष्णुरेवेति वेदनात् । स्वान्तर्यामित्वमपि हरेः प्रकटितम् । तेनात्र रुद्र एव परमात्मेत्याशङ्काऽनवकाशः तस्माद्धरिप्रीतिसद्भावादहं गरं विषं भुञ्जे । मे सकाशात्प्रजानां स्वस्ति क्षेमोऽस्तु ।। ४० ।।

श्रीशुक उवाच–

एवमामन्त्र्य भगवान् भवानीं विश्वभावनः ।
तद् विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ।। ४१ ।।

सत्यधर्मीया — सतीं प्रियामिति शुकोक्त्यनन्तरमहो इति श्लोकात्पूर्वं च शिव उवाचेति ग्रन्थ उत्सन्नः । क्वचित्पुस्तकसंपुट्यां दृश्यते । स चावश्यकः । अन्यथा पुनरन्यवागभावे स्वस्तिरस्तु म इत्यनन्तरमेवमामंत्र्येत्यतः प्राक् श्रीशुक इत्यवक्तव्यापातादिति ज्ञेयम् । पत्न्यामन्त्रणं चातिसाहसकार्यत्वात्तत्सुमुखीकरणार्थमिति ज्ञेयम् । विश्वभावनः भावयतीति भावनो विश्वो वायुर्भावनो यस्य सः । विश्वं स्वयोग्यं भावयतीति वा । विश्वो वायुरुदाहृत इत्यादेः । तद्घातपीतशेषम् । तदप्यस्तबलम् । तद्दत्तं विषम् । जग्धुं गतम् । पातुमारेभे । सती कुतः समीपे सति न निषेधेत्यत आह प्रभावज्ञा तत्सामर्थ्यज्ञाऽन्वमोदताङ्गीकृतवतीति । '(अत्र प्रासङ्गिकी कथा- अत्र सर्वत्र श्रुत्यादयो भवन्ति । तमेताः सप्ताक्षितय उपतिष्ठन्ते । तवाथवे इमा अक्षित्रोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तः । वायुरस्मा उपामन्थत् पिनष्टि स्म । कुनन्नमा । केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह । पूषण्वते मरुत्वते विश्वेदेवाय वायवे । बलमिन्द्रस्य गिरिशो गिरिशस्य बलं मरुत् । बलं तस्य हरिः साक्षान्न हरेर्बलमन्यत इत्याद्याः। व्याख्याताश्चैता बृहदारण्यकऋग्भाष्यादौ । दक्षिणाक्षिस्थितं वायुं सप्त देवा उपासते । अनन्तादवरेशाना तस्याः प्राणस्ततश्च वाक् । तस्या रुद्र उमा तस्मादिन्द्रिस्तस्यास्ततोऽपरे । सौपर्णश्रुतिरित्याह सप्ताक्षितय इत्यपि । वायुरस्मा उपामन्थद्विश्वेदेवाय वायवे । विश्वैर्देवैः सह इत्याद्याः प्रमा अत्रापरा इति । तट्टीकायां च । ईशाना लक्ष्मीः वायो रुद्रादुत्तमत्वे सति तमक्षिणिस्थितं वायुमेव । वक्ष्यमाणाक्षितयोऽक्षीणगुणाः सप्त देवा उपतिष्ठन्ते सेवन्ते । तत्तत्र । या इमा अक्षिन् अक्षिणि लोहिता राजयो रेखास्ताभिस्तदधिष्ठानेनैनं वायुं रुद्रोऽन्वायत्तस्तदधीनो वर्तते ।

कुत्सितान्नमयतीति कुनन्नमा । केशी प्रशस्तकेशवान् । वायुर्यद्यदा रुद्रेण सह । पात्रेण विषस्य विषमपिबत् । तदा तस्मै रुद्राय । तदनुजिघृक्षयेति यावत् । तद्विषमुपामन्थत् । तस्यैव विवरणं पिनष्टि स्मेति । विश्वेषां देवानां रुद्रादीनामित्यादि । वायो रुद्रादुत्तमत्वे । तथा वायुकरपिष्टतत्पीतशेषविषपाने चैतदाद्युक्तिर्ज्ञेया ।

तथा जगद्ग्रासि विषं समुत्थितं त्वदाज्ञया वायुरधात् करे निजे ।
कलेः स्वरूपं तदतीवदुःसहं वराद्विधातुः सकलैश्च दुःस्पृशम् ।
करे विमथ्यास्तबलं विधाय यदा स किञ्चिद्ददौ गिरिशाय वायुः ।
स तत्पिबन् कण्ठगतेन तेन निपातितो मूर्छित आशु रुद्रः ।
हरेः करस्पर्शबलात्स संज्ञामवापनीलोऽस्य गलस्तदाऽऽसीत् ।

अथ त्वदाज्ञां पुरतो विधाय निधाय पात्रे तपनीयरूपे । स्वयं त्वनिर्मथ्य बलोपपन्नं पपौ स वायुस्तदुतास्य जीर्णमिति भगवदुक्तेः । उक्तं च पद्मपुराणे उत्तरखण्डे ।

महाविषं महाघोरं संवर्ताग्निसमप्रभम् ।
दृष्ट्वा प्रदुद्रुवुः सर्वे भयार्तादिवमानताः ।
ततस्तद्विद्रुतान्दृष्ट्वा ब्रह्मा लोकपितामहः ।
जगाद वायुं तरसा हरेराज्ञापुरःसरम् ।
निःशेषं कुरु वायो त्वं लोकसंहारकं विषम् ।
त्वदन्यो नास्ति मद्ग्रस्तुं सर्वजीवहितं कुरु ।
इति धातुर्वचः श्रुत्वा दशप्रमतिरब्रवीत् ।
भक्षयामि हरेराज्ञां पुरस्कृत्य विधेर्वचः ।
हरेर्नामोच्चारणेन तद्भक्त्या च विशेषतः ।
सर्वव्याधिविषं घोरं पात्रे न्यस्य करे दधत् ।
बिन्दुमात्रं पृथग्गृह्य तद्विषं मर्दयंस्ततः ।
परीक्षणार्थं चान्येषां देवादीनां च पार्वति ।
मम हस्ते ददौ किञ्चिद्भक्षस्वेति स मारुतः ।
नाममात्रेण सहितं मन्त्रानुग्रहमादिशन् ।
तद्विषप्राशनादेव मम दाहोऽभ्यवर्तत ।

जिव्हाग्रधारणादेव मम प्राणा विनिर्गताः ।
कृपया पवमानस्य तथा नामत्रयेण च ।
अच्युतानन्तगोविन्दनाममाहात्म्यतः शुभे ।
जीवितोऽस्मि तदा काले विष्णोर्नामत्रयादहो ।
पश्चात्तु तद्विषं सर्वमेकीकृत्य स पात्रके ।
अनायासात्पपौ वायुः सर्वेषां रक्षणाय च ।
हरेश्च प्रीतये देवि ब्रह्मणो वचनात्तथा ।
ऋचोऽब्रुवंश्च देवस्य केशीति ब्रह्मवादिनः ।
इत्थं वायोर्महत्त्वं हि विष्णुभक्तस्य पार्वतीति ॥ ४१ ॥

छलारी — प्रभावज्ञा रुद्रसामर्थ्यं जानन्ती ॥ ४१ ॥

लिङ्गेरी — विश्वभावनो जगदुपास्यो भगवान् ऐश्वर्यादिषड्गुणवान् रुद्रो भवानीं पार्वतीं प्रत्येवमामन्त्र्य कथयित्वा तद्विषं जग्धुं भक्षितुमारेभे उपक्रान्तवान् । भवानी च यतो रुद्रस्य प्रभावं सामर्थ्यं जानातीति प्रभावज्ञाऽतो रुद्रकार्यमन्वमोदत सुखमनुज्ञातवती ॥ ४१ ॥

ततः करतलीकृत्य व्यापि हालाहलं विषम् ।
अभक्षयन्महादेवः कृपया भूतभावनः ॥ ४२ ॥

सत्यधर्मीया — ततः सत्यनुमोदानन्तरम् । अल्पत्वात्करतलीकृत्येत्युक्तिः । व्यापि करतल एव । ततो रुद्रपानानन्तरं व्याप्युत्सर्पत् उर्वतिमुरुहालाहलम् । ततो वायुरपिबत् । ततं वीणादिवाद्ये च पवमाने ततः पुनरिति विश्वः । अन्यथा गोनासगोनसौ हालाहलं हालहलं विषमिति लिङ्गानुशासनानाममरोक्तेरत्रैकातिरेकशङ्का न पारणीया स्यात् । विषमिति श्रुत्यनुकृतेरावश्यकं च । एवमन्वये पद्मपुराणमपि सर्वात्मना सत्कृतम् । केचित्सूर्य एवात्र केशी । केशाश्च किरणाः । विषं च जलं चैतत्प्रतिपाद्यमादित्यमुदितं चक्रुश्चेदपि पद्ममुकुलीभवनमित्यहो । माधवभाष्येऽष्टमाष्टकसप्तमाध्यायचतुर्विंशतिवर्गीये । केशीति सप्तर्चमष्टमं सूक्तम् । अग्निसूर्यवायुदेवताकमित्युक्तेर्वायुपरता नास्यानुपपन्नेति दिक् ॥ ४२ ॥

छलारी — करतलीकृत्य करतलपरिमितमात्रं कृत्वा व्यापि सर्वत्र प्रसारितं हालाहलं विषं रुद्रोऽभक्षयत् ॥ ४२ ॥

लिङ्गेरी — ततस्तदनन्तरं भूतभावनो महादेवो जगद्व्यापि हालाहलं विषं भूतकृपया स्वस्य करतलीकृत्याभक्षयत् । वायुभक्षणावशिष्टं रुद्रोऽपिबदित्यत्र तात्पर्यम् । मुख्यप्राण एवात्र प्रजाभिः प्रथमं प्रार्थितः समुद्रमथनोत्पन्नं विषं सुवर्णपात्रे स्वयं संपूर्यापिबत् । अविशिष्टं किञ्चिद्विषं स्वकराभ्यामुन्मथ्य रुद्रायादात् । वायुरस्मा उपामन्थत् पिनष्टिस्म कुनन्नमा । केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सहेत्यादिश्रुतेः ॥ ४२ ॥

तस्यापि दर्शयामास स्ववीर्यं गलकल्मषः ।
यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥ ४३ ॥

सत्यधर्मीया — गलस्य किल्बिषं यस्मिन्स विषः । यूषकरीषविषमिषचर्षाणि नपुंसके चेति लिङ्गानुशासनात् पुल्लिङ्गोऽपि विषशब्दः पापकिल्बिषकल्मषमित्यमरात्, तथा किल्विषकल्मषाणि नपुंसक इति लिङ्गानुशासनाच्च नित्यनपुंसकलिङ्गः किल्बिषशब्दः । तस्यापि शक्तस्यापि स्ववीर्यं स्वसामर्थ्यं दर्शयामास । तत्किमात्मकमित्यत आह ॥ यदिति । गले नीलवर्णं चकार । तत्साधोः परपीडापीडितस्य कृपालोर्विभूषणं न दूषणमित्यर्थः । गलकल्मषमिति पठन्तो व्याचक्रुश्च । कर्म शुभं स्यात समाप्तं करोति । कर्मशब्दोपपदात् षोन्तकर्मणीत्यस्मादुदात्तोनुपसर्गेति कप्रत्यये पृषोदरादित्वात्वषत्वयोः कल्मषमिति भवति नित्यनपुंसकः शब्दः । कल्मषं किल्बिषे क्लीबं पुंसि स्यान्नरकान्तर इति भानुनोक्तेर्नरकविशेषरूपार्थस्यात्रायोगात्पुंस्त्वं दुर्घटम् ॥ ४३ ॥

छलारी — तस्यापि महासमर्थस्यापि रुद्रस्य वीर्यं स्वसामर्थ्यं गलकल्मषो गलदोषो विषम् । किं तद्वीर्यं यस्माद्गले नीलं नीलरूपं चकार ॥ तच्च गलनैल्यं साधोर्दयालो रुद्रस्य विभूषणमभूत् ॥ ॥ ४३,४४ ॥

लिङ्गेरी — कलेरसुरश्रेष्ठस्याभिमन्यमानं शरीररूपं यत्कल्मषं विषं तत्तस्याप्युक्तरीत्या महानुभवस्य स्वल्पपायिनोऽपि रुद्रस्य स्ववीर्यं दर्शयामास । किं तद्विषदर्शितं सामर्थ्यमित्यत आह । गले रुद्रस्य कण्ठे नीलं नीलरूपं यच्चकार तदेव तत्सामर्थ्यमिति । तच्च तदपि ॥ ४३ ॥

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः ।
परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ४४ ॥

सत्यधर्मीया — लोक एवंविधा लोका लोकोपकृत्या एव प्रवर्तमाना बहव इत्याह । तप्यन्ते प्रायशः । उदासीनसमर्थैतद्यश आद्यर्थे प्रवर्तमानव्यावृत्तये प्राय इत्युक्तिः । साधवो जनाः । परेषां

तापेन स्वयं तप्यन्ते सन्तप्ता भवन्ति । तेषां चानुसन्धानमेवंविधमिति विधत्ते । अखिलात्मनः पुरुषस्य हरेः परं मुख्यमाराधनं पूजा तदिति ।। ४४ ।।

छलारी — दयालूनां लोकोपकारार्थं प्रवृत्तानामेतादृशासह्यकार्यकरणं स्वभाव इत्याह ।। तप्यन्त इति । लोकतापेन तप्यन्ते लोकानां तापं दृष्ट्वा स्वयमपि सन्तापं प्राप्नुवन्ति । तेन च परतापं परिहरन्तीति भावः । अनेन किं प्रयोजनमित्यत आह ।। परमेति । अखिलान्तर्यामिणः पुरुषस्य हरेस्तत्परमाराधनं महापूजा भवति ।। ४४ ।।

लिङ्गेरी — नीलरूपं साधो रुद्रस्य विभूषणत्वमुपपादयति । साधवो जना लोकताप्रेन जनसन्तापेन स्वयं तप्यन्त इति यत्तत् अखिलानां चेतनानामात्मनोऽन्तर्यामिणः पुरुषस्य पूर्णषड्गुणस्य हरेः परमाराधनं हीति । अन्तर्बहिः पूरुषकालरूपैरित्यादेरत्र सर्वचेतनान्तर्या-मिपुरुषशब्दितो विष्णुरेव ।। ४४ ।।

निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः ।
प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ।। ४५ ।।

सत्यधर्मीया — मीढुषो भक्ताभिलाषसेचकस्य । देवदेवस्य शम्भोस्तत्कर्म । निशम्य दृष्ट्वा प्रजाः, दाक्षायणी दक्षपुत्री । विवृतं प्राक् षष्ठे । ब्रह्मा, वैकुण्ठो विष्णुश्चैते शसंसिरे तुष्टुवुः ।। ४५ ।।

छलारी — मीढुषोऽभीष्टकर्तुर्दाक्षायणी उमा वैकुण्ठो हरिः । शसंसिर इत्यनेन रुद्रस्य यशो दातुमेव हरिणा विषं न पीतमिति ज्ञायते ।। ४५ ।।

लिङ्गेरी — प्रजा जना, दाक्षायणी सतीरूपा पार्वती, ब्रह्मा चतुर्मुखो, वैकुण्ठश्च विष्णुरपीत्येते देवानामिन्द्रादीनां देवस्य मीढुषो भक्ताभीष्टवषर्कस्य शंभोर्महारुद्रस्य तद्विषपानलक्षणं कर्म कार्यं निशाम्य दृष्ट्वा शशंसिरे । हे रुद्र । त्वं समर्थ इति स्तुवन्तः । वैकुंठश्चेत्यनेन विष्णोर्विषपानसामर्थ्ये सत्यपि मुख्यप्राणरुद्रयोः कीर्त्यभिवृद्धये तन्न पीतवानिति सूच्यते ।। तदुक्तम् ।। रुद्रस्य यशसेऽर्थाय स्वयं विष्णुर्विषं विभुः । न संजह्रे समर्थोऽपि वायुं चोचे प्रशान्तये इति । प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः । पारतन्त्र्याद्वै सादृश्याद्वयोः श्रेष्ठे चेष्टितमिति दशमस्कन्धे मुख्यप्राणादीनां जगत्स्रष्टृणां शक्तीनां स्वतन्त्रत्वेन प्रमितश्रीनारायणाधीनत्ववर्णनेन शास्त्रेणोपाध्यायमितिवत् । वायुर्यद्रुद्रेणापिबत्सहेति पूर्वमस्माभिरुक्तरीत्या विषपाने प्रधानाप्रधानयोर्मुख्यप्राणरुद्रयोर्विषपानादि-शक्तीनामपि हर्यधीनत्वाविवादाच्चायमेवार्थो युक्तः ।। ४५ ।।

प्रस्कन्नं पिबतः पाणेर्यत् किञ्चिज्जगृहुः स्म तत् ।
वृश्चिकाहिविषौषध्यो दन्दशूकाश्च ये परे ॥ ४६ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे सप्तमोऽध्यायः ।

सत्यधर्मीया — यत्किञ्चित्पिबतोऽपि हरस्य पाणेर्हस्तात्तन्मध्ये प्रस्कन्नं तद्विषम् । वृश्चिकाः शूककीटाः । वृश्चिकश्च द्रुमे राशौ शूककीट इति विश्वः । अहयः सर्पाः विषौषध्यो वत्सनाभ्यादयोः दन्दशूकाः सर्पविशेषाः । अपरे ते जगृहुः ॥ ४६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे सप्तमोऽध्यायः ॥ ८-७ ॥

छलारी — पाणेर्हस्तात्प्रस्कन्नं गलितम् । अहयोऽजगरा विषौषध्यो वृक्षादयोऽपरे च ये दन्दशूका महासर्पास्ते विजहुः ॥ ४६ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे सप्तमोऽध्यायः ॥ ८-७ ॥

लिङ्गेरी — विषं पिबतो रुद्रस्य पाणेर्यद्विषं किञ्चित्प्रस्कन्नं गलितं भूमौ पतितं तद्वृश्चिकाः प्रसिद्धाः कृमिविशेषा विषौषध्यो लांगलाद्या दंदशूका दंशनशीलसर्पा अपरे च व्याघ्रादयो ये विषदन्तास्ते जगृहुः स्वीकृतवन्तः । स्म हीति निपाताभ्यामस्य सामर्थ्यस्य श्रुत्यादिप्रसिद्धिं दर्शयति ॥ ४६ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे सप्तमोऽध्यायः ॥ ८-७ ॥

॥ अथ अष्टमोऽध्यायः ॥

श्रीशुक उवाच–

पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ।
ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥ १ ॥

सत्यधर्मीया — वृषाङ्केण । वृषो नन्दी स चाङ्को लक्ष्म वाहनत्वेन ध्वजत्वेन वा यस्य स तेन । अङ्कः स्थानेऽन्तिके मन्तौ रूपकोच्छुङ्गलक्ष्मस्विति विश्वः । हरादिनामागृह्णानो गृह्णानो वृषाङ्कपदं वृषो

वृषभरूपम् । अङ्कस्थानं सत्यकामोपदेशस्य, यस्य सवायुस्तेनापि पीत इति भावं च ध्वनयामासेति ज्ञेयम् । अथ हैनमृषभोऽभ्युवाद । वायुर्वृषभरूपःसन्निति छान्दोग्योपनिषद्भाष्योक्तेः । हविः पयोरूपं धीयतेऽस्यामिति सा कामधेनुः ॥ १ ॥

छलारी — वृषाङ्केण वृषध्वजेन शिवेन । हविर्धानी कामधेनुः ॥ १ ॥

लिङ्गेरी — एवं रुद्रेण विषपाने कृते सति तेऽमरा दानवाः प्रीताः सन्तः सिन्धुं क्षीरसमुद्रं तरसा वेगेन ममन्थुः । ततो मथितात्समुद्राद्धविर्धान्यग्निहोत्रादिहविर्योग्यक्षीरादिदात्री कामधेनुरभवत् ॥ ॥ १ ॥

तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ।
यज्ञस्य देवपानस्य मेध्याय हविषे नृप ॥ २ ॥

सत्यधर्मीया — अग्निहोत्रोपयुक्तत्वेनाग्निहोत्री ताम् । देवपानस्य देवानां पानं सोमपानं यस्य यज्ञस्य मेध्याय पवित्राय हविषे । ब्रह्मवादिनः ऋषयः । जगृहुः । देवयानस्येति पाठे ब्रह्मलोक-प्रापकमार्गस्येति वा ॥ २ ॥

छलारी — तामग्निहोत्रीं कामधेनुं देवानां सोमपानं यस्मिन्नस्य यज्ञस्य सम्बन्धिने मेध्याय पवित्राय हविषे । देवयानस्येति पाठे ब्रह्मलोकमार्गप्रापकस्य यज्ञस्येत्यर्थः ॥ २ ॥

लिङ्गेरी — हे नृप । ऋषयस्त्रिकालदर्शिनो ब्रह्मवादिनः परब्रह्मप्रतिपादकवेदाध्ययनशीलाः मुनयोऽग्निहोत्रोपयुक्तां तां धेनुं यज्ञस्य, देवानां पानस्य पानयोग्याय मेध्याय पवित्राय हविषे हविरर्थं जगृहुः । देवानां पानयोग्यं क्षीरादि यस्मिंस्तस्य यज्ञस्येति वा ॥ २ ॥

तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥

सत्यधर्मीया — चन्द्रवत्पाण्डुरः शुभ्रवर्णः । तस्मिन् उच्चैःश्रवसि । कार्यानिष्पत्तेर्न चतुर्थी । बलिः स्पृहां चक्रे । इन्द्रश्चेश्वरशिक्षया स्पृहां न चक्र इत्यन्वयः । चन्द्रपाण्डुर इत्यावर्तते ॥ ३ ॥

छलारी — चन्द्र इव पाण्डुरः । स्पृहामिच्छाम् । ईश्वरशिक्षया मथनात्प्रागेव कृतया ॥ ३ ॥

लिङ्गेरी — ततस्तदनन्तरं क्षीरसमुद्राच्चन्द्रवत्पाण्डुरः शुभ्रो नाम्नोच्चैःश्रवा हयोऽश्वोऽभूदुत्पन्नः । बलिर्विरोचनस्तस्मिन्नुच्चैःश्रवसि स्पृहामाकाक्षां चक्रे । ईश्वरस्य विष्णोः शिक्षयाऽऽज्ञया इन्द्रस्तत्स्पृहां न चक्रे ॥ ३ ॥

तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महम् ॥ ४ ॥

सत्यधर्मीया — भगवतो भवस्य श्वेताद्रेः कैलासस्य । अनेनैव धावल्यमर्थाल्लब्धं श्वेतपदस्वारस्यात् तदननुवृत्तिर्वा । महं कान्तिम् ॥ ४ ॥

छलारी — चन्द्रपाण्डुर इत्यनुवर्तते । वारणेन्द्रो गजश्रेष्ठश्चतुर्भिर्दन्तैः शिखरतुल्यैः । भगवतो रुद्रस्य श्वेताद्रेः कैलासस्य महं महत्त्वं हरन्विनिर्गत उदभूत् ॥ ४ ॥

लिङ्गेरी — तत ऐरावताख्यो वारणानां गजानामिन्द्रः श्रेष्ठः स्वस्य चुतुर्भिर्दन्तैः श्वेतपर्वतस्य भगवतोऽनुग्रहेण महाकान्तिं हरन् सन्विनिर्गतः ॥ ४ ॥

ततोऽभवत् पारिजातः सुरलोकविभूषणः ।
पूरयत्यर्थिनो योऽर्थैः शश्वद् भुवि यथा भवान् ॥ ५ ॥

सत्यधर्मीया — सुरलोकविभूषणं यस्मात् सुरलोकं विभूषयतीति स तथा वा । योऽर्थिनः पुराषार्थापेक्षावतो जनान् । अर्थैः विषयैस्तैः तैः पूरयति । तत्रान्यत्र निदर्शनं दर्शनीयं त्वत्त इत्याह । शश्वदिति । भुवि भवान्यथेति साम्यं शश्वदसङ्कल्पनसमयेऽपीति ततोऽतिरेकः । शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमला इतिवत् । निरपेक्षावधूतमुखत एवमुक्तिरनौपचारिकी न दाक्ष्यादिति ज्ञायते ॥ ५ ॥

छलारी — सुरलोकं स्वर्गलोकं विभूषयतीति तथा । तन्महिमानमाह ॥ पूरयतीति । अर्थैरिष्टैः शश्वत्सर्वदा । परीक्षिद्राजानमेव दृष्टान्तयति ॥ भुवि यथा भवानिति ॥ ५ ॥

लिङ्गेरी — तदनन्तरं सुरलोकं स्वर्गं विभूषयतीति विभूषणः पारिजातो वृक्षोऽभवत् । यः पारिजातो भुवि भवान्यथा योऽर्थैर्भूम्यां स्थितैः पुरुषार्थैरर्थिनः पुरुषार्थकांक्षिणः पुरुषान् तथा पूरयति पूर्णान्करोति ॥ ५ ॥

ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ।
रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ॥ ६ ॥

सत्यधर्मीया — निष्कं ग्रैवेयकं कण्ठालङ्कारो यासां ताः अङ्गगात्रेति वार्तिकात् ङीप् । निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलङ्करण इति विश्वः । रमण्यः रमणीयाः । करणम् ईरयति । वल्गुगतीति । वल्ग्विति सर्वान्वयि । वल्गुः काके मयूरेच वल्गुभाषितमन्यवदिति विश्वः । वल्गुः स्यात् हृदयङ्गम इति रभसः । स्वर्गिणां नाकिनाम् ॥ ६ ॥

छलारी — निष्कमाभरणविशेषः । वल्गुभिः सुन्दरैर्गत्यादिभिः स्वर्गिणां रमण्यो रतिं कुर्वन्त्यः ॥ ६ ॥

लिङ्गेरी — ततो निष्कं कण्ठाभरणं कण्ठेषु यासां ताः । सुवाससः, स्वर्गिणां स्वर्गस्थप्राणिनां वल्गुगतिलीलावलोकनैर्मनोहरगमनक्रीडाकटाक्षदर्शनै रमण्यः सुखजनका अप्सरसो जाताः ॥ ६ ॥

ततश्चाऽऽविरभूत् साक्षाच्छ्रीरमा भगवत्प्रिया ।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा ॥ ७ ॥

सत्यधर्मीया — श्रीमती च सा रमा च । सौदामनी । श्वेतद्वीपः सुदामेति त्रिकाण्डशेषे । तेनैक दिगित्यण् । अन्निति प्रकृतिभावादिलोपाल्लोपौ न भवतः । सुदामा कश्चिदद्रिरिति वा । सुदामातु पुमान् वारिधरपर्वतभेदयोः । सुदाम्नि मेघे भवा वा । सौदामन्यप्सरोभेदे तटितद्भेधयोरपीत्यादेः सौदामिनीत्यपपाठ इति भानुः । विद्युद्यथा साच सुदामोत्पन्नेति सौदामनी विद्युत्प्रकाशमान् इति वा न पुनरुक्तिः । विद्युद्यथा । सौदामनी अप्सरसः यथेत्यन्वयो वाक्यभेदेन वा ज्ञेयः ॥ ७ ॥

छलारी — विद्युद्विद्योतमाना सौदामिनी यथा तद्वत् । स्वकान्त्या दिशो रंजयन्ती श्रीर्भगवत्प्रिया साक्षाद्रमाऽऽविरभूदित्यर्थः ॥ ७ ॥

लिङ्गेरी — ततो रमयति सुखयति स्वदर्शनादिनेति रमा, भगवति विष्णौ परा तात्पर्यलक्षणभक्तिमती साक्षान्निरुपचारेण श्रीशब्दवाच्या लक्ष्मीः । सौदामिनिकृता रूपा विद्युत्तटिद्यथा तथा स्वकांत्या दिशो रञ्जयन्त्यलङ्कुर्वती सत्याविरभूत् । अत्र साक्षाछ्रीरित्यनेन सर्गाभिमानिश्रीर्निवारिता । आविरभूदित्यनेन लक्ष्म्याः ज्ञानानन्दात्मकदेहतया नारायणवत्प्रादुर्भाव एव न तु देहोत्पत्तिरित्यसूचि ॥ ७ ॥

तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ।
रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ८ ॥

सत्यधर्मीया — असुरासुरमानवाः इति छेदः । सुरैः सहिताः ससुराः ते न भवन्तीति ते तथा । ते च ते असुराश्च मानवा असन्तश्च ते । ससैन्यं रावणं हत्वेत्यादिवत्सुरसाहितीमात्रमभिहितम् । वस्तुतस्तु न स्पृहाकरण इति वा ससुरेत्युक्तिः । स्पृहाहेतुमाह । रूपेति ॥ ८ ॥

छलारी — तस्यां रूपादिमहिम्नाऽऽक्षिप्तमाकृष्टं चेतो येषां ते तथा । ज्ञानिनामपि रागजनकलोकविलक्षणसौन्दर्यं लक्ष्म्यामस्तीति द्योतयितुं सुरग्रहणं कृतमित्यवधेयम् ॥ ८ ॥

लिङ्गेरी — तस्यां लक्ष्म्यां ससुरासुरमानवाः सर्वे प्राणिनो, रूपं सौन्दर्यमौदार्यं महत्वं वयस्तारुण्यं वर्णो रूपं सुवर्णादिरूपं तेषां महिम्ना माहात्म्येनाक्षिप्तं स्थापितं चेतोऽन्तःकरणं यैस्ते तथा सन्तः स्पृहां चक्रुः ॥ ८ ॥

तस्याश्चासनमानिन्ये महेन्द्रो महदद्भुतम् ।
मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ॥ ९ ॥

सत्यधर्मीया — मूर्तिमत्यः धृताकाराः ॥ ९ ॥

छलारी — इदानीं लक्ष्म्याः स्वयंवरं वक्तुमादावभिषेकमहोत्सवमाह ॥ तस्याश्चेत्यादिना । मूर्तिमत्यः शरीरधारिण्यः ॥ ९ ॥

लिङ्गेरी — लक्ष्मीसौन्दर्यादिना वशीकृतान्तःकरणतयेन्द्रादीनां तत्सेवाप्रकारमाह ॥ तस्याश्चेत्यादिना । महेन्द्रस्तस्या अद्भुतमाश्चर्यकरं महदासनं महत्पूज्यमासनमानिन्ये । मूर्तिमत्यो देहधारिण्यः सरिच्छ्रेष्ठा भागीरथ्यादिदेवता सुवर्णकलशैः शुचि निर्मलं जलमानिन्युः ॥ ९ ॥

अभिषेचनिका भूमिराहरत् सकलौषधीः ।
गावः पञ्चपवित्राणि वसन्तो मधु माधवम् ॥ १० ॥

सत्यधर्मीया — अभिषेचनिकाः अभिषेकोपयुक्ताः । गावः पञ्च पवित्राणि गोमयादीनि । माधवं मधौ वसन्ते भवं मधु ॥ १० ॥

छलारी — अभिषेचनिका अभिषेकोचिताः । सकलौषधीः सकलधान्यानि । पञ्च पवित्राणि गोमयादीनि पञ्चगव्यानि वसन्तो वसन्त ऋत्वभिमानिदेवता मधुमाधवं चैत्रवैशाखफलसंभवं फलपुष्पादिकम् ॥ १० ॥

लिङ्गेरी — भूमिदेवता अभिषेचनिका अभिषेकोचिताः सकलौषधीरहरदानीतवती । गावः पवित्राणि क्षीरादीनि पञ्चगव्यादीन्याहरन् । वसन्तो माधवं चैत्रोत्पन्नं मध्वाहरत् ॥ १० ॥

ऋषयः कल्पयाञ्चक्रुरभिषेकं यथाविधि ।
जगुर्भद्राणि गन्धर्वा नार्यश्च ननृतुर्जगुः ॥ ११ ॥

सत्यधर्मीया — भद्राणि मनोहराणि ॥ ११ ॥

छलारी — अभिषेकमभिषेकविधिम् । भद्राणि मङ्गलानि गायनानि । नर्तक्यो नटनस्त्रियः ॥११॥

लिङ्गेरी — ऋषयोऽभिषेकं यथाविधं कल्पयांचक्रुः कृतवन्तः । गन्धर्वा भद्राणि मङ्गलानि जगुर्नटा विद्याधरादयो ननृतुः किन्नराश्च जगुः ॥ ११ ॥

मेघा मृदङ्गपणवमुरजानकगोमुखान् ।
व्यनादयन् शङ्खवेणुवीणातुमुलनिःस्वनान् ॥ १२ ॥

सत्यधर्मीया — मृदङ्गो मर्दलः । मृदक्षौदे विडादिभ्यः किदित्यङ्गच् । मृदङ्गमस्येति वा । मृदङ्गो वाद्यघोषयोरिति हैमः । पणं व्यवहारं वातीति पणवः । वातेः कः । मुरवेष्टने तुदादिः पञ्चम्यामिति डः । मुराज्जायते इति मुरजः । आनको ढक्का । गोमुखाः एते वाद्यविशेषाः । शङ्खश्च वेणुश्च वीणा च तासां तुमुलो निःस्वनो येषां ते तान्मृन्दगादीन् ॥ १२ ॥

छलारी — शङ्खादीनां तुमुलो गंभीरा निःस्वना येषु तान्मृदंगादीन् ॥ १२ ॥

लिङ्गेरी — वाद्यघोषका मृदंगपणवमुरजानकगोमुखान्यवादयन् । शङ्खवेणुवीणानां तुमलान्सन्दडितान्निःस्वनांश्चक्रुः ॥ १२ ॥

ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् ।
दिगिभाः पूर्णकलशैः सूक्तवाकैर्द्विजेरितैः ॥ १३ ॥

सत्यधर्मीया — दिगिभाः ऐरावतपुण्डरीकाद्याः । सूक्तवाकैः वाकानुवाकैर्वाक्य विशेषैः ॥१३॥

छलारी — दिगिभा दिग्गजाः ॥ १३ ॥

लिङ्गेरी — ततो दिश इभा गजा ऐरावताद्याः पूर्णकलशैर्ब्राह्मणोक्तैर्महाभिषेकसूक्तवाक्यैः पद्मकरां सतीं निर्दुष्टां श्रियमभिषिषिचुः ॥ १३ ॥

समुद्रः पीतकौशेयवाससी समुपाहरत् ।
वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ॥ १४ ॥

सत्यधर्मीया — समुद्रः पिता । पात्राभिमानी । वरुणः जलमात्राभिमानिरूपान्तरम् । नाममात्रं भिन्नं न वस्तुद्वैराश्यं इति ज्ञेयम् । मत्ताः षट्पदाः भ्रमरा यस्यां सा ताः । मदनिमित्तं मध्वित्याह ॥ मधुनेति ॥ रसविशेषेण ॥ १४ ॥

छलारी — मधुना मकरंदपानेन मत्ताः षट्पदा भ्रमराः यस्यां तां वैजयन्तीं स्रजम् । अत्र समुद्रो वरुणस्यैव रूपान्तरं न पृथगिति ज्ञातव्यम् ॥ १४ ॥

लिङ्गेरी — समुद्रो वरुणः पीतकौशेयवाससी हरिद्रावर्णकुशकृमिनिर्मितवस्त्रे । मत्ताः पुष्परसपानजमदोपेताः षट्पदा भ्रमरा यस्यास्तामत एव धुनानां चाञ्चलयन्तीं नानासुगन्धपुष्पनिर्मितां स्रजं मालां च समुपाहरत् ॥ १४ ॥

भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ।
हारं सरस्वती पद्ममजो नागाश्च कुण्डले ॥ १५ ॥

सत्यधर्मीया — विश्वकर्मा तत्स्नुषा सरस्वती । हारं मुक्तामालाम् । हारो मुक्तावलाविति विश्वः । अजः ब्रह्मा । नागाः सर्पाः ॥ १५ ॥

छलारी — प्रजापतिर्विश्वकर्मा । अजो ब्रह्मा । नागाः सर्पाः ॥ १५ ॥

लिङ्गेरी — प्रजापतिर्विश्वकर्मा देवशिल्पिर्विचित्राणि भूषणान्याहरत् । सरस्वती ब्रह्माणी हारं मुक्तासरमजो ब्रह्मा पद्ममाहरत् । नागाः सर्पाः कुण्डले कर्णाभरणेऽहरन् ॥ १५ ॥

ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ।
चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ॥ १६ ॥

सत्यधर्मीया — कृतस्वस्त्ययना कृतपुण्याहवाचना । नन्दन्तो द्विरेफा भ्रमरा यस्यां सा ताम् । चचाल अचलत् । निरगादिति यावत् ॥ १६ ॥

छलारी — इदानीं स्वयंवरप्रकारमाह ॥ तत इति । कृतस्वस्त्ययना कृतपुण्याहवाचना । नदन्तो हुंकारं कुर्वन्तो द्विरेफा भ्रमरा यस्यास्तामुत्पलमालाम् । चचाल निरगात् ॥ १६ ॥

लिङ्गेरी — ततस्तदनन्तरं लक्ष्मीः कृतं स्वस्त्ययनं पुण्याहो यया सा सती । नन्दन्तो ध्वनिं कुर्वाणा द्विरेफा भ्रमरा यस्यां सा तामुत्पलस्रजं पाणिना प्रगृह्य सुकपोलकुण्डलं, सुशोभनं, व्रीडया लज्जया हासेन च सहितं वक्त्रं मुखं दधती सती चचार संचारं कृतवती ॥ १६ ॥

स्तनद्वयं चातिकृशोदरी समं निरन्तरं चन्दनकुङ्कुमोक्षितम् ।
ततस्ततो नूपुरवल्गुसिञ्जितैर्विसर्पती हेमलतेव सा बभौ ॥ १७ ॥

सत्यधर्मीया — समं निरन्तरम् । अन्तरवकाशशून्यम् । चन्दनकुङ्कुमेक्षितं स्तनद्वयं दधतीति पूर्वेणान्वयः । अतिकृशोदरी विसर्पती सा हेमलता सुवर्णवल्लीव बभावभात् ॥ १७ ॥

छलारी — अतिकृशोदरी सूक्ष्ममध्या निरन्तरमन्योन्यमत्यन्तसम्बद्धं सममेकप्रकारं स्तनद्वयं च दधती । चन्दनेन कुङ्कुमेनोक्षितं लेपितम् । नुपूरयोर्वल्गुभिः श्राव्यैः सिंजितैर्ध्वनिभिर्युक्ता ततस्ततस्तत्र तत्र विसर्पती शनैः शनैर्गच्छन्ती ॥ १७ ॥

लिङ्गेरी — अतिकृशोदर्यत्यल्पमध्यदेशा निरन्तरं घनं समं चन्दनकुङ्कुमकेसराभ्यां भूषितं लिप्तं स्तनद्वयं च दधाना, ततस्ततस्तत्र तत्र वल्गुभिर्मनोहरैः सिंजितैर्भूषणध्वनिभिः । भूषणानां तु सिंजितमित्यमरः । विसर्पती सञ्चारं कुर्वती सा रमा हेमलतेव बभौ ॥ १७ ॥

विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणम् ।
गन्धर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविन्दत् ॥ १८ ॥

सत्यधर्मीया — लोकं अनुकुर्वन्त्या लोकमातुः कश्चन विलासमालपति । विलोकयन्तीति । ध्रुवं निरवद्यं निर्दुष्टम् । अव्यभिचारिणो नान्यत्रातिव्याप्ताः सन्तो गुणा यस्य तम् । आत्मनः स्वस्याः पदं भर्तृस्थानम् । त्रैविष्टपेयाः तृतीयं विष्टपं स्थानं यस्याः सा त्रिविष्टपा अदितिस्तस्या अपत्यानि आदितेयाः त्रैविष्टपेयाः । स्त्रीभ्यो ढगिति ढक् । तदादिषु विलोकयन्ती नान्वविन्दत् न लब्धा । तात्पर्यं निर्दोषतायामिवेतरसदोषतायां रमाया ज्ञेयम् ॥ १८ ॥

छलारी — गन्धर्वादीन्विलोकयन्ती रमा तेषु मध्ये आत्मनः स्वस्याः पदं पदलक्षणमाश्रयं ध्रुवं निरवद्यं निर्दोषमव्यभिचारिणो नित्याः सन्तो निर्दुष्टा गुणा यस्मिंस्तं नान्वविन्दत नामन्यत । त्रैविष्टपेयास्त्रिविष्टपसम्बन्धिनो देवाः ।। १८ ।।

लिङ्गेरी — सा लक्ष्मीर्निरवद्यं पारतन्त्र्याद्यशेषदोषविदूरमव्यभिचारिणोऽतिव्याप्तिरहिताः सन्तोऽव्याप्त्यसंभवविधुरागुणाः शुभधर्मा यस्य तम् । आत्मनः स्वस्य ध्रुवं सर्वदैकप्रकारतया स्थिरतरं पदमाश्रयीभूतं पतिं, गन्धर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु विलोकयन्ती सती नान्वविंदत न प्राप्तवती । त्रैविष्टपेया देवाः ।। १८ ।।

नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित् तच्च न सङ्गवर्जितम् ।
कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ।। १९ ।।

सत्यधर्मीया — कस्मिन् कस्मिन् कं कं दोषं योषिद्विलोक्य तं तं तत्याजेत्यतो व्याजहार । नूनमिति । तपो यस्य दूर्वासआदेः नूनं तपोऽस्ति निश्चयेन मन्युनिर्जयः कोपजयो नूनं नास्तीत्येत-दादावन्वेति । तपश्च विधिनोक्तमार्गेण कृच्छ्रचान्द्रायणादिभिः । शरीरशोषणं प्राहुस्तापसां तप उत्तममित्यादि प्रोक्तम् । अम्बरीषादौ तद्व्यापृतिदृष्टेः न मन्युजयः तस्मिन्निति भावः । ज्ञानं क्वचित् बृहस्पत्यादौ वर्तते । तच्च ज्ञानं सङ्गवर्जितम् न। स्वभ्रातृभार्यां गर्भिणीं बलादगच्छदिति न सङ्गवर्जितमिति स न मदुद्वाहार्ह इति भावः । कश्चित् महान् वयसा गुणेन च । महान् महत्तत्वाभिमानिचतुर्मुखः । महतश्चतुर्मुखादित्यादेरिति वा । कस्मै देवाय हविषा विधेमेत्यादेः । ब्रह्मास्ति तथापि तस्य कामनिर्जयः नास्ति नूनम् । प्रजापतिर्वै स्वां दुहितरमभ्यधावदिति श्रुतेः । न च सङ्गवर्जितमित्यनेनाहं महानपि गृहीतुमर्ह इति अतिरिच्य ते न कामनिर्जय इति वाच्यम् । अत्र कामनामात्रम् । तदपि न मे हृषीकाणि पतन्त्यसत्पथ इति तदुक्तेः प्रदर्शनमात्रम् । तत्र तु संसर्ग इति महता भेदेनोक्त इति ज्ञेयम् । य ईश्वर इन्द्रः सोऽपि किं प्रयोजकः । परतो व्यपाश्रयः व्यपाश्रयतीति स तथा । परतः परम् । इतराश्रयणेन वर्तमानो भर्ता कथं मम भवेदिति भावः ।।१९।।

छलारी — कुतो नामन्यत इत्यतः क्वचित्कस्यचिद्दोषस्य सद्भावादित्याह ।। नूनमित्यदिना । क्वचिद्गुरुशुक्रादिषु ज्ञानमस्ति । तज्ज्ञानं संगेन फलासक्त्या रहितं न । क्वचिद्ब्रह्माऽस्ति । तस्य कामनिर्जयो नास्ति । प्रजापतिः स्वां दुहितरमभ्यधावदिति श्रुतेः । यः परतो व्यपाश्रयः परापेक्ष इन्द्रादिः स ईश्वरः किं नैवेत्यर्थः ।। १९ ।।

लिङ्गेरी — गन्धर्वादिषु स्वपतित्वायोग्यताविमर्शप्रकारमाह ॥ नूनं तपो यस्येत्यादिना सोऽप्यमङ्गल इत्यन्तेन । यस्य तपः कायशोषणादिरूपं, "शरीरशोषणं प्राहुस्तपसामुत्तमं तपः" इत्यादिप्रमाणसिद्धमस्ति । तस्य पुरुषस्य मन्युनिर्जयः कोपजयो नास्ति । मन्युः क्रोधे क्रतौ दैन्य इति नानार्थरत्नमाला । नूनं निश्चयः । अनेन ऋषयो निराकृताः । कंचित्पुरुषे ज्ञानमस्ति तत्ज्ञानं संगवर्जितं फलाकांक्षारहितं न । नूनमिति । अनेन बृहस्पत्यादयो निराकृताः । देवेषु कश्चिच्चतुर्मुखो महानस्ति तस्य कामनिर्जयो नास्ति । प्रजापतिः स्वां दुहितरमभ्यध्यादिति श्रुतेः । यः परतो व्यपाश्रयोऽन्याश्रितः, स्वसंपदेऽस्य देवस्येति पूर्वोक्तश्रुतौ विष्ण्वनुग्रहेण प्राप्तपदो रुद्र ईश्वरः किं नेत्यर्थः । ईश्वरः सर्वभूतानामिति श्रुतिर्निरवकाशाऽस्य देवस्येति श्रुत्या बाधितार्थतया विवक्षितसर्वभूतेश्वरत्वं प्रतिवदतीति भावः ॥ १९ ॥

धर्मः क्वचित् तस्य न भूतसौहृदं त्यागः क्वचित् तच्च न मुक्तिकारणम् ।
वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥ २० ॥

सत्यधर्मीया — क्वचित् धर्मरूपे धर्मो वर्तते तस्यैव यमरूपे भूतसौहृदं नास्ति शिक्षाध्यक्षत्वात् । क्वचिद्धनदे त्यागः वित्तवितरणमात्रम् । तत्सत्पात्रेभ्यो नेति मुक्तिकारणं न । तच्च तदपि मुक्तिकारणम् । मत्कर्तृकत्यागकरणम् । न वरवरणकारणमित्यावृत्त्यार्थोज्ञेयः । क्वचित्कार्तवीर्यादिः पुंसः वीर्यमस्ति । अजवेगस्य कालचक्रवेगस्य निष्कृतम् । प्रतीकाररूपं न । गुणसङ्गवर्जितः सनकादिः नहिद्वितीयः । न हि विद्यते द्वितीया भार्या यस्य स तथा । नित्यं ब्रह्मचारित्वात्तस्येति भावः । पत्नीपाणिग्रहीति स्याद्द्वितीया सहधर्मिणीत्यमरः । मम द्वितीयः भर्ता न भवतीति वा ॥२०॥

छलारी — क्वचित्संयमिन्यां धर्मो यमस्तस्य भूतसौहृदं भूतेषु प्राणिषु सौहृदं दया नास्ति । निरनुक्रोशाधिकारप्रवृत्तत्वात् । क्वचित्पुंसि पुण्यलक्षणधर्मोऽस्ति तस्य भूतसौहृदं नेति सामान्यनिषेधो वा । क्वचित्पुरुषे त्यागो नामार्थिभ्यो देवतादिभ्यो वा न्यायार्जितधनत्यागः । तच्च यजनमपि मुक्तिकारणं न । भगवदर्पणबुध्याऽननुष्ठितत्वात् । कस्यचित्पुंसः कार्तवीर्यार्जुनादेः सामर्थ्यमस्ति तदजवेगेन कालवेगेन परिहृतं न भवति । अनित्यमित्यर्थः । गुणसंगेन नित्यसंगेन विषयसंगेन वर्जितः स न कदाऽपि द्वितीयो मम वरो न हि । समाधिनिष्ठत्वात् । वरस्य वध्वापेक्षया द्वितीयत्वात् द्वितीय इत्युक्तम् । अत एव वध्वा वधुवरा इति प्रथमतो निर्देशः ॥ २० ॥

लिङ्गेरी — क्वचिद्यमादौ धर्मोऽस्ति । यस्य धर्मादेर्भूतेषु सौहृदं स्नेहो दया नास्ति । निर्दयव्यापारप्रवृत्तत्वात् । क्वचित्कुबेरादौ त्यागो द्रव्यदानमस्ति तच्च त्यजनं तस्य मुक्तिकारणं न । कस्यचित्पुंस इन्द्रादेर्वीर्यमस्ति तच्चाजस्य हरेर्वीर्यात् निष्कृतं निष्क्रान्तमनाश्रयं न । तदेवं नारायणं विना समो गुणादिकार्यक्रोधादिदोषरहितः समस्तचेतनेष्वपि द्वितीयो नास्ति ॥ २० ॥

क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित् तदप्यस्ति न वेद्यमायुषः ।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्चन कांक्षते हि माम् ॥ २१ ॥

सत्यधर्मीया — चिरायुः दीर्घमायुरस्ति । अश्वत्थाम्नि । न शीलमङ्गलम् । शीलेन स्वाचारेण मङ्गलम् न हि । पूतिगन्धित्वादिनाऽमङ्गलकरत्वादिति भावः । तदपि शीलमङ्गलम् क्वचिन्मनुष्योत्तमादौ आयुषः । आयुर्नवेद्यं इयदिति ज्ञातुमशक्यम् । स्थिरं नेति तात्पर्यम् । तत्रायुर्मानं तथावेद्यं चेत्युभयं रुद्रे वर्तते चेदपि सोऽमङ्गलः श्मशानवेश्मत्वादेः । चिरायुष्ट्वशीलमङ्गलेत्युभय ग्रहणे मङ्गल इति बाधितार्थमिति ज्ञेयम् । कश्चित् त्वत्कामुको वर्तेतेत्यतो न तादृशो मदीश इत्युपदिशति । कश्च सुमङ्गलः पूर्वोदीरितदोषाकलुषः मां न हि काङ्क्षते काङ्क्षति । निरपेक्षमिति वक्ष्यमाणत्वात् । ममैव तदपेक्षा स च निर्मम इति भावः । मन्युनिर्जयः दैन्यनिर्जयो न नास्ति । तपः तापकतास्ति मन्युर्दैन्ये क्रतौ क्रुधीति विश्वः । अनेन सूर्यपर्यासः । क्वचित् ज्ञानं मनोनियामकत्वात् यामिनीनियामके सङ्गवर्जितं नेति तारारन्तृत्वाच्चन्द्रविद्रावणम् । वर्जितं भावे क्तः सङ्गवर्जनं क्वचिद्वायौ वर्ततेऽथाप्यज्ञानं हरिविषये इति सोऽपिप्रतिषिद्धः । यस्य हिरण्यकस्य । तपः ब्रह्माणं प्रति तत्करणात् । मन्युनिर्जयः । तस्य न । नास्तीत्यसुरस्य क्रुद्धस्य यस्य कम्पन्ते त्रयो लोका इति तदुक्तेः । कुबेरं निराकृत्यैव यक्षान्यध्यक्षतायाः उक्तेर्यक्षस्य । क्वचित्तस्य भूतसौहृदं दीन-शिखण्ड्यादिशरीरदानेन तुम्बरो दृश्यते चेदपि न धर्मः । स्वस्वाम्यागमन उत्थानाभिगमनादिपुण्यं नास्तीति गन्धर्वस्य । ईश्वरः ईशत्वादिसिद्धिमान् कश्चित् चेदपि परतोव्यपाश्रयः । न निरवधितदवधिकत्वमिति सिद्धस्य । परतो व्यपाश्रयश्चारणः । स ईश्वरः किमिति चारणस्य च प्रतिषेधो वादानुकूल्यायानुसन्धेयः ॥ २१ ॥

छलारी — क्वचिन्मार्कण्डेयादौ चिरायुर्दीर्घायुषमस्ति । तत्र शीलमङ्गलं मङ्गलशील-मनुकूलस्वभावो नास्ति । इन्द्रियादमनशीलत्वात् । क्वचित्पुंसि तदपि तादृशं शीलमप्यस्ति । तत्रायुषः स्थैर्यं न वेद्यं दुर्ज्ञेयम् । अकस्मादेव मृत्युसंभवात् । यत्र कुत्र च रुद्रादाविन्द्रियदमनाद्यभावात् ।

मङ्गलं शीलमायुषः स्थैर्यं निश्चयश्चेत्युभयमप्यस्ति । तथाऽपि सोऽप्यमङ्गलः । स्मशानवासाद्यमङ्गल-चेष्टितैर्गर्हितः । ब्रह्माऽतिवृद्धः । सूर्यः सन्तापकर्ता । वायुश्चञ्चलो, रुद्रो दिगंबर, इन्द्रो गर्वी, चन्द्रः प्रतिदिनं क्षययुक्तः । एवमादिप्रकारेणापि रमादेव्या ब्रह्मादीनां दोषाश्चिन्तिता इति ज्ञेयम् ।

एष ब्रह्माऽतिवृद्धस्तपति दिनपतिश्चञ्चलो मातरिश्वा
दिग्वासा नीलकण्ठस्त्रिदशपतिरसौ गर्वितः क्षीयतेऽब्जः ।
इत्थं देव्याविचिन्त्य भ्रमरकुलकलागीतशब्दप्रफुल्ला
दत्ता माला मुरारेः सुरतरुकुसुमालङ्कृता पातु युष्मान् ।। इत्यादिपुराणवचनात् ।

तर्हि सर्वेषां सदोषत्वेन तव निर्दोषः पतित्वेन स्वीकार्यः क इत्यतो मुकुन्दं लक्षीकृत्याह ।। कश्चनेति । लोके विलक्षणः सुमङ्गलो निर्दोषश्च मां कांक्षते । तं वरं वृणोमीत्याशयः । यद्वा । कश्च नेत्येतत्पदद्वये कश्च यः कश्चिल्लोकविलक्षणः सुमङ्गलो निरवद्यश्चास्ति सोऽपि मां न हि कांक्षते । आत्मारामादित्याशयः ।। २१ ।।

लिङ्गेरी — क्वचित्पुरुषे चिरायुरस्ति । शीलेन सत्स्वभावेन युक्तं मङ्गलं नास्ति । क्वचिच्च तदपि शीलं मङ्गलमप्यस्ति तथाऽप्यायुष इयत्ता वेद्यं ज्ञानं नास्ति । यत्र कुत्र चोभयमायुर्ज्ञानं चेत्युभयमस्ति सोऽपि कालान्तरेण मरणवत्त्वेनामङ्गलः । कश्चन लोकविलक्षणः सुमङ्गलः सर्वदा माङ्गल्ययुक्तः श्रीनारायणो मां कांक्षते । ययोरेव समं वित्तमित्यादिश्रुतिस्मृतिसिद्धसाम्यस्य द्वावेतौ नित्यमुक्ता-वित्यादिश्रुतिसिद्धत्वात् । मम सर्वकालेऽपि तत्स्त्रीत्वात् । मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्य-हमिति तदुक्तेरित्याद्यर्थं हिशब्देनाह । नारायणस्य सर्वचेतनवैलक्षण्यं सर्वदा माङ्गल्यं च ''द्वाविमौ पुरुषौ लोके । उत्तमः पुरुषस्त्वन्यः । मङ्गलानां च मङ्गलम्'' इत्यादि भारतसिद्धम् ।। २१ ।।

श्रीशुक उवाच–

एवं विमृश्याव्यभिचारिसद्गुणं पदं निजैकाश्रयिसद्गुणाश्रयम् ।
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ।। २२ ।।

तात्पर्यम् – 'अनाद्यनन्तकालेऽपि विष्णुमेवाश्रिता रमा ।
अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतराञ्जहावि'ति च ।। २२ ।।

सत्यधर्मीया — एवं विलोक्येति श्लोके तर्हि नियतभार्याया रमाया इतरालोचनं कथं युज्यते उच्यमानमित्यतो मानेनार्थमाह ।। अनाद्यनन्तेति ।। अन्येषां एते दोषिण इति ज्ञापनार्थाय दोषानुक्त्वा

इतरान् जहौ तत्याज । एवं गुणान् दोषांश्चेतरेषु विमृश्य तांस्त्यक्त्वा रमा । अव्यभिचारिणः कचिच्चाव्यभिचीर्णाः सन्तो गुणा यस्य तम् । निजः स्वयं तेनैवैको मुख्यश्चासावाश्रयश्च स एषामस्ति ते निजैकाश्रयिणः । तेषां सन्तो गुणास्तेषां तत्तद्योग्यतानुसारेणाश्रयस्तम् । सर्वगुणैः दोषासमधिकरणैः । अपेक्षितं वस्तुमिति शेषः । गुणा एव तमपेक्षन्त इति भावः । सर्वगुणैः करणैरपः पालकान्तररहितः इतीक्षितः ज्ञानदृष्टिविषयीकृतस्तमिति वा । मुकुन्दं पदं तद्रूपम् । वव्रे । परं पतिं अत्यन्तमिति वा । ईप्सितं स्वकाङ्क्षितम् । सोऽपि स्वसाकाङ्क्षश्चेदपूर्णः स्यादित्यत आह ।। निरपेक्षमिति । रमाया रतिपात्रतेत्यादेः ।। २२ ।।

छलारी — एवं विमृश्य विचार्य रमा निरपेक्षमपि मुकुन्दमेव वव्रे । तत्र हेतुः ।। अव्यभिचारीत्यादि । अव्यभिचारिभिरन्यत्राविद्यमानैः परिपूर्णैरित्यर्थः । सद्भिः कल्याणैः ज्ञानैश्वर्यप्रभवानन्दतेजःशक्त्यादिभिर्वरं सर्वोत्तमं निजैकाश्रयता केवलं स्वाश्रयता परानपेक्षत्वं स एव गुणस्तस्याश्रयं स्वतन्त्रमित्यर्थः । सुशीलत्वादिसर्वैर्गुणैर्निमित्तैरपेक्षितं वरणीयं ममेप्सितमतिप्रियम् । यद्यपि भगवान्स्वयमात्मारामत्वेनान्यनिरपेक्षस्तथाऽपि तद्गुणलुब्धाऽसमा तदपेक्षयाऽहं तत्सेवया कृतार्था स्यां किमन्यैः प्राकृतैरपीति तमेव वव्र इति भावः ।। २२ ।।

लिङ्गेरी — रमैवं विमृश्य विचारं कृत्वाऽव्यभिचारिसद्गुणं निजैकाश्रयाः केवलं स्वाश्रिता भक्त्यादिसद्गुणवंतश्च ये मुक्तास्तेषामाश्रयम् । मुक्तानां परमा गतिरित्यादेः । संसारिणां स्वभक्तानां मुकुन्दं मोक्षप्रदं, स्वसत्ताप्रतीतिप्रवृत्तिषु निरपेक्षं पराकांक्षारहितं, इप्सितं सर्वदाऽपेक्षितं सर्वजनैः सर्वैः सौन्दर्यादिगुणैरपेक्षितं परं सर्वोत्तमं श्रीनारायणं वरं पतिं वव्रे स्वीकृतवती ।। २२ ।।

तस्यांसदेश उशतीं नवकञ्जमालां
माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ।
तस्थौ निवीय निकटे तदुरः स्वधाम
सव्रीडहासविकसन्नयनेन भीता ।। २३ ।।

सत्यधर्मीया — उशतीं प्रकाशमानाम् । गतम् । माद्यन्तश्चते मधुव्रता भ्रमराश्च तेषां वरूथं सङ्घस्तस्य गिरा उपघुष्टां शब्दिताम् । घुष्टं इति गतम् । पदे एकस्मिन् गिरयोपघुष्टां इति गिराशब्दः । मेरुर्गिराया गुरुरित्यादेः । नवकञ्जमालाम् । यस्य अंसदेशे स्कन्धप्रदेशे निवीय निधाय निकटे तस्थौ । तस्य यदुरः वक्षः तच्च तत्स्वधाम स्वागारश्च तस्मिन् । व्रीडासहितं सव्रीडम् । हासेन विकसती नयने

यस्याः सा । इन इति भीता सेव । अतो नाध्याहारक्लेश इव, नयनैकत्वशङ्कापीति ज्ञेयम् । अयमपि शृङ्गारविशेषः ।

एष ब्रह्मातिवृद्धस्तपतिदिनमणिश्चञ्चलो मातरिश्वा
दिग्वासा नीलकण्ठः ससुरपतिरसौ गर्वितः क्षीयतेऽब्जः ।
इत्थं देव्या विचिन्त्य भ्रमरकुलकलागीतशब्दप्रफुल्ला
दत्ता माला मुरारेः सुरतरुकुसुमालङ्कृता पातु युष्मान् ।। इति पौराणिकाः ।

सुरतरोः कुसुमानि चेदीप्सितपुष्पाणि भविष्यन्तीति नवकञ्जमालेति उत्पल स्रजमिति च वैसंवाद्यं पुराणस्येति मन्तव्यम् । उक्तं चैवमेव भारते हरिवंशे पारिजाते नारदेन रुग्मिणीं प्रति ''यानि यानि च पुष्पाणि त्वं देव्यभिलषिष्यसि । कुसुमं वृक्षराजस्य तानि तानि प्रदास्यति'' इति ।। २३ ।।

छलारी — वरणप्रकारमाह ।। तस्येति । तस्य मुकुन्दस्यांसदेशे स्कन्धदेशे उशतीं मनोहरां नवकञ्जमालां निधाय निकटे तत्समीपे तूष्णीं तस्थौ । कथम्भूता । सव्रीडहासेन लज्जायुक्तमन्दहासेन विकसितनयनेन । स्वधाम स्वस्य स्थानभूतं तदुरो विष्णोर्वक्षो, भीता । पश्यन्तीति यावत् । कथम्भूतां मालाम् । माद्यन्तो मकरन्दयुता ये मधुव्रतास्तेषां वरूथस्य वृन्दस्य गिरा झङ्कारेणोपघुष्टां नादिताम् ।। २३ ।।

लिङ्गेरी — वरणप्रकारमाह ।। तस्येति । रमा तस्य श्रीनारायणस्यांसदेशे उशतीं मनोरमां भक्तानामभीष्टप्रदां च । माद्यन्तः पुष्परसपानमदोपेता ये मधुव्रता भ्रमरास्तेषां वरूथं समूहस्तेषां गिरा वाण्योपघुष्टां ध्वन्युपेतां नवकञ्जमालां नूतनकमलमालां निवीय प्रक्षिप्य व्रीडया लज्जया सहितो यो हासस्तेन विकसद्विस्तृतं यन्नयनं तेन तन्मुखारविन्दं पश्यती भीता भयभक्तियुता सती स्वधाम स्वगृहस्थानीयं तस्य हरेरुरो वक्षःस्थलं च पश्यती सती निकटे समीपे तस्थौ । अनाद्यनन्तकालेऽपि विष्णुमेवाश्रिता रमा । अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतरान् जहाविति प्रमाणात् । हरेरिदानीमेव लक्ष्मीप्राप्तिर्न पूर्वमिति न मन्तव्यम् । स्वस्याः श्रिय इत्युत्तरश्लोकाच्च ।। २३ ।।

स्वस्याः श्रियस्त्रिजगतो जनको जनन्या
वक्षो निवासमकरोत् परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन
यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ।। २४ ।।

सत्यधर्मीया — त्रिजगतो जनकः, तस्यैव जनन्याः स्वस्याः स्वकीयायाः । श्रियाः विभूतेः महालक्ष्म्याः । यत्र स्थिता । सकरुणेन करुणासहितेन निरीक्षणेन नेत्रावलोकनमात्रेण । साधिपतीन् । एवं निर्देशेन आधिना मनोव्यथया सहिताः साधयः, ते पतयो एषां ते इति विग्रहणेन तद्गतस्थितिरुक्ता भवतीत्यपि ज्ञेयम् । तथा च श्रुतिः ''यं कामये'' इत्यादिका । स्वस्वाधिपति-सहितान् त्रिलोकान् तथा स्वाः प्रजाः च ऐधयत अवर्धयत् । तद्वक्षः परमं निवासं अकरोदित्यन्वयः ॥ २४ ॥

छलारी — भगवानपि तस्या लक्ष्म्या वक्षःस्थलं ददावित्याह ॥ स्वस्या इति । त्रिजगतो जनको हरिर्विभूतयो विभवा यस्यास्तस्यास्त्रिजगतो जनन्याः श्रियः स्ववक्षः परमं सुस्थिरं निवासमकरोत् । यत्र वक्षसि स्थिता श्रीः स्वाः प्रजाः साधिपतींस्त्रिलोकांश्च सकरुणेन निरीक्षणेनैधयतावर्धयत् ॥२४॥

लिङ्गेरी — त्रिजगतो लोकत्रयस्य जनक उत्पादकतया पितुःस्थानीयो, जनन्या मातुःस्थानीयया विभूतेरैश्वर्याभिमानिन्या अनादिकाले स्वस्याः श्रियः स्वकीयपत्न्याः श्रीदेव्याः स्ववक्षःस्थलं परमं निवासमुत्तमवासस्थलमकरोत् । श्रीर्यत्र हरेर्वक्षःस्थले स्थिता सती साधिपतीन् सस्वामिचतुर्मुखादि-सहितान् त्रिलोकान् लोकत्रयस्थजनान्, यतस्ते जनाः स्वाः स्वकीयाः प्रजा अत एव सकरुणेन कृपायुक्तेन निरीक्षणेनावलोकनेनैधयताभिवृद्धैश्वर्ययुक्तानकरोत् ॥ २४ ॥

शङ्खतूर्यमृदङ्गानां वादित्राणां पृथक् स्वनः ।
देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ २५ ॥

सत्यधर्मीया — तूर्यं मुरजादि । तुरी त्वरायाम् । ऋहलोर्ण्यत् । गुणवाचित्वात् बाहुलकात् हलि चेति दीर्घः । वादित्राणां भूवादिगृभ्योणित्रन् इति त्रन् । मुखवाद्यानां, देवानुगानां गन्धर्वाणां पृथक् स्वन अभूत् ॥ २५ ॥

छलारी — वादित्राणां वाद्यानां पृथगनेकविधः ॥ २५ ॥

लिङ्गेरी — तस्मिंल्लक्ष्मीनारायणविवाहोत्सवे शङ्खादिवाद्यानां स्वनो ध्वनिः सस्त्रीणामप्सर-सहितानां नृत्यतां विद्याधराणां गायतां देवानुगानां गन्धर्वाणां ध्वनिश्च पृथक् प्रत्येकमभूत् ॥ २५ ॥

ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम् ।
ईडिरेऽवितथैर्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः ॥ २६ ॥

सत्यधर्मीया — अङ्गिरा: विधिसुत: । अवितथै: विद्यमानार्थपरै: विभुं हरिम् । तल्लिङ्गै रमालक्षणोपेतैर्मन्त्रै रमाश्च पुष्पवर्षिण: सन्त: ईडिरे अस्तुवन् ॥ २६ ॥

छलारी — अङ्गिरोनाम प्रजापतिर्ब्रह्मपुत्र: । अवितथैरबाधितार्थैर्वेदमन्त्रैस्तल्लिङ्गैर्विष्णुलिङ्गप्रतिपादकैर्विष्णुं हरिम् । तल्लिङ्गै: श्रीलिङ्गोपेतै: श्रीसूक्तैर्विभुं श्रियमिति वा ॥ २६ ॥

लिङ्गेरी — ब्रह्मरुद्राङ्गिरस: मुख्या: श्रेष्ठा येषां ते । सर्वे विश्वसृजो विभुं हरिं पुष्पवर्षिण: सन्तस्तल्लिङ्गैर्हर्यसाधारणधर्मप्रतिपादकैरवितथैरनुपचरितार्थैर्मन्त्रैर्विष्णोर्नुकं वीर्याणीत्यादिरूपैरीडिरे स्तुतवन्त: ॥ २६ ॥

श्रिया विलोकिता देवा: सप्रजापतय: प्रजा: ।
शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम् ॥ २७ ॥

सत्यधर्मीया — देवा: सप्रजापतय: प्रजा इतराश्च श्रिया विलोकिता: शीलादिगुणसम्पन्ना: परां निर्वृतिं लेभिरे प्रापु: ॥ २७ ॥

छलारी — परामतिशयितां निर्वृतिं सुखम् ॥ २७ ॥

लिङ्गेरी — प्रजापतिना चतुर्मुखेन सहिता: सप्रजापतयो देवा रुद्रादयस्तदितरप्रजाश्च श्रिया विलोकिता: सन्त: शीलादिगुणसंपन्ना: सन्त: परामुत्तमां निर्वृतिं मुदं लेभिरे ॥ २७ ॥

निस्सत्वा लोलुपा राजन् निरुद्योगा गतत्रपा: ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवा: ॥ २८ ॥

सत्यधर्मीया — यदा च दैत्यदानवा: दितिसुता: दित्यदित्येति ण्य: । दनोरपत्यानि दानवा: । लक्ष्म्योपेक्षिता: अकटाक्षिता: तदैव निस्सत्त्वा: । दैत्येषु दानस्य वा: उदकं यस्य । बलि: निरन्तरं दातेति यावत् । सोऽपि बलि: दैत्यदानवाश्च निस्सत्त्वा: बभूवुरित्यावर्त्यान्वय: । दुर्बला: लोलुपा: वृथा काङ्क्षन्त: । गतत्रपा: निर्लज्जा: । गता आगता त्रपा येषान्त इति वा बभूवु: ॥ २८ ॥

छलारी — लक्ष्म्या दैत्यादयो यदोपेक्षितास्तदा ते नि:सत्त्वा धैर्यरहिता उदरपोषण एव रता निरुद्योगा आलस्यवन्तो गतत्रपा निर्लज्जा बभूवुरित्यन्वय: ॥ २८ ॥

लिङ्गेरी — यदा दैत्यदानवा लक्ष्म्योपेक्षितास्तदा यतो निःसत्त्वा अतो निरुद्योगा अपि, यतो गतत्रपा अतो लोलुपा बभूवुः । निःसत्त्वाः शरीरशक्तिरहिता अतो निरुद्योगाश्च, यतो गतत्रपास्त्यक्तलज्जा अतो लोलुपाश्च लक्ष्म्याकांक्षावन्तश्च बभूवुरिति वा ॥ २८ ॥

अथासीद् वारुणी देवी कन्या कमललोचना ।
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ २९ ॥

सत्यधर्मीया — वारुणी तदभिमतिमती देवता । सा तु मद्यम् । अनुमतं अनुमतिः ॥ २९ ॥

छलारी — वारुणी सुराभिमानिनी देवता ॥ २९ ॥

लिङ्गेरी — अथ वारुणी सुराभिमानी देवता कमललोचनकन्योत्पन्ना । तामसुरा हरेरनुमतेन संमत्या जगृहुः ॥ २९ ॥

अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः ।
उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥ ३० ॥

सत्यधर्मीया — काश्यपैः देवपूर्वदेवैः । परममद्भुतं आश्चर्यं येन सः । विस्मयोऽद्भुतमाश्चर्यमित्यमरः ॥ ३० ॥

छलारी — काश्यपैः कश्यपपुत्रैर्देवदैत्यादिभिः । पुरुषो हरिः ॥ ३० ॥

लिङ्गेरी — अथासुरैर्वारुणीस्वीकारानन्तरममृतार्थिभिः काश्यपैः कश्यपपुत्रैः सुरासुरैर्मथ्यमानादुदधेः क्षीरसमुद्रात्परमाद्भुतोऽत्याश्चर्यकरः पुरुष उदतिष्ठदुत्तस्थौ । हे महाराजेति परीक्षित्संबोधनम् । उदतिष्ठदित्यनेनोक्तं प्रादुर्भावाभिज्ञतया स्तुत्यर्थम् ॥ ३० ॥

दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ।
श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३१ ॥

सत्यधर्मीया — दीर्घौ पीवरौ पुष्टौ । पीवरेति गतम् । दोषौ दण्डाविव यस्य सः । कम्बुः शङ्खस्तद्वत् ग्रीवा यस्य सः । त्रिवलिकलितत्वाद्गलस्य तदौपम्यम् । श्यामलः । स्रग्वी अस्मायेति विनिः ॥ ३१ ॥

छलारी — दीर्घौ पीवरौ पुष्टौ दोर्दण्डौ भुजदण्डौ यस्य सः । कम्बुवद्रेखात्रययुक्ता ग्रीवा यस्य सः ॥ ३१ ॥

लिङ्गेरी — उत्थितं पुरुषं विशिनष्टि ॥ दीर्घेत्यादिना । दीर्घा आजानावलंबिनः पीवराः पुष्टा दोर्दण्डा दण्डवत्परशिक्षणदक्षा हस्ता यस्य सः । कंबुवच्छंखवद्वलित्रयोपेता ग्रीवा यस्य सः । अरुणे कमलदलगर्भवद्रक्ते ईक्षणे नेत्रे यस्य सः । श्यामलो नीलमेघश्यामस्तरुणः षोडशवार्षिकः स्रग्वी वैजयन्त्यादिमालाधरः सर्वाभरणभूषितः ॥ ३१ ॥

पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः ।
नीलकुञ्चितकेशान्तः सुभगः सिंहविक्रमः ॥ ३२ ॥

सत्यधर्मीया — केशाश्च तदन्तश्च केशान्ताः । नीलाश्च कुंचिताश्च ते केशान्ता यस्य स तथा । क्रमान्नैल्यं केशेषु तदन्ते वक्रता च यस्य सः । सुभगः 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इतीरितषड्गुणः । सिंहवद्विक्रमः पादक्षेपो यस्य स सिंहविक्रमः ॥ ३२ ॥

छलारी — नीलकुञ्चितः केशानामन्तो यस्य सः । सुभगः सुन्दरः सिंहविक्रमः प्रसिद्धपराक्रमः ॥ ३२ ॥

लिङ्गेरी — पीतवासाः पीतांबरवान् । महद्भिस्तृतं पूज्यं च उरः वक्षो यस्य स महोरस्कः । सु मृष्टेऽतिशयशोभितसुवर्णात्मके रत्नखचिते कर्णाभरणे यस्य स सुमृष्टमणिकुण्डलः । नीलाः कुंचिता वक्रीभूताः केशान्ता यस्य सः । सिंहस्य विक्रमवत्पराक्रमवद्विक्रमो यस्य सः । सु समीचीनो भगः समग्रैश्वर्यादिषड्गुणा यस्य सः ॥ ३२ ॥

अमृतापूर्णकलशं बिभ्रद् वलयभूषितः ।
स वै भगवतः साक्षाद् विष्णोरंशांशसम्भवः ॥ ३३ ॥

सत्यधर्मीया — अमृतापूर्णकलशः अमृतेनापूर्णः सम्यक् पूर्णः कलशः तम् । आपूर्णेति पाठस्सरसः अमृताभृतमित्युत्तरमूलमूलकत्वात् । अमृतस्येति पाठे षष्ठी तृतीयार्थे । बिभ्रद्दधत् । वलयाभ्यां कङ्कणाभ्याम् । अंशः पद्मनाभस्तदंशेन सम्भवो यस्य सः ॥ ३३ ॥

छलारी — अमृतेनापूर्णं सम्पूर्णं कलशं बिभ्रत् । वलयाभ्यां कङ्कणाभ्यां भूषितः । विष्णोरंशस्य पद्मनाभस्यांशेनैकदेशेन संभवः प्रादुर्भावो यस्य सः ॥ ३३ ॥

लिङ्गेरी — अमृतस्यामृतेन पूर्णं कलशं बिभ्रद्दधानो, वलयाभ्यां कटकाभ्यां भूषित एतादृशः पुरुषः उदतिष्ठदिति पूर्वेणान्वयः । स पुरुषः कस्यांशः किं नामकः किं कार्य इत्यत आह ॥ स वा इति । स पूर्वोक्तपुरुषः साक्षादनुपचारेण भगवच्छब्दवाच्यस्य ''अन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थ'' इति स्मृतेः । विष्णोर्नारायणस्यांशांशसंभवः ॥ ३३ ॥

धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् ।
तमालोक्यासुराः सर्वे कलशं चामृताभृतम् ॥ ३४ ॥

सत्यधर्मीया — धन्वन्तरिः धन्वं पापं आधिक्ये बिन्दुः तस्मादतिशयेन तारयतीति धन्वन्तरिः । विस्तृतश्चाशनायां मृत्युरिति व्याख्याबृहदारण्यकभाष्यतत्सजातीयस्थलेऽनुसन्धेयम् । वै स्मार्ती चेयं निरुक्तिरिति द्योतयति । धन्वं पापं तारयति प्लावयति लोकानिति वा । द्वितीयाया अलुक् । आयुर्वेदो वैद्यकवेदस्तद्दृक् । इज्यभाक् यज्ञभोक्ता । यज्ञभागहारीति वा । यज्ञभागिति पाठे अर्थः । अमृताभृतम् ॥ ३४ ॥

छलारी — आयुर्वेदं वैद्यशास्त्रं (पश्यति) जानातीति स तथा । अमृतेनाभृतं परिपूर्णम् सर्ववस्तूनि ॥ ३४ ॥

लिङ्गेरी — धन्वन्तरिरिति ख्यातः प्रसिद्ध आयुर्वेदस्य वैद्यशास्त्रस्य दृक् द्रष्टा । इज्यं यज्ञहविः, तद्भोक्ता य एवंविधस्तमसुराः सर्वेऽवलोक्यामृतमाहृतमाहारो यस्मिंस्तं कलशं चावलोक्य ॥ ३४ ॥

लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ।
नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने ॥
विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३५ ॥

तात्पर्यम् – 'तेषां सत्याच्चालनार्थं हरिर्धन्वन्तरिर्विभुः ।
समर्थोऽप्यसुराणां तु स्वहस्तादमुंचत्सुधामि'ति च ॥ ३५ ॥

सत्यधर्मीया — लिप्संतः सर्ववस्तूनीति श्लोके हरिरसमर्थ इत्यहरन्नसुरा अमृतभृतकलशमिति भात्यतः प्रमाणेन तद्यथावद्व्याख्याति । तेषामिति । सत्याच्चालनार्थम् । तदुत्तरत्र निकृत्या निकृतिमिति

नीतितस्तद्वंचनार्थमिति मन्तव्यम् । समर्थोऽपि विभुर्धन्वन्तरिर्हरिः । स्वहस्तात् सुधां तत्कलशं अमुञ्चत् मुमोच । इत्यष्टमेष्टमः । सर्ववस्तूनि सैन्धवानि तरसा कलशं अहरन् । अमृतभाजने तत्पूरितकलशे । यद्वा कलशेऽसुरैर्नीयमाने विषण्णमनसः सुमनसो हरिं अमृतभाजने विभजनविषये शरणमाययुरित्यन्वयः ।। ३५ ।।

छलारी — कामधेन्वादीनि लिप्सन्तः प्राप्तुकामा अहरन् अपहृतवन्तः । अमृतपानेन जरामरण-शून्याः सन्तः सर्वं प्राप्स्याम इति, भाजनममृतकलशमपाहरन्निति भावः । अमृतभाजनेऽमृतपात्रे ।। ।। ३५ ।।

लिङ्गेरी — सर्ववस्तूनि लिप्सन्त आकाङ्क्षमाणाः कलशं तरसाऽहरन् । असुरैरमृतस्य भाजने पात्रे तस्मिन्कलशे नीयमाने सति देवा विषण्णं क्लेशयुक्तं मनो येषां ते तथा सन्तो हरिं शरणमाययुः ।। ३५ ।।

इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत् ।
मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ।। ३६ ।।

सत्यधर्मीया — भृत्यकामस्तदिच्छितः पुमर्थः तं करोतीति कृत् । भृत्या वेतनेन कामकृन्न भवतीति वा । स्वमायया स्वेच्छया ।। ३६ ।।

छलारी — मा खिद्यत खेदं नाप्नुत । वोऽर्थं प्रयोजनं स्वमायया स्वसामर्थ्येन दैत्यानां मिथः कलहोत्पादनेन साधयिष्ये । इत्याहेति शेषः ।। ३६ ।।

लिङ्गेरी — भृत्यानां देवानां कामं मनोरथं करोतीति कृत् भगवान् धन्वन्तरिः, इति उत्युक्तरीत्या तेषां देवानां दैन्यमालोक्य । हे देवाः ! यूयं मा खिद्यत व्यथां न कुर्वत । अहं स्वमायया तेषामसुराणां मिथः परस्परं कलहं जनयित्वा वो युष्माकमर्थं प्रयोजनममृतपानरूपं साधयिष्ये । इत्याहेति शेषः ।। ।। ३६ ।।

मिथः कलिरभूत् तेषां तदर्थे तर्षचेतसाम् ।
अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ।। ३७ ।।

सत्यधर्मीया — तर्षं तद्युतं चेतो येषां तेषाम् । कलिः कलहः । तत्प्रकारमाह ।। अहं पूर्वमहं पूर्वमिति ।। हे प्रभो परीक्षित् ।। ३७ ।।

छलारी — तदेवाह ॥ मिथ इति । तदर्थेऽमृतार्थे तर्षः कामस्तद्युक्तानि चेतांसि येषां ते । तेषामित्येवं समबलानां कलिरभूत् ॥ ३७ ॥

लिङ्गेरी — हे प्रभो । तस्मिन्नमृतरूपेऽर्थे तर्षेणाकांक्षायुतं चेतो मनो येषां तेषामसुराणामहं पूर्वमिदममृतं दृष्टवान् गृहीतवान् पास्ये त्वं नेत्यादिरूपः कलिः कलहोऽभूत् ॥ ३७ ॥

देवाः स्वभागमर्हन्ति ये तुल्यायासहेतवः ।
सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३८ ॥

सत्यधर्मीया — द्वाभ्यां पद्याभ्यां दुर्बलानां स्वतस्तदलाभादलाभा इत्थं प्रसस्रुर्बलिनः प्रतीतीरयति । एतस्मिन्नमृतप्राप्तिप्रयत्ने ये तुल्यायासहेतवः अस्मदायाससमानायासकारणानि देवा इति ते स्वभागं अर्हन्ति । यथा सत्रयागे सर्वे यजमानाः सर्वे ऋत्विज इत्यादेः एषः सनातनो धर्मः ॥३८॥

छलारी — दुर्बलानां तु क्रोशप्रकारमाह ॥ देवा इति । एतस्मिन्नेवामृतसाधने तुल्येनायासेन हेतवो ये देवास्ते स्वभागं प्राप्तुमर्हन्ति । यथा सत्रयागे सर्वेषां समबलं तद्वत् ॥ ३८ ॥

लिङ्गेरी — हे राजन् । दैतेया दैत्यादयोऽसुरा जातमत्सराः सन्तो यतः स्वयं दुर्बला अतः स्वतः प्रबलान् गृहीतामृतकलशान् स्वान्स्वकीयानेव इति प्रत्यषेधन्मुहुर्मुहुः । किमिति । हे असुराः । ये तुल्ये समाने आयासे समुद्रमथननिमित्ते हेतवः कारणीभूता देवा अपि स्वभागमर्हन्ति । यथा बहुकर्तृकानेकाहर्निवर्त्यसत्रयागे सर्वे समानफलभागिनस्तथैष धर्मः सनातनः सदातनः यतोऽतोऽस्मिन्विवादकाले कर्तुमुचित इति ॥ ३८-३९ ॥

इति स्वान् प्रत्यषेधन् वै दैतेया जातमत्सराः ।
दुर्बलाः प्रबलान् राजन् गृहीतकलशान् मुहुः ॥ ३९ ॥

सत्यधर्मीया — स्वान् स्वयूथ्यान् जातमत्सरा बलिष्ठा इति नास्मभ्यं दद्युरिति मात्सर्योपेताः । अनेन न मनःपूर्वकं सुमनोमृतवितरणवचनं किन्तु स्वालाभप्रयुक्तोऽयं प्रलाप इति द्योत्यते । मुहुः प्रत्यषेधन् ॥ ३९ ॥

छलारी — इति दुर्बला दैत्याः स्वेषाममृताभावेन गृहीतकलशान् प्रबलान् दैत्यान् प्रत्याहुः । किमिति । देवाः स्वभागमर्हन्ति । कुतः । तुल्यायासहेतवोऽतः सत्रयाग इव इत्युक्ताः दुर्बला दैत्याः प्रबलान्स्वान्दैत्यान् प्रत्यषेधन् ॥ ३९ ॥

एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः ।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ।। ४० ।।

सत्यधर्मीया — सर्वोपायवित् ईश्वरः । सर्वोपायविदामीश्वर इति वा ।। ४० ।।

छलारी — एतस्मिन्नन्तरे दैत्यानां मिथः कलहकालेऽनिर्देश्यमिदमेतादृशमिति निर्देष्टुमशक्यम् ।। ।। ४० ।।

लिङ्गेरी — हे राजन् । एतस्मिन्नन्तरेऽस्मिन्नसुरकलहसमये सर्वोपायविदामीश्वरो विष्णुरनिर्देश्यमिदमेतादृगिति निर्देष्टुमशक्यमत एव परमाद्भुतं योषित्स्त्रियो रूपं दधार प्रादुश्चकारेत्यर्थः ।। ४० ।।

प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम् ।
समानकर्णाभरणं सुकपोलोन्नसाननम् ।। ४१ ।।

सत्यधर्मीया — उत्पलं नीलम् । उन्नता नासिका यस्य तदुन्नसं च तदाननं च । क्रतुपुरुषगुल्फकपोलमेधाभिधानानि पुंसीति लिङ्गानुशासनम् । गण्डः कपोले विस्फोट इत्यमरः । सु शोभने कपोलोन्नसानने यस्य तत् ।। ४१ ।।

छलारी — तद्भगवतः स्त्रीरूपं वर्णयति ।। प्रेक्षणीयेत्यादिना । प्रेक्षणीयमुत्पलमिव श्यामम् । समानयोः कर्णयोराभरणयोः कुण्डले यस्मिन् । सुकपोलं च तदुन्नसमुन्नतनासिकं चाननं यस्मिंस्तत् ।। ४१ ।।

लिङ्गेरी — तं नारायणीरूपं वर्णयति ।। प्रेक्षणीयेत्यादिना । सौन्दर्यकोमलतादिगुणैः प्रेक्षणीयमवश्यं द्रष्टव्यं यत्, उत्पलं नीलोत्पलं तद्वच्छामं नीलवर्णं, सर्वावयवैः करचरणादिभिः सुन्दरं, समाने कर्णाभरणे यस्य तत् । सुकपोलेन समीचिनगण्डस्थलेनोन्नतनासिकया च युक्तमाननं यस्य तत् ।। ४१ ।।

नवयौवननिष्पन्दस्तनभारकृशोदरम् ।
मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनम् ।। ४२ ।।

सत्यधर्मीया — नवं यद्यौवनं तेन । न विद्यते स्पन्दः किञ्चित् चलनं ययोस्तौ च तौ स्तनौ कुचौ च तयोर्भारः तेन कृशं तनूदरं यस्य तत् । मुखस्य च य आमोदः परिमलम् । तत्रानुरक्ता आसक्ता अलयोऽलिनो वा तेषां झङ्कारेण उद्विग्ने भीते इव लोचने यस्य तत् ।। ४२ ।।

छलारी — नवयौवननिवृत्तयोर्नितरां पुष्टयोः स्तनयोभरिण । मुखामोदे मुखपरिमलेऽनुरक्तानां निरतानामलीनां भृंगाणां झंकारेणोद्विग्ने भ्रान्ते लोचने यस्य तत् ॥ ४२ ॥

लिङ्गेरी — नवयौवनेन नूतनतारुण्येन निष्पँदतोर्निश्चलतोः स्तनयोः कुचयोभरिण कृशं स्वल्पमुदरं यस्य तत् । मुखस्यामोदे परिमलेऽनुरक्ता अलयस्तेषां झंकारेणोद्विग्ने चञ्चले लोचने यस्य तत् ॥ ४२ ॥

बिभ्रत् स्वकेशभारेण मालामुत्फुल्लमल्लिकाम् ।
सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ॥ ४३ ॥

सत्यधर्मीया — उत्फुल्ला विकसिता मल्लिकाः तृणशून्यानि यस्यां सा तां मालाम् बिभ्रत्, कण्ठे आभरणं यस्य तत् । सु शोभना ग्रीवा यस्य तत् तच्च । सु शोभनानि भुजाङ्गदानि तैर्भूषितम् ॥४३॥

छलारी — सुष्ठु ग्रीवा यस्मिंस्तत् सुग्रीवं, कण्ठे आभरणं यस्य तत्कण्ठाभरणं च तथोक्तम् । सुभुजयोरङ्गदाभ्यां च भूषितम् ॥ ४३ ॥

लिङ्गेरी — उत्फुल्ला विकसिता मल्लिका यस्यास्तां मालां स्वकेशभारेण बिभ्रत्, शोभमाना ग्रीवा कण्ठाभरणं च यस्य तत् । शोभनाभ्यां भुजांगदाभ्यां भूषितम् ॥ ४३ ॥

विरजाम्बरसंवीतं चित्रं वध्वीयशोभया ।
काञ्च्या प्रविलसद् वल्गुस्फुरच्चरणनूपुरम् ॥ ४४ ॥

सत्यधर्मीया — विगतं रजः मलं यस्मात् तच्च तदम्बरं वस्त्रं च तेन संवीतम् । रजोवाची रजो दन्तः शिरोवाची शिरस्तथा । निचकर्त शिरान्द्रौणिरर्थाः पादरजो यमा इत्यादेरजःशब्दपर्यायोऽयं रजशब्दः । वधूनामियं वध्वीया सा च सा शोभा च तया चित्रम् आश्चर्यकरम् । कांच्या च प्रविलसत् । वल्गुनी मनोहरे स्फुरती चरणनूपुरे यस्य तत् ॥ ४४ ॥

छलारी — विरजांबरेण स्वच्छवस्त्रेण संवीतं परिवेष्टितं नितम्ब एव वध्वीयः विशालत्वात्तत्र शोभा यस्यां तया कांच्या प्रकर्षेण विलसत् । वल्गु मनोहरं यथा भवति तथा । चलतोश्चरणयोर्नूपुरे यस्मात् ॥ ४४ ॥

लिङ्गेरी — विरजं मालिन्यादिदोषरहितं यदंबरं वस्त्रं तेन संवीतं वेष्टितं वधोः स्त्रियो विद्यमानया शोभया चित्रमाश्चर्यकरं, कांच्या कट्याभरणेन प्रविलसदतिप्रकाशं, वल्गुभ्यां मनोहराभ्यां स्फुरद्भ्यां प्रकाशमानाभ्यां नूपुराभ्यां पादांगदाभ्यां युक्तम् ॥ ४४ ॥

सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ।
दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥ ४५ ॥

सत्यधर्मीया — सव्रीडस्मितेन विक्षिप्ताः प्रसादिताः भ्रूविलासास्तैः सहितानि अवलोकनानि तैः । उद्दीपयत् उज्वलयत् ॥ ४५ ॥

छलारी — सव्रीडेन स्मितेन सह विक्षिप्ता कम्पिता या भ्रूस्तस्या विलासेन सह यान्यवलोकनानि तैर्दैत्ययूथपानां चेतःसु मुहुरतिशयेन काममुद्दीपयन् ॥ ४५ ॥

लिङ्गेरी — सव्रीडेन सलज्जेन स्मितेन हासेन युक्तैर्विक्षिप्तैर्भ्रूविलासैः सहितैरवलोकनैर्दैत्यानां यूथं समूहं पांति रक्षन्तीति यूथपास्तेषां चेतःस्वन्तःकरणेषु कामं स्वविषयेच्छां मुहुः पुनरुद्दीपयदभिवृद्धं कुर्वद्योषिद्रूपं दधारेति पूर्वेणान्वयः ॥ ४५ ॥

तेऽन्योन्यतः सुधापात्रं हरन्तस्त्यक्तसौहृदाः ।
क्षिपन्तो दस्युधर्मेण आयान्तीं ददृशुः स्त्रियम् ॥ ४६ ॥

सत्यधर्मीया — दस्युधर्मेण कापट्येन आयान्तीं स्त्रियं ददृशुः । अन्योन्यं दस्युधर्मेण क्षिपन्त इति वा । धर्मेण आयान्तीमित्यत्र सन्ध्यभावो भाविदेवदैत्यसन्ध्यभावसूचकः ॥ ४६ ॥

छलारी — ते दैत्या दस्युधर्मेणान्योन्यतः परस्परमपहरन्तः क्षिपन्तः परुषं वदन्तः सन्तः ॥ ॥ ४६ ॥

लिङ्गेरी — ते असुराः । अन्योन्यतः परस्परं एकस्माद्येक इति यावत् । सुधापात्रं हरन्तः सन्तो बलात्कारेण स्वीकुर्वाणः सन्तस्त्यक्तं सौहृदं स्नेहलक्षणं यैस्ते तथा सन्तः, क्षिपन्तस्तिरस्कुर्वन्तः, एवं दस्यूनां चोराणां धर्मेण प्रवृत्ताः सन्तः आयान्तीं स्त्रियं ददृशुः ॥ ४६ ॥

अहो रूपमहो धाम अहो अस्या नवं वयः ।
इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ ४७ ॥

सत्यधर्मीया — जातः हृच्छयो मन्मथो येषां ते तथा ।। ४७ ।।

छलारी — अहो रूपं सौन्दर्यं अहो धामेति वदन्तो हृच्छयवन्तः ।। ४७ ।।

लिङ्गेरी — ते असुरास्तां दृष्ट्वा जातो हृच्छयः कामो येषां ते तथा सन्तः, अस्याः स्त्रियो रूपमहो आश्चर्यकरं, धाम तेजोऽहो, नवं वयस्तारुण्यमहो इति परस्परं वदन्तस्तामभिद्रुत्य पप्रच्छुः प्रश्नं कृतवन्तः ।। ४७ ।।

का त्वं कञ्जपलाशाक्षि कुतो वा किं चिकीर्षसि ।
कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ।। ४८ ।।

सत्यधर्मीया — पलाशानि । पत्रे पलाशमिति विश्वः । कस्यासि पुत्रीति शेषः । न स्पृष्टपूर्वां जानीम इत्युत्तरस्वारस्यात् ।। ४८ ।।

छलारी — त्वं का देवादिमध्ये किं जातीया कुतः कस्माद्देशादागताऽसि । कस्य पुत्र्यसि । मथ्नतीव क्षोभयतीव ।। ४८ ।।

लिङ्गेरी — प्रश्नप्रकारं दर्शयति ।। का त्वमित्यादिना । हे कञ्जपलाशाक्षि कमलपत्रवद्विशालतादिगुणवन्नेत्रे! त्वं काऽसि? कुतः कस्मादागता? किं कार्यं चिकीर्षसि कर्तुमिच्छसि? हे वामोरु मनोहरोरुमति! त्वं कस्य पुत्री कस्य भार्याऽसि तन्नोऽस्माकं वद । त्वं नो मनांसि मथ्नन्तीव भासि ।। ४८ ।।

न वयं त्वाऽमरैर्दैत्यैः सिद्धगन्धर्वचारणैः ।
स्पृष्टपूर्वां तु जानीमो लोकेशैश्च कुतो नृभिः ।। ४९ ।।

सत्यधर्मीया — नृभिः स्पृष्टपूर्वा नेति किं वक्तव्यमित्यर्थः ।। ४९ ।।

छलारी — त्वाममरादिभिः स्पृष्टपूर्वाम् ।। ४९ ।।

लिङ्गेरी — हे स्त्रि । वयं त्वाममरैर्दैत्यैः सिद्धगन्धर्वचारणैश्च लोकेशैरिन्द्रादिभिश्च न तु स्पृष्टपूर्वां पूर्वमस्पृष्टामननुभुक्तां जानीमः । यदैवं त्वं लोकेशैश्चास्पृष्टपूर्वा तदा नृभिर्मनुष्यैरस्पृष्टपूर्वेति कुतो वक्तव्यम् ।। ४९ ।।

नूनं त्वं विधिना सुभ्रुः प्रेषितासि शरीरिणाम् ।
सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥ ५० ॥

सत्यधर्मीया — सुभ्रुरित्येव पाठः । अवृत्तकर्तनात् । हे सुभ्रूः । हापितः क्वासि हे सुभ्रु इति भक्तिः प्रमाद एवायमिति बहव इति कौमुद्युक्तेः । सघृणेन सकरुणेन । विधिना धात्रा प्रेषितासि किम् ॥ ५० ॥

छलारी — सर्वेन्द्रियाणां मनसश्च प्रीतिं विधातुं सघृणेन दयालुना विधिना नूनं हरिणैव प्रेषिताऽसि किम् ॥ ५० ॥

लिङ्गेरी — हे सुभ्रु । त्वं सघृणेन दयावता विधिनाऽस्मददृष्टप्रेरकेणेश्वरेणास्मदादिशरीरिणां सर्वेन्द्रियमनःप्रीतिं विधातुं कर्तुं प्रेषिता किं प्रेषिता नूनं निश्चयः ॥ ५० ॥

सा त्वं नः स्पर्धमानानामेकवस्तुनि भामिनि ।
ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमुध्यमे ॥ ५१ ॥

सत्यधर्मीया — एकवस्तुनि अमृतरूपैकपदार्थे । हे भामिनि । स्पर्धमानानां सङ्घर्षं कुर्वतां तत्रापि ज्ञातीनां बद्धवैरिणाम् । हे सुमध्यमे शं विधत्स्व यथाभागं विभजनेन सुखं कुरु । भामिनि, सु मध्ये मिर्यस्याः सा तत्संबुद्धिः सुमध्यमे इति च वचनचातुरी ज्ञेया । एकवस्तुनीति नपुंसकनिर्देशेन स्त्रीप्रयुक्तोऽयं कलहो न भवतीति न सुन्दोपसुन्दनीत्यवसर इति ध्वन्यते ॥ ५१ ॥

छलारी — एकवस्तुन्यमृतविषये । शं सुखं विधत्स्व कुरुष्व ॥ ५१ ॥

लिङ्गेरी — हे भामिनि । अननुकूलेषु कोपनशीलेषु सुमध्यमे । सा त्वमेकवस्तुन्यमृतलक्षणविषये स्पर्धमानानामत एव बद्धवैराणां ज्ञातीनां नोऽस्माकं शं सुखं विधत्स्व कुरु ॥ ५१ ॥

वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ।
विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ५२ ॥

सत्यधर्मीया — ज्ञातितां विज्ञापयन्ति ॥ वयमिति । कृतं पौरुषं मथनोपयुक्तं यैस्ते । यथान्यायम् । तदेव विवृण्वन्ति । भेदो यथा नैव भवेदिति ॥ ५२ ॥

छलारी — दायादाः पुत्राः । भेदो मिथो विग्रहो न भवेत्तथा ॥ ५२ ॥

लिङ्गेरी — हे सुभ्रु । वयं कश्यपार्जितद्रव्यभोक्तारः कृतपराक्रमा भ्रातरश्च । त्वयाऽस्मिन्नमृते विभज्यमानेऽस्माकं भेदः कलहो यथा न भवेत्तथा नीतिमनतिक्रम्यामृतं विभजस्व ॥ ५२ ॥

श्रीशुक उवाच—

इत्युपामन्त्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ।
प्रहस्य रुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ ५३ ॥

सत्यधर्मीया — निरीक्षन् निरीक्षमाणः । हासस्तु 'हे सुरा असुराः मद्वशाः' इति ॥ ५३ ॥

छलारी — मायया स्वेच्छया स्त्रीरूपं यस्य सः ॥ ५३ ॥

लिङ्गेरी — मायया स्वेच्छया योषिद्वपुः स्त्रीरूपधारी हरिर्दैत्यैरित्युपामन्त्रितः प्रार्थितः सन् प्रहस्य रुचिरापाङ्गैर्मनोहरकटाक्षैरसुरान्निरीक्षन् सन्निदं वक्ष्यमाणवचनमब्रवीदुक्तवान् ॥ ५३ ॥

श्रीभगवानुवाच—

कथं कश्यपदायादाः पुंश्चल्यां मयि सङ्गताः ।
विश्वासं पण्डिता जातु कामिनीषु न यान्ति हि ॥ ५४ ॥

सत्यधर्मीया — पुंश्चल्यां पुरुषमात्रगमनोद्देशेन चलन्त्यां वारनारीसमायां मयि । पण्डिताः तारकादीतजन्तः कामिनीषु विश्वासं न यान्ति । तत्रापि यूयं कश्यपदायादाः तत्पुत्राः ॥ ५४ ॥

छलारी — पुंश्चल्यां वेश्याशीलगुणवत्यां मयि कथं संगताः सक्ताः । भवतां ऋषिपुत्रत्वादित्यर्थः ॥ ५४ ॥

लिङ्गेरी — हे पुरुषाः कश्यपस्य दायादाः पुत्राः । यूयं पुंश्चल्यां स्वैरिण्यां स्वेच्छया नानापुरुषकामिन्यां कथं संगता विश्वस्ताः । पण्डिता ज्ञानिनः कामिनीषु स्वेच्छाचारासु स्त्रीषु विश्वासं जातु कदाचिन्न यान्ति ॥ ५४ ॥

सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ।
सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ॥ ५५ ॥

सत्यधर्मीया — हे सुरद्विषः । सालावृकाणां श्वाविधां स्वैरिणीनाम् । स्वादीरेरिणोः इति वृद्धिः । स्त्रीणां च । सख्यान्यनित्यान्यस्थिराण्याहुः । श्रुतया न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता इतीत्येवंजातीयकाः । तत्र हेतुः । नूत्नं नूत्नं विचिन्वतामिति । विचिन्वन्त्यस्त्रियश्च विचिन्वन्तश्च शालावृकाश्च । विचिन्वन्त इत्येकशेषः । नूत्नं नूत्नं भक्ष्यमेकत्रापरत्र पुरुषम् । णु स्तुतावित्यस्य नूनवस्यन् आदेशो यत्नत्पुनरवखाश्च प्रत्यया वक्तव्या इति नू आदेशे नूत्नेति भवति । नवो नूत्न इत्यमरः ।। ५५ ।।

छलारी — कुतो विश्वासं न यान्तीत्यत आह ।। सालावृकाणामिति । मृगविशेषाणां स्वैरिणीनां पुंश्चलीनाम् । हे सुरद्विषः । नूत्नं नूत्नं प्रतिक्षणं नूतनमेव विचिन्वतां मृगयन्तीनाम् ।। ५५ ।।

लिङ्गेरी — हे सुरद्विषः । पण्डिताः शालावृकाणां कपिक्रोष्टुशुनां स्वैरिणीनां स्त्रीणां च सख्यान्यस्थिराण्याहुः । नूत्नं नूत्नं नवं नवं विचिन्वतामिति हेतुगर्भविशेषणम् । शालावृकाणां विचिन्वतीनामिति स्त्रीणामिति ज्ञेयम् ।। ५५ ।।

श्रीशुक उवाच–

इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ।
जहसुर्भावगम्भीरं ददुश्चामृतभाजनम् ।। ५६ ।।

सत्यधर्मीया — भावगम्भीरं यथा तथा तस्याः क्ष्वेलितैः छलालापैः । अथवा भावगम्भीरं यद्यपि वदति सुदती विश्वासं पण्डिता न यान्तीति तथा वञ्चनं न तनुयादिति किञ्चित् गाम्भीर्यं भावे ज्ञेयम् । तत्फलं लपति ।। ददुरिति । आशु अस्तं निरस्तं कलहे मनो येषां ते इति वा । अहं पूर्वमहं पूर्वमिति तदुक्तेः ।। ५६ ।।

छलारी — क्ष्वेलितैः छलमिश्रितवचनैराश्वस्तमनसः समाहितान्ताः भावेन केनाप्यभिप्रायेण गम्भीरं यथा भवत्येवं जहसुः ।। ५६ ।।

लिङ्गेरी — तेऽसुरास्तस्याः स्त्रिय इत्युक्तलक्षणैः क्ष्वेलितैः परिहासपूर्वकछद्मवचनैराश्वस्त-मनसः सन्तो भावगंभीरं जहसुर्हासं कृतवन्तोऽमृतस्य भाजनं पात्रं ददुश्च ।। ५६ ।।

ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ।
यद्यभ्युपेतं क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम् ।। ५७ ।।

सत्यधर्मीया — ईषत्स्मितेन शोभा यस्याः सा तया गिरा वाण्या । तदेव भाषणमाविष्करोति । यदीति ॥ मया कृतं क्व च साधु क्व चासाधु च यदि अभ्युपेतमङ्गीकृतं स्यात् तर्हि इमां सुधां विभजे विभागं करोमीति बभाषे ॥ ५७ ॥

छलारी — ईषत्स्मितेन शोभा यस्यास्तया गिरा । क्व च कुत्रचित्तथा कृतं साधु वाऽसाधु वा यद्यभ्युपेतमङ्गीकृतं तर्हि सुधां विभजे ॥ ५७ ॥

लिङ्गेरी — ततो हरिरमृतभाजनं गृहीत्वेषत्स्मितेन शोभा यस्यास्तया गिरा वाण्याऽऽह ॥ हे असुराः । मया कृतं क्व च कुत्रचित्साध्वसाधु वा, यत्तु तद्युष्माभिरभ्युपेतमङ्गीकृतं यदि तर्हीमां सुधाममृतं वो युष्माकं विभजे विभागं कृत्वा दास्यामीत्येवं रूपया गिरा बभाषे ॥ ५७ ॥

इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुङ्गवाः ।
अप्रमाणविदस्तस्यास्तत् तथेत्यन्वमंसत ॥ ५८ ॥

सत्यधर्मीया — प्रमाणम् तस्या योषितस्तस्या व्याहृतेः भाषाया इयत्ताम् । अतो न तस्या इत्यस्यातिरेकः ॥ ५८ ॥

छलारी — प्रमाणमियत्तां तन्न जानन्तीत्यप्रमाणविदस्तस्याः स्वभावस्थितिं न जानन्त इत्यर्थः ॥ ५८ ॥

लिङ्गेरी — असुरपुंगवा इति उक्तरूपं तस्या अभिव्याहृतं वचनमाकर्ण्य श्रुत्वा यतस्तस्याः अप्रमाणविदः स्वरूपानभिज्ञा अतस्तत्कार्यं तथास्त्वित्यन्वमंसतानुज्ञातवन्तः ॥ ५८ ॥

अथोपोऽष्य कृतस्नाना हुत्वा च हविषाऽनलम् ।
दत्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥ ५९ ॥

सत्यधर्मीया — विप्रेभ्यः भूतेभ्यश्च तूष्णीं त्यागः । देवयोनयश्च ते ॥ ५९ ॥

छलारी — द्विजैः कृतस्वस्त्ययनाः कृतपुण्याहवाचनाः ॥ ५९ ॥

लिङ्गेरी — अथ कृतस्नानास्तेऽसुरा वासांसि परिधायातिभूषिताः सन्तो द्विजैः कृतस्वस्त्ययनाः, सन्तो हविषाऽनलं हुत्वा, विं परमात्मानं प्रीणन्तीति विप्रास्तथाभूतेभ्यो ब्राह्मणेभ्यो गां दत्वा प्रागग्रेषु कुशेषु यथोपजोषं यथा सुखं स्यात्तथा प्राविशन्नुपविष्टाः ॥ ५९-६० ॥

यथोपजोषं वासांसि परिधायाहतानि ते ।
कुशेषु प्राविशन् सर्वे प्रागग्रेष्वभिभूषिताः ॥ ६० ॥

सत्यधर्मीया — यथोपजोषं यथाप्रीति । आहतानि नूतनानि । तदा धूतानि वा । आहतं स्यात्पुरातने नूत्नवस्त्रेऽपि चाहतमिति विश्वः । अहतमिति पठन्तोऽहतं यत्र निर्मुक्तमुक्तं वासः स्वयम्भुवा । शस्तं मङ्गलकार्येषु तावन्मात्रेण सर्वदेति लक्षणं चाचक्षते । प्रागग्रेषु कुशेषु दर्भेषु । अभिभूषिता अलङ्कृताः सन्तः प्राविशन्नुपविविशुः ॥ ६० ॥

छलारी — यथोपजोषं यथा अहतानि नूतनानि । प्रागग्रेषु प्राक्कूलेषु कुशेषु प्राविशन् उपाविशन् ॥ ६० ॥

प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च ।
धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ ६१ ॥

सत्यधर्मीया — धूपैरागर्वादिधूपैः । आमोदिता सुरभीकृता शाला तस्याम् । माल्यैः कुसुमैर्मालाभिर्वा । माल्यं मालाप्रसूनयोरित्यमरः । दीपकैर्दीपैः । जुष्टायां सेवितायाम् ॥ ६१ ॥

छलारी — धूपैरामोदितायां सुरभीकृतायाम् । जुष्टायां मङ्गलकृतायाम् ॥ ६१ ॥

लिङ्गेरी — माल्यैः पुष्पमालाभिश्च । माल्यं पुष्पे पुष्पदाम्नीति रत्नमाला । जुष्टायां सेवितायामलंकृतायां, धूपैः कृष्णागर्वादिजैरामोदिता परिमलिता या शाला तस्याम् । सुरेषु दितिजेषु च प्राङ्मुखेषु पूर्वाभिमुखेषूपविष्टेषु सत्सु ॥ ६१ ॥

तस्यां नरेन्द्रकरभोरुलसद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ।
सा कूजती कनकनूपुरसिञ्जितेन कुम्भस्तनी कलशपाणिरथाविवेश ॥ ६२ ॥

सत्यधर्मीया — करभो मणिबन्धमारभ्य कनिष्ठिकापर्यन्तबहिर्भागः । ताविवोरू यस्याः सा करभो मणिबन्धादि कनिष्टान्ते तथोष्ट्रक इति विश्वः । कलभेति पाठे करिशावशुण्डेत्यर्थः । कलभत इति योगात् । साक्षादुदकलाभः करिकरस्यैवेत्यौचित्यात् । लक्षणयेति पूर्वे । लसद्दुकूलं यस्मिंस्तच्च तच्छ्रोण्योर्नितम्बयोस्तटं बिम्बस्तेनालसा मन्थरा गतिर्यस्याः सा च सा मदविव्हलाक्षी । मदेन विव्हले चञ्चलेऽक्षिणी लोचने यस्याः सा मदविव्हलेत्यानुपूर्व्या प्रतिदितिसुतं मद्विषयेऽविव्हलाक्षी मामेव स्थिरं कटाक्षयतीयमिति धिषणाजननीति द्योत्यते । भूषणानां तु सिञ्जितम् । सिजि अव्यक्ते शब्दे । तालव्यादिः । भावे क्तः । अत्र तु तद्भूषणं नूपुरम् । सगतिम् । कुम्भाविव स्तनौ यस्याः सा ॥६२॥

छलारी — अथ तस्यां शालायाम् । हे नरेन्द्र । कलशपाणिराविवेश । कथम्भूता । कलभो गजपोतस्तेन तच्छुण्डालवत्कलभसदृशयोरुर्वोर्लसद्दुकूलं यस्याः सा । सा चासौ श्रोणीतटे मण्डले । अलसा मन्दा गतिर्यस्याः सा । मदेन विव्हले चञ्चलेऽक्षिणी यस्याः सा । सिंजितेन शब्देन कूजती ॥ ६२ ॥

लिङ्गेरी — हे नरेन्द्र परीक्षित् । सा नारायणी तस्यां सभायां कलभवद्गजहस्तवत्क्रमवर्तुलत्वादिगुणविशिष्टयोरूर्वोर्लसत्प्रकाशमानं दुकूलं यस्याः सा । श्रोणितटाभ्यामलसा मन्दा गतिर्यस्याः सा । मदेन हर्षोद्रेकेण विव्हलेऽक्षिणी यस्याः साः कनकनूपुरयोः सिंजितेन ध्वनिना कूजन्ती कुंभस्तनी कलशपाणिः सती विवेश प्रवेशं कृतवती । कलभः करिपोते स्यात्करिहस्ते पुमानयमिति मुक्तामाला ॥ ६२ ॥

तां श्रीमुखीं कनककुण्डलचारुकर्ण-
नासाकपोलवदनां परदेवताख्याम् ।
संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन
देवासुरा विगलितस्तनपट्टिकान्ताम् ॥ ६३ ॥

सत्यधर्मीया — श्रीमन्मुखं यस्याः सा । स्वाङ्गाच्चोपसर्गादसंयोगोपधादिति ङीष्, श्रिया शोभया मुखं निस्सरणं यस्येति वा । मुखनिःसरणे वक्त्र इति विश्वोक्तेः । अतो न वदनातिरेक उभयत्र । कनकस्य तदात्मके कुण्डले ययोस्तौ च तौ चारू कर्णे च चारुर्नासा च चारुश्च कपोलश्च गण्डश्च चारु च वदनं यस्याः सा । तां परदेवताख्यां तन्नाम्नीम् । विगलितः स्खलितः स्तनपट्टिकाया अन्तोऽन्तभागो यस्याः सा ताम् । विगलिता स्तनपट्टिका कञ्चुकादिर्यस्याः सा ताम् । उत्स्मितेन सहितं च तद्वीक्षणं तेन करणेन । देवदानवा मुमुहुः ॥ ६३ ॥

छलारी — श्रीमुखीं परदेवताख्यां संवीक्ष्य देवासुराः संमुमुहुः । कथम्भूताम् । कनकमये कुण्डले यस्याः सा कनककुण्डला । चारवः कर्णादयो यस्याः सा । कनककुण्डला च सा चारुकर्ण नासाकपोलवदना च ताम् । उत्स्मितवीक्षणेन स्मितपूर्वकावलोकनेन युक्ताम् । विगलितो विस्रस्तः स्तनोपरि बद्धपट्टिकाया अन्तो यस्याः सा ॥ ६३ ॥

लिङ्गेरी — देवासुराः कनककुण्डलचारुकर्णो नासाकपोलश्च यस्य तद्वदनं यस्यास्ताम् । विगलितः स्तनच्युतः स्तनपट्टिकाया अन्तो यस्यास्ताम् । श्रिया कांत्यादिसंपदा युक्तं मुखं यस्यास्तां

परदेवताख्यां नारायणीं संवीक्ष्य तस्या उत्स्मितेनोत्कृष्टमंदहासेन सहितेन वीक्षणेन वीक्षिताः संमुमुहुरतिभ्रान्ता बभूवुः ॥ ६३ ॥

असुराणां सुधादानं सर्पाणामिव दुर्नयम् ।
मत्वा जातिनृंशसानां नतान् व्यभजदच्युतः ॥ ६४ ॥

सत्यधर्मीया — सुधा चैकत्रामृतमन्यत्र क्षीरम् । सुधा पयसि देवान्ने गुणपक्कपयोमृदीत्यभिधानात् । दुर्नयं दुर्गतो नयो न्यायो यस्य तत् अनीतिं मत्वा तान्प्रति तान्न व्यभजत् । न विबभाज । तत्र हेतुः । जातिनृशंसानामिति । जात्या स्वभावेनैव नृशंसास्तेषाम् । एतत्पानेऽपि यथा पीतं क्षीरं सर्पेषु विषपोषहेतुस्तथा तेषां नृशंसतोत्तंसतैव स्यादिति दुर्नयमिति भावः । एते बहवः स्वयमेकाकी किंवा कुर्युरिति न भीतः पीताम्बरः किमित्यतः कथयति ॥ अच्युत इति । च्यावितश्च्युतेः । ते किं करिष्यन्तीति भावः । तर्हि कान्प्रति व्यभजदित्यतः संक्षेपतोऽप्यनेनैवाह ॥ नतानिति ॥ नतान्प्रवणानमरगणान्व्यभजदिति ॥ ६४ ॥

छलारी — एवं तान्मोहयित्वा यत्कृतवान्हरिस्तदाह ॥ असुराणामित्यादिना । असुराणां सुधादानममृतदानं सर्पाणां सुधादानमिव । सुधा पयसि देवान्ने इति वचनात् । दुर्नयमन्याय्यम् । महाजात्यैव स्वभावेनैव नृशंसानां क्रूराणां दैत्यानां तां सुधां नैव व्यभजत् ॥ अयं भावः ॥ दैत्यैर्मया कृतं साधु वाऽसाधु वा सर्वमनुमतमेवातो मद्भक्तान्देवानेव सुधां पाययिष्यामि । किञ्च तैर्यथा न्यायं विभजस्वेत्युक्तम् । न चैतेभ्योऽक्रूरेभ्योऽमृतदानं न्याय्यं न । अमृतं सुधामुभयेषां न ददामीति ॥६४॥

लिङ्गेरी — अच्युतो जातिनृशंसानामुत्पत्तिमारभ्यान्यहिंसकानां सर्पाणां सुधादानमिव क्षीरप्रदानमिवासुराणां सुधाया अमृतस्य दानं दुर्नयमनीतिरिति मत्वा तानुद्दिश्य तां सुधां न व्यभजत् ॥६४॥

कल्पयित्वा पृथक् पङ्क्तीरुभयेषां जगत्पतिः ।
तांश्चोपवेशयामास स्वासु स्वासु च पङ्क्तिषु ॥ ६५ ॥

सत्यधर्मीया — तदुभयं वितत्य वक्ति ॥ कल्पयित्वेति । उभयेषां सुराणामसुराणां च । पृथक् पङ्क्तीः । वीथ्यालिरावलिः पङ्क्तिरित्यमरः । आली श्रेणी स्त्रियां पङ्क्तिरुभयोस्ततिरुच्यत इत्यभिधानात् । कानित्कः स्वेषु स्वेष्विति पाठोऽपि शुद्धिमर्हति । स्वेषुस्वेष्विति पदमेकम् । देवेषु देवान्दैत्येषु दैत्यानिति । तथा पङ्क्तीषूपवेशयामासेति तत्रार्थः । अथवा स्वेषु स्वेष्विति नपुंसकस्यापि शक्यं नेतुं पङ्क्तिविशेषणता । विस्तृतं च प्राक् । तान्देवदानवान् । स्वासु स्वासु पङ्क्तिषूपवेशयामास ॥ ६५ ॥

छलारी — उभयेषां देवासुराणां पङ्क्तीः पृथग्विविच्य कल्पयित्वा विधाय तासु पङ्क्तिषु स्वेषु जातीयेषु जनेषु मध्ये तान्देवासुरान् उपवेशयामास । तत्रासुराणां प्रतारणार्थमेवोपवेशनं ज्ञेयम् ।।६५।।

लिङ्गेरी — जगत्पतिरुभयेषां देवासुराणां पृथक् पङ्क्तीः कल्पयित्वा स्वासु स्वासु पंक्तिषु ताः असुरदेवता उपवेशयामास ।। ६५ ।।

दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः ।
दूरस्थान्पाययामास जरामृत्युहरां सुरान् ।। ६६ ।।

सत्यधर्मीया — उपसञ्चरैः समीपपरिभ्रमणैः । दूरस्थान्देवान् । जरामृत्युहरां सुधां पाययामास । तदेतदाभाणकं जगति विततमभूत् । परिवेषकाः स्वकीयाश्चेत्कोपवेशोऽपि किमिति ।। ६६ ।।

छलारी — उपसंचरैः समीपगमनबहुमानप्रियवाक्यादिभिर्वञ्चयन् दूरस्थानपि देवान् ।। ६६ ।।

लिङ्गेरी — गृहीतामृतकलशो हरिरुपसंचरैः समीपसंचरणादिभिर्दैत्यान्वंचयन् दूरस्थान्देवान् जरामृत्युहरां सुधां पाययामास ।। ६६ ।।

ते पालयन्तः समयमसुराः स्वकृतं नृप ।
तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया ।। ६७ ।।

सत्यधर्मीया — तेऽसुराः । यद्यभ्युपेतं क्वच साध्वसाधु वेति तथोक्तास्तत्तथेत्यन्वमंसतेत्यादिनोक्तं स्वकृतं समयबन्धं पालयन्तस्तूष्णीमासन् । कृतस्नेहाः । इदानीं स्त्रीविवादनिमित्ता या जुगुप्सा लोककर्तृकस्वकर्मकनिन्दा तया । इदानीं तु कृतः छिन्नः स्नेहो येषां ते तथेति व्याकरणपक्षे श्लोक उत्तरः कथं व्याकार्य इत्यार्या आचार्या विचार्याः । कृतः कृतश्च कृतः गुपगोपनकुत्सनयोः गुपे निन्दायां सन् । अप्रत्ययादिकारः प्रत्ययः । उपक्रोशो जुगुप्सा चेत्यमरः । कृतेन हसितेन सह स्नेहश्च यैस्ते । कृतं युगेऽपि पर्याप्ते विहिते हसिते फल इति विश्वः ।। ६७ ।।

छलारी — समयं कालविशेषं पालयन्तः प्रतीक्षन्तस्तस्यां कृतस्नेह आसक्तिर्यैस्ते स्त्रिया सह विवादस्य जुगुप्सया । निन्दितत्वादिति यावत् ।। ६७ ।।

लिङ्गेरी — हे नृप । नारायण्यां कृतस्नेहाः कामुकत्वात्तेऽसुरा एवं नारायण्या वञ्चने कृतेऽपि स्वकृतं समयं सङ्केतं 'त्वया यथा क्रियते तथाऽस्माकं संमतमि'त्यादिरूपं पालयन्तः सन्तः स्त्रिया सह विवादे जुगुप्सया च युक्ताः सन्तस्तूष्णीमासन् ।। ६७ ।।

तस्यां कृतातिप्रणयाः प्रणयापायकातराः ।
बहुमानेन चाबद्धा नोचुः किञ्चन विप्रियम् ।। ६८ ।।

सत्यधर्मीया — कृतोऽतिप्रणयो बहुस्नेहो यैस्ते । विश्वासो वा प्रणयः प्रेम्णि विश्रंभ इति विश्वः । प्रणयस्यापायोपगमो भवतीति कातरा धृता धैर्याः । अधीरे कातरत्रस्तावित्यमरः । ईषत्तरतीत्यप् । ईषदर्थे चेति कोः कादेशः । बहुमानेनान्तया समीपस्थापनादिरूपसत्कृत्या । श्रीमद्भिः पुरुषैः किं कामिनीकलहेनेति दुरहङ्कारेणेति केचित् । आबद्धा नियन्त्रिताः । तद्बहुमानस्य समयसंरक्षणकृतस्नेहत्वस्त्रीविवादजुगुप्सितत्वकृतप्रणयापायकातरतेत्यादिहेतुभिः । किञ्चन विप्रियम् । एतत्सर्वनिर्वासकम् । नोचुर्नाब्रुवन् ।। ६८ ।।

छलारी — कृतः अतिप्रणयोऽत्यन्तप्रीतिर्यैस्ते । प्रणयस्यापायेन नाशेन कातरा भीताः । किञ्चैते देवास्तावत्कृपणाः पूर्वं किञ्चित्पिबन्तु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादि बहुमानेन चाबद्धा नियन्त्रिता दैत्याः । समयपालनत्वं स्नेहत्वं स्त्रीविवादजुगुप्सितत्वं कृतातिप्रणयत्वं प्रणयापायकातरत्वं बहुमानेनाबद्धत्वं चेत्येतैः षड्भिर्निमित्तैर्विप्रियं किञ्चन नोचुः । तूष्णीमासंश्च ।। ६८ ।।

लिङ्गेरी — तस्यां कृतोऽतिप्रणयः स्नेहो यैस्ते । प्रणयस्यापायो नाशः स्यादिति कातरा भीता । बहुमानेनाबद्धाश्चासुराः किञ्चना विप्रियमनिष्टं नोचुः ।। ६८ ।।

देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ।
प्रविश्य सोममपिबच्चन्द्राकाभ्यां च सूचितः ।। ६९ ।।

सत्यधर्मीया — देवलिङ्गेन तच्चिह्नवद्धृतचिह्नेन प्रतिच्छन्न आच्छादितनिजरूपः स्वर्भानू राहुः । देवसंसदि तत्पङ्क्तौ प्रविश्य सोमममृतमपिबत् मुखमात्रे प्रावेशयत् । चन्द्रार्काभ्यां सूचितः । हरिं प्रति । अनुचितं रचितमेतेनेति सूचितः ।। ६९ ।।

छलारी — देवसंसदि देवपङ्क्तौ । देवलिङ्गेन देववेषेण प्रतिच्छन्नोऽप्रकटितस्वरूपः स्वर्भानू राहुश्चन्द्रार्कयोर्मध्ये प्रविष्ट उपविष्टः सोमममृतमपिबत् । चन्द्रार्काभ्यां सूचितो ज्ञापितः ।। ६९ ।।

लिङ्गेरी — स्वर्भानू राहुर्देवानां लिङ्गेन चिन्हेन प्रतिच्छन्न आच्छादितस्वरूपः सन्देवानां संसदि पङ्क्तौ प्रविश्य सोमममृतमपिबत् । चन्द्रार्काभ्यामयं राहुरिति हरये सूचितश्च । राहुः स्वर्भानुरित्यमरः ।।
।। ६९ ।।

चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधया प्लावितोऽपतत् ॥ ७० ॥

सत्यधर्मीया — हरिः क्षुरस्य छुरिकाया इव धारा यस्य तेन । पिबतस्तस्य शिरो जहार । सुधया प्लावितः कबन्धः । अयमूर्ध्वः कलेवरे । कबन्धस्तूत्तरे रक्षो विशेषे च विधुन्तुद इति विश्वः । तत्सम्बन्धमात्रतोऽजरामरोऽपतत् पातितः । स्वादूदोदधौ । यथोक्तं भगवत्पादैः । क्षिप्तः कबंधोऽस्य शुभोदसागरे त्वया स्थितोऽद्यापि हि तत्र सामृत इति ।

राहुर्बाहुबलेन दुर्लभमिति ज्ञात्वाऽन्यपङ्क्तौ स्थितः
श्रीशेन स्वशयेऽर्पितं तदमृतं द्राङ्नापिबत्कौतुकी ।

तर्ह्येवेन्दुरविप्रचोदित हरिच्छिन्नात्ममूर्धा पतत् चालस्यादमृतं विषं च भवतीत्याभाणकं प्रासरत् । यत्त्वत्राप्लावितो संस्पृष्ट इति व्याकरणं तदद्यापि जरामृतिरहिततयावस्थानहेत्वन्तरस्यानुपन्यस-नात्तस्योपेक्ष्यं परकीयं तदनुसरन्तः केचनास्माकीनाश्च नाचार्यवचनदर्शनवत इति महान्तः ॥ ७० ॥

छलारी — हरिस्तस्य राहोरमृतं पिबतोऽसतः, क्षुरवच्छुरिकावद्धाराः प्रान्ता यस्य तेन चक्रेण शिरो जहार । कबन्धः शिरोरहितदेहः सुधया आप्लावितः संस्पृष्टः ॥ ७० ॥

लिङ्गेरी — हरिः क्षुरवन्नापितशस्त्रवद्धारावता चक्रेणामृतं पिबतस्तस्य राहोः शिरो जहारापहृत-वान् । तस्य राहोः कबन्धः शिरोरहितदेहः सुधयाऽमृतेन प्लावित आर्द्रीकृतोऽपतत् । शुद्धोदसमुद्रे इति शेषः ॥ ७० ॥

शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।
यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥ ७१ ॥

सत्यधर्मीया — तच्छिरोऽमरताम् । तदाविष्टत्वात्तत्त्वम् । शिरस्तु तस्य गृहतामवाप सुरैः समाविष्टमिति श्रीमदुक्तेः । तुश्च । तेनामृतार्थं हि सहस्रजन्मसु प्रतप्य भूयस्तप आरितो वरः । स्वयंभुव इति श्रीमदुक्तविशेषस्याशेषविदो हरेर्विरिञ्चिवररिरक्षयिषयैव पीयूषस्थापनं पाणौ चन्द्रसूर्यसूचनं च स्वसेवाघटनार्थं देवं प्रति । सत्सु सुरेष्वन्येष्वेताभ्यामेव सूचनं लोचननिभालनीये कार्ये तन्नेत्रतया शशिसूर्यनेत्रमिति स्मृताभ्यां युक्तं पत्युक्तं च कथं विश्वचक्षुर्नापश्यदित्यादिविशेषस्य च द्योतक इति ध्येयम् । अजो ब्रह्मा । नवग्रहमध्य एकं ग्रहमचीक्लृपदकल्पयत् । सूचनमचारि

ताभ्यामिति वैरधीर्वैरयुक्तबुद्धिर्यश्चन्द्रार्कौ पर्वण्यमापौर्णम्यादिपर्वकाले । अभिधावति मण्डलाच्छादकतया । यथोक्तमादिपर्वणि । ''ततो वैरविनिर्बन्धः कृतो राहुमुखेन वै । शाश्वतश्चन्द्रसूर्याभ्यां ग्रसत्यद्यापि चैव तावि''ति । गृह्णातीति तद्योगं करोतीति ग्रह इति तद्व्युत्पत्तिर्ज्ञेया । ग्रसितुमित्युक्तिरप्येतदभिप्रायातम् ।। ७१ ।।

छलारी — अमरतां नाशरहिततां नीतं प्राप्तं शिरो ग्रहं सूदिवद्ग्रहत्वादिकारणं कल्पयामास । यो राहुश्चन्द्रार्कयोर्वैरधीः पर्वणि पौर्णिमायाममावास्यां च चन्द्रार्कौ प्रतिग्रसितुमभिधावति तद्ग्रहं राहुनामकं ग्रहमचीक्लृपदिति सम्बन्धः ।। ७१ ।।

लिङ्गेरी — अजो ब्रह्मा राहोः शिरोऽमृतानीतं ग्रहमचीक्लृपत् कल्पितवान् । यो ग्रहः पर्वणि सूर्यचन्द्रोपरागयोश्चन्दार्कौ प्रति वैरधीः सन् अभिधावति ।। ७१ ।।

पीतप्रायेऽमृते देवैर्भगवांल्लोकभावनः ।
पश्यतामसुरेन्द्राणां स्वरूपं जगृहे विभुः ।। ७२ ।।

सत्यधर्मीया — पीतप्राये योग्यतातुल्यतयाऽमृते पीत इत्यर्थः । अधुना हस्ते किञ्चिच्छिष्टमिति पीतप्राय इत्युक्तिर्वा । स्वरूपं पुरुषाकारम् ।। ७२ ।।

छलारी — स्वरूपं पुरुषरूपम् ।। ७२ ।।

लिङ्गेरी — लोकभावनः सर्वजगदुत्पादको भगवान्हरिर्देवैरमृते प्रायशः पीते सति असुरेन्द्राणां पश्यतां सतां पुरुषरूपं जगृहे स्वीकृतवान् । प्रभुरित्यनेनाघटितघटनासामर्थ्यं हरेः सूचयति ।। ७२ ।।

एवं सुरासुरगणाः समदेशकाल-
हेत्वर्थयोगगतयो विफले विकल्पाः ।
तत्रामृतं सुरगणाः फलमञ्जसाऽऽपुः
यत्पादपङ्कजरजःश्रयणान्न दैत्याः ।। ७३ ।।

सत्यधर्मीया — हरिकरुणा चेत्कर्म फलवन्नापरथेति स्फुटमाचष्टे ।। एवमिति । समदेशकालहेत्वर्थयोगगतयः । समो देशः । क्षीरनिधितीरादिः । कालश्च मथनकालः । हेतुर्मन्दरादिः । अर्थाश्च कामधेनुप्रभृतयस्तैर्योगः सम्बन्धस्तदर्थं गतिश्च येषां ते तथा । अनेन परिदृश्यमानोपरितनसाधनान्योन्याभावः प्रकाश्यते । तत्रैवंविधसाधने सत्वेऽपि । तयोर्मध्य इति वा सुरगणा अमृतं

फलं तद्रूपमंजसा सम्यगापुः । तत्र हेतुमाह । यत्पादेति । यस्य हरेः पादावेव पङ्कजे तयोर्यद्रजः परागवत्धूलयस्तदाश्रयणात् । विफले फलानुपलम्भके लक्ष्मीशे सति । विपरीत इति यावत् । विकल्पा असमर्थाः सन्तो दैत्या नापुः । विशिष्टे फले देवप्राप्ये व्यवस्थितविकल्पे येषामस्तीत्यच्प्रत्ययान्तः शब्दः । तमेव विकल्पपदार्थमाह । फलममृतमञ्जसा नापुर्दैत्या इति ॥ ७३ ॥

छलारी — हरिभक्तानामेवोद्यमफलं नान्येषामित्येवं व्याख्याय तात्पर्यमाह ॥ एवमिति । समा देशादयो येषां ते तादृशा अपि । हेतुर्मन्दराद्रिरर्थः समुद्रे क्षिप्तवीरुधादिद्रव्यम् । विविधः कल्पः केषाञ्चित्फलं नियतं केषाञ्चिन्नेति वैचित्र्यमित्यर्थः । तथा च केवलविकल्पो वैचित्र्यं येषां ते फले विकल्पाः फलवैषम्यवन्तो बभूवुरित्यर्थः । निमित्तं वदन् फलवैषम्यमाह ॥ तत्रेति । तत्र देवासुरेषु मध्ये सुरगणा यस्य हरेः पादपङ्कजयो रजसः परागस्याश्रयणादञ्जसा । अञ्जःशब्दोऽवधारणे । सेवनादेवेत्यर्थः । आपुः प्राप्नुवन् । दैत्यास्तु न प्रापुः । स हरिः सेव्य इत्यर्थः ॥ ७३ ॥

लिङ्गेरी — एवं सुरासुरगणाः समानदेशकालकारणार्थप्राप्त्युपायगमनादिवन्तोऽपि फलविषये विकल्पाः फलतदभाववन्तोऽभवन् । तदेव दर्शयति । सुरगणा यस्य हरेः पादपंकजरजः श्रयणादमृत रूपं फलमंजसा निर्विघ्नेनापुर्दैत्यास्तदभावान्नापुः । स एव फलार्थिभिः सेव्य इति शेषः ॥ ७३ ॥

यद्युद्यतेषु वसुकर्ममनोवचोभि-
र्देवात्मजादिषु नृभिस्तदसत् पुरस्तात् ।
तैरेव सद् भवति यत् क्रियते च तस्मिन्
सर्वस्य तद् भवति मूलनिषेचनं यत् ॥ ७४ ॥

इति श्रीमद्भागवते अष्टमस्कन्धेऽष्टमोऽध्यायः ।

सत्यधर्मीया — समश्रमादीनाममराणामनमराणां मध्ये कुतः फलमफलं लेभिरे सुरासुराः कुतो नापुरित्यत एवंकरणानेवंकरणाभ्यामित्याह ॥ यदीति । वसु द्रव्यम् । कर्म मनो वचांसि च तैः । देवात्मजादिषु । देवाश्च । अत्रात्मजादीति दृष्टान्तोपदर्शनार्थम् । यथाऽऽत्मजादिषु तद्वद्देवेषु हरीतरेष्विति । न च द्वन्द्वनिर्दिष्टेष्वेकस्य कथं दृष्टान्तसमर्पकतेति वाच्यम् । आकाशग्रहणं दृष्टान्तोपदर्शनार्थमित्यादिसुधा । विद्याशब्दस्य योगरूढिभ्यामिति सुधाव्याख्यायां चाचार्यैरत्र यथार्थज्ञानेऽपि वेदनं विद्येति योग्यस्य ''कर्मणा बद्ध्यते जन्तुर्विद्यया च विमुच्यते'' । विद्यैव तु

निर्धारणादित्यादिप्रयोगमभ्युपेत्य रूढेश्च प्रदर्शनं दृष्टान्ततयेति ज्ञातव्यमित्युक्तेः । एवं द्वितीयाध्याय-द्वितीयपादीयमहत्त्वाणुत्त्वयोश्चैवेत्यनुव्याख्याव्याख्यायामत्र महत्त्वग्रहणं दृष्टान्तार्थमित्यादि बहुस्थले विलोकनीयमिदं प्रमेयमिति नापूर्वता । नृभिरधिकारिभिः । पुरस्तात् । धनाद्याराधनेन । पुरस्ताद्वेदाद्यान्तरङ्गिकार्थाननुसन्धनादग्रतः । उद्यतेषु त्वमेतत्त्वमेतत्कुर्वितीश्वरनियममनुसृत्य वर्त-मानेषु । अस्वतन्त्रेषु देवात्मजादिषु । एते एवं तुष्यंत्विति यदि यत्किञ्चित्क्रियते तर्हि तदसदविद्य-मानम् । अफलोपलम्भकत्वात् । तैरेव नृभिः । तैर्वस्वादिभिर्यदाराधनं तस्मिन्भगवति क्रियते तत्सफलत्वेन विद्यमानं भवति । न ह्येकं श्रीकान्तमाराधयतां तदितरसुरसपर्यया कथं कथय फललाभः प्रत्युतासमञ्चिता रुषान्वितास्ते भवेयुरित्यत आह । यन्मूलनिषेचनं तरुवेरनीरनिषेके शाखादीना-मम्लानतैवं वासुदेवपूजने सभाजनभाजनानि सुरा इति न सरूढत्वं तेषामिति भाव इति । देवात्मजादिभिरित्यत्रानेवं व्याकरणे देवोत्तमात्मजनिबन्धः किमनुबन्ध इत्यनुयोगो दुष्पारः स्यात् । देवात्मजेषु तत्परमात्मजातेषु पद्मजादिष्विति यावत् । तानेव एतीत्यनुसंहितं तदसदिति वा । देहात्मजादिष्विति पाठो ललितः । सुलभार्थश्च । यद्युज्यतेषु वसुकर्मदेहात्मजादिषु नृभिस्तद-सत्पृथक्त्वात् । तैरेव सद्भवति यत्क्रियते पृथक्त्वादिति काचित्कः पाठः । तन्मात्रप्रीत्या शासनात्तत्सत्क्रियाभेदात् । अपृथक्त्वात् । परमात्मसमर्पणतत्परिवारत्वेनापृथग्भावात् । पृथक्त्वम-पृथक्त्वं च निमित्तीकृत्येति ल्यब्लोपपञ्चम्यौ वा । असवः प्राणाश्च । यद्युज्यते देहाद्युपयुक्तं क्रियते तत् । उर्वरितं सर्वं पूर्ववत् । श्रीधरीये तथा छलारीये च । असुश्च प्राणाश्चेति सति । पुंसि भूम्न्यसवः प्राणा इति योऽसावसौ पुरुषः सोऽहमित्यादिवदनिर्वाहाभावेऽपि समासः किमनुबन्धनिबन्ध इति न जानीमः । उद्यतेषु वसुकर्मेत्यादि पाठे इषुशब्दो बाणशब्दलक्षकः स च शरीरवाची । उद्यतानि देवात्मजादिसत्कारोद्युक्तानि । इषु बाणं शरीरं वसुकर्ममनोवचनानि च तैः । न च कथमिषुपदेन बाणग्रहस्तेन च कायो बाणं शरीरं चेत्युक्तशरीरपरिग्रह इति वाच्यम् । सूस्मूर्षतुभवाद्द्विरेफद्युरत्नादेः। ।। ७४ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे अष्टमोऽध्यायः ।। ८-८ ।।

छलारी — एतदेवोपपादयति ।। यदीति । असुः प्राणो वसु धनं प्राणादिभिर्देहात्मजादिषु देहापत्यकलत्रादिषु यद्युज्यते प्रयुज्यते केवलं देहाद्युद्देशेन वित्तादिना पोषणादिरूपं यत्कर्म क्रियत

इत्यर्थः । तदसदल्पफलं भवति । कुतः । पृथक्त्वात्पोषणादेः केवलं देहादिविषयमात्रत्वेन हरिविषयादित्वाभावात् । तथा तैरेव वित्तादिसाधनैरीश्वरोद्देशेन यत्कर्म क्रियते तत्सन्महाफलं भवति । कुतः । अपृथक्त्वात्तत्कर्मण ईश्वरं विनाऽकृतत्वात् । ईश्वरभक्त्यैव कृतत्वादिति यावत् । तर्हीतो देवताद्यर्चनाभावात्कथं महाफलं स्यादित्यत आह ॥ सर्वस्येति । यन्मूलस्य प्रधानस्य हरेर्निषेचनमर्चनं तत्सर्वस्येतरदेवादेरपि भवति । कुतः । अपृथक्त्वात्परिवारतया स्थितत्वादित्यप्यर्थो ग्राह्यः । यस्य कस्यापि पूजेश्वरप्रीत्युद्देशेन कृता चेत्सफला नान्यथा । अतो देवानां तादृशत्वात्फलप्राप्तिर्न दैत्यानामभक्तत्वादिति भावः ॥ ७४ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे अष्टमोऽध्यायः ॥ ८-८ ॥

लिङ्गेरी — नन्वसुराणामपि ब्रह्मरुद्राद्याश्रयणात्कथं फलाप्राप्तिर्ब्रह्मरुद्रविष्णूनां समत्वादित्याशङ्क्य श्रीहरेरेव ब्रह्मरुद्राभ्यामुत्तमत्वेन तदनुग्रहमभिभाव्यासुराणां फलादाने स्वपादपद्माराधकदेवानां फलदाने च समर्थत्वादिना नैवं शङ्क्यमिति परिहरति ॥ यदीति । नृभिः फलार्थिभिः पुरुषैरुद्यतेषु फलदानाभिमुखेषु देवात्मजादिषु वसुकर्ममनोवचोभिर्द्रव्यक्रियाकरणवाक्यैर्यदर्चनं पुरस्तात्प्रथममेव ते स्वतन्त्रा इति बुद्ध्या क्रियन्ते तदसद्दुष्टं निष्फलं भवेत् । यतस्तैरेव देवात्मजादिभिरेव स्वेषामर्चनादि यत्स्वातन्त्र्यबुद्ध्या स्वमात्राराधकैः क्रियते तत्तस्मिन् हरौ समर्पितं भवति । यत्पुनर्मूलनिषेचनं प्रथमत एव हरिपूजादिकं क्रियते तद्वृक्षमूले उदकसेचनं यथा सर्वस्य वृक्षस्य साधनं भवति तद्वत्सर्वस्यापि फलस्य हरिगुरुदेवतानुग्रहप्राप्यस्य साधनं भवति । येऽप्यन्यदेवताभक्ता यजंत्यविधिपूर्वकम् । अन्तवत्तु फलं तेषाम् । देवा विष्ण्वर्पणं कृत्वेत्यादेः ॥ ७४ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे अष्टमोऽध्यायः ॥ ८-८ ॥

॥ अथ नवमोऽध्यायः ॥

श्रीशुक उवाच–

इति दानवदैतेया नाविन्दन्नमृतं नृप ।
युक्ताः कर्मणि यत्ताश्च नारायणपराङ्मुखाः ॥ १ ॥

सत्यधर्मीया — सन्नद्धानां सुराणां च युद्धमध्यायद्वयेन वदन्नादौ भगवांस्तत्रैव स्थितोऽन्यत्र गत इति विषये किञ्चिदनूद्य परमात्मगमनप्रकारमाहेत्याह ॥ श्रीशुक इति । दानवाश्च दैतेयाश्च ते । अनेन विशेषेण पीयूषप्राशनं नासुराणामिति द्योत्यते । कर्मणि मथनरूपे । यत्ता इति युक्ताः अमृतप्राशनयोग्या अथाऽपि नाविन्दन्नापुः । तत्र हेतुमाह ॥ नारायणपराङ्मुखा इति । वासुदेव-पराङ्मुखा इति बहुमुखपाठः ॥ १ ॥

छलारी — पूर्वाध्यायान्तोक्तमेवानुवदन् हरेर्गमनप्रकारं वक्ति ॥ इतीति । कर्मण्यमृतमथने युक्ता यत्ताः सन्नद्धा अप्यमृतं नाविन्दन्न प्राप्ताः । विद् लाभ इति धातोः । वासुदेवपराङ्मुखा इति हेतुगर्भविशेषणम् ॥ १ ॥

लिङ्गेरी — श्रीहरिचरणारविंदभक्त्यादिसाधनेनैव श्रेयःप्राप्तिस्तदभावे तदभाव इति ज्ञापयितुं देवासुरजयापजयाद्याहाध्यायद्वयेन शुकः । हे नृप । दानवदैतेया वासुदेवपराङ्मुखाः भक्त्यादि-विधुरास्ततः कर्मणि क्षीरसमुद्रमथनरूपे युक्ता मनोयुक्ता यत्ताश्च प्रयत्नवन्तोऽपीत्युक्तरीत्याऽमृतं नाविन्दन्न प्रापुः ॥ १ ॥

साधयित्वाऽमृतं राजन् पाययित्वाऽमृतं सुरान् ।
पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २ ॥

सत्यधर्मीया — साधनफलत्वेन पानकर्मत्वेन चामृतममृतमिति द्विवारमुक्तिः । स्वकानिति पाठे सुरामृतप्राशने हेतूनिति मन्तव्यम् । सर्वभूतानां पश्यतां सतां गरुडवाहनो ययावित्यन्वयः ॥ २ ॥

छलारी — सुरान् स्वभक्तान् । पश्यतां सताम् ॥ २ ॥

लिङ्गेरी — हे राजन् । गरुडवाहनोऽमृतं साधयित्वा सुरान्पाययित्वा च सर्वभूतानां पश्यतां सतां ययौ ॥ २ ॥

सपत्नानां परामृद्धिं दृष्ट्वा च दितिनन्दनाः ।
अमृष्यमाणा उत्पेतुर्देवान् प्रत्युद्यतायुधाः ॥ ३ ॥

सत्यधर्मीया — ये येषां सपत्नानां शत्रूणां परां वृद्धिमैश्वर्यं दृष्ट्वाऽमृष्यमाणास्ते । उद्यतायुधाः दिविनन्दनास्तान्देवान्प्रत्युत्पेतुरित्यन्वयः ॥ ३ ॥

छलारी — सआयासवद्भिर्देवैः स्वान्परित्यज्यामृते पीते दैत्या किमकुर्वन्निति तत्राह ॥ सपत्नानामिति । सपत्नानां वैरिणां परामृद्धिं समृद्धिम् । दितिनन्दना दैत्याः ॥ ३ ॥

लिङ्गेरी — दितिनन्दना दैत्याः सपत्नानां स्वशत्रूणां देवानां परामुत्कृष्टामृद्धिमैश्वर्याभिवृद्धिं स्वेषां तदभावं च दृष्ट्वाऽमृष्यमाणा असहिष्णवः सन्त उद्धृतायुधाः सन्तो देवान्प्रत्युत्पेतुः ॥ ३ ॥

ततः सुरगणाः सर्वे सुधया पीतयैधिताः ।
प्रतिसंयुयुधुः शस्त्रैर्नारायणपरायणाः ॥ ४ ॥

सत्यधर्मीया — एधिता अभिवृद्धाः ॥ ४ ॥

~~**छलारी** — ऐधिता वर्धिताः प्रतिसंयुयुधुरभिमुखा बभूवुः ॥ ४ ॥~~

लिङ्गेरी — ततः सुरगणा यतो नारायणपरास्ततः पीतया सुधयैधिता बलाद्यभिवृद्धाः सन्तः शस्त्रैरसुरैः प्रतिसंयुयुधुः ॥ ४ ॥

तत्र देवासुरो नाम रणः परमदारुणः ।
रोधस्युदन्वतो राजन् तुमलो रोमहर्षणः ॥ ५ ॥

सत्यधर्मीया — तुमलः । तुमलं रणसङ्कुल इत्यमरस्तथाऽपि पुल्लिङ्गता ताम्यत्यत्रेति तमु ग्लाग्नानावस्माल्लच् इतरत्सर्वं पृषोदरादित्वात्सौत्रो वा तुमुः । रोमाणि हर्षयतीति रोमहर्षणं येन स इति वा । नाम नाम्ना । देवा असुरा सन्त्यस्मिन्निति स तथा । अर्श आद्यजन्तः । उदन्वत उदका अत्यत्र सन्ती ति स उदन्वान् । उदन्वानुदधौ चेति मत्वन्तो निपातितः । तस्य समुद्रस्य रोधसि तीरे ॥ ५ ॥

छलारी — रणं युद्धमुदन्वतः समुद्रस्य रोधसि तीरे तुमुलोऽतिशयितः ॥ ५ ॥

लिङ्गेरी — हे राजन् । तत्र तस्मिन्काले उदन्वतः समुद्रस्य रोधसि तीरे परमदारुणोऽति-क्रूरस्तुमुलः संदटितो वीराणां रोमहर्षणकरो देवासुराणां रणः । अभवदिति शेषः । उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः । कूलं रोधः च तीरं चेत्यमरः ॥ ५ ॥

तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ।
समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥

सत्यधर्मीया — अन्योन्यं गतम् ॥ ६ ॥

छलारी — रणे संरब्धमनस आग्रहयुक्तान्तःकरणा अन्योन्यं समासाद्य निजघ्नुः ॥ ६ ॥

लिङ्गेरी — तत्र रणे सपत्नाः शत्रवस्ते देवासुराः संरब्धमनसः कोपाटोपयुक्तान्तःकरणाः सन्तोऽन्योन्यं परस्परं समासाद्यासिभिः खड्गैर्बाणैः शरैर्विविधायुधैश्च निजघ्नुस्ताडितवन्तः ॥ ६ ॥

शङ्खतूर्यमृदङ्गानां भेरीडमरिणां महान् ।
हस्त्यश्वरथपत्तीनां नदतां निस्स्वनोऽभवत् ॥ ७ ॥

सत्यधर्मीया — डमरिणां डमरूणां डमितिशब्दमियर्ति मृगव्यादित्वादर्तेःकुः गणपाठादेव गुणे डमरुर्भवति । तात्पर्योऽयं नान्तो डमरिशब्दो वाद्यविशेषवाचकः । वाद्यप्रभेदा डमरुर्मड्डुडिंडिमझर्झरा इत्यमरः । हस्त्यश्वरथपत्तीनां नदमताम् । पदातिपत्तिपदगेत्यमरः ॥ ७ ॥

छलारी — डमरीति वाद्यविशेषः ॥ ७ ॥

लिङ्गेरी — तदा नदतां मुहुर्मुहुर्ध्वनिं कुर्वतां शङ्खतूर्यमृदंगाणां हस्त्यश्वरथपत्तीनां च निःस्वनोऽभवत् ॥ ७ ॥

रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ।
हया हयैरिभैश्चेभाः समसज्जन्त संयुगे ॥ ८ ॥

सत्यधर्मीया — समसज्जन्त सङ्गता अभवन् ॥ ८ ॥

छलारी — द्वन्द्वयुद्धमभूदित्याह ॥ रथिन इति । समासज्जन्त संसक्ताः ॥ ८ ॥

लिङ्गेरी — तस्मिन्संयुगे युद्धे रथिनो रथिभिः पत्तयः पादचारिणः पत्तिभिः सह हयाश्च हयैरिभा गजाश्चेभैः समसज्जन्त संयुक्ता बभुवुः ॥ ८ ॥

उष्ट्रैः केचिद् द्विजैः केचिदपरेऽभिययुः खरैः ।
केचिद् गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥

सत्यधर्मीया — द्विजैः पक्षिभिः ऋक्षैर्भल्लूकैर्द्वीपिभिः शार्दूलैर्हरयः सिंहा मर्कटा वा ॥ ९ ॥

छलारी — तेषां वाहनान्याहुः ॥ उष्ट्रैरिति । द्वीपिभिः शार्दूलैः । हरिभिः सिंहैः कपिभिर्वा ॥९॥

लिङ्गेरी — केचिद्भटा वीरा उष्ट्रैर्दीर्घग्रीवैः, केचिद्भटा द्विजैः पक्षिभिरपरे खरैर्गर्दभैः केचिद्गौरैः श्वेतैर्मृगैः केचिदृक्षैः करडीत्यपभ्रष्टैर्भल्लूकैर्द्वीपिभिर्व्याघ्रैर्हरिभिः सिंहैरूढाः सन्तो निर्ययुः । युद्धाय निर्जग्मुः ॥ ९ ॥

गृध्रैः कङ्कैर्बकैरन्ये श्येनैर्भासैस्तिमिङ्गिलैः ।
शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥

सत्यधर्मीया — श्येनैर्भासैः कुक्कुटैः । भासो मासि समाख्यातौ लोष्ठे कुक्कुटगृध्रयोरिति विश्वः । तिमिङ्गिलैर्महामत्स्यैः । विस्तरस्तु दशमविवृतावनुसंधेयः । शरभैरष्टपादैः खड्गैस्तन्नामकमृगैर्गवयैर-रुणैरटव्यटत्सत्त्वैः ॥ १० ॥

छलारी — श्येनभासैः श्येनपक्षिभिः । तिमिङ्गिलैर्मत्स्यविशेषैः । खड्गैर्मृगविशेषैः । अरुणैर्वन-सत्त्वविशेषैः ॥ १० ॥

लिङ्गेरी — अन्ये गृध्रैरपरे कंकैरपरे बकैः केचित्सेनाभासैः कुत्सितैः सेनैरपरे तिमिंगिलैरन्ये शरभैरष्टपदमृगविशेषैः केचिन्महिषैरन्ये खड्गैरपरे गोवृषैः केचिद्गवैरन्येऽरुणैः रक्तवर्णैर्मृग-विशेषैर्निर्ययुः ॥ १० ॥

शिवाभिराखुभिः केचित् कृकलासैः शशैर्नरैः ।
बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥

सत्यधर्मीया — शिवा गोमायवः कृकलासैः सरटैर्बस्तैरजैः ॥ ११ ॥

छलारी — शिवाभिर्गोमायुभिः । आखुभिर्मूषकैः । कृकलासैः सरटाभिः । बस्तैर्मेषैः ॥ ११ ॥

लिङ्गेरी — अन्ये शिवाभिर्जंबुकस्त्रीभिः केचिदाखुभिः इलीत्यपभ्रष्टैः केचित्कृकलासैः ओती-काटेत्यपशब्दैः केचिच्छशैः प्रसिद्धैर्नरैः केचिद्बस्तैरजैरपरे कृष्णसारैरन्ये हंसैरपरे सूकरैर्वराहैर्निर्जग्मुः। ॥ ११ ॥

अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ।
सेनयोरुभयो राजन् विविशुस्तेऽग्रतोऽग्रतः ॥ १२ ॥

सत्यधर्मीया — विकृतविग्रहैः सत्त्वै ऋक्षआदिभिः ते सुरासुराः ॥ १२ ॥

छलारी — जलस्थलखगैर्जलस्थलपक्षिभिः । विकृता विग्रहा अवयवा येषां तैः सत्त्वैर्जन्तुभिः ॥ ॥ १२ ॥

लिङ्गेरी — अन्ये जलस्थलानां खगैः पक्षिभिर्विकृता विकारं प्राप्ता विग्रहाः शरीराणि येषां तैः सत्त्वैः प्राणिभिरुभयोः सेनयोरग्रतोऽग्रे विविशुः ॥ १२ ॥

चित्रध्वजपटै राजन्नातपत्रैः शितामलैः ।
महाधनैर्वज्रदण्डैर्विभ्राजद्बार्हचामरैः ॥ १३ ॥

सत्यधर्मीया — शितानि शुभ्राणि च तान्यमलानि च तैः शितावच्छ्वेतशर्करावदमलैर्वा । चक्रे शितापर्णमहोत्सवमन्वगा इति **श्रीविद्याधीशविजयव्याख्याने** शिता स्याच्छ्वेतशर्करेत्यभिधानाभिधानात् । बार्हचामरैः पिच्छप्रकीर्णैः ॥ १३ ॥

छलारी — चित्रध्वजपटादिभिर्देवदानववीराणां ध्वजिन्यौ सैन्ये रेजतुरित्यन्वयः । सितैर्धवलैरमलैर्निर्मलैर्महाधनैरनर्घ्यैर्वज्रमयदण्डोपेतैः । बार्हचामरैः पिच्छाविरचितचामरैः ॥ १३ ॥

लिङ्गेरी — हे पाण्डुनन्दन पाण्डुकुलसन्तोषक परीक्षित् राजन् । देवदानववीराणां ध्वजिन्यौ सेने, सागरे यादसां जलचरप्राणिनां समूहौ वीचीनां तरंगाणां मालाभिः पङ्क्तिभिरिव । चित्रैराश्चर्यकरैर्ध्वजस्तंभैः पटैश्च, सितैः शुभ्रैरमलैर्निर्दोषैरातपत्रैः सौरकिरणानीतसंतापाद्रक्षकैः छत्रैः । महाधनैर्बहुद्रव्यविक्रियैर्वज्रखचितदण्डवद्भिर्विभ्राजद्बार्हचामरैः प्रकाशशीलमयूरगरुत्मतचामरैः, वातेन तीव्रगमनजनितवायुनोद्धूतैरुर्ध्वं चलितैरुत्तरोष्णीषैः श्रेष्ठशिरोबन्धकवस्त्रैः सत्कृतैर्निर्दुष्टतया कृतैर्वर्मभूषणैः कवचालंकारैर्विशदैः शाणोल्लीढतया प्रशस्तैः सूर्यरश्मिभिः संयुक्तैर्निमित्तैः सुतरां स्फुरद्भिः प्रकाशमानैर्ध्वजिन्यौ सेने रेजतुः शुशुभाते ॥ १३-१५ ॥

वातोद्धूतोत्तरोष्णीषैः सत्कृतैर्वर्मभूषणैः ।
स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥

सत्यधर्मीया — वातोद्धूतैस्तत्कंपितैस्तैरुत्तरैरुत्तरीयैरुष्णीषैः शिरोवेष्टनैः । उष्णीषं तु शिरोवेष्टन इति विश्वः । वर्मभिः कवचैः सूर्यरश्मिभिः सुतरां स्फुरद्भिः विशदैः शस्त्रैः ॥ १४ ॥

छलारी — वातोंद्धूतैरूर्ध्वं क्षिप्तैरुत्तरैरुष्णीषैः शिरोवेष्टनवस्त्रैश्च सत्कृतैः संमृष्टैर्वर्मभूषणैः । कवचैर्भूषणैश्च सूर्यरश्मिभिश्च सुतरां स्फुरद्भिः ॥ १४ ॥

देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन ।
रेजतुर्वीचिमालाभिर्यादसामिव सागरे ॥ १५ ॥

सत्यधर्मीया — ध्वजिन्यौ सेने । यादसां जलजन्तूनां वरूथिनी सागरे । वीचिमालाभिर्वीचीनां तरङ्गाणां वा स्त्रियामिति काकाक्षिन्यायेनोर्मिवीचिभ्यां सम्बद्ध्यते । पुल्लिङ्गस्त्रीलिङ्गयोर्वीचिमणि-यष्टिमूष्ट्योन्यामित्रुटिश्यामिपाटलिशाल्मलितरणिश्रेण्यूर्मयो वस्तिश्चेति वामनोक्तेः । वयति पूर्यते वा वेञो ङिच्चेति चिः । वीचिर्नित्यं स्त्रीति केचित् । वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोरित्युक्तेर्द्विलिङ्गो वीचिशब्दः । इदं प्रासङ्गिकं ज्ञेयम् ॥ १५ ॥

छलारी — तत्र दृष्टान्तः । सागरे यादसां जलजन्तूनां वरूथिन्यौ वीचीनां तरंगाणां मालाभिः राजभिर्यथा रेजतुस्तद्वत् ॥ १५ ॥

वैरोचनो बलिः सङ्ख्ये सोऽसुराणां चमूपतिः ।
यानं वैहायसं नाम कामगं मयनिर्मितम् ॥ १६ ॥

सत्यधर्मीया - वैरोचनस्तत्सम्बन्धी । पुत्र इति यावत् । वैहायसं विहायो गगनं तस्येदम् ॥१६॥

छलारी — सङ्ख्ये युद्धे वैरोचनो विरोचनपुत्रोऽसुराणां या चमूस्तस्याः पतिः यानमास्थित उदये उदयाद्रौ स्थितश्चन्द्र इव रेजतुरित्यन्वयः । विहायसाऽऽकाशमार्गेणैव गच्छमानमत एव वैहायसं नाम । मयेन दैत्यतक्षकेण निर्मितम् ॥ १६ ॥

लिङ्गेरी — हे प्रभो परीक्षित् । वैरोचनो विरोचनपुत्रो बलिर्यस्य संख्ये देवासुरयुद्धेऽसुराणां चमूपतिः सेनापतिर्भूत्वा मयेनासुरवर्धकेन निर्मितं कामेनेच्छानुसारेण गच्छतीति कामगमाकाश-गमनशक्त्याऽतिशयेन वैहायसं नाम ॥ १६ ॥

सर्वसाङ्ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ।
अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ।। १७ ।।

सत्यधर्मीया — साङ्ग्रामिकं युद्धसाधनम् । न विद्यते दर्शनं यस्य तददर्शनमदृश्यमित्यर्थः ।।१७।।

छलारी — सर्वसांग्रामिकैर्युद्धसाधनैरुपेतमप्रतर्क्यमेतादृशमिति निर्देष्टुमशक्यं च । दृश्यमानं सददर्शनं दृश्यते च विद्युद्वत् ।। १७ ।।

लिङ्गेरी — सर्वैः सांग्रामिकैर्युद्धसाधनैरुपेतं सर्वेषामाश्चर्यकरम् । अत एवाप्रतर्क्यमूहितुमशक्यमनिर्देश्यं वक्तुमशक्यं दृश्यमानमप्यदर्शनं दर्शनरहितम् । अद्भुतत्वादनिर्वाच्यमित्यादेः ।। १७ ।।

आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ।
वालव्यजनछत्राग्र्यै रेजे चन्द्र इवोदये ।। १८ ।।

सत्यधर्मीया — सर्वानीकाधिपैस्तत्तत्सेनानायकैः । उदये गिरौ । चन्द्र इव रेजे बभौ । अनेन निदर्शनेन क्रमात्क्षैण्यं कटाक्षयति ।। १८ ।।

छलारी — वालेति । चामरादिभिः ।। १८ ।।

लिङ्गेरी — एतादृशं विमानं श्रेष्ठयानमास्थितः आरूढः सन् सर्वैरनीकाधिपैः सेनानायकैर्वृतः सन् बालव्यजने छत्रं चेत्येषामग्र्यैः श्रेष्ठैरुदये चन्द्र इव रेजे दीप्तवान् ।। १८ ।।

तस्यासन् सर्वतो यानैर्यूथानां पतयोऽसुराः ।
नमुचिः शम्बरो बाणो विप्रचित्तिरयोमुखः ।। १९ ।।

सत्यधर्मीया — यूथानां सैन्यसङ्घानाम् । मुख्याख्यानाख्याति नमुचिरित्यादिना ।। १९ ।।

छलारी — तस्य बलिविमानस्य सर्वतः परितो यानैः सह यूथानां पतयो असुरा आसन् । यूथपतीनाह ।। नमुचिरित्यादिना ।। १९ ।।

लिङ्गेरी — नमुच्यादयस्त्रिपुराधिप इत्यन्तानाम् असुराणां यूथानां समूहानां पतयोऽसुरा यानैः स्वस्वारूढविमानैस्तस्य बलेः सर्वतो दिक्षु स्थिता आसन् । पौलोमकालेयनिवातकवचाख्यगणस्था अन्येऽसुराश्चासन् ।। १९-२२ ।।

द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ।
शकुनिर्भूतसन्तापो वज्रदंष्ट्रो विरोचनः ॥ २० ॥

सत्यधर्मीया — द्विमूर्धा संज्ञात्वान्न षः विरोचनस्तत्पिता बाणस्तदात्मजः ॥ २०-२२ ॥

छलारी — विरोचनो बलिपिता ॥ २० ॥

हयग्रीवः शङ्कुशिराः कपिलो मेघदुन्दुभिः ।
तारकश्चक्रदृक् शुम्भो निशुम्भो जम्भ उत्कलः ॥ २१ ॥

छलारी — हयग्रीवस्तन्नामको दैत्यः ॥ २१ ॥

अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ।
अन्ये पौलोमकालेया निवातकवचादयः ॥ २२ ॥

छलारी — पौलोमादयो गणविशेषाः ॥ २२ ॥

अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ।
सर्व एते रणमुखे बहुशो निर्जितामराः ॥ २३ ॥

सत्यधर्मीया — सोमस्यामृतस्य । अलब्धोऽप्राप्तो भागो यैस्ते । क्लेशभागिनो मथनकालिकवासुकिश्वासादिबाधाजनितश्रमभागवन्तः । निर्जिताः पराजिता अमरा यैस्ते ॥ २३ ॥

छलारी — सोमस्यामृतस्यालब्धो भागो यैस्तथा । बहुशो नितरां जिताः पराभूता अमरा यैस्ते तथा ॥ २३ ॥

लिङ्गेरी — रणमुखे बहुवारं निर्जितदेवाः । एतेन नमुच्यादयो निवातकवचांताः सर्वे सोमस्यामृतस्याप्राप्तस्वभागाः सन्तः केवलं क्लेशभाजिनः सन्तो युद्धार्थं सिंहनादं विमुंचन्तः सन्तो बहुध्वनीन् शङ्खान् ध्वनियुक्तांश्चक्रुः यदा तदा बलिभिदिन्द्रः सपत्नान् शत्रून् शूरानुत्सिक्तानभिवृद्धान् दृष्ट्वा भृशं कुपितश्चुकोप ॥ २३-२४ ॥

सिंहनादं विमुञ्चन्तः शङ्खान् दध्मुर्महारवान् ।
दृष्ट्वा सपत्नानुत्सिक्तान् बलभित् कुपितो भृशम् ॥ २४ ॥

सत्यधर्मीया — उत्सिक्तान्गर्वितान् ॥ २४ ॥

छलारी — महारवान् महाशब्दजनकान् । उत्सिक्तान् बलगर्वितान् सपत्नान् शत्रून्दृष्ट्वा बलभिद्देवेन्द्रो दिक्करिणां दिग्गजानाम् । स्वराट् स्वर्गपतिः । स्रवत्प्रस्रवणं स्रवन्ति गलन्ति प्रस्रवणानि मदजलानि यस्मिन् गजे तम् । उदयगिरिपक्षे स्रवन्ति स्यन्दमानानि प्रस्रवणानि निर्झरोदकानि यस्मिंस्तम् । अह्नःपतिः सूर्यः ॥ २४,२५ ॥

ऐरावतं दिक्करिणमारूढो वियति स्वराट् ।
यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २५ ॥

सत्यधर्मीया — स्वेन हरिणैव राजत्वेन कृत इति स तथा । अहर्पतिरन्हः पतिः सूर्यः । अहरादीनामिति रेफः । स्रवन्ति प्रस्रवणानि झरनीराणि यस्मिन्निति पर्वतपक्षे । ऐरावतपक्षे प्रस्रवणानि दानोदकानीति ज्ञेयम् ॥ २५ ॥

लिङ्गेरी — एवं कुपितोऽसुरसेनामभिविशन्प्रवेष्टुमिच्छुः स्वराट् स्वर्गाधिपतिरिन्द्रोऽहर्पतिः सूर्यः स्रवत्प्रसवणं स्यन्दमाननिर्झरोदकमुदयपर्वतं यथा तथा स्रवन्मदजलं दिग्गजमैरावतमारुरोह ॥ २५ ॥

तस्यासन् सर्वतो देवा नानावाहध्वजायुधाः ।
लोकपालाः सह गणैर्वाय्वग्निवरुणादयः ॥ २६ ॥

सत्यधर्मीया — तानेव लोकपालानाह ॥ वाय्वग्नीति ॥ २६ ॥

छलारी — यस्येन्द्रस्य सर्वतः समंतात् । नानाविधानि वाहनानि येषां ते । वाय्वग्निवरुणादयो लोकपालाः सह गणैः स्वस्वगणैः सह ॥ २६ ॥

लिङ्गेरी — वाय्वग्निवरुणादयो लोकपाला देवा नानाप्रकारवाहनध्वजायुधयुक्ताः संतस्तस्येन्द्रस्य सर्वतो दिक्षु स्वगणैः स्थिता संरक्षका आसन् ॥ २६ ॥

तेऽन्योन्यमभिसंसृत्य क्षिपन्तो नामभिर्मिथः ।
आह्वयन्तो विशन्तोऽग्रे युयुधुर्द्वन्द्वयोधिनः ॥ २७ ॥

सत्यधर्मीया — ते दैतेया आदितेयाश्च ॥ २७ ॥

छलारी — क्षिपन्तः परुषवचनैः धिक्कुर्वन्तो मिथो नामभिराह्वयन्तोऽग्रे प्रथमे द्वन्द्वयोधिनः द्वन्द्वेन योधिनः सन्तः ॥ २७ ॥

लिङ्गेरी — ते देवासुरा अन्योन्यं परस्परमभिसंहत्य मिलित्वा द्वन्द्वयोधिनो द्वौ द्वौ मिलित्वा युद्धं कर्तुमिच्छवः सन्तो नामभिराव्हयन्तस्तत्तन्नामग्रहणं कारयन्तो मिथः परस्परं क्षिपन्तस्तिरस्कुर्वन्तोऽग्रे सेनामुखे विशन्तः प्रविशन्तो युयुधुर्युद्धं चक्रुः ॥ २७ ॥

युयुधे बलिरिन्द्रेण तारकेण दिवस्पतिः ।
वरुणो हेतिनाऽयुध्यन्मित्रो राजन् प्रहेतिना ॥ २८ ॥

सत्यधर्मीया — दिवस्पतिः सेनानीः स्कंदः ॥ २८ ॥

छलारी — द्वन्द्वान्याह ॥ युयुधे इत्यादिना । गुहः स्कन्दोऽस्यतायुध्यत ॥ २८ ॥

लिङ्गेरी — हे राजन् । बलिरिन्द्रेण युयोध । दिवस्पस्तिस्तारकेण युयोध । वरुणो हेतिना, मित्राख्यः सूर्यः प्रहेतिनाऽयुध्यत् ॥ २८ ॥

यमस्तु कालनाभेन विश्वकर्मा मयेन वै ।
शम्बरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २९ ॥

सत्यधर्मीया — सविताऽप्यत्रोत्तरत्र चापरः सूर्यः ॥ २९ ॥

छलारी — सवित्रा तन्नामकसूर्येण ॥ २९ ॥

लिङ्गेरी — यमस्तु कालनाभेनासुरेण । विश्वकर्मा देवतक्षको मयेनासुरतक्षकेन युयुधे इति वै प्रसिद्धम् । शंबरोऽसुरस्त्वष्ट्राख्यादित्येन, विरोचनोऽसुरः सवित्राख्यादित्येन युयुधे ॥ २९ ॥

अपराजितेन नमुचिरश्विनौ वृषपर्वणा ।
सूर्यो बलिसुतैर्देवो बाणज्येष्ठशतेन सः ॥ ३० ॥

सत्यधर्मीया — बाणो ज्येष्ठो यस्य तच्च तच्छतं तेन बलिसुतैरित्यन्वयः ॥ ३० ॥

छलारी — सूर्यो विवस्वान्नामक एव शतेन शतसंख्याकैः बाणःज्येष्ठो यस्य तेन ॥ ३० ॥

लिङ्गेरी — अपराजिताख्यदेवेन नमुचिरसुरो युयुधे । अश्विनौ देवौ वृषपर्वणाऽसुरेण शर्मिष्ठा पित्राऽयुध्यत् । बाणोऽसुरः ज्येष्ठः श्रेष्ठो यस्य तेन शतेन शतसंख्याकैर्बलेरसुरस्य सुतैः सह प्रसिद्धः सूर्यो देवो युयुधे ॥ ३० ॥

राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ।
निशुम्भशुम्भयोर्देवी भद्रकाली नराशनी ॥ ३१ ॥

सत्यधर्मीया — अनिलो भूतवातः । भद्रकाली दुर्गा ॥ ३१ ॥

छलारी — अनिलो भूतवायुः । निशुंभशुंभाभ्याम् भद्रकाली दुर्गा ॥ ३१ ॥

लिङ्गेरी — सोमश्चन्द्रश्च राहुणाऽसुरेण युयुधे । अनिलो वायुः पुलोम्नाऽसुरेण । न रियन्त ब्रह्मादिवरबलेन न क्षियन्त इति नरा महिषासुरादयस्तानश्नातीति नराशनी । भक्तानां मङ्गलं दत्तत्वाद्भद्राऽसुराणां संहारकत्वात्काली दुर्गादेवी निशुंभशुंभाभ्यां युयुधे । निशुंभशुंभयोरिति कर्तरि षष्ठी ॥ ३१ ॥

वृषाकपिस्तु जम्भेन महिषेण विभावसुः ।
इल्वलः सहवातापिर्ब्रह्मपुत्रैररिन्दम ॥ ३२ ॥

सत्यधर्मीया — वृषाकपिः रुद्रः । वृषाकपिः शिवे कृष्ण इति विश्वः ॥ ३२ ॥

छलारी — वृषाकपी रुद्रः । विभावसुरग्निः । ब्रह्मपुत्रैर्दक्षप्रजेश्वरैः ॥ ३२ ॥

लिङ्गेरी — हे अरिंदम शत्रुशिक्षक । परीक्षित्संबोधनं वीररसाभिज्ञत्वख्यापनाय । वृषाकपिस्तु देवो जंभेनासुरेण विभावसुरग्निर्महिषेणासुरेण । सहवातापिर्वातापिसहितेल्वलोऽसुरो ब्रह्मपुत्रैर्वसिष्ठादिभिर्युयुधे ॥ ३२ ॥

कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ।
बृहस्पतिस्तूशनसा नरकेण शनैश्चरः ॥ ३३ ॥

सत्यधर्मीया — ब्रह्मपुत्रा दक्षाद्या । मातृभिः । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा सप्त मातर इत्युक्तसप्तभिः ॥ ३३ ॥

छलारी — मातृभिर्ब्राह्याादिसप्तमातृभिः । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः इत्युक्तेः । उशनसा शुक्राचार्येण ।। ३३ ।।

लिङ्गेरी — दुर्मर्षोऽसुरः कामदेवेनोत्कलोऽसुरो मातृभिर्ब्राह्याादिसप्तमातृभिः । बृहस्पतिर्देवाचार्यस्तूशनसा शुक्रेणासुराचार्येण, शनैर्मन्दं चरतीति राशिष्विति शनैश्चरो देवो नरकेणासुरेण युयुधे ।।३३।।

मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ।
विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ।। ३४ ।।

सत्यधर्मीया — कालेयैस्तद्गणैः ।। ३४ ।।

छलारी — मरुत एकोनपञ्चाशन्मरुद्गणाः । वसवो वसुनामका गणाः । रुद्रा रुद्रगणाः ।।३४।।

लिङ्गेरी — एकोनपञ्चाशन्मरुतो देवा निवातकवचैरसुरैः । अष्टवो वसवो देवाः कालेयैरसुरैः । दश विश्वेदेवास्तु पौलोमैरसुरैः । एकादशरुद्राः क्रोधवशैरसुरैः सह युयुधुः ।। ३४ ।।

त एवमाजावसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः ।
अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरांश्च चिक्षिपुः ।। ३५ ।।

सत्यधर्मीया — संहत्य मिलित्वा । अनेनायमनेनाहमिति संहत्य सङ्घं कृत्वेति वा । अनन्तरमन्यमासाद्य ।। ३५ ।।

छलारी — एवं द्वन्द्वेन संहत्य ।। ३५ ।।

लिङ्गेरी — बलीन्द्रादयोऽसुराः सुरेन्द्राः संहत्य परस्परं प्राप्य द्वन्द्वेनाजौ युद्धभूमावेवं युद्धयमानाः सन्तोऽन्योन्यमासाद्य खड्गादिभिरोजसाऽवष्टंभनशक्त्या निजघ्नुः । एवं परस्परं जिगीषवो जेतुमिच्छवः सन्तस्तीक्ष्णशरान् क्रूरान् बाणांश्चिक्षिपुश्च ।। ३५ ।।

भूशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ।
निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिण्डिपालैश्च शिरांसि चिच्छिदुः ।। ३६ ।।

सत्यधर्मीया — भूशुण्डय आयुधविशेषाः चश्चक्राणि गदाश्च चक्रगदम् । ऋष्टयोऽसयः । असिरिष्टय इत्यमरः । ऋषेर्गत्यर्थाच्चेदकारपूर्वः रिषेर्हि सार्धाच्चेद्रेफपूर्वः । प्राक् पक्षे ऋत्यक इति

प्रकृतिभावः । पट्टिशैरुभयपार्श्वधारैः खड्गविशेषैः । शक्तय उल्मुका उल्मुकानि वा । चुबुकं शालूकप्रातिपदिकां शुकोल्मुकानि नपुंसके चेति लिङ्गानुशासनोक्तेः । अलातानि । अङ्गारो लातमुल्मुकमित्यमरः । प्रासाः । प्रासस्तु कुंत इत्यमरः । परश्वधाः स्वधितिः । परशुश्च परश्वध इत्यमरः । भल्ला बाणविशेषाः । भल्लो भल्ली च बाणे स्यादिति विश्वः । परिघैः परिघातनैर्लोहाश्चितलगुडैर्मुद्गरैः । द्रुघणे मुद्गरघनावित्यमरः । भिन्दिपालाः भिण्डिपाला इति वा । भिन्दतः पालयतीति स तथा । द्वितीये डकारः पृषोदरादिः । भिन्दिपालः सृगस्तुल्यावित्यमरः ।। ३६ ।।

छलारी — विनष्टमरणधर्माणां देवानां पराक्रमं वर्णयति ।। भृशुण्डिभिरिति । निस्त्रिंशैः खड्गैर्भिन्दिपालसहितैः पूर्वोक्तायुधविशेषैः शिरांसि देत्यानां चिच्छिदुः । देवा इति शेषः ।। ३६ ।।

लिङ्गेरी — ते देवासुराः परस्परं भृशुण्डिभिश्चक्रैर्गदाभिः, ऋष्टिभिः साधारणखड्गैः पट्टिशैर्विस्तृतखड्गैः शक्तिभिरयोमुखैर्दीर्घदण्डैरुल्मुकैर्गतज्वलाग्नियुक्तकाष्टैः प्रासैरूर्ध्वमधश्चायोमुखैर्दण्डैः परश्वधैः कुठारैर्निस्त्रिंशैस्त्रिंशदंगुलिभ्योऽधिकदीर्घखड्गैर्भल्लैर्बाणैः परिघैः कवाटपृष्ठोपोद्बलकदारुविशेषैः, पृथुपुष्टबृहच्छिरोदण्डविशेषैर्भिण्डिपालैः शिरांसि चिच्छिदुर्द्विधाऽकुर्वन् ।। ३६ ।।

गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः ।
निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ।। ३७ ।।

सत्यधर्मीया — सारोहवाहा अध्यारूढपुरुषसहितवाहनानि । इष्वासः कोदण्डः । कार्मुकमिष्वास इत्यमरः ।। ३७ ।।

छलारी — सारोहवाहा आरोहन्तीत्यारोहाः पुरुषास्तै सहिता अन्ये वाहा उष्ट्रादीनि वाहनानि च । खण्डनमेव विशदयति ।। निकृत्तेति । निकृत्ताश्छिन्ना बाह्वादयो येषां ते शिरोधरा ग्रीवाः । इष्वास इषोर्बाणस्यासमासनं धनुः । तनुत्रं कवचम् । छिन्नानि ध्वजादीनि येषां ते ।। ३७ ।।

लिङ्गेरी — रथैः सहिता गजास्तुरंगाश्चाश्वाः, पदातयः पादचरा नरा, विविधा आरोहन्तीत्यारोहा गजाद्यारूढाः पुरुषास्तैः सहिताः सारोहावाहा वाहनानिविखण्डिताश्छिन्ना बभूवुः । एवं तत्र वीरा निकृत्ताश्छिन्ना बाहव ऊरवः शिरोधरा ग्रीवा अंघ्रयः पादा येषां ते तथा बभूवुः । छिन्नानि ध्वजज्यासानि धनूंषि तनुत्राणि कवचानि भूषणानि येषां ते तथा चासन् ।। ३७ ।।

तेषां पदाघातरथाङ्गचूर्णितादायोधनादुल्बण उच्छ्रितस्तदा ।
रेणुर्दिशः खं द्युमणिं च छादयन् न्यवर्ततासृक्स्रुतिभिः परिप्लुतः ।। ३८ ।।

सत्यधर्मीया — चक्रं रथाङ्गमित्यमराद्रथाङ्गाच्चक्रात् । उल्बणोऽसह्य उच्छ्रित उन्नतः । रेणुर्धूलिः रेणुस्तु पर्यटे धूल्यामिति विश्वः । असृजां रक्तानां सृतिभिः स्रावैः परिप्लुतः । न्यवर्तत भूलग्नोऽभूदिति यावत् ।। ३८ ।।

छलारी — तेषां देवादीनां पदाघातैः पादप्रहारै रथाङ्गै रथस्याङ्गभूतैश्चक्रैश्च चूर्णितात् । आयोधनाद्युद्धभूमेः सकाशादुत्थितो रेणुर्धूलिर्दिशः खमाकाशं द्युमणिं सूर्यमाच्छादयन्सन् तदैव न्यवर्तत सूर्यादेः सकाशान्निवृत्तोऽभूत् । कथम्भूतः । अस्रक्सृतिभी रक्तस्रावैः परिप्लुतः सिक्तः सन् ।। ३८ ।।

लिङ्गेरी — तेषां गजाश्वपदातीनां पदाघातैः पादसंघट्टनै रथांगैः रथचक्रैश्च चूर्णितादायोधनाद्युद्धमण्डलादुत्थित उल्बणस्तीक्ष्ण उच्छ्रित उन्नतो रेणुर्धूलिस्तदा दिशः खमाकाशं द्युमणिं सूर्यं चाच्छादयन् स्थितोऽपि असृक्स्रुतिभिः रक्तप्रवाहैः परिप्लुतः क्लिन्नो न्यवर्तत शान्तोऽभूत् ।। ३८ ।।

शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः ।
महाभुजैः साभरणैः सहायुधैः संप्रास्तृता भूः करभोरुभिर्बभौ ।। ३९ ।।

सत्यधर्मीयां — करभोरुभिर्गजोत्सङ्गैः । दष्टदच्छदैर्गतम् । सम्प्रास्तृता आच्छादिता बभौ ।। ।। ३९ ।।

छलारी — शिरोभिर्महाभुजैश्च । करभोरुभिः करिकरसदृशैरुरुभिश्च । सा भू रणभूमिः प्रकर्षेणास्तृताऽऽच्छादिता सती बभौ । कथम्भूतैः शिरोभिः । उद्धूतान्युत्पतितानि किरीटानि कुण्डलानि च येभ्यस्तैः । संरंभयुक्ताः कोपाकारयुक्ता दृशो येषु तैः । परिदष्टा दच्छदा ओष्ठा येषु तैः ।। ३९ ।।

लिङ्गेरी — तदा भूः, उद्धूतानि शिरसः स्खलितानि किरीटानि शिरोभूषणानि कुण्डलानि कर्णाभरणानि येषां तैः । संरभेन कोपाटोपेन युक्ता दृशा नेत्राणि येषां तैः । परिदष्टानि दन्तैर्गृहीता दतां दन्तानां छदा आच्छादका ओष्ठा येषां तैः । शिरोभिः साभरणैः सहायुधैर्महाभुजैः करभवद्गजहस्तवत् क्रमवर्तुलत्वपुष्टत्वादिगुणैरुरुभिः प्रस्तृता आच्छादिता सती बभौ ।। ३९ ।।

कबन्धास्तत्र चोत्पेतुः पतितैः स्वशिरोऽक्षिभिः ।
उद्यतायुधदोर्दण्डैराधावन्तो भटान् मृधे ॥ ४० ॥

सत्यधर्मीया — स्वशिरोऽक्षिभिस्तत्स्थितैर्नेत्रैः। पश्यन्त इति शेषः । भटान्स्वप्रतिभटान् ॥४० ॥

छलारी — कबन्धाः शिरोरहितदेहाः । पतितानि यानि शिरांसि तत्रत्यैरक्षिभिः पश्यन्तः उद्यतान्यायुधानि यैस्ते । दोर्दण्डैर्युक्ता आधावन्तो द्रुवन्तो मृधे युद्धायोत्पेतुरभ्यपद्यन्त ॥ ४० ॥

लिङ्गेरी — तत्र मृधे युद्धे कबन्धाः वीरान्पश्यन्तः सन्त उद्यतायुधैर्दण्डाकारैर्हस्तैर्युक्ताश्च सन्तः उत्पेतुरुपरि पतिता अभवन् ॥ ४० ॥

बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः ।
चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥ ४१ ॥

सत्यधर्मीया — चतुरो वाहान् अश्वान्करचरणरक्षणार्थं स्थापितान् । वाजिवाहार्वेत्यमरः । प्रथमान्तं च सद्बलिविशेषणम् । कुशल इति तदर्थः । आरोहमंबष्टम् । आर्च्छयत् आर्च्छत् । धातूनामनेकार्थत्वाद्गत्यर्थोऽपि ऋच्छिस्ताडनार्थस्तताड ॥ ४१ ॥

छलारी — वाहान् ऐरावतपादचतुष्टयरक्षवान् । आरोहं गजयन्तारम् । आर्च्छयद्विव्याध ॥ ४१ ॥

लिङ्गेरी — बलिर्दशभिः शरैर्महेन्द्रं त्रिभिः शरैरैरावन्तं चतुर्भिः शरैश्चतुःसङ्ख्याकान्वाहान् एकेन शरेण, आरोहत्यनेनेत्यारोहः वाहनप्रेरकस्तं चार्च्छयत्तताड ॥ ४१ ॥

स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः ।
चिच्छेद निशितैर्भल्लैरसंप्राप्तान् हसन्निव ॥ ४२ ॥

सत्यधर्मीया — तावद्भिरष्टादशभिः । हसन्निव हसन्नेव ॥ ४२ ॥

छलारी — तावद्भिः कलिमुक्तशरसंख्याकैर्भल्लैः शरैः ॥ ४२ ॥

लिङ्गेरी — स शक्रो यतः शीघ्रविक्रमस्तत आपतत आगच्छतोऽसंप्राप्तान् स्वप्राप्तिशून्यान् मध्ये तावत्संख्याकैर्निशितैः शाणोल्लीढैर्भल्लैर्बाणैर्हसन्निव परिहासं कुर्वन्निव चिच्छेद ॥ ४२ ॥

तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ।
तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः ।। ४३ ।।

सत्यधर्मीया — हरिर्हस्तस्थां रिपोः ।। ४३ ।।

छलारी — उत्तमं कर्म पाटवं दुर्मर्षोऽसहमानो बलिर्महोल्काभां महोल्कसदृशीं हस्तस्थाम् । हरिरिन्द्रः ।। ४३ ।।

लिङ्गेरी — बलिस्तस्येन्द्रस्योत्तमं कर्म स्वशरच्छेदनरूपं वीक्ष्य दुर्मर्षोऽसहिष्णुः सन् शक्तिमाददे जगृहे । हरिरिन्द्रो बलेर्हस्तस्थां महोल्काभामत एव ज्वलन्तीं तां शक्तिमच्छिनत् द्विधा चकार ।।४३।।

ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ।
यद्यच्छस्त्रं समादद्यात् सर्वं तदच्छिनद् विभुः ।। ४४ ।।

सत्यधर्मीया — शूलं ततः प्रासं गततोमरम् । सर्वलाम् । सर्वला तोमरोऽस्त्रियामित्यमरः । ऋष्टयो ऋष्टीन् ये ऋष्टयः । ततो द्वितीयार्थे तसिः । तानिति वा । समादद्यात्समादत्त । बलिरिति शेषः । विभुरिन्द्रः ।। ४४ ।।

छलारी — विभुरिन्द्रः ।। ४४ ।।

लिङ्गेरी — विभुः शत्रुजयसमर्थ इन्द्रो, बलिस्ततः शूलमनन्तरं प्रासं तोमरमृष्टयश्चेत्येवमादि यद्यदस्त्रं समादद्याद्गृहीतवांस्तत्सर्वमच्छिनत् ।। ४४ ।।

ससर्जाथासुरीं मायामन्तर्धानगतोऽसुरः ।
ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ।। ४५ ।।

सत्यधर्मीया — अन्तर्धानं गतोऽन्तर्धानगतः ।। ४५ ।।

छलारी — असुरो बलिः सुरानीकोपरि देवसैन्योपरि शैलो मायामयः । हे प्रभो राजन् ।। ४५ ।।

लिङ्गेरी — हे प्रभो । अनन्तरमसुरो बलिरदृश्यत्वं गतः सन् असुरसंबन्धिनीं भ्रान्तिजनकां विद्यां सृष्टवान् । ततो मायया देवसैन्योपरि भागे पर्वतः प्रकटोऽभूत् ।। ४५ ।।

ततो निपेतुस्तरवो दह्यमाना दवाग्निना ।
शिलाविटङ्कशिखराश्चूर्णयन्तो द्विषद्बलम् ॥ ४६ ॥

सत्यधर्मीया — विटङ्कवद्विद्यमानानि शिखराण्यग्रभागाः । शिखरं शैलवृक्षाग्र इति विश्वः । कपोतपालिकायां स्याद्विटङ्कं पुंनपुंसकमित्यमरः । शिलानां विटङ्कशिखराणि येषां ते । दवदहन-दग्धद्रुमाः । विशेषेण टङ्क्यतेऽत्रेति टकि वर्धने हलश्चेति घञ् । शिलाविटङ्कशिखरसहिताः । तत्तापस्फुटितद्विषद्बलं चूर्णयन्तः निपेतुरित्यन्वयः । अधिकारश्च तद्धानिरित्यत्रेव विठङ्कशिखराः शिला दवाग्निना दह्यमानास्तरव इत्येते चूर्णयन्त इति वाऽन्वयः । चूर्णयन्त्य इति पाठे तत्र तरवः पेतुरित्यन्वयः । शिलाश्चूर्णयन्त्यः पेतुरित्यन्वय इति विवेकः ॥ ४६ ॥

छलारी — विटङ्कान्युन्नतानि शिखराणि यासु ता इत्यर्थः । द्विषतां सुराणां सैन्यं बलम् ॥४६॥

लिङ्गेरी — ततः पर्वताद्दवाग्निनाऽरण्यवन्हिना दह्यमाना जलमानास्तरवो वृक्षाः पतिताः । उन्नतशिखराः शिलाश्च पाषाणा अपि द्विषतामसुरद्वेषिणां देवानां बलं सैन्यं चूर्णयन्तः पतिताः ॥ ॥ ४६ ॥

महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः ।
सिंहव्याघ्रवराहाश्च मर्दयन्तो महासुरान् ॥ ४७ ॥

सत्यधर्मीया — महान्तश्च ते सुराश्च तान् ॥ ४७ ॥

छलारी — महोरगा अजगरा दन्दशूका दंशनशीलाः सर्पाः ॥ ४७ ॥

लिङ्गेरी — सवृश्चिका महोरगा अजगराः, दंशनशीला दंदशूकाः सर्पाः, सिंहव्याघ्रवराहाश्च महतः पूज्यान्सुरान् मर्दयन्तो निपेतुः । आन्महत इत्यादिना महच्छब्दस्याकारादेशः ॥ ४७ ॥

यातुधान्यश्च शतशः शूलहस्ता विवाससः ।
छिन्दि भिन्धीति वादिन्यस्तथा रक्षोगणा विभो ॥ ४८ ॥

सत्यधर्मीया — विवाससो दिगम्बराः ॥ ४८ ॥

छलारी — यातुधान्यो राक्षसस्त्रियो विवाससो दिगम्बरा इत्यर्थः ॥ ४८ ॥

लिङ्गेरी — हे विभो । शूलहस्ता, विवाससो वस्त्ररहिताः । छिंधि द्विधा कुरु । भिंधि विदारयेति वादिन्यः शतसंख्याका यातुधान्यो राक्षस्यस्तथा राक्षससमूहाश्च समुत्पेतुः ॥ ४८ ॥

ततो महाघना व्योम्नि गम्भीरपरुषस्वनाः ।
अङ्गारान् मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥

सत्यधर्मीया — महाघना अतिविपुलाः स्तनयित्नवो बलाहकाः । स्तन गदे देवशब्दे । चुरादावदन्तः स्तनितषीती लुच् । अयामन्तेति णेरञ् । स्तनयन्तीति स्तनयित्नवो ये महान्तो घना लोहमद्गुरास्ततस्तान् । घनः सान्द्रे दृढे दीर्घे विस्तारे लोहमुद्गर इति विश्वः । अङ्गारपातमभ्युपेत्यानलोहमुद्गरपाते मनो विनोदनीयम् । मायायाः किमसुशकम् ॥ ४९ ॥

लिङ्गेरी — व्योम्न्याकाशे महामेघाः स्तनयित्नवो गर्जनशीलाः, गंभीराः, परुषाः क्रूराः स्वना ध्वनयो येषां ते तथा सन्तो वातैराहताश्च सङ्घटिताः सन्तोऽङ्गारान्साग्निकाष्टमुखान्मुमुचुस्त्यक्तवन्तः ॥ ॥ ४९ ॥

सृष्टो दैत्येन सुमहान् वह्निः श्वसनसारथिः ।
सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥ ५० ॥

सत्यधर्मीया — सांवर्तकः प्रलयकालसम्बन्धी । अधाक् । आर्षः । ददाह ॥ ५० ॥

छलारी — श्वसनसारथिर्वायुसखः । सांवर्तक इव प्रलयाग्निरिव । अधाक् छान्दसोऽयं प्रयोगः । अधोक्षीदित्यर्थः ॥ ५० ॥

लिङ्गेरी — दैत्येन बलिना सृष्ट उत्पादितः श्वसनो वायुः सारथिः सहायो यस्य श्वसनसारथिः सांवर्तकः प्रलयाग्निरिवातितीक्ष्णः सुमहान् अतिस्थूलतरो वह्निर्विबुधानां देवानां ध्वजिनीं सेनामधाक् भस्मीचकार ॥ ५० ॥

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ।
प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ॥ ५१ ॥

सत्यधर्मीया — वेलामतिक्रान्त उद्वेलः । आवर्ताः । स्यादावर्तोऽम्भसां भ्रम इत्यमरः । तैर्भीषयतीति तथा ॥ ५१ ॥

छलारी — उद्वेलो वेलामतिक्रान्तः । उद्धूतैस्तरंगैरावर्तैश्चांभसां भ्रमैश्च भीषणः ॥ ५१ ॥

लिङ्गेरी — तदनन्तरं प्रचण्डवातैरतितीक्ष्णवायुभिरुद्धूता जनिता ये तरंगास्तैरावर्तैश्चक्राकार-भ्रमजलैश्च भीषणो भयङ्कर उद्वेलः मर्यादातिलङ्घी सन् समुद्रः सर्वतः सर्वासु दिक्षु प्रत्यदृश्यत दृष्टोऽभूत् ॥ ५१ ॥

एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ।
सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५२ ॥

सत्यधर्मीया — अलक्ष्याऽदृश्या गतिस्तया । सैनिकाः सेनायां समवेताः ॥ ५२ ॥

छलारी — अलक्ष्यगत्याऽदृश्यगत्या विभीषणैर्महामायैरैन्द्रजालामायाविभिः । एवमन्यैश्च दैत्यैः सृज्यमानासु मायासु विषेदुर्विषण्णाः ॥ ५२ ॥

लिङ्गेरी — सुराणां सैनिकाः सेनारक्षका महामायैरत एवालक्ष्याऽमेया गतिः स्थितिस्तया भीषणैर्भयजनकैर्दैत्यैरेवमुक्तप्रकारेण मायासु सृज्यमानासु सतीषु विषेदुर्व्यथिता बभूवुः ॥ ५२ ॥

न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप ।
ध्यातः प्रादुरभूत् तत्र भगवान् विश्वभावनः ॥ ५३ ॥

सत्यधर्मीया — यत्र यदा । प्रतिविधिं परिहारोपायम् । तत्र ध्यातस्तैः ॥ ५३ ॥

छलारी — तत्प्रतिविधिं तस्यासुरकृतकर्मणः प्रतिक्रियां यत्र यदा न विदुस्तत्र तैर्ध्यातः सन् विश्वभावनो विश्वपालकः ॥ ५३ ॥

लिङ्गेरी — हे नृप । यत्र यदेन्द्रादयो देवास्तत्प्रतिविधिं बल्याद्यसुरसृष्टमायाप्रतीकारं न विदुरज्ञातवन्तस्तत्र तदा विश्वभावनः सर्वोत्पादको भगवान्नारायण इन्द्रादिभिर्ध्यातः सन्प्रादुरभूत् ॥ ॥ ५३ ॥

ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः ।
अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुण्डलः ॥ ५४ ॥

सत्यधर्मीया — अष्टावायुधाष्टकसहिता बाहवो यस्य सः ॥ ५४ ॥

छलारी — सुपर्णांसयोर्गरुडस्कन्धयोः स्थापितपादपल्लवः । नवकञ्जवद्विकसितपद्मवल्लोचने यस्य सः । अष्टावायुधयुक्ता बाहवो यस्य सः । श्रीश्च कौस्तुभश्चानर्घ्यानि किरीटकुण्डलानि च । उल्लसन्ति श्रीकौस्तुभादीनि यस्य सः ॥ ५४ ॥

लिङ्गेरी — प्रादुर्भावानन्तरं भगवान् सुपर्णस्य गरुडस्यांसयोः कृतौ स्थापितौ पल्लवसदृशाङ्घ्री यस्य स तथा सन् पिशंगं हरिद्रावर्णसदृशं वासो वस्त्रं यस्य स तथा सन् नवकंजवन्नूतनकमलवदम्लानविस्तृतलोचने नेत्रे यस्य स तथा सन् । अष्टसंख्याकायुधोपेतहस्तः सन् उल्लसन्नतिप्रकाशमानः श्रिया कांत्या युक्तो यः कौस्तुभः, अत्युत्तमतयाऽनर्घ्याणि मौल्यरहितानि किरीटकुण्डलानि मुकुटकर्णाभरणानि यस्य स तथा च सन् देवासुरैरदृश्यत ॥ ५४ ॥

तस्मिन् प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महतां महीयसि ।
स्वाप्नो यथाऽहिः प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणी ॥ ५५ ॥

सत्यधर्मीया — असुराणां कूटकर्म कपटव्यापारस्तस्माज्जायन्त इति ताः । प्रतिबोधे जागरे । अस्थिरतामात्रे निदर्शनम् । अथवा स्वाप्नपदेन जाग्रत्कालिकपदार्थतादात्म्यं गृह्यते । परमात्मस्मरणमात्रमियत्कार्यकरं का कथा स्वतस्तस्यैवागमने मायापाय इत्याशयेनाह ॥ हरिः स्मृतिरिति ॥५५॥

छलारी — असुराणां कूटकर्म मन्त्रादिप्रयोगः । तस्माज्जाता । महतां महीयस्यतिशयेन महति प्रतिबोधे आगते सति स्वाप्नो यथा नश्यति तद्वत् । अत्र कैमुत्यन्यायमाह ॥ हरिस्मृतिरिति । हरेः स्मृतिरेव सर्वासां विपदां विनाशिनी । किमुत हरिरित्यर्थः ॥ ५५ ॥

लिङ्गेरी — प्रतिबोधे जागरे आगते सति स्वप्नावस्थाद्रष्टो गजतुरगादिर्यथा विनश्यति चक्षुषा दृश्यो न भवति तथा महतामुत्तमानां महीयस्युत्तमे नारायणे तस्मिन्युद्धे प्रविष्टे सति असुरमायाकर्मजाः पर्वतवृक्षादयो विनेशुरदृश्या अभूवन् । नैतद्विचित्रमित्याह । हरिस्मृतिः सर्वविपद्भ्यो विमोक्षिणी विमोचिका किमु हरिरिति ॥ ५५ ॥

दृष्ट्वा मृधे गरुडवाहमिभारिवाह
आविध्य शूलमहिनोदथ कालनेमिः ।
तल्लीलया गरुडमूर्ध्नि पतद् गृहीत्वा
तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५६ ॥

तात्पर्यम् – 'कालनेम्यादयः सर्वे हरिणा निहता अपि ।
शुक्रेणोज्जीविताः सन्तः पुनस्तेनैव पातिता' इति च ॥ ५६ ॥

सत्यधर्मीया — दृष्ट्वा मृध इति श्लोक उत्तरश्लोके न कालनेम्यादिमृतिश्चाक्षुषे श्रूयते । श्रूयते च पुनर्वैवस्वतमन्वन्तरे समुद्रमथने तत्कृतयुद्धादौ तन्मृतिश्चेति तच्च न युज्यत इत्यतो मानमेवाह ॥ कालनेम्यादय इति ॥ हरिणा वैवस्वतमन्वन्तरे समुद्रमथने निहिताः । पुनरपि मृतसञ्जीविन्या विद्यया शुक्रेण जीविताः सन्तस्तेनैव हरिणा पातिताः । अतो न विरोध इति भावः । अत्र विस्तरस्तु प्रकाशिकातोऽवसेयः । अनेन स एव पुनरेतन्मन्वन्तर एवाष्टाविंशतितमे द्वापरे कंसः सन्कृष्णेन निहत इति दर्शितमित्याहुः । इत्यष्टमे नवमः । अथ श्लोकार्थः । इभारिहवाहः सिंहवाहनः कालनेमिः शूलामाविध्य भ्रामयित्वाऽहिनोत्प्राहिणोत् । गरुडवाहमथारिवाह इति वाऽऽहुः । अरीन्सुरान्व-हतीत्यरिवाह इत्यर्थं च वर्णयन्ति । त एवारिर्गजारिः सिंहो वाहो यस्येत्यप्याहुः । गरुडमूर्ध्नि पतत् । शूलं लीलया गृहीत्वा तेनैव सवाहमरिं कालनेमिमहनदहन् । त्र्यधीशस्त्रिलोकीनाथः । अप्रजाः संत्वत्रिण इति ऋग्भाष्ये पितृदेवमनुष्याणामित्युक्तमार्गत्रयाधीशः । वेदाधीश इति वा ॥ ५६ ॥

छलारी — इभारिर्गजरिपुः सिंहो वाहो यस्य स तथा कालनेमिः शूलमाविध्य भूमौ पोथयित्वाऽहिनोच्चिक्षेप । त्रयाणां लोकानामधीशो हरिर्गरुडमूर्ध्नि पतच्छूलं हस्तेन गृहीत्वा तेनैव सवाहमरिं कालनेमिमहनज्जघान ॥ ५६ ॥

लिङ्गेरी — हे नृप । अनन्तरमरीन् शत्रून् वहत्युद्धरति रणभूमेरित्यरिवाहः शत्रुपलायनकरः । अरिर्मृगारिः सिंहो वाहो यस्येति चारिवाहः । इभस्य गजस्यारिः सिंहो वाहो यस्येतीभारिवाहः । अस्मिन्पाठद्वये वाहशब्दोऽणुप्रत्ययान्तः कुंभकारशब्दवज्ज्ञेयः । कालनेमिरसुरो युद्धे गरुडवाहं भगवन्तं दृष्ट्वा स्वत्रिशूलमाविद्ध्य भ्रामयित्वा हरये आहिनोत् प्रेषयामास । त्रयाणां लोकानां वैकुण्ठश्वेतद्वीपानन्तासनानां सत्त्वरजस्तमसामधीशोऽधिकस्वामी नारायणो गरुडशिरसि पतत्त्रिशूलं लीलयाऽनायासेन गृहीत्वा तेन शूलेन वाहनसहितं शत्रुं कालनेमिमहनत्तताड हिंसितवांश्च ॥ ५६ ॥

माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ।
आहत्य तिग्मगदयाऽहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः ॥ ५७ ॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे नवमोऽध्यायः ।

सत्यधर्मीया — मालीसुमाली चेत्यतिबलौ यच्चक्रेण कृतशिरसौ कृत्तं छिन्नं शिरो ययोस्तौ पेततुः । अथ माल्यवान् । गदामाहत्य भ्रामयित्वा तया तिग्मगदयाऽण्डजेन्द्रम् । अण्डजः पक्षी गरुडस्तदिन्द्रं तत्स्वामिनम् हरिम् । यच्चक्रेण तमित्युक्तिस्वारस्यात् । यद्याग्रहो निरवग्रहस्तर्हि तं तद्वाहमण्डजेन्द्रं गरुडमित्यर्थो ज्ञेयः । अहनत्ताडनोद्युक्तोऽभूत् । तावत्तन्मध्य एवारिणा चक्रेणाद्यो नदतोऽरेर्माल्यवतः शिरोऽच्छिनत् । आहत्य प्राप्येति वा । आद्यः सुरोपजीव्यः । आदिभवो वा ॥ ॥ ५७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
अष्टमस्कन्धे नवमोऽध्यायः ॥ ८-९ ॥

छलारी — यस्य हरेश्चक्रेण कृत्तशिरसौ पेततुः । तं भगवन्तं माल्यवांस्तन्नामाऽऽहत्य संहत्य । आसाद्येति यावत् । तिग्मगदयांऽडजेन्द्रं पक्षीन्द्रं गरुडं यावदहनत्तं हन्तुं गदामुन्नमय्येत्यर्थः । तावदाद्यो हरिर्नदतोऽरेर्माल्यवतः शिरोऽरिणा चक्रेणाच्छिनत् ॥ ५७ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे नवमोऽध्यायः ॥ ८-९ ॥

लिङ्गेरी — अतिबलौ माली सुमाली चेत्युभौ यद्यदा युधि रणभूमौ हरिणा कृत्तशिरसौ सन्तौ पतितौ । अथानन्तरं माल्यवानसुरोंऽडजानां पक्षीणामिन्द्रं श्रेष्ठं गरुडमाहत्य भ्रामयित्वा गदया यावद्यदाऽहनत्तताड तावत्तदाऽऽद्यः पुराणपुरुषो भगवान्नदतो ध्वनिं कुर्वतोऽरेर्माल्यवतः शिरोऽरिणा चक्रेणाच्छिनत् । अत्रायं विशेषो ज्ञेयः । कालनेम्यादयः सर्वे हरिणा निहता अपि शुक्रेणोज्जीविताः सन्तः पुनस्ते वै निपातिता इति ॥ ५७ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे नवमोऽध्यायः ॥ ८-९ ॥

॥ अथ दशमोऽध्यायः ॥

श्रीशुक उवाच–

अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयाऽनुकम्पया ।
जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः पुरा ॥ १ ॥

सत्यधर्मीया — प्रथमत उपक्रान्तममरासुरयुद्धम् तत्र हरिणाऽरिणाऽरिशिरोहरणं मध्येऽभिहितम्। नावगतं किममराः समरे मृताः किं वा पलायिताः किं वा कौतुकावलोकनपरा न्यस्तशस्त्रहस्तास्तत्रैव तस्थुरित्यतो नाद्योऽनवद्यः । पीतामृततया निर्मृतेः । नापि पलायनादिद्विकमपि सम्भवि । स्वध्यानमाविर्भूतभगवदाप्यायितत्वात्तेषामतः किमकुर्वन्सुपर्वाण इत्यतो वर्णयति ॥ अथो इति । प्रत्युपलब्धानि चेतांसि येषां ते तथा । समाश्वस्तमानसा इति यावत् । तत्र तन्त्रम् ॥ परस्येत्यादि ॥ यैर्यैरभिसंहितास्तांस्तानिति पदमेकम् । ते ते पिबन्तु जिव्हयेति भाष्यटीकादिकमुदाहृत्य व्याख्यातं षष्ठे विलोकनीयं यैर्यैरित्यपरस्य शेषो ज्ञेयः ॥ १ ॥

छलारी — भगवता कालनेम्यादिदहनानन्तरं देवाः किमकुर्वन्निति तत्राह ॥ अथो इति । प्रत्युपलब्धान्याप्याहितानि चेतांसि येषां ते । शक्रसमीरणाविन्द्रवायू आदिर्येषां ते । पुरा द्वन्द्वयुद्धकाले यैर्दैत्यैरभिसंहतास्तान् भृशं जघ्नुः ॥ १ ॥

लिङ्गेरी — अथोऽनन्तरं, शक्र इन्द्रः समीरणो वायुरादिर्येषां ते तथा सन्तः स्वयं पूर्वं यैर्यैरसुरैरभिसंगता योद्धुं मिलितास्तांस्तान् भृशमत्यन्तं जघ्नुः शस्त्रैस्ताडितवन्तः ॥ १ ॥

वैरोचनाय संरब्धो भगवान् पाकशासनः ।
उदयच्छद् यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥ २ ॥

सत्यधर्मीया — तत्र बलिबलभिदोर्मुख्यतया तत्संख्यमाख्याति ॥ वैरोचनाय बलय इति ॥ २ ॥

छलारी — तत्र बलिवासवयोः प्रसक्तं युद्धं किमभूत्तत्राह ॥ वैरोचनायेति । वैरोचनाय बलये संरब्धः कुपितः पाकशासन इन्द्र उदयच्छदुद्धृतवान् ॥ २ ॥

लिङ्गेरी — यदा भगवानैश्वर्यादिषड्गुणोपेतः पाकाख्यमसुरं शास्ति शिक्षतीति पाकशासन इन्द्रः संरब्धः कोपाटोपयुक्तः सन् वैरोचनाय विरोचनपुत्रबलये वज्रायुधमुदयच्छद्दातुमुद्यतस्तदा प्रजा जना असुरप्रकृतयो हाहेत्यतिखेदः समागतोऽस्माकमिति चुक्रुशुरार्तध्वनिं चक्रुः ॥ २ ॥

वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितम् ।
मनस्विनं सुसम्पन्नं विचरन्तं महामृधे ॥ ३ ॥

सत्यधर्मीया — सम्पादितहरिकृपासम्पत्कत्वादमेघायुधत्वात्किञ्चिद्वैरिकुत्सनभर्त्सनपूर्वकं स्वपौरुषप्रदर्शनवचनं योद्धसम्प्रदायप्राप्तमिति वज्रमुद्यम्यादौ वाग्वज्रमसृजच्छक्र इत्याह ॥ वज्रपाणि-रित्यादिभिश्चतुर्भिः पद्यैः ॥ ३ ॥

छलारी — शत्रुं प्रधृष्यता योधेन स्वपौरुषं प्रकाश्य प्रहर्तव्यमिति न्यायमनुसंदधानो वज्रमुद्धृत्य व्रजपाणिस्तं वक्ति ॥ वज्रपाणिरिति । तं बलिं तिरस्कृत्यागणयित्वा मनस्विनं युद्धोत्साहवन्तं सुसंपन्नं युद्धसाधनसमृद्धम् ॥ ३ ॥

लिङ्गेरी — वज्रपाणिरिन्द्रः स्वस्य पुरोऽग्रे स्थितं युद्धे सुमनस्कं शस्त्रास्त्रैः सुसंपन्नं महामृधे विचरन्तं बलिं तिरस्कृत्येदं वक्ष्यमाणं वचनमाहोक्तवान् ॥ ३ ॥

इन्द्र उवाच—

नटवन्मूढ मायाभिर्मायेशान् नो जिगीषसि ।
जित्वा बालान् निबद्धाक्षान् यथा हरति तद्धनम् ॥ ४ ॥

सत्यधर्मीयां — नटोऽत्रैन्द्रजालिको मायया नयनबन्धसाधनीभूतया योजनत्रितयपर्यन्तं प्रसरन्त्या। बालांस्तद्विद्याऽज्ञान्निबद्धाक्षान्जित्वा । तद्धनं बालधनं यथा हरति, त्वं तन्नट-वन्मायाभिर्मायेशान् मायाया ईशास्तत्स्वामिनस्तान् । अथवा । मायाया ईशो मायेशः । सोऽस्त्येषामिति मायेशास्तान् । तत्स्वामिकानिति यावत् । तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुरिति पूर्वमुक्तेरस्मान्जिगीषसीति मायेशत्वज्ञानहीनत्वं मूढेत्युक्तितो द्योतयति । नभो हरतीति पाठे नभ आकाशं चाच्छाद्येत्यर्थः । अनेनोपरिस्थानामपि ज्ञानाभावार्थं तद्धन्धो ध्वन्यते । नभो मन्त्रज्ञान्तरसमागमप्रयत्ननैष्फल्यं स्यादित्याकाशं जित्वा प्राप्य तद्धनं हरतीति वा । जिः प्राप्त्यर्थतया षष्ठे छान्दोग्यभाष्याद्युदाहृतिविवृतोऽनुसन्धेयः । न विद्यते भाः प्रकाशो यस्मिंस्तद्धनं तत्र तेषां तम एव दृश्यत इति भाव इति वा । न विद्यते भा यस्य । कोऽपि मन्त्रकोविद आगच्छेदिति निष्कान्तिरिति वा ॥ ४ ॥

छलारी — इन्द्रजालाभिर्बद्धान्यक्षाणि चक्षूंषि येषां तान् बालान् जित्वा । नटः कपटवृत्तिर्यथा तेषां धनं हरति । तथात्वं मूढवन्मायेशान्मायानियामकान्नो मायाभिर्जेतुमिच्छासि ॥ ४ ॥

लिङ्गेरी — हे मूढ कर्तव्यज्ञानरहित बले! त्वं नटवदैन्द्रजालिकवन्मायाभिरिन्द्रजालादिभिर्मायेशान्नोऽस्मान् जेतुमिच्छसि । ऐन्द्रजालिको बालानविवेकिनः स्वमायया निबद्धाक्षान् आवृत्तदृष्टीन् कृत्वा तद्बालधनं नभः स्वावकाशस्थलं नयति हि ॥ ४ ॥

आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् ।
तान् दस्यून् विधुनोम्यज्ञान् पूर्वस्माच्च पदादधः ॥ ५ ॥

सत्यधर्मीया — मायाभिरुत्सिसृप्संतमिन्द्राद्यामारुरुक्षतः । अवदस्यून्रघूनथा इति ऋगर्थगर्भितोऽयं श्लोकः । इयमृक् टीकाकारचरणैः श्रीहरिपरतया व्याख्याता । हे परमेश्वर कुविद्याभिरुत्तमत्वं प्राप्तुमिच्छतः स्वर्गमारोढुं चेच्छतो दस्यूनन्धे तमस्यवाक्षिप इति ज्ञानपादस्थाधिकरणतत्त्वप्रकाशिकायाम् । अत्र तु प्रसिद्धेन्द्रपरतया कथं योज्यम् । त इत्यनुयोज्यम् । परममुख्यामुख्यार्थत्वाभ्यां तदेतत्प्रवृत्तिरिति न विरोधः । पूर्वप्रसिद्धवर्जं तु शक्रान्ता देवता मता इत्यादेर्न निषिषिधुरमुमर्थं च । ऋचि उत्सिसृप्सत इति पूर्वं तदनन्तरमारुरुक्षत इति सति क्रमे बलिः स्वर्गाधिपत्यकामुक इति कोपवश इन्द्र इति द्योतनायोक्तिविपर्यय इति मन्तव्यम् । ये मायाभिः कुविद्यया उत्सिसृप्संत्युत्तमत्वं प्राप्तुमिच्छन्ति दिवं स्वर्गं चारुरुक्षन्त्यारोढुमिच्छन्ति दस्यून्प्रकाशतस्करान्स्तांन्दस्यूंस्तानिवेति वा । तच्छब्दस्यैवार्थकत्वं यद्वचनान्तं विशेष्यं तद्वचनान्ताव्ययत्वेन विशेषणं चेति पूर्वव्युत्पादितप्रकारेण ज्ञेयम् । पूर्वस्मात्पदादधस्तदर्वाक्तने देशे विधुनोमि क्षिपामीत्यर्थः । यद्यपीयं ऋगिन्द्रिं प्रति वेदपुरुषोदिता । तथापि स्वविषये यमिति बोधयितुमिन्द्रोऽन्ववादीदिति ज्ञेयम् ॥ ५ ॥

छलारी — मत्प्रभावं शृण्वित्याह ॥ आरुरुक्षन्तीति । ये मायाभिः कपटवृत्तेर्दिवं परलोकमारुरुक्षंत्यारोढुमिच्छन्ति । ततोऽप्युत्सिसृक्ष्यन्ति ऊर्ध्वं मोक्षं गन्तुमिच्छन्ति । तान्दस्यून्पूर्वस्मात्पदादपि चक्रवर्तिपदादप्यधो विधुनोमि पातयामि । ''मायाभिस्तूत्सिसृप्सन्तमिन्द्राद्यामारुरुक्षत'' इति श्रुतेः ॥ ५ ॥

लिङ्गेरी — हे बले । ये जना मायाभिः कपटकर्मभिर्दिवं स्वर्गमारुरुक्षंत्यारोढुं प्राप्तुमिच्छन्ति ततः स्वर्गादप्युत्सिसृक्ष्यंत्यूर्ध्वलोकं गन्तुमिच्छन्त्यहं तान्दस्यूंश्चोरान्कपटिनः स्वायोग्यापेक्षा न कर्तव्येति ज्ञानशून्यान्पूर्वस्मात्पूर्वं प्राप्तात्पदात्स्थानाद्विधुनोम्यधश्च्यावयामि । तस्माच्चाधःस्थानादप्यधो विधुनोमि । आरुरुक्षन्तीत्यादिपदानुकरणेनात्र मायाभिस्तूत्सिसृप्सन्तमिन्द्राद्यामारुरुक्षतः, अवदस्यून् रघूनथाः इत्यृचं प्रमाणयति ॥ ५ ॥

सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ।
शिरो हरिष्ये मन्दात्मन् घटस्व ज्ञातिभिः सह ॥ ६ ॥

सत्यधर्मीया — मन्दात्मन् क्षुद्रमनस्क । ज्ञातिभिः दैतेयैः सह घटस्व चेष्टावान् भव । यत्नं कुर्विति यावत् ॥ ६ ॥

लिङ्गेरी — हे मन्दात्मन् मूढचेतनबले । स उक्तगुणोऽहं दुष्टकर्मिणस्ते तव शिरः शतग्रन्थिना वज्रेण हरिष्ये । अतस्त्वं ज्ञातिभिः सगोत्रैरसुरैः सह घटस्व युद्धोद्योगं कुरुष्व ॥ ६ ॥

बलिरुवाच–

सङ्ग्रामे वर्तमानानां कालेनोदितकर्मणाम् ।
कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥

सत्यधर्मीया — सङ्ग्रामे वर्तमानानां सर्वेषामुदितं कर्म येषां ते तथा तेषां तदुदयः कालिक इत्याह ॥ कालेनेति । उत्तरत्रत्या जयमृत्युशब्दानुकूल्या ये कालेनोदितमुत्कर्षेण दितं खण्डितं गतं फलानर्पकं कर्मैषामिति व्याख्येयम् । अनुक्रमात् कदाचिज्जयः कादाचित्कोऽपजय इत्यनुक्रमात् । कालचोदितकर्मणां कालनोदितकर्मणामिति स्फुटार्थौ पाठौ ॥ ७ ॥

छलारी — कालेन कालनाम्ना हरिणा चोदितानि प्रेरितानि कर्माणि येषां तेषाम् । हरिणा तत्तत्कालक्लृप्तकर्मभोक्तॄणामित्यर्थः । अनुक्रमात्कदाचिज्जयः कदाचिदपजय इत्येवं क्रमेण सर्वेषामपि स्युः ॥ ७ ॥

लिङ्गेरी — एवमिन्द्रोदितबलिरिन्द्रं वक्ति ॥ संग्राम इति । हे इन्द्र । युद्धे वर्तमानानां कालाख्यरूपिणस्तवेति दशमस्कन्धोक्तरीत्या कालशब्दवाच्यहरिणा नोदितानि प्रेरितानि कर्माणि पुण्यपापरूपाणि येषां तेषां सर्वेषां वीर्याणां कीर्तिर्यशोऽकीर्तिश्च जयोऽनभिभवोऽजयोऽशिवो मृत्युरपमृत्युश्चेत्येतेऽनुक्रमात्क्रमेण स्युर्भविष्यन्ति ॥ ७ ॥

तमिमं कालरशनं जनाः पश्यन्ति सूरयः ।
न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः ॥ ८ ॥

सत्यधर्मीया — तमिमिममपजयादिकम् । कालरशनं कालाख्या रशना रज्जुर्यस्य तम् । तद्बद्धमिति यावत् । सूरयो जना इति सामानाधिकरण्येनान्वयः । ते पश्यन्त्यतो न हृष्यन्ति । तत्प्रापके सति । एवं न शोचन्ति । तत्र सुखदुःखसमताविषये यूयमपण्डिता अनिपुणा अधिषिणा अन्यथैवंविध-मुधाभाषणं न स्यादिति भावः ॥ ८ ॥

छलारी — तमिमं कीर्तिजयादि कालरशनं कालयन्त्रितं सूरयो ज्ञानिनो जनाः पश्यन्ति । अतो न हृष्यन्ति न शोचन्ति च । तत्रैवं विवेकविषये यूयमपण्डिता अनिपुणाः ॥ ८ ॥

लिङ्गेरी — सूरयो ज्ञानिनो जनास्तं पूर्वोक्तमिमं कालरशनं कालाख्यभगवदिच्छारज्जुं पश्यन्ति जानन्तीत्यतः स्वेषां जयादौ प्राप्ते सति न हृष्यन्ति सन्तोषं न प्राप्नुवन्ति । अपजयादौ च न शोचन्ति । कालशब्दितस्वादृष्टप्रेरकनारायणस्वातन्त्र्यज्ञत्वात् । तत्र तस्मिन्विषये स्वातन्त्र्ये यूयमपण्डिता अज्ञानिनोऽत एवं ब्रूथ ॥ ८ ॥

न वयं मन्यमानानामात्मानं तत्र कारणम् ।
गिरो वः साधु शोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥

सत्यधर्मीया — मम तु माऽस्तु तादृशी शेमुषी । ते तु तथा भवन्तु , भवतः किमित्यतः स्वस्य तदस्तीति वदन्ति ॥ न वयमिति । वयं समशेमुषय आत्मानम् । तत्र कारणं कालेश्वरादिकमन्तरेण स्वयमेव कारणं मन्यमानानां साधुशोच्यानां साधुभिः समदर्शिभिः शोच्यानां ''वृथा दुरभिमानिनो नश्यन्तीति'' शोकार्हाणाम् । साधु यथा भवति तथेति वा । वो युष्माकं गिरो नटवन्मूढेत्यादिवाचो मर्मताडना अरुन्तुदस्तत्त्वेन न गृह्णीमो न स्वीकुर्मो दुःखिनो वयं न तदनुसन्धानेन स्यामेति भावः । मर्माणि ताडयन्तीति, तेषां ताडनं याभिरिति वा ताः ॥ ९ ॥

छलारी — एवं कार्यादिभगवदधीनत्वात्स्वाधीनत्वं मन्यमानानां वोऽहं शिरो हरिष्य इत्यादिवचनं मूर्खप्रलाप एवेत्याशयेनाह ॥ नेति । वयं तत्र कीर्तिजयादावात्मानं स्वं कारणं साधनं मन्यमानानाम् । शोच्यानां शोकार्हाणाम् । अज्ञानिनामिति यावत् । वो युष्माकं गिरो वचनानि साध्विति न गृण्हीमो नाङ्गीकुर्मः । कथंभूता गिरः । मर्मसु ताडनं याभिस्ताः । मर्मभेदकवचनेन किं प्रयोजनमिति भावः ॥ ॥ ९ ॥

लिङ्गेरी — वयं तत्र जगदावात्मानं जीवं कारणं स्वतन्त्रं मन्यमानानामत एव साधुभिः हरिस्वातन्त्र्यज्ञैरेते वृथा नष्टा इति शोच्यानां वो युष्माकं मर्मताडना गिरो न गृण्हीमो नाङ्गीकुर्मः ॥९॥

श्रीशुक उवाच–

प्रत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः ।
आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ १० ॥

सत्यधर्मीया — वीरमर्दनो वीरो बलिर्यश्च प्रागाक्षेपैस्तिरस्काररूपवचनैराह तं विभुमिन्द्रं पुनः प्रत्याक्षिप्य तिरस्कृत्य । आकर्णपूर्णैर्नाराचैरहनदित्यन्वयः । अतो नाक्षिप्येति प्रागुदीरणादाक्षेपैराहत-मित्यतिरिक्तं, केवलानुवादरूपताकल्पनं च जघन्यमिति निरस्तम् ॥ १० ॥

छलारी — वीरो बलिर्विभुमिन्द्रमित्याक्षिप्य विनिंद्याकर्णपूर्णैः कर्णपर्यन्तमाकृष्टैर्नाराचैः शरैरहनत् । कीदृशमाक्षेपैर्निन्दारूपवचनैराहतम् ॥ १० ॥

लिङ्गेरी — वीरः पराक्रमी अत एव प्रतिवीरान्मर्दयतीति मर्दनो बलिर्विभुमिन्द्रमित्याक्षिप्य तिरस्कृत्य कर्णपर्यन्तमाकृष्टैर्नाराचैर्बाणैः पुराऽऽक्षेपैस्तिरस्कारवचनैराहतमपि पुनरहनत्तताड ॥ १० ॥

एवं निराकृतो देवो वैरिणा तथ्यवादिना ।
नामृष्यत् तदधिक्षेपं तोत्राहत इव द्विपः ॥ ११ ॥

सत्यधर्मीया — तथ्यवादिना यथार्थभाषिणा । तोत्रं वेणुकमालानामित्यमरः । तेन हतो हस्तीव नामृष्यत् न सेहे ॥ ११ ॥

छलारी — तथ्यवादिना भगवदधीनमित्येवंरूपयथार्थवादिना । तदधिक्षेपं बलिकृतधिक्कारम् । तोत्रेणांकुशेनाहतो द्विपः गज इव ॥ ११ ॥

लिङ्गेरी — तथ्यं यथा वदतीति वादी तेन । वैरिणा शत्रुभूतेन बलिनैवमुक्तप्रकारेण निराकृतो देव इन्द्रः, तोत्रेण गमनार्थं गजबोधककाष्ठेनाहतो द्विपो गज एव तत्कृतमधिक्षेपं नामृष्यत् न सेहे ॥ ॥ ११ ॥

प्राहरत् कुलिशं तस्मा अमोघं परमर्दनम् ।
सयानो न्यपतद् भूमौ छिन्नपक्ष इवाचलः ॥ १२ ॥

सत्यधर्मीया — तस्मै कुलिशं पत्येशेत इत्यादिवच्चतुर्थी द्वितीयार्थे । कुलिशमिति द्वितीया च तृतीयैव । सयानः सविमानः ॥ १२ ॥

छलारी — कुलिशं वज्रं तस्मै बलये परमर्दनः शत्रुसंहारी सयानो विमानसहितः ॥ १२ ॥

लिङ्गेरी — अनन्तरमिन्द्रस्तस्मै बलयेऽव्यर्थं शत्रुमर्दकं कुलिशं वज्रं प्राहरत् वज्रेण तं तताड । स बलिर्वज्रेणाहतः सन् छिन्नपक्षोऽचलः पर्वत इव सयानो भूमौ न्यपतत् ॥ १२ ॥

सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् ।
अभ्ययात् सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३ ॥

सत्यधर्मीया — बलेः सखा । बलिसखः टच् । बली चासौ, सखः खानीन्द्रियाणि तैः सहितः सहोरित्यादिवत्प्रशस्तेन्द्रिय इत्यर्थः । सहितः खैरिति सखः बलिभिर्बलवद्भिः सख इति बलिष्ठ-सखसहित इति योग्यतालभ्योऽर्थ इति वा । सुहृत् दृढमनस्कः सखायं बलिं पतितं दृष्ट्वा हतस्य तत्प्रायस्य बलेः सख्युः सौहृदं समाचरन्नभ्ययात् सख्युर्जीवतो बन्धुवर्गस्य सौहृदं समाचरन्निति वाऽन्वयः ॥ १३ ॥

छलारी — पतितं मृतम् । जम्भस्तन्नामासुरः सुहृत्स्नेहवान् । सख्युर्बलेः ॥ १३ ॥

लिङ्गेरी — जंभोऽसुरो यतः स्वयं बलेः सखाऽतः स्वस्य सखायं बलिं भूमौ पतितं दृष्ट्वा तस्मिन्सुहृदत्यन्तस्नेहयुक्तान्तःकरणः सन् हतस्य मृतस्यापि बलेः सौहृदं स्नेहं समाचरन्सन् इन्द्रमभ्ययात् युद्धार्थमभिमुखो जगाम ॥ १३ ॥

स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ।
जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥ १४ ॥

सत्यधर्मीया — सिंहवाहो जम्भो रंहसा वेगेन शक्रमासाद्य गजं च जत्रौ जत्रुणि । सन्धी तस्यैव जत्रुणीत्यमरः । जश्चादेश्चेति साधु । गलाधस्तनस्थलेऽताडयत् । आसादनमात्रस्य समुच्चायकश्चः । शक्रपक्षे न ताडनस्य नीरोगतया रथारोहणभाषणस्वारस्यात् ॥ १४ ॥

छलारी — सिंहवाहो जम्भासुरः । जत्रौ कण्ठे ॥ १४ ॥

लिङ्गेरी — सिंहवाहनः सुमहाबलः स जंभासुरः शक्रमिन्द्रमासाद्य गदामुद्यम्योद्धृत्य रंहसा वेगेन जत्रौ कण्ठकूबरेऽताडयत् । गजमैरावतं चाताडयत् ॥ १४ ॥

गदाप्रहारव्यथितो भृशं विह्वलितो गजः ।
जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ॥

सत्यधर्मीया — विह्वलितश्चञ्चलः सन् कश्मलं सम्मोहम् ॥ १५ ॥

छलारी — विह्वलितः कम्पितः । कश्मलं मूर्च्छाम् ॥ १५ ॥

लिङ्गेरी — गज ऐरावतो गदाप्रहरेण व्यथोपेतो भृशमत्यन्तं विव्हलितश्चञ्चलीकृतश्च सन् जानुभ्यां धरणीं भूमिं स्पृष्ट्वा परममत्यन्तं कश्मलं मूर्च्छां ययौ ॥ १५ ॥

ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ।
आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥

सत्यधर्मीया — दशशतैः सहस्रसङ्ख्यैः । हरिभिरश्वैर्वृतो रथो मातलिना तन्नामकसूतेनानीतः । द्विपमैरावतम् । उत्सृज्य ततः । तं रथं गच्छन्तमेवारुरुहे विभुरिन्द्र आरुरोह । रथ गताविति स्मरणात् । गच्छत एवारोहे नैपुण्यं लाघवं चेन्द्रस्य द्योतिते भवतः ॥ १६ ॥

छलारी — मातलिना हरिभिरश्वैः । विभुरिन्द्रः ॥ १६ ॥

लिङ्गेरी — तत ऐरावतस्य भूमौ जानुभ्यामुपवेशानन्तरं दशशतसंख्याकैर्हरिभिरश्वैर्वृतो रथो मातलिनेन्द्रसारथिनाऽऽनीतः । विभुरिन्द्रस्तं द्विपमैरावतमुत्सृज्य रथमारुरुहे ॥ १६ ॥

तस्य तत् पूजयन् कर्म यन्तुर्दानवसत्तमः ।
शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥

सत्यधर्मीया — यन्तुः सूतस्य । आहवे वाहने क्लिष्टे तत्क्षणे स्यन्दनानयनरूपं तत्कर्म । तं तु यन्तारमपि ॥ १७ ॥

छलारी — दानवसत्तमो जम्भासुरः । तस्य यन्तुः सारथेः कर्म समयोचितं रथयानम् ॥ १७ ॥

लिङ्गेरी — दानवेषु दनुपुत्रेषु सत्तमोऽत्युत्तमो जंभस्तस्येन्द्रस्य यन्तुः सारथेस्तत्कर्म गजपाते रथदानरूपं पूजयन् बहुमानयन् स्मयमानश्च सन् मृधे ज्वलता शूलेन तं तु मातलिनमहनत् ॥ १७ ॥

सेहे रुजं सुदुर्मर्षं सत्वमालम्ब्य मातलिः ।
इन्द्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥

सत्यधर्मीया — सुदुर्मर्षमन्यैः ॥ १८ ॥

छलारी — सुदुर्मर्षं सोढुमशक्यंजरुम् । शूलप्रहारं सेहेऽसहत् । सत्त्वं धैर्यमालम्ब्याश्रित्य ॥१८॥

लिङ्गेरी — मातलिः, सुतरां दुःखे प्राप्तेऽपि सहनशीलो यतो रुजं शूलताडनजमुपद्रवं सत्त्वं शारीरशक्तिमाश्रित्य सेहे मर्षितवान् । अथेन्द्रः संक्रुद्धः सन् वज्रेण जंभस्य शिरोऽपाहरत् ॥ १८ ॥

जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ।
नमुचिश्च बलः पाकस्त्रयोऽपेयुस्त्वरान्विताः ॥ १९ ॥

सत्यधर्मीया — तेषां नामान्याह ॥ नमुचिरिति । आर्षो गुण इति । त्रय अपेयुरिति वा छेदः उपेयुरित्यर्थः । अपेयुरिति छेदः । अप पालकरहित अस्मदागमनानन्तरमिति सम्बोध्य ईयुरिति वा ॥ ॥ १९ ॥

छलारी — नमुचिर्बलः पाकश्चेति ये ज्ञातयः ॥ १९ ॥

लिङ्गेरी — तस्य जंभस्य ज्ञातयो नमुचिर्बलः पाकश्चेत्येते नारदर्षेः सकाशाज्जंभं हतं श्रुत्वा त्वरान्विताः सन्तस्तत्र युद्ध अपेयुः समागताः ॥ १९ ॥

वचोभिः परुषैरिन्द्रं मर्दयन्तोऽस्य मर्मसु ।
शरैरवाकिरन् मेघा धाराभिरिव पर्वतम् ॥ २० ॥

सत्यधर्मीया — इन्द्रं परुषैर्वचोभिर्मर्दयन्तः । इन्द्रमर्दयन्त इति निरनुस्वारद्रकार एकः पाठो दृश्यते । तत्रार्दनं मर्दनं चानुरूपमिति सरलः । अस्येन्द्रस्य मर्मसु शरैरवाकिरन् । तदभिन्नं वर्षणं चक्रुरिति भावः ॥ २० ॥

छलारी — परुषैर्निष्ठुरैः । अवाकिरन् जघ्नुः । मेघधाराभिर्मेघवद्वर्षैः ॥ २० ॥

लिङ्गेरी — नमुच्यादयः परुषैर्निष्ठुरैर्वचोभिरिन्द्रं मर्मसु मर्दयन्तः सन्तो मेघा धाराभिः पर्वतमिवेन्द्रं शरैरवाकिरन् ॥ २० ॥

हरीन् दशशतानाजौ हर्यश्वस्य बलः शरैः ।
तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥

सत्यधर्मीया — दशशतं तदात्मसङ्ख्या येषु तान्हरीन् अश्वान् । हर्यश्वस्य हरिहयस्य । हरिरश्वो यस्य सः । हरी इन्द्रस्य रोहितोऽग्नेरित्यादेः । श्यामौ मूर्धनि वा शोणाविति ऋग्भाष्यटीकायां यतः शक्राश्वौ श्यामौ प्रमितावित्युक्तत्वेऽपि बहूनां हरिद्वर्णत्वेन तत्वव्यपदेश इति न विरोधः । त्वक्केशबालरोमाणि सुवर्णाभानि यस्य तु । हरिः सुवर्णतोऽश्वस्तु पीतकौशेयसप्रभ'' इति शालिहोत्रवचनं च सुवर्णस्य नानावर्णनामत्वेन पञ्चम बृहदारण्यकभाष्योक्तत्वेन सावकाशमिति न बबाधे । हरिर्हरित्कपिलवर्णयोरिति विश्वः । तावद्भिः सहस्रैः । लघू क्षिप्रकारिणौ च तौ हस्तौ च तावस्य स्त इति स तथा ॥ २१ ॥

छलारी — बलादीनां त्रयाणां पृथग्विक्रममाह ॥ हरीनिति त्रिभिः । बलिस्तन्नामको हर्यश्वस्येन्द्रस्य हरीन् परितो विद्यमानान्हयान् तावद्भिर्दशशतान् । लघुहस्तवान् लाघवयुक्तहस्तवान् ॥ ॥ २१ ॥

लिङ्गेरी — बलोऽसुरो हरयः श्वेता अश्वा यस्य तस्येन्द्रस्य शतसंख्याकान् हरीनश्वानाजौ रणे तावद्भिर्दशशतसंख्यैः शरैर्युगपद्येकदाऽर्दयामास । यतो लघुहस्तवान् शीघ्रबाणमोचनादिचातुर्योपेतहस्तः ॥ २१ ॥

शताभ्यां मातलिं पाको रथं सावयवं पृथक् ।
सकृत्सन्धानमोक्षेण तदद्भुतमभूद् रणे ॥ २२ ॥

सत्यधर्मीया — शताभ्यां सकृदेकदैव तावच्छरसन्धानेन सहितो मोक्षस्त्यागश्च तेनार्दयामासेत्यनुषञ्जनीयम् । तदेव मर्दनं रणेऽद्भुतमभूत् । पश्यतामिति शेषः ॥ २२ ॥

छलारी — पाकस्तन्नामकृदैत्यः शताभ्यां पृथगेकेन शरशतेन मातलिमन्येन शरशतेन सावयवं चक्रोद्यतं सहितरथं सकृत्सन्धानयुक्तमोक्षणमौर्व्यां शरसन्धानं तन्मोक्षणं च युगपदेवेति तत्कर्मकरणम् । पश्यतामिति शेषः । अद्भुतमभूत् ॥ २२ ॥

लिङ्गेरी — पाकोऽसुरो बाणानां शताभ्यां शतद्वयेन मातलिं रथं चावयवशः सर्वेष्ववयवेषु पृथक् तताड । रणे तस्य तत्कर्म सकृद्युगपदेव बाणानां सन्धानसहितमोक्षणेन निमित्तेन पश्यतामाश्चर्यकरमभूत् ॥ २२ ॥

नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः ।
आहत्य व्यनदत् सङ्ख्ये सतोय इव तोयदः ॥ २३ ॥

सत्यधर्मीया — मुचिलृ मोक्षणेऽस्मान्न मुञ्चतीति नमुचिः । इगुपधात्किदितीन् । न भ्राडित्यादिना प्रकृत्या नञ् ॥ २३ ॥

छलारी — स्वर्णपुंखैः । पुङ्खो नाम शरमूलप्रदेशः । आहत्येन्द्रं विध्वा । संख्ये युद्धे ॥ २३ ॥

लिङ्गेरी — नमुचिरसुरः संख्ये युद्धे पञ्चदशसङ्ख्याकैः स्वर्णखचितपुंखैर्ज्यासंयोज्यपृष्ठैर्महद्भिः स्थूलैरिषुभिर्बाणैरिन्द्रमाहत्य तोयेनोदकेन सहितः सतोयस्तोयदो मेघ इव व्यनदन्नादं चकार ॥ २३ ॥

सर्वतः शरकूटेन शक्रं सरथसारथिम् ।
छादयामासुरसुराः प्रावृट्सूर्यमिवाम्बुदाः ॥ २४ ॥

सत्यधर्मीया — प्रावृडिति प्रथमा सप्तम्यर्थे । प्रावृषः सूर्यो वर्षाकालवर्ती तं वा ॥ २४ ॥

छलारी — शरकूटेन शरसमूहेन प्रावृट्सूर्यं वर्षाकालीनसूर्यम् ॥ २४ ॥

लिङ्गेरी — असुराः, अंबूनि जलानि ददतीत्यंबुदा मेघाः, प्रावृषो वर्षाकालस्य सूर्यमिव शराणां कूटेन समूहेन रथसारथिभ्यां सहितं शक्रं सर्वतः छादयामासुः ॥ २४ ॥

अलक्षयन्तस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः ।
अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथाऽर्णवे ॥ २५ ॥

सत्यधर्मीया — अर्णवे वणिक्पंथाः । वणिजां पन्था येषां ते तथा । चिरन्तनाभ्यस्तवाणिज्यात्तत्कालोचितालोचितेन कथं कथञ्चित्पारङ्गता भवेयुरेते तु नूतना इति ध्वन्यते वाणिक्पथा इत्यनेन। भिन्ननवो भिन्ननावः । अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेदित्यादेः । यथा तथा विचुक्रुशुः ॥ २५ ॥

छलारी — तमिन्द्रमलक्षयन्तोऽपश्यन्तोऽनायका नाथरहिताः । अर्णवे भिन्ना नौर्येषां ते भिन्ननाव इत्यर्थः । वणिक्पथा वणिजां भिन्नपन्था वृत्तिर्येषां ते वणिजो यथाऽऽक्रोशं कुर्वन्ति तद्वत् ॥ ॥ २५ ॥

लिङ्गेरी — सहानुगा देवगणास्तमिन्द्रमलक्षयन्तोऽपश्यन्तोऽतीव चञ्चला अनायका रक्षकस्वामिरहिताः शत्रुबलेन निर्जिताः सन्तः समुद्रे विदारितनावो व्यवहारिणो यथा तथा विचुक्रुशुः ॥ २५ ॥

ततस्तुराषाडिषुबद्धपञ्जराद् विनिर्गतः साश्वरथध्वजोऽग्रणीः ।
बभौ दिशः खं पृथिवीं च रोचयन् स्वतेजसा सूर्य इव क्षपात्यये ॥ २६ ॥

सत्यधर्मीया — तुराषाट् । तुर त्वरणे । इगुपधेति कः । तुरं वेगवन्तं साहयत्यभिभावयति । अधेः प्रहसन इति सूत्रे प्रहसनमभिभव इति वृत्तेःण्यन्तात्सहेः क्विप् । सहेः साडः सः इति षत्वम् । अन्येषामपीति पूर्वपदस्य दीर्घः । आङ् पूर्वको वा सहिः । बाणबद्धात् पञ्जरात् । अग्रणीर्यन्ता । क्षपा रात्रिः ॥ २६ ॥

छलारी — तुराषाडिन्द्र इषुबद्धपञ्जराच्छरनिर्मितपञ्जरात्साश्वरथध्वजाग्रणीरश्वादिभिः सहितो विनिर्गतोऽग्रणीः सारथिः । क्षपायाः निशाया अत्यये नाशे सति ॥ २६ ॥

लिङ्गेरी — तुरां वैरिवेगं सहतीति तुराषाडिन्द्रोऽश्वरथध्वजश्रेष्ठसहितः सन् बाणबद्धपंजराद्विनिर्गतः सन् क्षपाया रात्र्या अत्ययेऽपगमे सति स्वतेजसा सूर्य इव दिशः खमाकाशं पृथिवीं च रोचयन् बभौ । तुराषाण्मेघवाहनः । त्रियामा क्षणदाक्षपाः । अनन्तं सुरवर्त्म खमिति चामरः ॥ २६ ॥

निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ।
उदयच्छद् रिपून् हन्तुं वज्रं वज्रधरो रुषा ॥ २७ ॥

सत्यधर्मीया — उदयच्छदुद्दधार ॥ २७ ॥

छलारी — पृतनां सेनामुदयच्छदुद्धृतवान् ॥ २७ ॥

लिङ्गेरी — वज्रधरो देव इन्द्रः, परैः शत्रुभिरसुरैः स्वस्य पृतनां सेनामभ्यर्दितां निरीक्ष्य रुषा कोपेन रणे रिपून् असुरान्हन्तुं वज्रमुदयच्छदुद्धृतवान् । वाहिनी पृतना चमूः । कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधावित्यमरः ॥ २७ ॥

स तेनैवाष्टधारेण शिरसी बलपाकयोः ।
ज्ञातीनां पश्यतां राजन् जहार जनयन् भयम् ॥ २८ ॥

सत्यधर्मीया — अष्टौ धारा अराणि यस्य स तथा ॥ २८ ॥

छलारी — अष्टधारा अस्त्रा यस्य तेन वज्रेण ज्ञातीनां बलपाकबान्धवानाम् ॥ २८ ॥

लिङ्गेरी — स इन्द्रोऽष्टधारेण तेनैव वज्रेण बलपाकयोः शिरसी पश्यतां ज्ञातिनां भयं जनयन्सन् जहार ॥ २८ ॥

नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ।
जिघांसुरिन्द्रं नृपते चकार परमोद्यमम् ॥ २९ ॥

सत्यधर्मीया — रुषाशब्दोऽयम् ॥ २९ ॥

छलारी — आमर्षोऽसहनशोकाभ्यां युक्तया रुषा क्रोधेनान्वितः सन् इन्द्रं जिघांसुः परमोद्यमं चकार ॥ २९ ॥

लिङ्गेरी — हे नृपते । नमुचिरसुरस्तद्बलपाकवधं दृष्ट्वा शोकासहिष्णुताकोपसहितः सन् इन्द्रं हन्तुमिच्छुरत्युद्योगं चकार ॥ २९ ॥

अश्मसारमयं शूलं घण्टावद्धेमभूषणम् ।
प्रगृह्याभ्यद्रवत् क्रुद्धो नमुचिर्दानवोत्तमः ॥ ३० ॥

सत्यधर्मीया — अश्मसारमयं लोहात्मकम् । घण्टा अस्य सन्तीति घण्टावत् ॥ ३० ॥

छलारी — अश्मसारमयं शिलासारात्मकं घण्टावद्धण्टाभिर्युक्तम् ॥ ३० ॥

लिङ्गेरी — तदेव दर्शयति ॥ अश्मेत्यादिना । दानवोत्तमो नमुचिरयोविकृतं घण्टायुक्तं सुवर्णभूषितं शूलं प्रगृह्य क्रुद्धः सन् इन्द्रमभ्यद्रवत् । अश्मसारमय इति कोशः । सुवर्णं हेमहाटकमिति च ॥ ॥ ३० ॥

तदाविध्य महावीर्यो हतोऽसीति वितर्जयन् ।
प्राहिणोद् देवराजाय निनदन् मृगराडिव ॥ ३१ ॥

सत्यधर्मीया — वितर्जयन्विशेषेण भर्त्सयन् ॥ ३१ ॥

छलारी — वितर्जयन् भीषयन् देवराजायेन्द्राय प्राहिणोच्चिक्षेप । मृगराडिव सिंह इव नदन् गर्जयन् ॥ ३१ ॥

लिङ्गेरी — महावीर्यो नमुचिस्तच्छूलमाविद्ध्य भ्रामयित्वा देवराजायेन्द्राय त्वं हतोऽसीति विसर्जयन् मुंचन् मृगराट् सिंह इव नदन् ध्वनिं कुर्वन् प्राहिणोच्चिक्षेप ॥ ३१ ॥

तदापतद् गगनतले महाजवं निचिच्छिदे हरिरिषुभिः सहस्रधा ।
तमाहनन् नृप कुलिशेन कन्धरे रुषाऽन्वितस्त्रिदशपतिः शिरो हरन् ॥ ३२ ॥

सत्यधर्मीया — महाजवं गगनतल आपतत् । तच्छूलं हरिरिन्द्रः । इषुभिर्बाणैः सहस्रधा निचिच्छिदे नितरां चिच्छेद । तं च, कन्धरे कन्धराऽस्मिन्प्रदेशेऽस्ति स कन्धरस्तत्प्रदेशे, शिरो हरंस्त्रिदशपती रुषान्वितः । कुलिशेनाहनत् ॥ ३२ ॥

छलारी — हरिरिन्द्रो गगनतले आकाशेऽपतत् । शूलं चिच्छेद । तं नमुचिं कन्धरे ग्रीवायां शिरो हरन् आहनत् ॥ ३२ ॥

लिङ्गेरी — हे नृप । त्रिदशपतिर्हरिरिन्द्रो गगनस्याकाशस्य तले प्रदेश आपतदागच्छन्महान् जवो वेगो यस्य तच्छूलमिषुभिः सहस्रधा चिच्छेद । कुलिशेन वज्रेण पुनरपि रुषान्वितः सन् तन्नमुचिकं शिरो धरतीति कन्धरः कण्ठस्तस्मिन्नहनत् । तेन तस्य शिरोऽहरत् अपहृतवान् चिच्छेद । कुलिशं भिदुरं पविरित्यमरः ॥ ३२ ॥

ततोऽस्य न त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ।
तदद्भुतं परमतिवीर्यवृत्रभित् तिरस्कृतो नमुचिशिरोधरत्वचा ॥ ३३ ॥

सत्यधर्मीया — ऊर्जितो तपसा । अस्य नमुचेस्त्वचमपि चर्मापि य ओजसा । सुरपतिनेरितः सोऽपि न बिभेद । तदभेदनं परमद्भुतं महाश्चर्यम् । अतिवीर्यो यो वृत्रस्तं भिनत्तीति स तथा । नमुचिशिरोधरत्वचा तिरस्कृतस्तेनातिवीर्यवृत्रभिदिन्द्रोऽपि तिरस्कृत इति वा । तदेवं तिरस्करणं परमद्भुतमिति वा ॥ ३३ ॥

छलारी — यः सुरपतिनौजसा बलेनेरितः क्षिप्तः स वज्रः । तस्य नमुचिकण्ठस्य त्वचमप्युपरितनचर्मापि न बिभेद । तत्परमद्भुतम् । कुतः । यतोऽतिवीरं वृत्रासुरं भिनत्तीति तथा । तादृशोऽपि वज्रो नमुचेः शिरोधरस्य कन्धरस्य त्वचा तिरस्कृतो धिक्कृतः ॥ ३३ ॥

लिङ्गेरी — ततः सुरपतिनेन्द्रेणोजसा शक्त्येरितः क्षिप्तोऽपि ऊर्जित उत्कृष्टोऽपि वज्रो यः सोऽस्य नमुचेस्त्वचमपि कण्ठस्थानं न बिभेदेति यत्तदद्भुतं परं केवलम् । एवमतिवीर्यमसुरं वृत्रं भिनत्ति विदारयतीत्यतिवीर्यवृत्रभिदपि इन्द्रो नमुचिशिरोधरभागकण्ठत्वचा तिरस्कृतः ॥ ३३ ॥

तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ।
किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥ ३४ ॥

सत्यधर्मीया — तस्माददीर्णत्वचो नमुचेरबिभेत् भीतिमाप । लोकविमोहनम् । किमिदं दैवयोगेन भूतं जातमित्यर्थः ॥ ३४ ॥

छलारी — तस्माच्छत्रोर्नमुचेः प्रतिहतो निर्वीर्योऽबिभेत् भयं प्राप । किमिति । इदं वज्राप्रतिहतं वस्तु लोकस्य विमोहकरं भयङ्करमित्यर्थः । दैववशाल्लोकानामिदं मोघमिति भ्रान्तिजनकम् । यद्वा । दैवयोगेन दैवसामर्थ्येन निर्मितं भूतम् । किं कश्चन ग्रहविशेषात् । इदं वज्रं निरस्तकरणं किं भूतं किं जातमिति ॥ ३४ ॥

लिङ्गेरी — यतो यस्मान्नमुचौ प्रयुक्तो वज्रः प्रतिहतस्तस्मात्कारणादिन्द्रः शत्रोर्नमुचेः अबिभेत् भीतियुक्तोऽभूत् । लोकानामेतद्व्रणद्रष्टृणां जनानां विमोहनं भ्रान्तिजनकं दैवयोगेनादृष्टप्रेरकेश्वरेच्छयेदं किं जातमिति चिन्तयामास ॥ ३४ ॥

येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ।
कृतो निविशतां भारैः पतत्त्रैः पततां भुवि ॥ ३५ ॥

सत्यधर्मीया — सदैवमेव किमपूर्वं जानासि पुरन्दरेत्यतस्तन्माहात्म्यमाह ॥ येनेति । निविशतां निविशमानानाम् । पतत्त्रैः पततां भारैः प्रजात्यये प्रजानाशे प्रसक्ते मे मयाऽद्रीणां पूर्वं पक्षच्छेदः कृतो निर्विशतामिति निर्विशङ्कः पाठः ॥ ३५ ॥

छलारी — काऽत्र कथंतेत्यतो वज्रवीर्यमाह ॥ येनेति । पूर्वं पतत्त्रैः पक्षैः पततां भारैर्भुवि निविशतां गुरुत्वेन निमित्तेन लोकोपरि पततानामद्रीणां पक्षच्छेदो येन वज्रेण कृतः । तत्र निमित्तम् ॥ प्रजानामत्यये नाशे सति ॥ ३५ ॥

लिङ्गेरी — तमेव विशदयन्ति ॥ येनेत्यादिना । येन वज्रेण मे मया पूर्वं पतत्त्रैः पक्षैः पततां भुवि ग्रामे ग्रामे निविशतामुपविश्यमानानामद्रीणां पर्वतानां भारैः प्रजानां जनानामत्यये नाशे सति

पक्षच्छेदः कृतस्तत्तादृशं त्वाष्ट्रस्य दधीचेरस्थिनिर्मिततया त्वाष्ट्रं त्वाष्ट्राख्योत्तमतपःप्रचुरं च येन वज्रेण वृत्रोऽसुरो विपाटितो विदारितोऽन्येऽतिबलोपेताः । सर्वास्त्रैरक्षता अविदारितास्त्वचो येषां तेऽपि विपाटिताः । स तादृशगुणोऽयं वज्रो मया क्षुद्रतरेऽसुरे नमुचौ मुक्तः प्रतिहतो वृथाऽभूत् । तस्मादहं ब्राह्मणतपःसामर्थ्योपेतमप्यत्र नमुचिवधेऽकारणं तत्तं दण्डं वज्ररूपं नाददे न ग्रहिष्यामीति ।
॥३५-३७॥

तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ।
अन्ये चातिबलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३६ ॥

सत्यधर्मीया — येन वृत्रो विपाटितः, सर्वास्त्रैरक्षतत्वचोऽन्ये चातिबलोपेता विपाटिताश्च । तत्तपः सारमयं दधीचेस्तपःसारात्मकं, त्वाष्ट्रम् त्वष्ट्रा विश्वकर्मणा निर्मितं यद्वक्ष्यति ब्रह्मतेजोऽप्यकारणमिति तदिदमेवं भूतमिति परमद्भुतमित्यन्वयः । वज्रोऽस्त्री चक्रवज्रान्धकारेति चामरलिङ्गानुशासनात् तपःसारमयं त्वाष्ट्रमित्युपपद्यते । अत एव सोऽयं वज्रो, नाहं तदाददे वज्रमिति सम्भवत्युत्तरोक्तिः ॥ ३६ ॥

छलारी — तथा सारमयं वीर्याधिकं त्वाष्ट्रदेवतासम्बन्धि तपः । एवं वृत्रस्त्वाष्ट्रतपसा जात इत्यर्थः । यद्वा । तपः सारमय इति, त्वाष्ट्रं तपः सारमयच्छदिति वा पदच्छेदः ॥ त्वाष्ट्रं तपः सारमयत्प्राप्त इत्यर्थः । सोऽसुरो येन वज्रेण विपाटितो हतः । तथा सर्वास्त्रैरप्यक्षतत्वचोऽच्छिन्नचर्माणः । बलोपेता अन्ये च बलश्च पाकादयो येन हता इत्यर्थः ॥ ३६ ॥

सोऽयं प्रतिहतो वज्रो मया मुक्तोऽऽसुरेऽल्पके ।
नाहं तदाददे वज्रं ब्रह्मतेजोऽप्यकारणम् ॥ ३७ ॥

सत्यधर्मीया — अल्पकेऽत्यल्पे । ब्रह्मतेजोऽपि दधीचेः प्रभावोऽकारणमकार्यकारि ॥ ३७ ॥

छलारी — अल्पके दुर्बलेऽसुरे नमुचौ मया मुक्तः सोऽयं वज्रः प्रतिहतो निर्वीर्योऽभूत् । तस्माद्दण्डं निर्वीर्यलकुटतुल्यं तद्वज्रमहं नाददे । स्वीकार्यं यतोऽतो ब्रह्मतेजोऽपि ब्रह्मणो दधीचिर्षेस्तेजोऽपि सामर्थ्यमप्यकारणं कार्यं कर्तुं क्षमं नाभूत् । वज्रस्य दधीचिर्षेरस्थिनिर्मितत्वाद्ब्रह्मतेज इत्युक्तम् ॥ ३७ ॥

इति शक्रं विषीदन्तमाह वागशरीरिणी ।
नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ ३८ ॥

सत्यधर्मीया — शुष्कैः पदार्थैः । एवं नार्द्रैः ॥ ३८ ॥

छलारी — अशरीरिण्यशरीरस्य वायोः संम्बन्धिनी । विषीदन्तं खेदयुक्तमिन्द्रमाह ॥ ३८ ॥

लिङ्गेरी — इति विषीदन्तं क्लेशं कुर्वन्तं शक्रं प्रति हे इन्द्र! अयं दानवो नमुचिः शुष्कैरथो आर्द्रैश्च वस्तुभिर्वधं मरणं नार्हतीत्यशरीरिणी वागाह ॥ ३८ ॥

मयाऽस्मै यद् वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ।
अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन् रिपोः ॥ ३९ ॥

सत्यधर्मीया — किं निमित्तमेवमिति हस्ते गृहीत्वा प्रष्टुं स्वाशरीरत्वेनाशक्तः शक्र इति दयावती सैव देव्याह ॥ मयेति । आर्द्रशुष्कयोः सकाशात् । अत आभ्यां रिपोस्तद्धननसम्बन्धी ॥ ३९ ॥

छलारी — अयं कुतो वधं नार्हतीत्यत आह ॥ मयेति । ब्रह्मस्वरूपेण मया किमिति वरो दत्त इत्यत आह ॥ मृत्युरिति । आर्द्रशुष्कयोः पदार्थयोः सकाशान्मृत्युर्नैवेति । ते त्वया रिपोर्वधे उपायश्चिन्तनीयः ॥ ३९ ॥

लिङ्गेरी — हे मघवन्! यस्मादस्मै नमुचये आर्द्रशुष्काभ्यां मृत्युर्नैव स्यादिति वरो दत्तोऽतः एतस्मात्कारणात्ते रिपोर्नमुचेर्वधायान्य उपायश्चिन्तनीयः ॥ ३९ ॥

तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः ।
ध्यायन् फेनमथापश्यदुपायमुभयात्मकम् ॥ ४० ॥

सत्यधर्मीया — ध्यायन् किं स्यादुभयरूपमिति चिन्तयन् उभयात्मकमाद्रमनार्द्रं चैकमेव ॥४०॥

छलारी — मघवानिन्द्रः । सुसमाहित एकाग्रचित्तः सन् एतादृशं किमिति ध्यायन् फेनं जलविकारं वस्तु । अपभृष्टभाषया नोरे । उभयात्मकमनार्द्रमशुष्कं च ॥ ४० ॥

लिङ्गेरी — मघवान् धनादिसंपन्न इन्द्रस्तामुक्तप्रकारां दैवीं गिरमाकर्ण्य श्रुत्वाऽतिसमाधानोपेतांतःकरणः सन् यत्केवलशुष्कमार्द्रं च न भवति तादृग्वस्तु चिन्तयानः सन् शुष्कार्द्रोभयात्मकं फेनलक्षणमुपायमपश्यद्दृष्टवान् ॥ ४० ॥

नशुष्केण नचार्द्रेण जहार नमुचेः शिरः ।
तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् विभुम् ।। ४१ ।।

सत्यधर्मीया — शुष्को न भवतीति नशुष्कः एवं नचार्द्रः । तथा च श्रुतिः । अपां फेनेन नमुचेः शिर इन्द्रोदवर्तय इति नोपधः पुंसि । इनः फेन इति लिङ्गानुशासनव्याख्यानोक्तेः पुल्लिङ्गः फेनशब्दः । तं विभुमिन्द्रम् ।। ४१ ।।

छलारी — उभयात्मकं विवृण्वन्नाह ।। न शुष्केण न चार्द्रेण फेनेनेति । तथा च श्रुतिः । ''अपां फेनेन नमुचेः शिर इन्द्रो जहार यत'' इति । माल्यैः पुष्पैर्विभुमिन्द्रमवाकिरन् अभ्यवर्षन् ।। ४१ ।।

लिङ्गेरी — इन्द्रो न शुष्केण केवलं शुष्कभिन्नेन न चार्द्रेण केवलमार्द्रभिन्नेन च फेनेन नमुचेः शिरो जहार । मुनिगणा विभुं शत्रुहननसमर्थं तमिन्द्रं स्तुवन्तो माल्यैः पुष्पैरवाकिरन् । माल्यं पुष्पे पुष्पदाम्नीति नानार्थमुक्तावली ।। ४१ ।।

गन्धर्वमुख्यौ जगतुर्विश्वावसुपरावसू ।
देवदुन्दुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ।। ४२ ।।

सत्यधर्मीया — विश्वावसुश्च परावसुश्च तौ ।। ४२ ।।

छलारी — विश्वावसुपरावसुनामकौ गन्धर्वमुख्यौ गन्धर्वश्रेष्ठौ जगतुर्गायनं चक्रतुः । देवदुन्दुभयो भेरिणो नेदुः । नर्तक्योऽप्सरस्त्रियो नृत्यं चक्रुः ।। ४२ ।।

लिङ्गेरी — तदा गन्धर्वेषु मुख्यौ प्रधानौ नाम्ना विश्वावसुः परावसुर्जगतुर्गानं चक्रतुः । देवदुंदुभयो भेर्यो नेदुर्ध्वनिं चक्रुः । नर्तक्योऽप्सरसो मुदा सन्तोषेण नर्तनं चक्रुः ।। ४२ ।।

अन्येऽप्येवं प्रतिद्वन्द्वान् वाय्वग्निवरुणादयः ।
सूदयामासुरस्त्रौघैर्मृगान् केसरिणो यथा ।। ४३ ।।

सत्यधर्मीया — अन्येऽपि वाय्वग्निवरुणादयः प्रतिद्वन्द्वान् प्रतियोद्धॄन् ।। ४३ ।।

छलारी — प्रतिद्वन्द्वान्प्रतिपक्षिणः । केसरिणः सिंहा मृगान्यथा ।। ४३ ।।

लिङ्गेरी — केसरिणः सिंहा मृगान् यथा तथा वाय्वग्निवरुणादयोऽप्यन्ये देवाः स्वस्वप्रतिद्वन्द्वान् स्वैर्द्वन्द्वीभूय युद्धचतोऽसुरान्सूदयामासुर्हतवन्तः ।। ४३ ।।

ब्रह्मणा प्रेषितो देवान् देवर्षिर्नारदो नृप ।
वारयामास विबुधान् दृष्ट्वा दानवसङ्क्षयम् ।। ४४ ।।

सत्यधर्मीया — देवान् अधुनापि विजिगीषून् विबुधान् नारदो वारयामासेत्यन्वयः ।। ४४ ।।

छलारी — दानवानां संक्षयं नाशं दृष्ट्वा ब्रह्मणा चतुर्मुखेन प्रेषितो नारदो दैत्यनाशं दृष्ट्वा देवान्वारयामासेति भावः ।। ४४ ।।

लिङ्गेरी — हे नृप । तदा ब्रह्मणा चतुर्मुखेन दानवानां संक्षयं दृष्ट्वा देवान्प्रति प्रेषितो देवर्षिर्नारदो विबुधान्देवान्वारयामास युद्धं मा कुरुध्वमित्यवोचत् ।। ४४ ।।

नारद उवाच–

भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ।
श्रिया समेधिताः सर्वे उपारमत विग्रहात् ।। ४५ ।।

सत्यधर्मीया — यूयं श्रिया समेधितास्ते च न तथेत्युपारमतेति वारयामासेत्यन्वयः ।। ४५ ।।

छलारी — किमिति । श्रिया ऐश्वर्येण समेधिता अभिवृद्धाः । विग्रहाद्युद्धादुपारमत विरमत । कृतकार्यत्वाद्वृथा हिंसां न कुरुतेति भावः ।। ४५ ।।

लिङ्गेरी — तदेव निमित्तकथनपूर्वं विशदयति ।। भवद्भिरिति । हे देवाः! नारायणभुजाश्रयैर्भवद्भिरमृतं प्राप्तम् । भवन्तः श्रिया संपदा समेधिता अत्यभिवृद्धाश्चातः सर्वे यूयं विग्रहात्कलहादुपारमत शान्ता भवतेति ।। ४५ ।।

श्रीशुक उवाच–

संयम्य मन्युसंरम्भं मानयन्तो मुनेर्वचः ।
संगीयमानानुचरैर्ययुः सर्वे त्रिविष्टपम् ।। ४६ ।।

सत्यधर्मीया — मुनेः । मुनिस्तु सर्वविद्यानां ब्रह्मेत्युक्तेर्ब्रह्मणो नारदस्य च । मन्युसंरम्भं कोपोद्रेकम् । सङ्गीयमानानुचरैः सङ्गीयमानाः अनुचराः भटाः तैः ।। ४६ ।।

छलारी — मन्युसंरम्भं द्वेषोद्रेकं संयम्य निगृह्य त्रिविष्टपं स्वर्गं ययुः ।। ४६ ।।

लिङ्गेरी — देवा मुनेर्नारदस्य वचो बहुमानयन्तः स्वेषामसुरेषु मन्युं सरंभं कोपाटोपं संयम्य निगृह्यानुचरैर्गन्धर्वैः सङ्गीयमानाः सन्तः सर्वे त्रिविष्टपं स्वर्गं ययुः प्रापुः । मन्युः क्रोधे क्रतौ दैन्ये । सुरलोको द्यौ दिवो द्वे स्त्रियां क्लीबे त्रिविष्टपमिति चामरः ॥ ४६ ॥

येऽवशिष्टा रणे तस्मिन् नारदानुमतेन ते ।
बलिं विपन्नमादाय अस्तंगिरिमुपागमन् ॥ ४७ ॥

सत्यधर्मीया — विपन्नं शीर्णाङ्गम् ॥ ४७ ॥

छलारी — नारदस्यानुमतेनानुज्ञया येऽवशिष्टा हतावशिष्टास्ते दैत्या विपन्नं मृतं बलिमुपादायास्तं गिरिं प्रापुः ॥ ४७ ॥

लिङ्गेरी — तस्मिन्देवासुररणे येऽसुरा अवशिष्टास्ते नारदसंमत्या विपन्नमापद्गतं बलिमादायास्तपर्वतं गताः ॥ ४७ ॥

तत्राविनष्टावयवान् विद्यमानशिरोधरान् ।
उशना जीवयामास सञ्जीविन्या स्वविद्यया ॥ ४८ ॥

सत्यधर्मीया — अविनष्टा अवयवा येषां ते तान् । विद्यमानशिरोधरांश्चोशना सञ्जीविन्या जीवयामास । सावयवान्सशिरोधरांश्च गतासूनुशना सञ्जीवयामास तथैवावयवसद्भावान्न विशल्यकरण्यादिकृत्यमिति भावः । स्वविद्यया मन्त्रेण चेति केचित् । न च शुक्रेणोज्जीवितास्ते तु पुनस्तेनैव पातिता इत्यतीततात्पर्ये सञ्जीविन्या अनुक्तत्वात्तद्विरोध इति वाच्यम् । तत्र मुख्यस्य शुक्रमात्रस्योपादानं नोपायोपन्यास उपायस्याप्यत्रोक्तिरिति तंत्रे तान्तयन्ति । सञ्जीविनी स्वविद्यैव तयेति वा ॥ ॥ ४८ ॥

छलारी — तत्र युद्धभूमौ । अविनष्टा अवयवा हस्तपादादयो येषां तान् । विद्यमानाः शिरोधराः कन्धरा येषां तान्मृतान् दैत्यान् संजीविनीनामिकयोशनाः शुक्राचार्यो जीवयामास ॥ ४८ ॥

लिङ्गेरी — तत्रास्तपर्वते उशनाः शुक्रः संजीविन्याख्यविद्यया अविनष्टावयवान्विद्यमानशिरोधरानसुरान् उज्जीवयामास प्राणधारिणोऽकरोत् । उशना भार्गवः कविरित्यमरः ॥ ४८ ॥

बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः ।
पराजितोऽपि नाखिद्यल्लोकतत्वविचक्षणः ॥ ४९ ॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे दशमोऽध्यायः ।

सत्यधर्मीया — प्रत्यापन्ना प्रत्यागता । इन्द्रियेषु स्मृतिर्यस्येन्द्रियाणि स्मृतिर्वा यस्य सः । विपन्नमित्यस्य मृतिमिति व्याकरणं, स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिरित्युत्तरास्वारस्यस्वारस्यकम् । लोकैर्ज्ञानिभिर्यत्तत्वमिति निश्चितं तत्र लोकतत्त्वे ज्ञानिरहस्यप्रमेये विचक्षणः कुशल इति । पराजितोऽपि । नाखिद्यत्खेदवान्नाभूत् ॥ ४९ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे दशमोऽध्यायः ॥ ८-१० ॥

छलारी — प्रत्यापन्नानि पुनः प्राप्तानीन्द्रियाणि स्मृतिश्च येन सः । लोकस्य ज्ञानिनस्तत्त्वे मते विचक्षणो जयपराजयादेर्भगवदधीनत्वज्ञानीत्यर्थः । यतोऽतो नाखिद्यदित्यर्थः ॥ ४९ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे दशमोऽध्यायः ॥ ८-१० ॥

लिङ्गेरी — तत्र बलिरसुर उशनसा शुक्रेण स्पृष्टः सन् पुनः प्राप्तेन्द्रियशक्तिः स्मृत्यादिमान्सन् यतः स्वयं लोकतत्त्वे जनस्थितौ विचक्षण ईश्वरपराधीनत्वादिविवेकवानत इन्द्रेण पराजितोऽपि खेदं नाकरोत् । ४९ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे दशमोऽध्यायः ॥ ८-१० ॥

॥ अथ एकादशोऽध्यायः ॥

श्रीशुक उवाच–

वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ।
मोहयित्वा सुरगणान् हरिः सोमममपाययत् ॥ १ ॥

सत्यधर्मीया — रुद्रोऽप्यमोहि मोहिन्या नारायणेनेति हरेर्माहात्म्यं वक्तुं तदुपोद्घातमाह ॥ वृषध्वज इति । इतीदं निशम्येत्यन्वयः ॥ १ ॥

छलारी — देवकार्यसाधनानन्तरं भगवान् किमकरोदित्यत उपोद्घातमाह ॥ वृषध्वज इति । वृषध्वजो रुद्रो हरिः योषिद्रूपेण दानवान्मोहयित्वा सुरगणान् अमृतमपाययदितीदं हरिमाहात्म्यं निशम्य ॥ १ ॥

लिङ्गेरी — श्रीहरौ भक्त्युत्पादनाय महादेवस्तुत्याऽनेकगुणवत्त्वमाहात्म्यं हरेः प्रतिपाद्यतेऽस्मिन्नध्याये । तत्रादौ रुद्रगमनप्रकारमाह ।। वृषध्वज इत्यादिना । वृषो नन्दिकेश्वरो ध्वजपटे चिन्हतया यस्य स वृषध्वजो रुद्रो हरिर्नारायणो, योषितो नारायण्याख्यस्त्रीरूपेण दानवान्मोहयित्वा सुरगणान्सोममममृतमपाययत् ।। १ ।।

वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ।
सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ।। २ ।।

सत्यधर्मीया — यत्रास्ते तं देशम् ।। २ ।।

छलारी — स मधुसूदनो यत्रास्ते तत्र द्रष्टुं ययावित्युत्तरेणान्वयः । देव्या सहोमया सह ।। २ ।।

लिङ्गेरी — गिरौ कैलासे शेते स्वपितीति गिरिश इतीदं वृत्तान्तं निशम्य श्रुत्वा वृषमारुह्य सर्वैर्भूतगणैर्वृतः सन् देव्या पार्वत्या च सहितः सन् यत्र मधुमसुरं सूदति हिनस्तीति मधुसूदनो नारायण आस्ते तं द्रष्टुं ययौ ।। २ ।।

सभाजितो भगवता सादरं सोमया भवः ।
सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन् हरिम् ।। ३ ।।

सत्यधर्मीया — स उमयेति पदम् । सैष दाशरथी, सोषामविन्दत्स वामनस्तारकोभाभ्यामित्यादिवत्सोमयेति ज्ञेयम् । हे स कोपसम्भवेति उमया सहितः सभाजितः पूजित इति हे स शूलिन्निति सम्बोध्येति वा । सः कोपे वारणे सस्ये तथा शूलिनि साधक इति सैकविश्वः । श्रुतकथास्मृतितः स्मयन्मन्दस्मितं तन्वन् ।। ३ ।।

छलारी — भवो रुद्रः सोमया सह । यद्वा । सः उमयेति पदच्छेदः । सैष राजा युधिष्ठिरः । सोषामविन्दत्स स्वामीत्यादिवत् । भगवता सभाजितः पूजितः सूपविष्टः सम्यगुपविष्टः । हरिं प्रतिपूज्य नमस्कारेण पूजयित्वा स्मयन् आश्चर्यं प्राप्नुवन् उवाचास्तौत् ।। ३ ।।

लिङ्गेरी — भवो भक्तमांगल्यदो हरो, भगवता नारायणेनोमया पार्वत्या सह सादरं सभाजितो बहुमानितः सन्नुपविष्टो भगवन्तं प्रतिपूज्य स्मयन्निवेदमुवाच ।। ३ ।।

देव देव जगद्व्यापिन् जगदीश जगन्मय ।
सर्वेषामेव भावानां त्वमात्मा हेतुरीश्वरः ।। ४ ।।

सत्यधर्मीया — हेतुः कारणम् । तन्न साधारणमित्याह ।। ईश्वर इति । स्वावस्थानस्थल ईश्वरश्चेत्तदनावासस्थलेऽन्यः स्यादित्यत आह ।। आत्मेति । आततः सर्वत्रेत्यात्मा । जगद्व्यापि यदुदर इति जगद्व्यापिन् । जगद्व्यापिन् जगति व्याप्तेत्यर्थपक्ष उक्तेतरसर्वगुणपूर्णेत्यात्मपदार्थः । सर्वान्गुणानात्मशब्दो ब्रवीतीति श्रुतिवेदितो वेद्यः ।। ४ ।।

छलारी — किमिति । हे देवदेव देवानां देव परदैवत स्तुत्य इति वा । जगद्व्यापित्वम् । आकाशवन्नेत्याह ।। जगदीश इति । जगन्नियामक इत्यर्थः । नियमनं च ब्रह्मादिवत्पराधीनत्वेनेत्यत आह ।। जगन्मयेति । जगति ब्रह्मादिजगति प्रधानः स्वतन्त्र इत्यर्थः । सर्वेषामपि भावानां पदार्थानामात्माऽऽदानादिकर्ता । हेतुर्निमित्तकारणम् । ईश्वर ईशनान्मत्तो वर उत्तमः । अचिन्त्यैश्वर्यसंपन्न इति वा ।। ४ ।।

लिङ्गेरी — देवानां ब्रह्मादीनां देव, जगद्व्यापिन् चेतनाचेतनविश्वव्यापक, पूर्वोक्तजगदीशात एव जगन्मयशब्दित हे हरे! त्वं सर्वेषां भावानां पदार्थानां हेतुर्निमित्तकारण आत्माऽन्तर्यामीश्वरश्च ।। ४ ।।

तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः ।
विसृज्योभयतः सङ्गं मुनयः समुपासते ।। ५ ।।

सत्यधर्मीया — नेश्वरता तव नश्वरसंपत्कैर्व्यभिचचारेति ज्ञापयितुमसाधारणगुणानुपन्यस्य स्तौति ।। तवेति । उभयत ऐहिकलौकिकपारलौकिकविषयजाते सङ्गं स्पृहारूपं त्यक्त्वा निराशिषः सन्तः श्रेयो नित्यमङ्गलं त्वामेव कामयन्ते ते तथा । उपासते सेवन्ते ।। ५ ।।

छलारी — मुमुक्षुभिरुपास्यमानत्वात्त्वमेव सर्वोत्तम इत्याशयेनाह ।। तवैवेति । श्रेयःस्कामा मोक्षकामा निराशिष ऐहिकामुष्मिककामरहिताः उभयतः ऐहिकामुष्मिकविषये सङ्गं विसृज्य । मुनयः सारज्ञाः ।। ५ ।।

लिङ्गेरी — ये श्रेयस्कामाः सर्वोत्तमत्वदर्शनेच्छा एकान्तिनो मुनयो मौनशीला ऋषयः सनकादयो निराशिष ऐहिकामुष्मिकफलाशारहिताः सन्त उभयत ऐहिकामुष्मिकयोः सङ्गं स्नेहं विसृज्य तव चरणांभोजमेवोपासते ।। ५ ।।

त्वं ब्रह्म पूर्णममृतं विगुणं विशोक-
मानन्दमात्रमविकारमनन्यदन्यत् ।
विश्वस्य हेतुरुदयस्थितिसंयमाना-
मात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ६ ॥

सत्यधर्मीया — ब्रह्मणो नान्यस्त्वमित्युपास्यस्तत्त्वतस्त्वमित्याह ॥ त्वं ब्रह्मेति । तत्पदार्थमाह ॥ पूर्णमिति । बृहन्तो ह्यस्मिन्गुणा इति श्रुतिमनुसृत्य योग्यतयान्वीयमानान्गुणानाह ॥ विगुणमित्यादिना। विमता गुणाः सत्त्वादयो यस्माद्विरुद्धा गुणादप्रधानादिति वा विगुणम् । विशोकं शोकशून्यम्। विशोकयत्यन्यानिति विशोकं वा । आनन्दमात्रं सुखात्मकम् । अविकारं षड्विकाररहितम् । अनन्यत् भिन्नस्वावयवगुणकर्मरहितम् । नेह नानाऽस्ति किञ्चनेत्यादेः । अन्यत् जगद्विलक्षणं विगुणत्वादिसर्वसम्भावकममृतं नित्यमुक्तमिति । अमृतत्वस्य मुख्यताबोधनेन मुख्यप्राणं व्यावर्तयितुं विगुणत्वादिकमिति वा । यतो वा इमानीत्यादिश्रुतिप्रतिपादितार्थोपेतस्त्वमित्याह ॥ विश्वस्येति । विश्वस्य जगत्सम्बन्धिनाम् । उदयस्थितिसंयमानामेतदाद्यष्टकस्य हेतुः । विश्वस्यात्माऽन्तर्नियामक ईश्वरोऽध्यक्षः । तर्हि किं प्रकृत्यादिकमुपादनकमुपादायैव करोतीत्यत आह ॥ तदपेक्षतयेति । तेषां प्रकृत्यादीनां तद्देवतानामपेक्षा यस्मिन्स तैरपेक्षित इति तदपेक्षस्तस्य भावस्तत्ता तया । तेन स्वफलाप्त्यै त्वामपेक्षते त्वं तु दयया तांल्लालयसीति वस्तुस्थितिमाह ॥ अनपेक्ष इति । अनिर्वाहेण न विद्यतेऽपेक्षा यस्य स तथा । विश्वस्यामृतस्य वायोः । वायुरनिलममृत इत्यादेः । उदयादेर्हेतुरात्मेश्वरस्तेन वायुनाऽपेक्षणीयत्वेन संहितः स्वयं तदनपेक्ष इति मुख्यामृतमित्यर्थो वा । इयदामननादित्यात्मनामीश्वरो यस्तस्य विश्वस्येति वा । तदुपेक्षतयेति पाठे तेषु कृतोपेक्षा यस्य तस्य भावस्तत्ता तयेति त्वमनपेक्ष इत्यर्थः । विनाऽपि तत्कर्तुं क्षम इति भावः । अनपेक्षस्तत्प्राप्यफलापेक्षारहित इति वा ॥ ६ ॥

छलारी — ननु मोक्षार्थिभिरुपास्यमानत्वादहं सर्वोत्तम इत्युक्तम् । तदयुक्तम् । मम परं ब्रह्मत्वाभावात् । परं ब्रह्मैव हि मोक्षार्थिभिरुपास्यमतस्तदेव सर्वोत्तममित्यतस्त्वमेव परं ब्रह्मेत्याह ॥ त्वं ब्रह्मेति । त्वमेव परं ब्रह्म । ब्रह्मशब्दप्रवृत्तिनिमित्तमाह ॥ पूर्णमिति । गुणपरिपूर्णमित्यर्थः । अविनाशिनः पूर्णत्वं युक्तमित्याह ॥ अमृतमिति । अमृतं नाशरहितं नित्यमुक्तं वा । अमृतत्वं कुत इत्यत आह ॥ विगुणमिति । सत्त्वादिगुणशून्यमत एवाविकारमुत्पत्त्यादिविकाररहितम् । अत एवाशोकमत एवानन्दमात्रम् । अनन्यन्मूलरूपादवताररूपेभ्यश्चान्यद्भिन्नं न । यद्वा । न

विद्यतेऽन्यत्सममधिकं वा । यस्मात्समाधिकशून्यमित्यर्थः । मूलरूपादवताररूपेभ्यश्चान्यज्जगतो भिन्नम् । विश्वस्योदयस्थितिसंयमानां हेतुश्च त्वमेव । आत्मेश्वरश्चात्मानां जीवानामीश्वरः फलप्रदश्च । कुतः । तदपेक्षतया तैरात्मभिः फलार्थमपेक्ष्यन्त इति तदपेक्षस्तस्य भावस्तदपेक्षता तया फलदानार्थं जीवैरुपास्यमानत्वादित्यर्थः । किं राजादिवत्तयाऽप्यपेक्षया सेवकेभ्योऽहं फलप्रदः किं नेत्याह ॥ अनपेक्षत इति । फलेच्छारहितः । आप्तकामस्य का स्पृहेति श्रुतेरिति भावः ॥ ६ ॥

लिङ्गेरी — ननु सनकादीनामुभयतः सङ्गाभावे निर्गुणब्रह्मोपासनमेवोचितं न तु सगुणब्रह्म-हर्युपासनमित्यतस्त्वमेव निर्गुणं ब्रह्म न त्वदन्यन्निर्गुणं ब्रह्मास्तीत्याह ॥ त्वं ब्रह्मेति । हे हरे । देशकालगुणैः पूर्णमत एव ब्रह्मशब्दितं विगुणं निर्गुणं सत्त्वादिगुणरहितमानन्दमात्रं केवलानन्दरूपमत एव विशोकमविकारं स्वरूपगुणशक्त्यादिभिरनन्यदभिन्नमन्यच्चेतनाचेतनात्मक-जगतो भिन्नममृतं नित्यमुक्तं परं ब्रह्म । ब्रह्मविदाप्नोतीत्यादिश्रुतितात्पर्यगोचरं त्वमेव । ननु यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतिषु सर्वजगदुत्पत्तिस्थितिसंहारकारणस्यैव परब्रह्मताऽवगमात् कथमस्य स्थितिमात्रकर्तृतया प्रसिद्धस्य विष्णोः परब्रह्मतेत्यत आह ॥ विश्वस्य समस्तस्य जगतः उत्पत्तिस्थितिलयानां हेतुर्निमित्तमिति, आत्मनां सर्वचेतनानामीश्वरस्य तस्मिन् जगदुपादानप्रकृत्या-दावुपेक्षवत्तयाऽनपेक्षजडप्रकृत्यादिकं विनाऽजसर्जनादिसामर्थ्यवत्त्वेऽपि स्वेच्छया तदङ्गीकरोषीति निरपेक्ष इत्यादिश्रुतिप्रतिपाद्योऽसीति भावः ॥ ६ ॥

एकस्त्वमेव सदसद्द्वयमद्वयं च
स्वर्णं कृताकृतमिवेह न वस्तुभेदः ।
अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद् गुणव्यतिकरो निरुपाधिकश्च ॥ ७ ॥

सत्यधर्मीया — तत्तत्पदार्थस्य भगवद्रूपाणां मूलरूपस्य च न भेद इति सदृष्टान्तमाचष्टे ॥ एक इति । सदसद्द्वयं मूर्तामूर्त्तद्वयं तदन्तस्थस्तच्छब्दवाच्यश्च त्वमेक एव । अद्वयं समोत्तमरहितः । स्वर्णं कृतं कुण्डलाद्यात्मकम् । अकृतं मूलसुवर्णं च यथैकं सुवर्णं तदिति वस्तुभेदो न हीह सुवर्णे तथा त्वमभिन्नः । कुतो नास्तीत्यतस्तत्र हेतुमप्यनेनाह ॥ वस्तुभेदो नेति । अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्वित्यादेः । शक्तं त्वत्तोऽन्यन्नास्तीति त्वमेक इत्यर्थः । भेदो न शास्त्रावेदितः किं तूत्प्रेक्षामूल इत्यप्याह ॥ नव इति । भेदो नवो नूतनः । तुनानन्द आनन्दीति व्यवहारः किंकृत इति

शङ्काशामकविशेषं सूचयति । एवं कुतस्ते जना जानत इत्यत आह ।। अज्ञानतो मिथ्याज्ञानाज्जनैः पामरैर्विकल्पो भेदस्त्वयि विहितः । पूर्वयोजनायाम् । यस्माद्गुणव्यतिकरो गुणानां व्यतिकरो मिश्रणं येन स तथा । तत्तत्प्रेरके तत्र तत्र विलक्षणे कार्योपलब्धिरेव विद्यमानाभेदानुपलब्धिहेतुरित्यर्थः । मास्तु वस्तुतो भेदः स्यादौपाधिक इत्यत आह ।। निरुपाधिक इति । उपाधिशून्य इति तत्कृतभेदशून्य इत्यर्थः । योजनान्तरे यस्माद्गुणव्यतिकरो नानाविधगुणकार्यसङ्कमस्तस्मात्स भेदो नवः कल्पित इति यावत् । निरुपाधिक उपाधिरहितो यतस्तस्माच्चैवं कल्पः कल्पनं स विगतो यस्मिन्सः । जनोलोके महर्लोकात्परे लोके च पामर इति विश्वः । सदसत् । अर्थः पूर्वकः द्वयं सद्वितीयम् । कटकमुकुटादिरूपान्तरसहितम् । अद्वयं पुनस्तत्त्वसम्पादन इति कृताकृतमित्यन्वयो वा । एवमीहते नैव वस्तुभेदः । नानाचेष्टाया कार्यरूपिण्या वस्तुभेद इति वा । अतो विकल्पः कल्पनानर्ह इति वा । तेषां जनानां कल्पकानामयं विकल्पो विहितः । विगतं हितं यस्मात्स तथा तेषां तम आदिकं प्रापय्याहितदायीत्यर्थः । यद्यपि नानन्दमात्रमित्युक्त्युपरि न सोपाधिकत्वशङ्का सम्भवति तथाऽपि मात्रशब्दस्य लेशाद्यर्थकत्वं लेशशेमुषिः कश्चिदभ्युपेत्य शङ्केत नास्य तदर्थकता किं त्वानन्दात्मकतार्थत्वमिति विवरितुं निरुपाधिकश्चेत्युक्तमिति मन्तव्यम् । नानामता नानाविधं माधवं वदन्ति परन्तु न भेदस्तवेति भावः ।। ७ ।।

छलारी — इदानीं तत्तत्पदार्थगतभगवद्रूपाणां वस्तुगत्या भगवद्रूपस्याभेददृष्टान्ते- नोपपादयति ।। एक इति । यथा कुण्डलाद्यात्मना कृतं प्रकृत्यात्मना त्वकृतं च स्वर्णमेकमेवेह कृताकृतयोः सुवर्णयोर्वस्तुतो भेदो नास्ति । तथा सदसद्द्वयं कार्यकारणरूपद्वयं सदादि वस्तुषु स्थित्वा तत्तत्स्वभावप्रवर्तकत्वेन सदादिशब्दवाच्यम् । अद्वयं समाधिकशून्यरूपं त्वमप्येक एव । इह तव रूपद्वये वस्तुभेदो नास्ति । नन्वेकस्यैव हरेर्भेदप्रतीतिः कस्मान्निमित्तादित्यत आह ।। अज्ञानत इति । जनैरज्ञानतस्त्वयि विकल्पो भेदो विहितः कल्पितः । अतो न वस्तुभूत इत्यर्थः । भेदकल्पकं किमित्यत आह ।। यस्मादिति । गुणानां सत्त्वादिगुणानां व्यतिकरः कार्यार्थमिश्रीभावो यस्मात्स तथा । यस्मात्त्वं गुणादीनां मिश्रीकृतत्त्वेन तत्र कार्ये स्थितोऽसि । अतो भिन्नाभिन्नस्थानस्थितत्वमेव भेदकल्पकमिति भावः । ननु स्वतो भेदाभावेप्युपाधिभेदात्सः स्यादित्यत आह ।। निरुपाधिकश्चेति । त्वं तादृशोपाधिशून्यश्चेत्यर्थः । अज्ञानाद्युपाधिसद्भावे तद्भेदात्सोऽस्तीति शङ्कितुं शक्यते । स एव नास्ति । आनन्दमात्रमिति निर्धारितत्वादिति भावः ।। ७ ।।

लिङ्गेरी — ननु सदेव सोम्येदमग्र आसीत् असद्वा इदमग्र आसीत् न सत्तन्नासदुच्यते इत्यादिषु सदसदादिविलक्षणवस्तुवाचकशब्दाभिधेयस्य कथमनन्यत्वं घटत इत्यतो दृष्टान्तमुखेन तदुपपादयति । यथा कटकमुकुटाद्यात्मना कृतं तदुपादानरूपेणाकृतं स्वर्णमेकमेव, इह सुवर्णवस्तुनि भेदो नास्ति तथा कार्यकारणरूपसदादिशब्दवाच्येषु महत्प्रधानादिषु तत्तत्प्रेरणाय स्थितस्य सदादिशब्दवाच्यस्य तवापि भेदो नास्तीत्याह ।। सदसद्द्वयमद्वयं च त्वमेक एवेति । एवं सत्यपि यतस्त्वं गुणानां व्यतिकरः कार्यार्थसमवायविशेषहेतुस्तत्तत्कार्यप्रवर्तकत्वेन तत्र तत्र स्थितोऽतो जनैरज्ञैरज्ञानतः "एकमेवाद्वितीयम् । न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीति च । सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यादित्यादिश्रुत्यर्थापरिज्ञानात् । त्वयि विकल्पो भेदो विहितः कल्पितः । ननु स्वाभाविकभेदस्य भगवद्रूपादावभावेऽपि सोपाधिकभेदः किं न स्यादित्याशङ्कानिरासायाह ।। त्वं निरुपाधिकश्चेति । युक्तं चैतन्निरुपाधिकत्वमानन्दमात्रस्येति व्युत्पादनानपेक्षा ।। ७ ।।

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेक
एके परं सदसतोः पुरुषं परेशम् ।
अन्ये वदन्ति नवशक्तियुतं परं त्वां
केचिन्महापुरुषमव्ययमात्मतन्त्रम् ।। ८ ।।

सत्यधर्मीया — स्तौति ।। त्वामिति । केचिद्वेदान्तिनोऽवयंत्यवगच्छन्ति । एके स्मृतिपथगामिन एके पौराणिकाः परेशं सदसतोः परं पुरुषम् । अनेन नैतत्पूर्वपद्ये सदसदिति तादात्म्यविवक्षयोक्तिः किन्तु तात्स्थ्यादिति विवृतं भवति । अन्ये पाञ्चरात्रिका मान्त्रिका वा नवशक्तियुतं विमलादिनवशक्तिमन्तम् । केचिदेकान्तभक्ता आत्मतन्त्रं स्वतन्त्रम् । अव्ययं नाशरहितं परमत्यन्तं महापुरुषं वदन्तीत्यन्वयः । परमिति पूर्वान्वयि वा ।। ८ ।।

छलारी — त्वमेक एव नानामतविषयोऽसीत्यत आह ।। त्वामिति । केचिद्वेदान्तिनो ब्रह्मेत्यवयन्ति मन्यन्ते । एके मीमांसकास्त्वां धर्मं मन्यन्ते । एके सांख्याः परेशं त्वां सदसतोः प्रकृतिपुरुषयोः सकाशात्परं विलक्षणं पुरुषमवयन्ति । अन्ये पाञ्चरात्रिकास्त्वां नवशक्तियुक्तं विमलोत्कर्षणीज्ञानेत्यादिनवशक्तिभिः स्वरूपभूताभिर्युतं परं पुरुषमवयन्ति । केचित्पातंजला एकान्तिनो वा त्वमेवाव्यमात्मतन्त्रं महापुरुषं मन्यन्ते ।। ८ ।।

लिङ्गेरी — ननु केचिद्ब्रह्मैव जगत्कारणं स्वतन्त्रमित्याहुः । केचित्कर्मादिकमाहुः । कथमत्र निर्णयः इत्याशङ्क्य तत्तन्मतेषु तत्तच्छब्दप्रतिपाद्यस्त्वमेवेति निर्णयोपपत्तिरित्याह ।। त्वां ब्रह्मेति । केचिद्वेदान्तिनस्त्वां ब्रह्मेत्यवयन्ति जानन्ति । एके मीमांसका धर्ममवगच्छन्ति । एके पौराणिकाः परेशं त्वां सदसतः परं पुरुषमवगच्छन्ति । अन्ये पाञ्चरात्रिकास्त्वां ''विमलोत्कर्षणी ज्ञानाक्रियायोगा तथैव च । प्रव्हीसत्यातथेशानानुग्रहेति'' नवशक्तियुतं परं वदन्ति । केचिदेकान्तिनोऽव्ययं चतुर्विधनाशरहितमात्मतन्त्रं स्वसत्ताप्रतीतिप्रवृत्तिषु परानपेक्षं महापुरुषं वदन्ति ।। ८ ।।

नाहं परायुर्ऋषयो न मरीचिमुख्या
जानन्ति यद्विरचितं खलु सत्वसर्गाः ।
यन्मायया मुषितचेतस ईश दैत्य-
मर्त्यादयः किमुत शश्वदभद्रवृत्ताः ।। ९ ।।

सत्यधर्मीया — तेषां तेषां सामान्यज्ञानं तदितरेषां च ज्ञानदारिद्यं कैमुत्येनाह ।। नेति । पुरःस्थितेः पुरहरः स्वयं पुरस्करोति ।। अहमिति । सत्त्वसर्गाः सात्त्विकप्रकृतयः खल्वपि यन्मायया यस्य तव शक्त्या मुषितमपहृतम् । मुषितं खण्डिते हृत इति विश्वः । चेतो मनो येषां ते तथा सन्तः । हे ईश । यद्विरचितं भवत्कृतम् । अहं न जानामि । परमायुस्तन्नामकं यस्य स ब्रह्मा । मरीचिर्मुख्यो येषां ते ऋषयो न जानन्ति । दैत्यमर्त्यादयः । शश्वदभद्रव्रताः शाश्वतिकाभद्राचारा न जानन्तीति किमु वक्तव्यमित्यर्थः । एके साङ्ख्या मान्त्रिका एके । नवभिरेव शक्तिभिर्युतम् । केचिदयमेको महापुरुष इति वदन्ति केऽपि । किमनुसृत्यैवं वचनमित्यत आह ।। आत्मतन्त्रमिति । आभिरुत्प्रेक्षितं तन्त्रं सिद्धान्तं परं वदन्तीति तात्पर्यम् । एतेषां तामसानां ज्ञानदारिद्यं कैमुत्येनाह ।। नाहमिति वा । किमुत शश्वदभद्रवृत्ता इति स्वारस्यात् ।। ९ ।।

छलारी — नानामतिविषयत्वे निमित्तमाह ।। नाहमिति । अहं रुद्रः परायुः परनामकमायुर्यस्य स ब्रह्मा । मरीचिमुख्या ऋषयः सत्त्वसर्गाः सत्त्वगुणेन सृष्टा अपि । सात्त्विकस्वभाववन्तोऽपीति यावत् । यद्विरचितं येन त्वया विरचितं व्यापारं न जानन्ति खलु सम्यक् न जानन्ति । कुतः । यन्मायया यस्य तव मायया मोहकशक्त्या मुषितानि पिहितानि चेतांसि येषां ते तन्मायया प्रतिबद्धमनस्का इति भावः । हे ईश्वर । शश्वत्सर्वदाऽभद्रं राजसतामसवृत्तं स्वभावो येषां ते तथा । दैत्यमर्त्यादयस्त्वां न जानन्तीति किमु वक्तव्यम् । तस्मात्तव नानामतिविषयत्वं युक्तमिति भावः ।।९।।

लिङ्गेरी — ननु तवापि मम समत्वाभिमाने कथमियं स्तुतिर्घटत इत्यतस्तदभावं व्यनक्ति ।। नाहमिति । हे परेश । यस्य तव माययेच्छया मुषितानि तत्त्वज्ञानादपहृतानि चेतांस्यन्तःकरणानि येषां तेऽहं रुद्रः परायुश्चतुर्मुखो मरीचिमुख्या ऋषयो यद्विरचितं न जानन्ति । सत्त्वगुणादुत्पत्त्यभावात्तदज्ञानं किं न स्यादित्यत आह ।। सत्त्वसर्गा अपीति । शश्वदेकप्रकारेणाभद्राऽमङ्गला वृत्तिः प्रवृत्तिर्येषां ते दैत्यमर्त्यादयो यस्य तव विरचितं न जानन्तीति किमु वक्तव्यमिति । अनेन पौण्ड्रकवासुदेवभास्करादिमतप्रसक्तमावयोः साम्यमसदित्युक्तं भवति ।। ९ ।।

स त्वं समीहसि ततः स्थितिजन्मनाशान्
भूतेहितं च जगतो ह्यपिबन्धमोक्षौ ।
वायुर्यथा विशति खं च चराचराख्यं
सर्वं त्वदात्मकतयाऽवगमो नुतिस्ते ।। १० ।।

सत्यधर्मीया — न नानात्वं मतानां मम सम्मतमित्याह ।। स इति । योऽस्मदाद्यविज्ञातरचितः स त्वम् । यतो जगतः स्थितिजन्मनाशान् बंधमोक्षौ च भूतं प्रभूतमीहितमपेक्षितं च । प्रजानामव्यवस्थित्येहितप्रभूततेति ज्ञेयम् । भूतानां पञ्चानामीहितम् । एतत्कार्यानुकूले । न पञ्चीकरणत्रिवृत्करणत्वादिकं च समीहसि समीहसे करोषीति यावत् । तर्हि तत्र तत्र प्रवर्तकतया स्थितस्य कर्तुश्च लौकिककर्तृवत्सङ्गोऽस्ति किमित्यतो नास्तीति सदृष्टान्तमाचष्टे ।। वायुरिति । चराचराख्यम् । खमवकाशं यथाऽसङ्गः सन्विशति तथा विशसि । ततः सर्वं त्वम् । सर्वं समाप्नोषीत्यादेः । न तु तदात्मकत्वात् । एवं त्वदात्मकतया सर्वस्यावगमो ज्ञानं ते तव नुतिः स्तवनम् । पूर्वोक्तसर्वाकारस्त्वमिति तत्त्वम् । खं ब्रह्म सर्वमिति वाऽन्वयः । तदात्मकतयेति सरलः पाठः ।। १० ।।

छलारी — इदानीं सर्वजगज्जन्मादिकारणत्वाच्च त्वमेव सर्वोत्तम इत्याशयेनाह ।। स इति । ब्रह्मादिभिरपि साकल्येनाज्ञेयमहिमा । त्वमेव जगतः स्थितिजन्मनाशान् भूतानामीहितमभीष्टं च मोक्षबन्धावपि समीहसि करोषि । यथा वायुः खमाकाशं च चराचराख्यं सर्वं विशति व्याप्नोति, तथा त्वं सर्वं सृष्टं जगत्तदात्मकतया तस्य जगत आत्मकतया नियामकतया व्याप्नोषि । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । वायुवत्प्रवेशोक्त्या तद्वदेव जगद्गतदोषासंगो भवतो ज्ञापितो भवति । अज्ञानिनो जगत्सृष्ट्याद्ययोगादाहुः ।। अवगम इति । अवगच्छति जानाति सर्वमित्यवगमः सर्वज्ञ इत्यर्थः ।। १० ।।

लिङ्गेरी — यत एवमावयोरत्यन्तभेदस्ततस्त्वमेव जगतः स्थितिजन्मनाशान् सर्वेषां भूतानां हितमपेक्षितं च, चेतनजगतो बन्धमोक्षावपि करोषि । यतस्त्वं वायुर्यथा खमाकाशं विशति तथा चराचराख्यं जगत्तदात्मकतया तत्प्रेरकतया विशसि । तत्सृष्ट्वा तदेवानुप्राविशदित्यादेः । एवं तत्तत्प्रेरणाय तत्तत्प्रविष्टतया तत्तदुपजीव्यतया त्वम् । सर्वं खल्विदं ब्रह्म । पुरुष एवेदं सर्वं तद्विश्वमुपजीवति । सर्वं समाप्नोषि ततोऽसि सर्व इत्याद्यवगमयतीत्यवगमः आगमः । आगमस्ते नुतिर्गुणोत्कर्षख्यापनसमर्थो नाहमिति स्तुत्युपसंहारः ॥ १० ॥

अवतारा मया दृष्टा रममाणस्य ते गुणैः ।
सोऽहं तद् द्रष्टुमिच्छामि यत् ते योषिद्वपुर्धृतम् ॥ ११ ॥

सत्यधर्मीया — यदर्थमत्यर्थमर्थता भवैतावता भवता कृता तावद्वदेत्यतो वक्ति ॥ अवतारा इति । गुणै रममाणस्य तेऽवतारा मया दृष्टाः । ते त्वया यद्योषिद्वपुर्धृतं तद्द्रष्टुम् । स बह्ववतार-द्रष्टाऽहमिच्छामि ॥ ११ ॥

छलारी — एवं स्तुत्वा प्रस्तुतं विज्ञापयति ॥ सोऽहमिति । ते त्वया धृतं यद्योषिद्वपुः स्त्रीरूपं तत्सोऽहं बव्हवतारदृष्टोऽप्यहं द्रष्टुमिच्छामि । स्त्रीरूपस्य कदाऽप्यदृष्टत्वात् ॥ ११ ॥

लिङ्गेरी — एवं हरो हरिं स्तुत्वा स्वापेक्षितं विज्ञापयति । हे हरे । स्वेच्छया रममाणस्य गुणैः पूर्णास्तेऽवतारा नारायिण्यन्या मया दृष्टाः सोऽहं ते त्वया यद्योषितः वपुः शरीरं धृतं तद्द्रष्टुमिच्छामि ॥ ११ ॥

येन सम्मोहिता दैत्याः पायिताश्चामृतं सुराः ।
तद् दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १२ ॥

सत्यधर्मीया — अवलोकनकौतुककारणमीरयति ॥ येनेति । मुख्यत्वादिच्छामीत्येकवचनम् । नो दिदृक्षव इत्यादि बहुवचनं च सतीभूतगणादिसाहित्येन संभवतः ॥ १२ ॥

छलारी — तत्र किं माहात्म्यमस्ति येन तद्दर्शनाशक्यं तवाभूदित्यत आह ॥ येनेति । येन स्त्रीरूपेण दैत्यमोहकातिसौन्दर्यं तत्रास्तीति तद्रूपं दिदृक्षवो वयमायाता हि यस्मान्नः परं कौतूहलम-त्यन्तमुत्कटम् ॥ १२ ॥

लिङ्गेरी — तद्दर्शने स्वस्यान्तःकरणौत्कण्ठ्यमाह । येन स्त्रीशरीरेण दैत्याः संमोहिताः सुरा अमृतं पायिता वयं तद्दिदृक्षव आयातास्तद्दर्शने नोऽस्माकं परं केवलं कौतूहलं कदा द्रक्ष्यामीति बुद्धिः ॥ १२ ॥

श्रीशुक उवाच–

एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना ।
प्रहस्य भावगम्भीरं गिरिशं प्रत्यभाषत ॥ १३ ॥

सत्यधर्मीया — भावगम्भीरं यथा तथा ॥ १३ ॥

छलारी — भावेनाभिप्रायेण गम्भीरं गम्भीरतरं वचनम् ॥ १३ ॥

लिङ्गेरी — एवं भगवान्विष्णुः शूलपाणिना रुद्रेण प्रार्थितः सन् गिरिशं प्रत्यभिप्रायेण गम्भीरं यथा तथाऽभाषत ॥ १३ ॥

श्रीभगवानुवाच–

कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ।
पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १४ ॥

सत्यधर्मीया — गते हृते सति ॥ १४ ॥

छलारी — पीयूषभाजनेऽमृतकलशे गते दैत्यैरपहृते सति सुरकार्याणि योषिद्वेषेण भविष्यन्तीति पश्यता जानता मया दैत्यानां कौतूहलाय कौतुकजननद्वारा बुद्धिभ्रंशाय योषिद्वेषः कृतः स्वीकृतः ॥ अयं भावः ॥ अवश्यं तावदमृतायोग्यान्दैत्यान्वञ्चयित्वा देवेभ्योऽमृतं देयम् । न चैवं वैषम्यम् । योषिद्विना रूपान्तरेण कर्तुमनुचितं भवति । अतो वञ्चनमोहनादिसारं कामिनीरूपं मया धृतमिति ॥ ॥ १४ ॥

लिङ्गेरी — हे रुद्र । दैत्यानां कौतूहलायाश्चर्यबुद्धिजननाय पीयूषस्यामृतस्य भाजने पात्रे दैत्यहस्तं गते सति देवकार्याणि संपाद्यानीति पश्यता बुद्धिमता मया योषिद्वेषः कृतः । पीयूषममृतं सुधा । भाजनं पात्रमित्यभिधानम् ॥ १४ ॥

तत् तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ।
तत्कामिनां च मन्तव्यं सङ्कल्पप्रभवोदयम् ॥ १५ ॥

सत्यधर्मीया — सङ्कल्पान्मनसः प्रभवतीति स मन्मथस्तस्योदयो येन तत् । अनेन मोहितानां स्वशत्रूच्छ्रयश्रवणेऽपि न स गच्छतीति तन्मोहमहिमानं ध्वनयति । तत्कामिनां ततत्वात्तदहं तस्य कामो येषामस्तीति ते निष्कामास्तेषामपि मन्तव्यं तत्त्वेन ज्ञातव्यम् । चेन च कामिनां कामुकानां किम्विति कैमुत्यं सूचयति । कामिनां मन्तव्यं गतम् ॥ १५ ॥

छलारी — संकल्पप्रभवस्य कामस्योदय उद्रेको यस्माद्वपुषः । तत्संकल्पप्रभवान्कामानित्युक्तेः । कामिनां बहुमन्तव्यं बहुमाननीयम् ॥ १५ ॥

लिङ्गेरी — हे सुराणामिन्द्रादीनां सत्तमात्युत्तम रुद्र । तद्रूपं दृष्टुमिच्छतस्तव दर्शयिष्यामि । तद्रूपं कामुकानां संकल्पप्रभवस्य कामस्योदय उत्पत्तिर्यस्मात्तथा मन्तव्यम् । कामार्त्तिमतामपि कामजनकं ज्ञेयमित्यर्थः ॥ १५ ॥

श्रीशुक उवाच–

इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत ।
सर्वतश्चारयंश्चक्षुर्भव आस्त सहोमया ॥ १६ ॥

सत्यधर्मीया — सर्वतः सर्वत्र । एकस्मिन्नेव देवविलोकनकार्ये त्रयाणामपि लोचनानां व्यापरणाच्चक्षुरित्येकवचनम् । आस्तेति पाठः सरसः । आस्त इति पाठे य आस्ते स ददर्शेत्युत्त-रेणान्वयः ॥ १६ ॥

छलारी — सर्वतो दिक्षु चक्षुश्चारयन् संचारयन् । पश्यन्निति यावत् ॥ १६ ॥

लिङ्गेरी — भगवान् विष्णुरिति रुद्रं प्रति वदन्नेवादृश्योऽभूत् । तदा भवो रुद्र उमया सह सर्वासु दिक्षु स्वनेत्रं प्रचारयन्नास्ते ॥ १६ ॥

ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ।
विक्रीडतीं कन्दुकलीलया लसन्नितम्बपर्यस्तदुकूलमेखलाम् ॥ १७ ॥

सत्यधर्मीया — विचित्रपुष्पारुणपल्लवद्रुमे विचित्राणि पुष्पाण्यरुणाः पल्लवाः येषु ते च द्रुमा यस्मिंस्तस्मिन्नुपवने प्राक्तने वा तदानीमेव सृष्टे वाऽऽरामे । नितंबे जघने लसती पर्यस्ते प्रावृते साक्षात्परंपरया दुकूलं च वस्त्रं च मेखला काञ्ची च यस्याः सा ताम् । कन्दुकलीलया कन्दुकस्य । गेन्दुकः कन्दुक इत्यमरः । लीला शृङ्गारभावप्रदर्शनंक्रियया । लीलां विदुः कालिविलासखेला शृङ्गारभावप्रभवक्रियास्विति विश्वः । विक्रीडतीं विक्रीडन्तीं खेलन्तीम् ॥ १७ ॥

छलारी — विचित्रपुष्पाण्यरुणपल्लवाश्च येषां द्रुमाणां ते तादृशा द्रुमा यस्मिंस्तस्मिन्नुपवने कन्दुकस्य लीलया क्रीडया विक्रीडन्तीम् । लसद्दुकूलेन पर्यस्ते परिवृते नितम्बे मेखला काञ्ची यस्यास्ताम् ॥ १७ ॥

लिङ्गेरी — ततो रुद्रो विचित्राणि पुष्पाण्यरुणाः पल्लवाः किसलया येषु तैर्द्रुमैर्युक्ते समीपस्थवने कन्दुकक्रीडां कुर्वन्तीं लसत्प्रकाशमाने नितम्बे कटिप्रदेशे पर्यस्ते क्षिप्ते दुकूलमेखले परिधानीयवस्त्रकांच्यौ यस्यास्तां स्त्रियं ददर्श ॥ १७ ॥

आवर्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैः पदे पदे ।
प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥ १८ ॥

सत्यधर्मीया — आवर्तनं मण्डलाकारभ्रमणम् । उद्वर्तनं चोपरि प्रसर्पणं ताभ्यां कंपिताश्चलन्तः स्तनयोर्ये हारास्तत्सबन्धिमुक्तास्रजस्तेषाम् । उर्वोरुत्सङ्गयोर्भरैः स्तनेषु प्रकृष्टौ तयोः स्तनौ तौ प्रकृष्टौ च । विशेषणपरनिपातो वा । हाराणां च भरैरिति वा । कंपितत्वं च स्तनयोर्लावण्यतारुण्यरसाभासमिति हारान्वितं शोभत इति ज्ञेयम् । यथा हि रुग्मिणीशविजये । ''विविच्य सर्वाङ्गविचारकाले तयोः समन्ताद्धटना किलासीत् । सुपीनदेवीस्तनमध्यदेशे सुदुर्लभा सा परमच्युतस्ये''त्यादेः । चलस्तनीमित्याद्युक्तेस्तद्व्यामोहनाय कंपितताप्रदर्शनमिति तत्स्तनान्वयि वा ज्ञेयम् । मध्यतो मध्ये प्रभज्यमानामिव । तृटय्यन्मध्यप्रदेशामिव विद्यमानाम् । चलत्प्रवालवद्विद्यमानं पदं पादं ततस्ततो नयन्ती । प्रवालो वल्लकी दण्डे विद्रुमे नवपल्लव इति विश्वात्तन्त्रन्यायेन म्रदिमानं रक्तिमानं न्यगदत्पदयोः प्रवालपदमिति ज्ञेयम् ॥ १८ ॥

छलारी — उत्पततोऽधःपततः कन्दुकस्य लीलावशेन यदावर्तनमर्वाग्गमनम् । उद्वर्तनमुन्नमनं ताभ्यां कम्पितयोः स्तनयोः । प्रकृष्टानामनर्घ्याणां हाराणां चोरुभरैः पदे पदे प्रतिपादविक्षेपं मध्यतो मध्ये भज्यमानामिव दृश्यमानं चलत्पदमेव प्रवाळं पल्लववत्कोमलं चरणं ततस्ततस्तत्र तत्र नयन्तीं प्रचालयन्तीम् ॥ १८ ॥

लिङ्गेरी — आवर्तनोद्वर्तनाभ्यामधोर्ध्वप्रदेशं ताभ्यां कम्पिताश्चलिता, स्तनौ तत्कांत्यादिगुणैः प्रकृष्टहारश्चेत्येतेषामुत्कृष्टभारैः पदे पदे प्रतिपादविक्षेपे मध्यतः कटिप्रदेशे विभज्यमानामिव स्थितां गमनेन चलत्पादपल्लवां ततस्ततस्तत्प्रदेशं नयतीं प्रापयन्तीम् ॥ १८ ॥

दिक्षु भ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ।
स्वकर्णविभ्राजितलोलकुण्डलोल्लसत्कपोलालकमण्डिताननाम् ॥ १९ ॥

सत्यधर्मीया — भ्रमतः कन्दुकस्य चापलैर्भृशं यथा तथा प्रोद्विग्ने भीते च ते तारे च ते आयते चायततारेऽक्षिमध्ये । ऋक्षाक्षिमध्ययोस्तारेति विश्वः । ताभ्यां लोले लोचने यस्याः सा ताम् । प्रोद्विग्नेऽत्यायतेति चेति लोचनविशेषणं वा । स्वस्य कर्णयोर्विभ्राजिते लोले वचे कुण्डले च ताभ्यां लसन्तौ च तौ कपोलौ च ताभ्याम् । अलकैश्चूर्णकन्तुलैश्च मण्डितमाननं यस्याः सा ताम् ॥ १९ ॥

लिङ्गेरी — दिक्षु भ्रमतश्चरतः कन्दुकस्य चापलैरितस्ततो गमनरूपचञ्चलधर्मैः प्रोद्विग्ने चञ्चले तारे कनीनिके ययोस्ते च, आयते विस्तृते च लोले चञ्चले कन्दुकग्रहणतृष्णासहिते च लोचने नेत्रे यस्यास्ताम् । स्वकर्णयोर्विभ्राजितेऽतिप्रकाशिते च ये कुण्डले कर्णाभरणे ताभ्यामुल्लसन्तौ प्रकाशमानौ गण्डस्थलावलकाश्चूर्णकुन्तलाश्च तैर्मण्डितमलङ्कृतमाननं मुखं यस्यास्ताम् । लोलश्चंचलतृष्णयोरिति नानार्थमुक्तावली ॥ १९ ॥

श्लथदुकूलां कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ।
विनिघ्नतीमन्यकरेण कन्दुकं विमोहयन्तीं जगदात्ममायया ॥ २० ॥

सत्यधर्मीयां — श्लथत्किञ्चिद्गलद्दुकूलं यस्याः सा ताम् । विच्युतां कबरीकेशपाशं जानपादेति ङीष् । सन्नह्यतीं बध्नन्तीं वामकरेण । अन्येन करेण कन्दुकं विनिघ्नन्तीम् । वल्गुनेति करद्विकान्वयि । आत्ममायया सहजशक्त्या । जगन्विमोहयन्तीम् । जगदन्तर्गतोऽयमेकः किं पादार्थ इति भावः ॥२०॥

छलारी — श्लथदुकूलां नितम्बाद्विभ्रंशत्सूक्ष्मवस्त्रां विच्युतां मुक्तग्रन्थिं कबरीं केशभारं च वल्गुना सुन्दरेण वामकरेण सन्नह्यन्ती बध्नन्तीं, सव्यकरेण दक्षिणहस्तेन कन्दुकं विनिघ्नन्तीं भूमौ पातयन्तीमात्ममायया स्वरूपशोभावैचित्र्येण जगद्विमोहयन्तीम् ॥ २० ॥

लिङ्गेरी — श्लथत्कटिप्रदेशाच्च्यवद्दूकूलं यस्यास्तां, विच्युतां कलितग्रन्थिं कबरीं बन्धितकेशसमूहं वल्गुना मनोहरेण वामकरेण सन्नह्यतीं केशान्मेलयित्वा बध्नन्तीमन्येन दक्षिणकरेण कन्दुकं विनिघ्नतीं ताडयन्तीमात्ममायया स्वकीयमोहनशक्त्या जगद्विमोहयन्तीं भ्रामयन्तीम् ॥ २० ॥

तां वीक्ष्य देव इति कन्दुकलीलयैष
व्रीडास्फुटस्मितविसृष्टकटाक्षमूढः ।
स्त्रीप्रेक्षणप्रतिसमीक्षणनिर्वृतात्मा
नात्मानमन्तिक उमां स्वगणांश्च वेद ॥ २१ ॥

सत्यधर्मीया — तां वीक्ष्य स्थितः । एष देवो वामदेवः । कन्दुकलीलया सहिता व्रीडा लज्जा तया सहितं स्मितमीषद्धसितं तेन सहितः स्फुटविसृष्टो दृढनिपातितो यः कटाक्षो नेत्रप्रान्तभागस्तेन मूढः । स्त्रियाः प्रेक्षणम् । तत्कर्तृकं स्वकर्मकं निरीक्षणं प्रतिसमीक्षणं स्वकर्तृकं तत्कर्मकं च ताभ्यां निर्वृतः सुखित आत्मा मनो यस्य स तथा सन् । आत्मानं स्वम् । अन्तिके विद्यमानामुमां चाद्विद्यमानान्स्वगणान्पार्षदान्न वेद । मौढ्योपपादकोऽयं ग्रन्थः ॥ २१ ॥

छलारी — तां स्त्रियं वीक्ष्य रुद्र आत्मानं स्वमन्तिके स्थितामुमां स्वभार्यां च स्वगणान्स्वभृत्यगणान्न वेद नापश्यत् । कथं भूत इति । एवं भूतया कन्दुकलीलयेषद्व्रीडा किञ्चिल्लज्जा तया स्फुटं स्मितं तेन सह स्वस्मिन्विसृष्टो यः कटाक्षोऽपांगदर्शनं तेन मुष्टो वञ्चितः । मूढ इति पाठे मोहित इत्यर्थः । अत एव स्वयं स्त्रियः प्रेक्षणं तया च प्रतिसमीक्षणं स्वदर्शनं च रुद्रस्तां पश्यति । सा च रुद्रं पश्यतीत्यर्थः । एवं समदर्शनाभ्यां विह्वलश्चञ्चल आत्मा मनो यस्य सः । निर्वृतात्मेति पाठे निर्वृत आल्हादित आत्मा यस्य स इत्यर्थः ॥ २१ ॥

लिङ्गेरी — देवो रुद्रस्तां वीक्ष्य इत्युक्तप्रकारकन्दुकलीलया ईषदल्पा व्रीडा लज्जा तत्सहितं यस्मिन्सः मन्दहासः, स्फुटमतिस्पष्टं विसृष्टो यः कटाक्षो नेत्रान्तावलोकनं तेन मूढो विवेकरहितो भ्रान्तश्च सन् । स्वकर्तृकं स्त्रीकर्मकं यत्प्रेक्षणं यच्च स्त्रीकर्तृकं स्वकर्मकं प्रतिसमीक्षणमवलोकनं ताभ्यां निर्वृतः सन्तोषातिशयवानात्माऽन्तःकरणं यस्य स तथा सन् आत्मानं स्वमन्तिके स्थितां पार्वतीं स्वगणांश्च न वेद । स्वात्माद्यनुसन्धानरहितोऽभूत् । किञ्चिदीषन्मनागल्पे । ऱ्हीस्त्रपा व्रीडेति चामरः ॥ २१ ॥

तस्याः कराग्रात् स तु कन्दुको यदा गतो विदूरं तमनुव्रजन्त्याः ।
वासः ससूत्रं लघु मारुतोऽहरद् भवस्य देवस्य किलानुपश्यतः ॥ २२ ॥

सत्यधर्मीया — तं कन्दुकं ससूत्रं सकाञ्चि लघु सूक्ष्मं वासो वस्त्रम् । देवस्य भवस्य पश्यतः सतो मारुतो वातोऽहरत् । लघुमारुत इति समस्तं वा । लघुश्चासौ मारुतश्च । अनेन लाघवमनिले

उक्तम् । वस्त्रे तद्धृते चातिलाघवमर्पयतीति ततोऽपि श्लाघ्योऽयमर्थः । किल सत्यम् । किल स्यात्सत्यनृत्ययोरिति विश्वः । एवमार्यैरुक्ता किल वार्तेति वा । किलशब्दस्तु वार्तायामिति तत्रैवोक्तेः ॥ २२ ॥

छलारी — तं कन्दुकमनुव्रजन्त्याः स्त्रियः लघु सूक्ष्मवासः परिधानं वस्त्रं ससूत्रं काञ्च्या सहितमहरदपाहरत् । भवस्यानुपश्यतः सतः ॥ २२ ॥

लिङ्गेरी — तस्या उक्तगुणनारायण्याः कराग्रात्सः कन्दुको यदा दूरं गतो रुद्रस्तं कन्दुकमनुगच्छन्त्या लघु सूक्ष्मं कटिसूत्रसहितं वस्त्रं महादेवस्य पश्यतः सतो मारुतोऽहरत् । सा नग्नाऽभूत् ॥ २२ ॥

एवं तां रुचिरापाङ्गीं दर्शनीयां मनोरमाम् ।
दृष्ट्वा तस्यां मनश्चक्रे विलज्जन्त्यां भवः किल ॥ २३ ॥

सत्यधर्मीया — दर्शनीयां स्वेनावलोकनीयामेव न तु स्पृश्या । मनोहरां मनोरमां दृष्ट्वा भवो मनस्तस्यां चक्रे । किल भगवन्मायाया भवभ्रमः सम्भावित इत्यर्थः । यद्वा यो भवो मनश्चक्रे सव्यापारं कृतवानिति चक्र इत्युच्यते सोऽपि तदभिमान्यपि अरमां रमेतरां दर्शनीयां मनोरमां रुचिरापाङ्गीं तां दृष्ट्वा तस्यां मनश्चक्र इति वाऽन्वयः । मनोनियामकस्याप्येवं चेत्का कथेतरेषामिति भावः । विलज्जन्त्यां विषज्जन्त्यां हस्तविन्यस्तामिव सम्बध्नन्त्याम् ॥ २३ ॥

छलारी — रुचिरोऽपांगः कटाक्षाक्षेपणं यस्यास्ताम् । दर्शनीयां द्रष्टुं योग्यामत एव मनोरमाम् ॥ ॥ २३ ॥

लिङ्गेरी — भवो रुद्रो, रुचिरो मनोहरोऽपांगः कटाक्षो यस्यास्तां, सौन्दर्यातिशयेन दर्शनीयामवश्यं द्रष्टव्यामत एव मनो रमयति सुखयतीति मनोरमा तामेवमुक्तरीत्या दृष्ट्वा विशेषाकारेण लज्जां कुर्वत्यां तस्यां मनश्चक्रे ॥ २३ ॥

तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः ।
भवान्या अपि पश्यन्त्या गतह्रीस्तत्पदं ययौ ॥ २४ ॥

सत्यधर्मीया — अपहृतं विज्ञानं स्वस्वभार्यापार्षदाज्ञानं यस्य सः । तत्कृतस्तदुज्जृम्भितो यो स्मरस्तेन विव्हलश्चञ्चलीकृतो भवान्याः पश्यन्त्याः सत्या अपि । अनेन नैर्लज्ज्यं परवशता च

शिवस्यापारमपादेति द्योत्यते । भवान्या इत्युपपत्तिः प्रागुपपादिता ज्ञेया । तत्पदं तस्याः पदमनुययौ ॥ २४ ॥

छलारी — तया स्त्रियाऽपहृतं विज्ञानमितरपदार्थज्ञानं यस्य सः तत्कृतेन स्त्रीकृतेन स्मरेण कामेन विह्वलश्चञ्चलस्तत्पदं तस्याः समीपम् ॥ २४ ॥

लिङ्गेरी — तथा तादृश्या नारायण्याऽपहृतं विज्ञानं परदारान्न कांक्षेदित्यादिरूपं यस्य स तथा सन् तन्निमित्तं जातकामेन चञ्चलो भवान्याः पार्वत्याः पश्यन्त्या सत्या अपि लज्जारहितः सन् तत्पदमनुययौ ॥ २४ ॥

सा तमायान्तमालोक्य विवस्त्रा व्रीडिता भृशम् ।
निलीयमाना वृक्षेषु हसन्ती नान्वतिष्ठत ॥ २५ ॥

सत्यधर्मीया — निलीयमाना वृक्षेषु गूहमाना हसन्ती । हे स्थाणोत्रापि स्थाणुमपरं स्पृष्ट्वैव वर्ते त्वं मा मयि रुष्टोभूरिति हास इति भावः । नान्वतिष्ठत अतिष्ठत् ॥ २५ ॥

छलारी — वृक्षेषु निलीयमाना स्वात्मानं गूहयन्ती । नन्वतिष्ठतानुकूला नाभूत् ॥ २५ ॥

लिङ्गेरी — वस्त्ररहिता नारायण्यागच्छन्तं रुद्रं दृष्ट्वा भृशं लज्जितेव वृक्षेषु स्वशरीरमाच्छादयन्ती हसन्ती च सती नान्वतिष्ठत । रुद्रानुकूलाऽसत्येकत्र न तस्थौ ॥ २५ ॥

तामन्वगच्छद् भगवान् भवः प्रव्यथितेन्द्रियः ।
कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २६ ॥

सत्यधर्मीया — करेणुं करिणीम् । प्रव्यथितानीन्द्रियाणि तदलाभप्रयुक्तव्यथा यस्य सः । यूथपो गजः ॥ २६ ॥

छलारी — प्रव्यथितमिन्द्रियं मनो यस्य सः । यूथपो गजेन्द्रः करेणुमिव गजीमिवान्वगच्छत् ॥ ॥ २६ ॥

लिङ्गेरी — कामवशं गतोऽत एव काम्यालाभेन दुःखितान्तःकरणो गजयूथपः करेणुं गजस्त्रियमिव भगवान् ऐश्वर्यादिगुणसंपन्नो भवः कामवशो व्यथितेन्द्रियश्च सन् नारायणीमनुगतवान् । करेणुरिभ्यामित्यमरः ॥ २६ ॥

सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ।
केशबन्ध उपानीय बाहुभ्यां परिषस्वजे ॥ २७ ॥

सत्यधर्मीया — अनिच्छन्तीमनोङ्कुर्वन्तीम् । केशबन्धे गृहीत्वा तां स्त्रियम् । उपानीय स्वसमीपं प्रापय्य बाहुभ्यां परिषष्वजे आलिलिङ्गे ॥ २७ ॥

छलारी — अतिवेगेनानुव्रज्य पृष्ठतोऽनुद्रुत्यानिच्छन्तीं तां स्त्रियं केशबन्धे गृहीत्वोपानीय समीपे आनीय, बाहुभ्यां परिषस्वजे आलिङ्गितवान् ॥ २७ ॥

लिङ्गेरी — स रुद्रोऽतिवेगेनानुगत्वाऽनिच्छतीमिव स्थितां स्त्रियं नारायणीं केशबन्धे कबर्यां गृहीत्वा स्वसमीपं प्रापयित्वा बाहुभ्यामालिलिङ्गे ॥ २७ ॥

सोपगूढा भगवता करिणा करिणी यथा ।
इतस्ततः प्रसर्पन्ती विप्रकीर्णशिरोरुहा ॥ २८ ॥

सत्यधर्मीया — इतस्ततः प्रसर्पन्त्यात्मानं मोचितुम् ॥ २८ ॥

छलारी — भगवता रुद्रेणोपगूढाऽऽलिंगिता प्रसर्पन्ती मोचनार्थमितस्ततश्चलंत्यभूत् । विकीर्णाः प्रसारिताः शिरोरुहाः केशा यस्याः सा ॥ २८ ॥

आत्मानं मोचयित्वाऽङ्ग सुरर्षभभुजान्तरात् ।
प्राद्रवत् सा पृथुश्रोणी माया देवविनिर्मिता ॥ २९ ॥

सत्यधर्मीया — अङ्ग हे राजन्निति शेषः । सुरर्षभो वृषभध्वजः । तस्य भुजयोरन्तरात् । पृथुश्रोण्यपि देवविनिर्मिता मायेति प्राद्रवत् ॥ २९ ॥

छलारी — हे अङ्ग राजन् । सुरर्षभस्य रुद्रस्य भुजमध्यात् पृथुश्रोणी स्थूलनितम्बा देवेन स्वेनैव हरिणा निर्मिता प्रदर्शिता माया जनमोहनकरी सा स्त्री प्राद्रवत् ॥ २९ ॥

लिङ्गेरी — सा नारायणी गजेन गजस्त्रीव भगवता रुद्रेणोपगूढा बाहुभ्यामाच्छादिता तदनन्तरं परस्परं विश्लिष्टकेशा सतीतस्ततः पादप्रसारणं कुर्वती सती पुष्टकट्यधोभागवती देवेन विष्णुना निर्मिता सा माया नारायणीन्द्रादिदेवोत्तमरुद्रभुजमध्यात्स्वां मोचयित्वा द्रुतं जगाम । अंगेति प्रियसंबोधनम् ॥ २९ ॥

तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ।
प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३० ॥

सत्यधर्मीया — कामेन वैरिणा प्राक्तनरिपुणा च विनिर्जितः ॥ ३० ॥

छलारी — तस्य प्राद्रवतः स्त्रीरूपस्य विष्णोः पदवीं मार्गं प्रत्यपद्यतान्वधावत् । वैरिणेव शत्रुणेव । कामेन विनिर्जितः पीडितः सन् ॥ ३० ॥

लिङ्गेरी — रुद्रोऽद्भुतकर्मणस्तस्य नारायणीरूपस्य विष्णोः पदवीं मार्गं प्रत्यपद्यतागतवान् । वैरिणास्वशत्रुणा कामेन विनिर्जितश्चात्यन्तं कामुकोऽभूदित्यर्थः ॥ ३० ॥

तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः ।
शुष्मिणो यूथपस्येव वासितामनुधावतः ॥ ३१ ॥

सत्यधर्मीया — अमोघरेतसस्तस्यानुधावतो हरस्य रेतो वीर्यम् चस्कन्द । अद्रवत् । शुष्मिणः प्रशस्तवीर्यवतः । शुष शोषणेऽन्येभ्योऽपीति मनिन् । संज्ञापूर्वकत्वान्न गुणः । शुषेरन्तर्भावितण्यर्थात् अविशिविशुषिभ्यः किदिति मनिन्प्रत्ययेऽदन्तोऽपि शुष्म शुभो वास्यास्तीति शुष्मी । तच्च बलं यथोक्तम् । संयन्मदाय शुष्मिण इत्यृग्भाष्यटीकाटिप्पणीषु । बलिनेऽस्मै । ओजो वाजः शव इत्यादिष्वष्टाविंशतिसङ्ख्याकेषु बलनामसु पठितस्य शुष्मशब्दस्य बलमर्थ इति भाव इति । शुष्मिणः प्रशस्तवीर्यवतो वासितां करिणीम् । वासिता करिणी नार्योरिति विश्वः । वासिता करिण्योरिति विश्वः । वासिता स्त्री करिण्योरिति नानार्थामरः । वस निवासे ण्यन्तात् क्तः । मैथुनेच्छावतीति व्याकरणेऽनिच्छतीमिति दार्ष्टान्तिकाननुरूपता ज्ञेया । विशेषाभिधानस्य स्रवद्योनिपुटा नारी वासितेत्यभिधीयत इतिवदनुदाहरणात् । अनुधावत इभस्य रेतः स्कन्दति तथा चस्कन्देत्यन्वयः ॥ ॥ ३१ ॥

छलारी — चस्कन्द गलितम् । शुष्मिणो वीर्यवतस्तरुणस्येत्यर्थः । वासितां मैथुनेच्छावतीं करिणीमनुधावतो यूथपस्येव गजश्रेष्ठस्येव ॥ ३१ ॥

लिङ्गेरी — वासितां गजस्त्रियमनुगच्छतः शुष्मिणोऽतिरेतस्कस्य गजयूथपस्येव नारायणीमनुधावतः आशु गच्छतोऽव्यर्थवीर्यस्य रुद्रस्य रेतश्चस्कन्द स्खलितम् । वासिता स्त्रीकरिण्योश्चेत्यमरः ॥ ३१ ॥

यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ।
तानि रुद्रस्य हेम्नश्च क्षेत्राण्यासन् महीपते ॥ ३२ ॥

सत्यधर्मीया — यत्र यत्र महात्मनस्तस्य रेतोऽपतत् । तानि तानि रुद्रस्य हेम्नः सुवर्णस्य च क्षेत्राणि आसन् । पुण्यभुवोऽभवन् ॥ ३२ ॥

छलारी — मह्यां भूमौ द्रस्य रजतस्य हेम्नः सुवर्णस्य क्षेत्राण्याकरा आसन् ॥ ३२ ॥

लिङ्गेरी — हे महीपते । मह्यां भूमौ यत्र यत्र स्थले महात्मनस्तस्य रुद्रस्य रेतोऽपतत् तानि तानि रुद्रस्य हेम्नः सुवर्णस्य च क्षेत्राण्याकरा आसन् ॥ ३२ ॥

सरित्सरःसु शैलेषु वनेषूपवनेषु च ।
यत्र क्वचासन् ऋषयस्तत्र सन्निहितो हरः ॥ ३३ ॥

सत्यधर्मीया — यत्र क्वचैतदादिषु रेतोऽपतत्तत्र ऋषयः आसन् कृतस्वाश्रमाः तत्र हरोऽपि सन्निहित आसीत् ॥ ३३ ॥

छलारी — एवं तामनुधावन् हरो रेतः क्षेत्रेषु सरिदादिषु यत्र क्च ऋषय आसन् । तत्र रेतो निवासस्थानेषु ऋष्याश्रमेषु च संनिहिता बभूव । यद्वा । यत्र क्च सरिदादिषु रेतः क्षेत्रेषु ऋषय आसंस्तत्राश्रमेषु हरः संन्निहितोऽभवत् ॥ ३३ ॥

लिङ्गेरी — नदीसरोवरपर्वतेषु वनोपवनेषु च रुद्रक्षेत्रेषु ऋषय आसन्यत्र क च तत्र हरः सन्निहितोऽभूत् ॥ ३३ ॥

स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ।
जडीकृतं नृपश्रेष्ठ सन्न्यवर्तत कश्मलात् ॥ ३४ ॥

सत्यधर्मीया — जडीकृतं अज्ञवत्कृतम् । कश्मलात् पूर्वोदीरितकृच्छ्रात् ॥ ३४ ॥

छलारी — रेतसि स्कन्ने पतिते सति देवस्य मायया मोहकशक्त्या जडीकृतं निर्व्यापारमात्मा-नमपश्यत् । कश्मलाद्बुद्धिभ्रंशकरात्क्लेशात् सन्न्यवर्तत निवृत्तोऽभूत् ॥ ३४ ॥

लिङ्गेरी — हे नृपश्रेष्ठ । स रुद्रः स्वकीये रेतसि स्कन्ने भुवि पतिते सति जातसंज्ञः सन् आत्मानं स्वं देवस्य विष्णोर्मायया मोहनशक्त्या जडीकृतं मन्दजनवत्कामुकं कृतमपश्यत्ज्ञातवान् । तदनन्तरं कश्मलात्परस्त्र्यनुधावनरूपात्सन्निवृत्तोऽभूत् ॥ ३४ ॥

अथावगतमाहात्म्य आत्मनो जगदात्मनः ।
अपरिज्ञेयवीर्यस्य न मेने तदुदाहृतम् ॥ ३५ ॥

सत्यधर्मीया — जगदात्मनस्तदन्तर्यामिणः । आत्मनः स्वस्यापि । अपरिज्ञेयं वीर्यं सामर्थ्यं यस्य तस्य । अथ रेतःपातानन्तरम् । अवगतमाहात्म्यो भवः तत् उत् आहृतमिति पदानि । आत्मन इतस्तत आहरणं पारवश्येन नयनं यत्तत् । उत् उत्कृष्टं न मेने । अहं कियान्कियदिदमिति मेने । महामाहात्म्यस्येदं नाद्भुतमिति भावः । एवं कर्तारो वर्तन्तेऽन्ये चेत् किमेवं मननमित्यतोऽप्याह ॥ मेने लक्ष्मीपताविति । यदुदाहृतं तन्निष्ठतयोक्तं तत् न । अन्यत्र नेति मेने ज्ञातवानिति । उत् वियुक्तं वा न मेने । उद्वियोगे प्राधान्ये चेति विश्वः ॥ ३५ ॥

छलारी — अपरिज्ञेयं सम्यग्ज्ञातुमशक्यं वीर्यं माहात्म्यं यस्य तस्य जगदात्मनो जगदन्तर्नियामकस्यात्मनः परमात्मनोऽवगतं माहात्म्यं येन सः । रुद्रस्तदिह मायया स्वस्य जडीकरणमद्भुतं न मेने ॥ ३५ ॥

लिङ्गेरी — अथ जगत्स्वामिनः साकल्येन तदनुग्रहमन्तरेण चाज्ञेयसामर्थ्यस्य विष्णोरवगतमाहात्म्यः सन् सम्यग्ज्ञातसर्वचेतनोत्तमत्ववान्सन् तस्य विष्णोरुदाहृतं नारायणीरूपं दर्शयेति प्रार्थनासमये यत्सुरसत्तमेति वचनं तत्स्वसाम्याभिप्रायं न मेने । यच्च कामिनामकामिनां च कामजनकमिति तदुदाहृतं तच्चानृतं न मेने । यदपि त्वामपि मोहयिष्यामीत्यभिप्रायेणोक्तं तत्कामिनां च संकल्पप्रभवोदयमिति तदुदाहृतं तत्प्राङ् न मेने । यतोऽथानन्तरमवगततत्स्वमोहकत्वरूपमाहात्म्य इत्यादियोजनाऽत्र द्रष्टव्या । अत एवोक्तं प्राक् भावगंभीरमिति ॥ ३५ ॥

तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ।
उवाच परमप्रीतो बिभ्रत् स्वां पौरुषीं तनुम् ॥ ३६ ॥

सत्यधर्मीया — अविक्लवमविव्हलम् । अव्रीडं परपारवश्येन भ्रमतो मम किमिदमिति वर्जितलज्जम् ॥ ३६ ॥

छलारी — अविक्लवं स्वच्छमनसमव्रीडं भवं तं लज्जारहितमालक्ष्य दृष्ट्वा स्वां पौरुषीं पुरुषाकारां तनुं बिभ्रत् ॥ ३६ ॥

लिङ्गेरी — मधुसूदनस्तं रुद्रमविक्लवमपरवशम् । स्वस्थमिति यावत् । अव्रीडं कामुकं लज्जारहितम् । आलक्ष्य दृष्ट्वा परमप्रीतः सन् स्वां पौरुषीं पुरुषरूपां तनुं बिभ्रत् सन् उवाच ॥३६॥

श्रीभगवानुवाच–

दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ।
यतो दुस्तरया स्वैरं मोहितोऽस्यङ्ग मायया ॥ ३७ ॥

सत्यधर्मीया — निष्ठां ज्ञाननिष्पत्तिम् । स्वां तिरोहितामिति पूर्वं विद्यमानम् । आत्मना मयैवास्थितः प्रापितः । इति यत्तद्दिष्ट्या । सुखम् । का यन्मामापेति श्रिपेत्थं लपसीत्यतो लपति ॥ यत इति । दुस्तरया । मत्क्रियां विना तरितुमशक्यया । अङ्ग । हे भव । मायया स्वैरं मोहितोऽसि । अङ्गमायया अङ्गनाङ्गप्रदर्शितमाययेति वा । अत इदं दिष्ट्येति भावः । निष्ठा निष्पत्तिरिति विश्वः । निष्ठां स्वस्वरूपस्थितिं वा । आस्थितः आत्मना मनसेति वा ॥ ३७ ॥

छलारी — स्वां निष्ठां मद्भक्तिलक्षणामात्मना मनसाऽऽस्थितः प्राप्त इत्येतद्दिष्ट्या । आश्चर्यम् । कुतः । यतः । हे अङ्ग रुद्र । दुस्तरया तर्तुमशक्यया मायया बन्धकभूतया प्रकृत्या स्वैरमत्यन्तं मोहितोऽसि ॥ ३७ ॥

लिङ्गेरी — अंग हे प्रिय । विबुधश्रेष्ठ रुद्र । त्वं मम मायया मोहितोऽस्यनन्तरं दिष्ट्या मदिच्छयाऽऽत्मनस्तव स्वां निष्ठां स्थितिं स्थितो गतोऽसि । यत्तत्सा माया स्वैरं स्वेच्छया तर्तुमशक्येति भावः । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इति स्मृतेः ॥ ३७ ॥

को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ।
तांस्तान् विसृजतीं भावान् दुस्तरामकृतात्मभिः ॥ ३८ ॥

सत्यधर्मीया — त्वदृते को नु पुमान् । विषक्तस्तल्लग्नचित्तो मे मायामतितरेत् । सा कीदृशीत्यत ईदृशीत्याह ॥ तांस्तानिति । अकृतात्मभिरशिक्षितमानसैर्दुस्तराम् । तत्र तन्त्रमाह । तांस्तान्भावान् इतरमोहकान् विलासान् सृजन्तीमुत्पादयन्तीमिति ॥ ३८ ॥

छलारी — अनन्ते जीवराशौ यः कश्चिन्मायामतितरेत्तज्जीवानां वैचित्र्यादतः किमाश्चर्यमित्यत आह ॥ को न्विति । विषक्तो विषयासक्तः को नु पुमान् त्वदृते त्वां विना मे मायामतितरेत् । ये ये बन्धकास्तांस्तान् भावान्विषयान्सृजतीम् । अकृतोऽनिगृहीत आत्मा मनो यैस्तैर्मनोजयरहितैर्दुस्तराम् ॥ ॥ ३८ ॥

लिङ्गेरी — हे रुद्र । त्वां विना को नु पुमान् स्त्र्यादिविषये विषक्तः प्रवृत्तान्तःकरणोऽपि तांस्तान् भावान् शृङ्गादीन्प्रदर्श्य मानसविकारान्विसृजतीम् । अत एवाकृतात्मभिः परमात्मानुग्रहासंपादकैस्तर्तुमशक्यां मे मायामतितरेत् । विकारो मानसो भाव इत्यमरः ॥ ३८ ॥

सेयं गुणमयी माया न त्वामभिभविष्यति ।
मया समेतं कालेन कामरूपेण भागशः ॥ ३९ ॥

सत्यधर्मीया — त्वदृते को नु तरेदित्यनेन मम सामर्थ्यमेतावदिति न भव भव भ्रान्त इति तात्पर्यं स्वयमाह ॥ सेयमिति । गुणमयी सत्वादिगुणात्मिका । माया प्रकृतिः । त्वां नाभिभविष्यति पराभावयति । तत्र हेतुमाह ॥ मयेति । कालेन तन्नामकेन कामरूपेणेच्छोपात्तगात्रेण । मया भागश एकांशेन समेतमिति । देवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यादेः। कामांस्तत्तदिच्छाविषयान् निरूपयति प्रतिष्ठापयतीति स तथा तेनेति वा ॥ ३९ ॥

छलारी — मदनुग्रहतः सुतरेत्याशयेनाह ॥ सेयमिति । गुणमयी सत्त्वादिगुणत्रयात्मिका सेयं माया प्रकृतिस्त्वां नाभिभविष्यति । मदनुग्रहपात्रस्य तव बन्धिका न भविष्यति । कथं भूता । कालेन सृष्ट्यादिनिमित्तेन सृष्ट्यादिकाले । सृष्ट्याद्यर्थमिति यावत् । कालरूपेण कालनियामकेन मया भागश एकदेशेनापि समेता । मदधीनेत्यर्थः ''दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त'' इत्युक्तेः ॥ ३९ ॥

लिङ्गेरी — हे रुद्र । गुणमयी सत्त्वादिगुणात्मिका सेयं माया जडप्रकृतिलक्षणा त्वां नाभिभविष्यति भ्रान्ततया तिरस्कृतं न करिष्यति । तत्र निमित्तमाह ॥ मया समेतमित्यादिना । कालाख्यरूपवता कालनाम्ना भागशोंऽशेन मया समेतं त्वामिति ॥ अयमभिप्रायः ॥ कालनियामकतया संहर्तृतया च कालशब्दवाच्यस्त्वयि स्थितोऽहं यदा त्वां भक्तत्वेनानुगृण्हामि तदा त्वं भ्रान्तिमुक्तरूपां न यास्यसीति । मया सम्यगितो भक्ततया भ्रान्तो मा भूदित्यङ्गीकारं प्राप्त इति यत्सामर्थ्येनायमभिप्रायोऽवगम्यते । अन्यथा कालादिशब्दवाच्यभगवदंशस्य रुद्रे सर्वदा सत्वात्प्राक्तना रुद्रभ्रान्तिर्नोपपद्यत इति ज्ञातव्यम् ॥ ३९ ॥

श्रीशुक उवाच–

एवं भगवता राजन् श्रीवत्साङ्केन सत्कृतः ।
आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४० ॥

सत्यधर्मीया — सत्कृतो लालितः ॥ ४० ॥

छलारी — श्रीवत्सोऽङ्कं चिन्हं यस्य तेन हरिणा सत्कृतो रुद्र आमन्त्र्यानुज्ञां गृहीत्वा परिक्रम्य प्रदक्षणीकृत्य सगणः प्रमथादिभूतगणैः समेतः स्वालयं कैलासम् ॥ ४० ॥

लिङ्गेरी — हे राजन् । रुद्रो भगवता श्रीवत्सचिन्हवता सत्कृतः सन् तमामन्त्र्य परिक्रम्य प्रदक्षणीकृत्य सगणः सन् स्वाश्रमं ययौ ॥ ४० ॥

आत्मांशभूतां तां मायां भवानीं भगवान् भवः ।
शंसतामृषिमुख्यानां प्रीत्या तुष्टाव भारत ॥ ४१ ॥

सत्यधर्मीया — शंसतां संस्तुवतामृषिमुख्यानां सताम् । भगवान् भवो भवानीं विलक्ष्य । आत्मांशभूतां परमात्मन एकदेशरूपिणीम् । तां मायां प्रीत्या मां किमिति स्तुवन्ति भवन्तस्तां स्तुवतेति स्वयं तां मायां तुष्टाव अस्तौषीत् । भवानीं भव इत्युक्तोपपत्तिकम् ॥ ४१ ॥

छलारी — भवो रुद्रो ऋषिमुख्यानां शंसतामात्मानं स्तुवतामात्मनः परमात्मनोंऽशभूतां स्वरूपांशभूतां तां स्वेन दृष्टां मायां स्त्रीरूपं प्रीत्या भवानीमुमां प्रत्याचष्टाब्रवीत् । तुष्टावेति पाठे भवानीं सम्बोध्येति शेषः । तां मायां तुष्टावेति योज्यम् ॥ ४१ ॥

लिङ्गेरी — हे भारत । आत्मनो विष्णोरंशभूतां मायां नारायणीरूपां भवानीं पार्वतीं प्रति ऋषिश्रेष्ठानां शंसतां कथयतां स्तुवतां सतां भगवान् भवः प्रीत्या तां मायां तुष्टाव स्तुतवान् ॥ ४१ ॥

अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ।
अहं कलानामृषभो विमुह्ये यया वशोऽन्ये किमुतास्वतन्त्राः ॥ ४२ ॥

सत्यधर्मीया — अये सति त्वं परदेवताया मदादिपरेष्टदेवस्य । परमपुंसः परमपुरुषस्याजस्य विष्णोर्मायां व्यपश्यः किल । कलानां भगवद्विभूतीनाम् । कासाञ्चिन्मध्ये ऋषभः श्रेष्ठोऽपि सन्नहं यथा विमुह्ये मोहितोऽभवम् । अन्येऽनंशबाहुल्या अस्वतन्त्राः परतन्त्राः । मदधीना इति यावत् । ते

मुह्येयुरिति किमुत न वक्तव्यमित्यर्थः । अहंकलानामिति पदमेकं वा । अहमित्यव्ययमहन्तत्त्ववाची । अहं कलाश्च तासां कलानामृषभो विद्यास्वामी । ज्ञानसम्पन्न इति यावदिति वा ॥ ४२ ॥

छलारी — अयि उमे । त्वं परस्य पुंसः सर्वोत्तमपुरुषस्य परदेवताया अस्मदादीनामिष्टदेवताया अजस्य विष्णोर्मायां व्यपश्यो विशेषेण दृष्टवत्यपि । कथंभूताम् । यया मायया कलानां हरेर्भिन्नांशानां विभूतिरूपाणां मध्ये ब्रह्माणं विना ऋषभः श्रेष्ठोऽहमवशः सन् विमुह्ये मोहं प्राप्तवान् । मदधीना अन्ये प्राणिनो विमुह्यन्तीति किमु ॥ ४२ ॥

लिङ्गेरी — हे भवानि । त्वं परस्योत्तमस्य पुंसोऽजस्य विष्णोर्मायां नारायणीरूपां त्वं व्यपश्योऽप्यद्राक्षीः । किं च परदेवताया विष्णोः कलानामंशवतां ऋषभः श्रेष्ठोऽप्यहं वशोऽपि वशीकृतान्तःकरणोऽपि यया मामया विमुह्ये भ्रान्तोऽस्मि । मनोनिग्रहेऽस्वतन्त्रा अन्ये विमुह्येयुरिति किमुत ॥ ४२ ॥

यं मामपृच्छस्त्वमुपेत्य योगात् समासहस्रान्त उपारतं वै ।
स एष साक्षात् पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४३ ॥

सत्यधर्मीया — समासहस्रान्ते । समानां संवत्सराणां सहस्रं तस्यान्ते । सहस्राणि तेषामन्त इति वा । समायाः सहस्राणि तेषामन्त इति वा । हायनोऽस्त्री शरत्समा इति नित्यबहुवचनान्तः समाशब्द इत्यमरज्ञापनात् कथमेकवचनान्तविग्रह इति चेन्न । समष्टमवैक्लव्ये । समान्ति विक्लवं कुर्वन्ति सर्वामिति अपचाद्यचि डाप् तदन्तत्वा डात् । समं विजायत इति सूत्रात् समासमामिति तद्व्याख्याच्च वचनान्तरमस्तीति ज्ञायते । समान्ति सह ऋतवो वर्तन्तेऽस्यामिति वा । मा माने आतश्चोपसर्ग इत्यङ् । समासंवत्सरे स्त्रियामिति रत्नकोशाच्चैकवचनं च सम्भवति । प्रायिकाभिप्रायपरो वाऽमरः पामरो वेति ज्ञेयम् । यद्यपि विनैतच्चर्चां श्लोकव्याकृतिर्भवति चेदपि प्रायेणैकवचनान्तप्रयोगो दुर्मिलः । एकवचनता चैतस्य बोधनीयेति विग्रहप्रदर्शनमुखेन सा बोधितेति सन्तोष्टव्यम् । योगात् समाध्यादेस्तपसः । उपारतम् । कं प्रति तपः पते भव भवता क्रियत इति मां प्रति त्वमुपेत्यापृच्छः पृष्टवती । स एषः साक्षात्त्वयेदानीं प्रत्यक्षीकृतपुराणः सर्वदेहवर्ती । पुरुषो न सुलभं तज्ज्ञानम् । किन्तु दययैवेवं जातमित्याह ॥ यत्रेति । यत्र यस्मिन् कालो न विशते विशति स्वकार्यं कर्तुमसुशकमित्याशयः । वेदः सोऽपि न विशति साकल्येन प्रतिपादयितुं न शक्तः । यतो वाचो निवर्तन्त इति श्रुतेः ॥ ४३ ॥

छलारी — हरिमाहात्म्यं वर्णयति ॥ यमिति । हे गौरि । त्वं समाः सहस्रान्ते समानां वत्सराणां सहस्रस्यान्तेऽवसाने योगाद्धरिविषयकध्यानलक्षणयोगादुपारतं विरतं मामुपेत्य यमपृच्छस्त्वद्ध्यान-विषयः कः कीदृश इत्येवं पृष्ठवत्यसि सम्यग्ध्यानविषय एषो ममापि मायामोहकः साक्षात्पुराणपुरुषो हरिः । स कीदृश इत्यस्योत्तरं ॥ न यत्रेत्यादि । यत्र भगवति कालो न विशते जन्मादिविकारं कर्तुं न शक्नोति । वेदश्च न विशते न प्रवर्तते । यं वेदोऽपि साकल्येन प्रतिपादयितुं न शक्नोति । ''यतो वाचो निवर्तन्त'' इति श्रुतेः ॥ ४३ ॥

लिङ्गेरी — हे भवानि । त्वं योगादुपासनादिलक्षणात्समानां वर्षाणां सहस्रान्त उपारतं निवृत्तं मामुपेत्य यमपृच्छः पृष्टवत्यसि सः साक्षात्पुराणः पुरुष एष नारायणीरूपो यत्र विष्णोः कालः परिमितायुष्यज्ञापको जरादिविकारजनकश्च न विशते प्रविष्टो न भवति । वेदोऽपि यं साकल्येन प्रतिपादयितुं न विशते ॥ ४३ ॥

श्रीशुक उवाच–

इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः ।
सिन्धोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥ ४४ ॥

सत्यधर्मीया — शृङ्गस्य विकारः शार्ङ्गं धनुः । अनुदात्तादेश्चेत्यञ् । अस्यास्तीति स शार्ङ्गधन्वा । वा संज्ञायामीत्यनुङ् । तस्य । धन्विन इति पाठे व्रीह्यादिरिनिः शार्ङ्गधन्विनः ॥ ४४ ॥

छलारी — पञ्चमाध्याये उपक्रान्तं चाक्षुषमन्वन्तरेऽवतीर्णस्य हरेरजितनाम्नोऽमृतमथनार्थं मन्दरोद्धरणादिविक्रममुपसंहरति ॥ इतीति । हे तात । शार्ङ्गधन्विनोऽजितनाम्नो हरेर्येनाजितेन । कूर्मरूपेणेति शेषः ॥ ४४ ॥

लिङ्गेरी — हे तात कृपास्पदपरीक्षित् । मया ते तव सिन्धोः क्षीरसमुद्रस्य मथनकाले येन महाचलो मन्दरः पृष्ठे धृतस्तस्य शार्ङ्गधन्वनो हरेर्विक्रम इति उक्तप्रकारेण कथितः ॥ ४४ ॥

एतन्मुहुः कीर्तयतोऽनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ।
यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरि(भ्र)श्रमापहम् ॥ ४५ ॥

सत्यधर्मीया — उत्तमैः श्लोक्यते स । उद्गतं तमो ग्लानिरज्ञानं अन्यथाज्ञानं वा यस्मात्स । श्लोकः कीर्तिर्यस्य तस्य । गुणानामनुवर्णनम् । समस्तो यः संसारे परिभ्रमो भ्रमणं संसारात् यः

परिश्रमस्तमपहन्तीति तत्तथा । अपेक्लेशतमसोरित्युक्तत्वेप्यन्येष्वपीति डः । मुहुर्यत्कीर्तयतोऽनुशृण्वतश्चाधिकारिणो जनस्य । समुद्यमः समीचीनफलोपलम्भक उद्योगः । जातु कथञ्चित् कदाचित् क्वचिद्देशे न रिष्यते । रीङ् क्षये । न नश्यति । सफलमेव सदा भविष्यतीति भावः ।। ४५ ।।

छलारी — अजिताख्यानकीर्तनादिना फलमाह ।। एतदिति । यद्यस्मादुद्गच्छति नश्यति । तमो मिथ्याज्ञानं यस्मात्स उत्तमो मिथ्याज्ञाननाशक इत्यर्थः । एतादृशः श्लोकः कीर्तिर्यस्माद्यस्यैति वा । तस्य हरेर्गुणानामनुवर्णनं समस्तसंसारपरिश्रमं संसारदुःखमपघ्नन्ति नाशयतीति तथोक्तम् । तस्मादेतदतीतचरितम् । मुहुर्निरन्तरं कीर्तयतोऽनुशृण्वतश्च पुरुषस्य कश्चित्स्वापेक्षयैहिकामुष्मिककार्यमात्रविषये समुद्यमः प्रयत्नो जातु कदाचिदपि न रिष्यते न नश्यति । सार्थक एव भवतीति भावः ।। ४५ ।।

लिङ्गेरी — एतादृशं शार्ङ्गधन्विनो वीर्यं शृण्वतः पुनःपुनरनुकीर्तयतश्चोद्यम उद्योगः ऐहिकपारत्रिकसाधनः क्वचित्कस्मिन्विषयेऽपि जातु कदाचिदपि न रिष्यते क्षयवान्न भवति । यस्मात्कारणादुत्तमैर्ब्रह्मादिभिः स्तुत्यः श्लोकः कीर्तिर्यस्य तस्य हरेर्गुणानुवर्णनं तद्गुणश्रवणं च समस्तसांसारिकश्रमनाशकं तस्मात्तदुभयं मुमुक्षुणाऽवश्यमनुष्ठेयम् ।। ४५ ।।

असदविषयमङ्घ्रिं भावगम्यं प्रपन्ना-
नमृतममरवर्यानाशयत् सिन्धुमथ्यम् ।
कपटयुवतिवेषो मोहयन् यः सुरारीं-
स्तमिममुपसृतानां कामपूरं नतोऽस्मि ।। ४६ ।।

इति श्रीमद्भागवते अष्टमस्कन्धे एकादशोऽध्यायः ।

सत्यधर्मीया — एतावता स्तुतभगवद्गुणः शुकस्तत्परवशाशयः स्वयं नमति ।। असदविषयमिति । योऽसदविषयमसतामविषयम् । अङ्घ्रिम् । भावो भक्तिस्तया गम्यं पादमूलम् । प्रपन्नान् अमरवर्यान् सिन्धुमथ्यम् । तन्मथनाज्जातममृतम् । कपटयुवतिवेषः सुरारीन् मोहयन् सन् । आशयत्प्राशयामास । गतिबुद्धीति द्विकर्मकता आशयच्चामृतं देवानितिवत् । तेषां तोषदश्चेत्किमायातं भवतोऽस्माकं च महिष्या धृतमनीषच्चेत् माहिषस्य किमायातमित्याभाणकविषयवदित्यत आह ।। तमिममिति । उपसृतानां कामपूरं कामान् काम्यानिच्छाविषयान् पूरयतीति स तथा तम् । नतोऽस्मि । उपसरणमात्रमस्मत्कृत्यं तदपि स एव कारयित्वा तत्फलं प्रयच्छतीति भावः । असदविषयं तदप्राप्यं भावगम्यं भक्त्ये कव्यंग्यमङ्घ्रिम् । अधिर्गत्यर्थ इति ज्ञानार्थः । असदविषयोऽङ्घ्रिः समीचीनं ज्ञानं

तम्। प्रपन्नान् अमरवर्यान् इदानीं सिन्धुमथ्यममृतमाशयदनन्तरममृतंमित्युक्तिः । व्यक्तिसुखरसं अराण्या इति । सिन्धुमथनव्यक्त माशयदेष्यन्न्यायेन । यच्च सुरारीन् । सुरा हरेर्गुणाः प्रोक्ता इत्युक्तगुणानां अरयो हरौ । तेनापि तु ईश्वरोऽहं आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मयेत्यादिप्रकारेण स्वेषु तांश्चिन्तयन्तो मिथ्याज्ञानिनः । एतत्पक्षे अमरवर्यान् पूर्वदेवानित्यर्थः । कपटयुवतिवेषो लोके कपटकामिनीवेषः । कपटकः कुत्सितः पटः गजचर्म वा दिशो वा यस्य स कपटकः । तं प्रति युवतिवेषः प्रदर्शितो येन सः । स एष स्त्री एष पुरुष इत्युक्तेः । स्वाभाविको भवति भगवति कामिन्याकार इति । वेषपदं चातदाकारतदाकारप्रदर्शकवाची च भूषामेतत्पक्षे भजते । मोहयन् सिन्धुमथ्यं विषमाशयदिव यस्तमिमम् । उपसृतानाम् । उप इति सर्वाधिक इति सृतं ज्ञानं येषां तेषाम् । कामपूरमभिलषितपूरकम् । उपसृतं सृतिर्येषामुपलक्षणतया प्रमिततम आदिग्रहस्तेषां कामपूरम् । वन्ध्येच्छानां पुरो हि सद्यो येन स तम् । इमं प्राप्स्ये मनोरथमित्यादेः । कामानेव पूरयतीति स तथा वा तम् । एतादृशं भगवन्तं नतोऽस्मीत्यपि विवृण्वन्ति ॥ ४६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे एकादशोऽध्यायः ॥ ८-११ ॥

छलारी — भगवता कृतं भक्तपक्षपातं स्मरन्नमस्करोति ॥ असदिति । असतामभक्तानामविषयमप्राप्यं किन्तु भावेन भक्त्या गम्यमङ्घ्रिचरणं प्रपन्नान् अमरवर्यान् सिन्धुमथ्यं सिन्धोर्मथने जातममृतं यो हरिरश्यदपाययत् । उपसृतानां शरणागतानां पुंसां कामरूपमभीष्टप्रदं तं हरिमहं नतोऽस्मीत्यन्वयः । कथम्भूतः सन् । कपटयुवतिवेषो । कापट्यर्थं दैत्यवञ्चनार्थं युवत्याः स्त्रियो वेषो यस्य सः सुरारीन्मोहयन् सन् । अनेनैवंविधे भगवति भक्तिः कर्तव्येति सूचितं भवति ॥ ॥ ४६ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे एकादशोऽध्यायः ॥ ८-११ ॥

लिङ्गेरी — एवं भगवद्गुणकीर्तनोद्रिक्तभक्तिः शुक उक्तगुणं भगवन्तं स्तुवन्नमति ॥ असद-विषयमिति । यो हरिः सिंधोः क्षीरसमुद्रमध्ये मथनजममृतमसतामभक्त्यादिदोषवतामसुराणामविषयं तत्साधनागोचरमप्राप्यम् । भावेन भक्त्या सतां भक्तानां प्राप्यम् । स्वस्याङ्घ्रिं पादपद्मं प्रपन्नान् शरणागतान् अमरवर्यान्देवश्रेष्ठान् आशयद्भोजयामास । पाययामासेति यावत् । किं कुर्वन् । सुरारीनसुरान् कपटेन छद्मना युवतेः स्त्रियो वेषेण नारायण्याख्येन मोहयन्सन् । अहं तं तादृशगुणमिमं स्वपादसमीपं पूजाद्यर्थमुपसृतानां प्राप्तानां कामानामभिलाषाणां पूरकं नतोऽस्मि ॥ ४६ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे एकादशोऽध्यायः ॥८-११॥

॥ अथ द्वादशोऽध्यायः ॥

श्रीशुक उवाच–

मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ।
सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥

सत्यधर्मीया — प्रासङ्गिकमुक्त्वा प्रकुतमनुसरन् मनुकथाकथनापदेशेनेशमाहात्म्यमेव वर्णयत्युत्तराध्यायैः। तत्र श्राद्धदेवः कस्यापत्यं तदपत्यानि कानीत्यत आह ॥ मनुरिति । विवस्वतः सूर्यस्य । वर्तमान इदानीं सप्तमो मनुः श्राद्धदेव इति श्रुत इत्यन्वयः । तदपत्यानि तस्य श्राद्धदेवस्य पुत्रान् मे मत्तः ॥ १ ॥

छलारी — एवं प्रासंगिकं समाप्येदानीं हरिमाहात्म्यसूचकानि श्राद्धदेवाद्यष्टमन्वन्तराणि क्रमेण वर्णयति ॥ मनुरित्यादिना यावदध्यायमाप्ति । विवस्वतस्तन्नामकसूर्यपुत्रः । इदानीं वर्तमानः सप्तमो मनुः श्राद्धदेव इति श्रुतः । यस्य मनोरपत्यानि शृणु ॥ १ ॥

लिङ्गेरी — शुकः स्वायंभुवादिचाक्षुषान्तमन्वन्तरस्थितिं सविस्तरं निरूप्य सप्तमस्य वैवस्वतो मनुस्तस्यापत्यानि पुत्रान्मे मम सकाशाच्छृणु ॥ १ ॥

इक्ष्वाकुश्च नभश्चैव धृष्टः शर्यातिरेव च ।
नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥

करूषश्च वृषध्रश्च दशमो वसुमान् स्मृतः ।
मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप ॥ ३ ॥

सत्यधर्मीया — तदन्तरसुरसुरर्षभऋष्यादिनाम कर्म च वक्ति ॥ इक्ष्वाकुरित्यादिना । अथ नाभागानन्तरं दिष्टस्तन्नामा सप्तम उच्यते । करुषो वृषध्रश्चेतावष्टमनवमौ ज्ञेयौ । वसुमांश्च दशमः स्मृतः ॥ २-३ ॥

छलारी — तानाह ॥ इक्ष्वाकुरित्यादिना । पुत्रसंख्यानाह ॥ मनोरिति । वैवस्वतः श्राद्धदेव इति अपरनामा ॥ २,३ ॥

लिङ्गेरी — इक्ष्वाकादयो वसुमदन्ता दश वैवस्वतमनोः पुत्राः । हे परंतप शत्रुसंतापक परीक्षिद्राज । वैवस्वतेऽन्तरे आदित्या इत्यादि ऋभव इत्यन्तनामानो देवास्तेषां पुरन्दरनामेन्द्रः ।। २-४ ।।

आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः ।। ४ ।।

सत्यधर्मीया — आदित्याद्या अश्व्यन्ताः ऋभवो देवा इत्यर्थः । ऋ इति स्वर्गस्य वाऽदितेर्वा नाम । स्वरादित्वादव्ययता । तत्र ततो वा भवन्ति । मितंद्वादित्वाड्डुः । अदित्या ऋभवोऽस्वप्ना इत्यमरः । क्विपि ऋभुव इत्यपीत्युक्तेर्ऋभव इति पाठोऽपि दृश्यः । तेषां देवानाम् । पुरन्दरनामेन्द्रः । पूः सर्वयोर्दारिसहाः वाचंयमपुरन्दरौ चेति निपातितः ।। ४ ।।

छलारी — वैवस्वतमन्वन्तरे देवानाह ।। आदित्या इति । आदित्यादयो देवा इत्यन्वयः ।।४,५।।

कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ।
जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ।। ५ ।।

सत्यधर्मीया — कश्यपादयः सप्त ऋषयः स्मृताः ।। ५ ।।

लिङ्गेरी — कश्यपादयो वसिष्ठान्ताः सप्तर्षयो वैवस्वतमन्वन्तरे ।। ५ ।।

अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ।
आदित्यानामवरजो विष्णुर्वामनरूपधृक् ।। ६ ।।

सत्यधर्मीया — अत्राप्येतन्मन्वन्तरेऽपि कश्यपादृषेरदित्यां भगवज्जन्माभूत् । आदित्यानां द्वादशानां मध्येऽवरजोऽन्तिमः । वामनरूपधृग्वामनरूपधारी तन्नामकश्च ।। ६ ।।

छलारी — मन्वन्तरगतेन्द्रमाह ।। आदित्यानामिति । आदित्यानाम् । विवस्वानर्यमा पूषा त्वष्टा च सविता भगः । धाता पर्जन्य वरुणो मित्रः शक्र उरुक्रम इत्युक्तद्वादशादित्यानां मध्येऽवरं पश्चाज्जन्म यस्य स तथा । वामन इत्यर्थः ।। ६ ।।

लिङ्गेरी - अत्र वैवस्वतमन्वन्तरेऽपि कश्यपादृषेरदितिदेव्यां भगवतो नारायणस्य जन्म प्रादुर्भावोऽभूत् । प्रादुर्भूतस्य नामाद्याह । प्रादुर्भूतो विष्णुरदित्युत्पन्नदेवानामनुजो वामनाख्यरूपधारीति ।६।

संक्षेपतो मयोक्तानि सप्तमन्वन्तराणि ते ।
भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यऽन्वितानि च ।। ७ ।।

सत्यधर्मीया — स्वायम्भुवस्वरोचिषोत्तमतापसरैवतचाक्षुषाणीति षट् । वर्तमानं वैवस्वतमन्वन्तरं चेति सप्त मन्वन्तराणि ते त्वां प्रति सङ्क्षेपत उक्तानि । भविष्याण्येष्यन्ति । विष्णोः शक्त्यान्वितानि चेति अवश्यं श्रोतव्यत्वे हेतूक्तिः ।। ७ ।।

छलारी — मन्दानां पूर्वकथामनूद्योत्तरकथां प्रतिजानीते ।। संक्षेपत इति । ते तुभ्यं सप्त मन्वन्तराणि । स्वायंभुवस्वारोचिषोत्तमतापसरैवतचाक्षुषाख्यान्यतीतानि षट् । वैवस्वताख्यं वर्तमानं सप्तमं चेत्येवं सप्तमन्वन्तराणि संक्षेपतो मयोक्तानि वर्णितानि । अथानन्तरं विष्णोः शक्त्या सामर्थ्येनान्वितानि विष्ण्ववतारसहितानि भविष्याण्यग्रे । इतराणि । सावर्णिदक्षसावर्णिब्रह्मसावर्णि-धर्मसावर्णिरुद्रसावर्णिदेवसावर्णिइन्द्रसावर्णिसंज्ञानि सप्तमन्वन्तराणि वक्ष्यामि ।। ७ ।।

लिङ्गेरी — पूर्वोक्तमनुसंख्यां स्मारयन्नेव भविष्यन्मनुकथाकथनस्यापि विष्णुशक्तिप्रकाशकत्वे-नावश्यकत्वं सूचयन्नेव तत्प्रतिजानीते ।। संक्षेपत इत्यादिना । हे राजन् । मया ते सप्त मन्वन्तराणि संक्षेपत उक्तानि । अथ च यस्माद्भविष्याण्यपि मन्वन्तराणि विष्णोः शक्त्यन्वितानि । अथ तस्मात्तान्यपि ते वक्ष्यामीति ।। ७ ।।

विवस्वतश्च द्वे भार्ये विश्वकर्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ।। ८ ।।

सत्यधर्मीया — विवस्वतः संज्ञा छायेति द्वे भार्ये पत्न्यौ । कस्यापत्ये इत्यतो विश्वकर्मसुते इति । सूर्यभार्यात्वे एते योग्ये इत्याह ।। उभे इति । उरूत्कृष्टा भययोस्ते । प्राक् षष्ठे स्कन्धे ।। ८ ।।

छलारी — अष्टमं मनुं वक्तुं तदुपयुक्तकथामाह ।। विवस्वत इति त्रिभिः । प्राक् षष्ठस्कन्धे सञ्ज्ञा छायेत्युभयेऽपि विश्वकर्मसुतेऽभिहिते ते विवस्वतस्तन्नाम्नः सूर्यस्य तेजस एव बभूवतुः ।। ८ ।।

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ।। ९ ।।

सत्यधर्मीया — ताभ्यामन्येयमिति तृतीयां वडवामेवैके आहुः । मम तु मतं संज्ञैव वडवेति । तथा हि । षष्ठे । सैव भूत्वाऽथ वडवानासत्यौ सुषुवे भुवीति । सैव संज्ञैवेत्यसूचयत् स्वमतं शुक एक इत्युक्त्येति ज्ञेयम् । तासां तिसृणां मध्ये संज्ञांशविवक्षया तासामित्युक्तिः । संज्ञायाः सुता यमो यमी यमुना । प्रकृतः श्राद्धदेवो मनुश्चेति त्रयः ।। ९ ।।

छलारी — तासां तिसृणां भार्याणां मध्ये संज्ञायाः सुता यमो यमी श्राद्धदेवश्चेति त्रयः ।। ९ ।।

लिङ्गेरी — हे राजेन्द्र । विवस्वान्नामकादित्यस्य संज्ञा छाया चेति द्वे भार्ये । उभे च विश्वकर्मणः सुते । ये प्राक् पूर्वं तवाभिहिते उक्ते तदपेक्षया वडवा नाम्नी तृतीया विवस्वतो भार्या । तासां मध्ये संज्ञासुता यमो यमी श्राद्धदेव इति त्रयः । छायायाश्च सुतान्वक्ष्यमाणान् शृणु ।। ९ ।।

सावर्णिस्तपती कन्या भार्या संवरणस्य या ।
शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ ।। १० ।।

सत्यधर्मीया — सावर्णिरेकः तपती कन्यैका । या संवरणस्य तन्नाम्नो राजर्षेः । तथा ह्यादिपर्वणि । तापत्ये द्विरष्टवर्षां तां पश्यन् सविता रूपशालिनीम् । नोपलेभे ततः शान्तिं सम्प्रदानं विचिन्तयन् । तामवेक्ष्य तु कौन्तेय कुरूणां ऋषभो बली । सूर्यमाराधयामास नृपः संवरणस्ततः । वरः संवरणो राज्ञां त्वमृषीणां वरो मुने । तपती योषितां श्रेष्ठा किमन्यत्रापवर्जनात् । जग्राह विधिवत् पाणिं तपत्याः स नराधिप इति । भार्या । शनैश्चरश्च तृतीय इति त्रयोऽभवन् । वडवात्मजावश्विनावभूताम् ।। १० ।।

छलारी — सावर्णिः पुत्रस्तपती नाम्नी कन्या । या तपती संवरणस्य ऋषेर्भार्या वडावाया अश्विनावात्मजौ पुत्रौ ।। १० ।।

लिङ्गेरी — सावर्णिर्या सावर्णाख्यस्य भार्या सा, तपती नाम्नी कन्या, शनैश्चरेति त्रयः छायासुताः । अश्विनौ वडवायाः पुत्रौ ।। १० ।।

अष्टमे अन्तरे याते सावर्णिर्भविता मनुः ।
निर्मोहविरजस्काद्याः सावर्णेस्तनया नृप ।। ११ ।।

सत्यधर्मीया — अन्तरे श्राद्धदेवमन्वन्तरे । याते गते सति । अष्टमे सावर्णिर्नाम्ना मनुर्भविता ।। ।। ११ ।।

छलारी — एवमुपयुक्तमुक्त्वेदानीमष्टममन्वन्तरगतमन्वादीनाह ॥ अष्टम इति । सावर्णिः पूर्वोक्तः । विवस्वत्सुतस्तस्य सुतानाह ॥ निर्मोहेति ॥ ११ ॥

लिङ्गेरी — हे नृप । अष्टमेऽन्तरे मन्वन्तरे याते गते सति सावर्णिर्मनुर्भविता भविष्यति । तस्य सावर्णेर्निर्मोहविरजस्काद्याः पुत्राः ॥ ११ ॥

तत्र देवाः सुतपसो विरजा अमितप्रजाः ।
तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥

सत्यधर्मीया — सुतप आदयो देवाः तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥

छलारी — देवानाह ॥ तत्रेति । इन्द्रमाह ॥ तेषामिति । विरोचनसुतो बलिरिन्द्रः ॥ १२ ॥

लिङ्गेरी — तत्र सावर्णिमन्वन्तरे सुतपसो विरजा अमितप्रजा इति नामानो देवास्तेषां देवानां विरोचनस्यासुरस्य सुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥

दत्वेमां याचमानाय विष्णवे यः पदत्रयम् ।
राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ १३ ॥

सत्यधर्मीया — यो बलिः पदत्रयं याचमानायेमां पृथिवीं दत्वा । राद्धं सिद्धमिन्द्रपदं हित्वा । ततः प्रदानपुण्यतः सिद्धिं मुक्तिमाप्स्यतीत्यन्वयः ॥ १३ ॥

छलारी — तन्माहात्म्यमाह । दत्वेति । सप्तममन्वन्तरे यो बलिः पदत्रयं पादत्रयपरिमितां भूमिं याचमानाय विष्णवे वामनायेमां सर्वां भूमिं दत्वाऽष्टममन्वन्तरे विष्णोः प्रसादेन राद्धं लब्धमिन्द्रपदम् । भुक्त्वेति शेषः । ततोऽन्ते हित्वा त्यक्त्वा च सिद्धिं मुक्तिमवाप्स्यति । वैवस्वतान्तरेऽमृतमथनकाले इन्द्रेण हतो बलिः पुनः शुक्रेणोज्जीवितः सन् पुनरिन्द्रं जित्वा त्रैलोक्याधिपतिर्भूत्वाऽस्य यज्ञ आगत्य याचमानाय वामनरूपाय हरये सर्वभूमिं ददौ । तत्पुण्येनैवाष्टमे मन्वन्तरे इन्द्रपदं प्राप्यानुभूयान्ते मुक्तिमेष्यतीति भावः ॥ १३ ॥

लिङ्गेरी — यो बलिः पदत्रयं याचमानाय विष्णवे वामनरूपिणे इमां पृथिवीं दत्वा राद्धमैश्वर्यादिभिर्वृद्धमिन्द्रपदं स्वर्गं हित्वा परिपूज्यस्ततो विष्णोरनुग्रहात्सिद्धिं मोक्षलक्षणमवाप्स्यति । बलिशब्दवाच्ययोः कर्मदेवासुरयोर्मध्ये कर्मदेवस्य मोक्ष इति ज्ञातव्यम् ॥ १३ ॥

योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ।
निवेशितोऽधिके स्वर्गादधुनाऽऽस्ते स्वराडिव ॥ १४ ॥

सत्यधर्मीया — बद्धः पुनः प्रीतेन भगवता । स्वर्गाधिके सुतले निवेशितोऽधुना स्वराडिन्द्रो गतमज्ञ । आस्ते वैवस्वतेऽन्तरेऽमृतमथनकाले इन्द्रेण पातितः शुक्रस्पर्शात उपलब्धेन्द्रियः इन्द्रं जित्वा त्रैलोक्याधिपतिरभूत् तदा स्वक्रतुमागत्य याचमानाय वामनाय सर्वस्वं वितार्य तत्पुण्येनैव पुनरष्टमे मन्वन्तरे पुनरिन्द्रपदमनुभूयान्ते मुक्तिमेष्यति स इति भाव इति वर्णयन्ति । तावत्पर्यन्तं सुतले वासस्तस्येति च ॥ १४ ॥

छलारी — दत्तसर्वभूमिर्बलिरिन्द्रपदप्राप्तिपर्यन्तमिदानीं कुत्रास्त इत्यत आह ॥ योऽसाविति । यो भगवता बद्धः स्वपार्षदैः पाशैर्बन्धनं प्रापितोऽसौ बलिः पुनः प्रीतेन तेनैव हरिणा स्वर्गादधिके सुतलनामके भूमिबिले निवेशितः प्रतिष्ठितः सन् अधुना वैवस्वताख्येऽस्मिन्मन्वन्तरे स्वराडिवेन्द्र इवास्ते ॥ १४ ॥

लिङ्गेरी — योऽसौ बलिर्भगवता वामनेन प्रीतेन बद्धः पुनः प्रीतेन स्वर्गाधिके सुतले निवेशितः स्थापितः सन् स्वराड् स्वर्गाधिपेन्द्र इवाधुनाऽऽस्ते ॥ १४ ॥

गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ।
ऋष्यशृङ्गः पिताऽस्माकं भगवान् बादरायणः ॥ १५ ॥

सत्यधर्मीया — ऋषीन् भाषते । द्रोणपुत्रोऽश्वत्थामा रामो जामदग्न्यो दीप्तिमांस्तन्नामा । अस्माकं पिता । अस्मदोर्द्वयोश्चेत्युक्तगतिकं बहुवचनम् ॥ १५ ॥

छलारी — अष्टममन्वन्तरगतानृषीनाह ॥ गालव इति । दीप्तिमान् रामः परशुरामो द्रोण-पुत्रोऽश्वत्थामा । अस्माकं शुकनामकस्य मम पिता बादरायणो वेदव्यासः । गुरावात्मनि चैकेषामित्युक्तेरस्माकमिति बहुवचनं एकस्मिन्नपि स्वस्मिन्युज्यते ॥ १५ ॥

लिङ्गेरी — अष्टमे सावर्णिमन्वन्तरे गालवो दीप्तिमान् प्रशस्तकान्तिर्दीप्तिमन्नाम रामो भार्गवो द्रोणपुत्रोऽश्वत्थामा तथा कृपाचार्यो ऋष्यशृङ्गोऽस्माकं पिता भगवान् बादरायणः ॥ १५ ॥

इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः ।
इदानीमासते राजन् स्वे स्वे आश्रममण्डले ॥ १६ ॥

सत्यधर्मीया — स्वयोगतः स्वसमाध्यादिना । आश्रममण्डले तत्प्रदेशे ।। १६ ।।

छलारी — तत्राष्टमे मन्वन्तरे भविष्यन्ति । इदानीं कुत्रासत एते इत्यत आह ।। स्वयोगत इति । स्वयोगतः सत्कर्मानुष्ठानेन सह स्वस्वकर्म कुर्वन्त इत्यर्थः । आसते ।। १६ ।।

लिङ्गेरी — इतीमे स्वयोगात्सप्तर्षयो भवन्ति । हे राजन् । इदानीमिमे सप्तर्षयः स्वकीये आश्रमपदे सन्ति ।। १६ ।।

देवगुह्यात् सरस्वत्यां सार्वभौमपतिः प्रभुः ।
स्थानं पुरन्दराद् हृत्वा बलये दास्यतीश्वरः ।। १७ ।।

सत्यधर्मीया — देवगुह्यात्तन्नाम्न ऋषेः । ल्यब्लोपनिमित्ता पञ्चमी । देवतागुह्यं रहस्यं निमीत्तीकृत्येत्यावृत्तस्यार्थः । सरस्वत्यां तत्पत्न्याम् । सार्वभौम इति नामवान् । देवताकार्यार्थमेव पुरन्दरात् स्वर्गं हृत्वा बलये दास्यति ।। १७ ।।

छलारी — तत्रेश्वरावतारमाह ।। देवगुह्यामिति । देवगुह्यां सरस्वत्यां भार्यायां प्रभुरीश्वरो हरिः सार्वभौमपतीति नाम्ना जातः सन् पुरंदरात्स्थानं स्वर्गलोकं हृत्वा बलये दास्यति ।। १७ ।।

लिङ्गेरी — देवगुह्याख्यात्सरस्वतीनाम्न्यां प्रादुर्भूतः प्रभुर्नामेश्वरो हरिः पुरंदराख्येन्द्रस्य स्थानं स्वर्गं पुरंदरादपहृत्य बलये दास्यति ।। १७ ।।

नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः ।
भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप ।। १८ ।।

सत्यधर्मीया — वरुणसम्भवस्तत्पुत्रः । इति आदिः येषां ते तथा ।। १८ ।।

छलारी — वरुणसंभवो वरुणपुत्रस्तत्सुता दक्षसावर्ण्याख्यमनुसुताः ।। १८ ।।

लिङ्गेरी — हे नृप । वरुणोत्पन्नो दक्षसावर्णाख्यो नवमो मनुर्दक्षसावर्णेर्भूतकेत्वादयः सुताः । ।। १८ ।।

पारामरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः ।
द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः ।। १९ ।।

सत्यधर्मीया — पारामरीचिगर्भौ आदी येषां ते देवाः । अद्भुत इन्द्रः । द्युतिमान् प्रमुखमाद्यो येषाम् । स प्रमुखे आदौ येषामिति वा ते ॥ १९ ॥

छलारी — परा पूर्वमन्वन्तरापेक्षयाऽन्येऽत्राद्भुतं नाम इन्द्रः स्मृतः ॥ १९ ॥

लिङ्गेरी — दक्षसावर्णिमन्वन्तरे पारामरीचिगर्भा इत्यादिनामानो देवाः । अद्भुतनामेन्द्रः स्मृतः । द्युतिमत्प्रभृतयस्तत्र सप्तर्षयो भविष्यन्ति ॥ १९ ॥

आयुष्मतोऽम्बुधारायामृषभो भगवत्कलः ।
भविता येन संत्रातस्त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥

सत्यधर्मीया — आयुष्मतः पुरुषादम्बुधारायां तत्पत्न्याम् । भगवत्कलो भगवदंशो ऋषभः तन्नामा अद्भुत इन्द्रः । सन्त्रातः सम्यग्रक्षितः । त्रिलोकीं भोक्ष्यते ॥ २० ॥

छलारी — अत्र भगवदवतारमाह । आयुष्मत इति । आयुष्मान्नामकादम्बुधारानामिकायां भार्यायां ऋषभनामको भगवतः कलाऽवतारो भविष्यति । येन ऋषभनाम्ना संत्रातो रक्षितोऽद्भुतस्तन्नामेन्द्रस्त्रिलोकीं भोक्ष्यतेऽनुभविष्यति ॥ २० ॥

लिङ्गेरी — आयुष्मान्नामकादंबुधाराख्यायां ऋषभनामा हरिर्भगवान् प्रादुर्भविता । किलेत्यत्र प्रमाणप्रसिद्धिं सूंचयति । अद्भुतो नामेन्द्रो येन ऋषभेन संरक्षितः सन् त्रिलोकीं पालयिष्यति ॥२० ॥

दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ।
तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥

सत्यधर्मीया — उपश्लोकस्य सुतः ॥ २१ ॥

छलारी — उपश्लोकस्य तन्नामकस्य सुतः । तत्सुता ब्रह्मसावर्णिनाममनुसुता द्विजाः सप्तर्षयः ॥ ॥ २१ ॥

लिङ्गेरी — उपश्लोकस्य सुतो महान्पूज्यो ब्रह्मसावर्ण्याख्यो दशमो मनुः । भूरिषेणादयो ब्रह्मसावर्णिपुत्राः । हविष्मन्नामकप्रभृतयो द्विजाः सप्तर्षयः । सुधामानो विरुद्धा इत्यादिनामका देवाः, शंभुनामेन्द्रः ॥ २१ ॥

तत्रापि जन्म भविता हरेर्विश्वसृजां गृहे ।
श्रीमूर्तिरिति विख्यातो येनाप्यायेत वै जगत् ॥ २२ ॥

हविष्मान् सुकृतः सत्यो जयो मूर्तिस्तदा द्विजाः ।
सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः ॥ २३ ॥

सत्यधर्मीया — केषाश्चिन्नामान्याह ॥ हविष्मानिति । शम्भुरिन्द्रः। विश्वसृजां गृहे ॥ २३ ॥

छलारी — देवानाह ॥ सुवासनेति । इन्द्रमाह ॥ शम्भुरिति । शम्भुनामा सुरेश्वर इन्द्रः ॥ २३ ॥

विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति ।
जातः शान्तस्तु भगवान् गृहे विश्वसृजां विभुः ॥ २४ ॥

सत्यधर्मीया — विषूच्यां तन्नाम्न्याम् । जातो विष्वक्सेनः । शान्तः शुद्धसात्त्विकवृत्तिः । शम्भोरिन्द्रस्य सख्यं सखित्वं करिष्यति । विष्वक्सेनो जनार्दन इत्यमरः । विषु नानाऽश्वति ऋत्विगिति क्विन् । उगितश्चेति ङीप् । विषूची सेना यस्य सः । अगकारत्वादेति संज्ञायामगादिति न सषत्वम् । विष्वग्विश्वक् स्मृतौ विज्ञैर्विषुवं विशुवं तथेति द्विरूपकोशात्तालव्यमध्योऽपि विष्वक्सेना फलिन्यां स्याद्विष्वक्सेनो जनार्दन इति वोपालितः ॥ २४ ॥

छलारी — हरेरवतारमाह ॥ विष्वक्सेन इति । विष्वक्सेननामको हरिः । शम्भोस्तन्नाम्नः । इन्द्रस्य सख्यं करिष्यति ॥ २४ ॥

लिङ्गेरी — दशमे ब्रह्मसावर्णिमन्वन्तरे विष्वक्सेनाभिधाद्विषूचिनाम्न्यां जातः शान्तनामा विश्वसृजां ब्रह्मादीनां विभुः स्वामी भगवान्नारायणः शंभ्वाख्येन्द्रस्य सखा भविष्यति । विश्वजितेति पाठे तन्नामविषुचीपतेरिति ज्ञेयम् ॥ २४ ॥

मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ।
अनागतस्तत्सुताश्च सत्यधर्मादयो दश ॥ २५ ॥

सत्यधर्मीया — एकादशम एकादशोऽनागतो भविष्यन् ॥ २५ ॥

छलारी — एकादशम इति प्रयोग आर्षः । आत्मवान्मनस्विन् । अनागतो भविष्यन्मनुः । तत्सुता धर्मसावर्णिसुताः ॥ २५ ॥

लिङ्गेरी — आत्मवान्प्रशस्तभगवद्विषयमनस्को धर्मसावर्णिनामैकादशो मनुरनागतो भविता । सत्यधर्मादयो दश सावर्णिपुत्राः ।। २५ ।।

विहङ्गमाः कामगमा निर्वाणरुचयः सुराः ।
इन्द्रश्च वैधृतस्तेषामृषयश्चारुणादयः ।। २६ ।।

सत्यधर्मीया — विहङ्गमाद्या गणाः वैधृतस्तन्नामा ।। २६ ।।

छलारी — देवानाह ।। विहंगमा इति । तेषां देवानां वैधृतिस्तन्नामेन्द्रः । अरुणादयः सप्तर्षयः ।। २६ ।।

लिङ्गेरी — विहंगमादयो निर्वाणरुच्यन्ता देवास्तेषां विहङ्गमकामगमनिर्वाणरुचिनामकदेवानामिन्द्रश्च वैधृत्याख्योऽरुणादयः सप्तर्षयः ।। २६ ।।

आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ।
वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ।। २७ ।।

सत्यधर्मीया — वैधृतायां तत्र धर्मसावर्णिमन्वन्तरे । आर्यकस्य सुतो धर्मसेतुरिति स्मृतः । हरेरंशस्तत्कार्यमाह ।। त्रिलोकीं धारयिष्यतीति ।। २७ ।।

छलारी — तत्र धर्मसावर्णिमन्वन्तरे वैधृतायां तन्नामिकायां स्त्रियां जात आर्यकनाम्नः सुतो धर्मसेतुरिति स्मृतः । हरेरंशोऽवतारस्त्रिलोकीं धारयिष्यति ।। २७ ।।

लिङ्गेरी — तत्रैकादशाधर्मसावर्णिमन्वन्तरे आर्यकस्य वैधृतायां धर्मसेतुरिति स्मृतो हरेरंशः सुतः सन् त्रिलोकीं धारयिष्यति पालयिष्यति ।। २७ ।।

भविता रुद्रसावर्णी राजन् द्वादशमो मनुः ।
देववानुपदेवश्च देवश्रेष्ठादयः सुताः ।। २८ ।।

सत्यधर्मीया — एकादशमवद्द्वादशमः ।। २८ ।।

छलारी — भविता भविष्यति ।। २८ ।।

लिङ्गेरी — हे राजन् । रुद्रसावर्ण्याख्यो द्वादशो मनुर्भविता । देववानुपदेवदेवश्रेष्ठादिनामानो रुद्रसावर्णिपुत्राः ।। २८ ।।

ऋतधामा च तत्रेन्दो देवाश्च हरितादयः ।
ऋषयश्च तपोमूर्तितपश्चाग्नीध्रकादयः ॥ २९ ॥

सत्यधर्मीया — हरितादयो देवाः ऋतधाम इन्द्रः ॥ २९ ॥

छलारी — ऋतधामा तन्नामकेन्द्रः ॥ २९ ॥

लिङ्गेरी — द्वादशमे रुद्रसावर्णिमन्वन्तरे ऋतधामाख्येन्द्रो हरितादिनामानश्च देवास्तपोमूर्तित-पश्चाग्नीध्रकादिनामानो रुद्रसावर्णिसप्तर्षयः ॥ २९ ॥

स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ।
अन्तरं सत्यमहसः सूनृतायाः सुतो विभुः ॥ ३० ॥

सत्यधर्मीया — स्वधामाख्यो हरेरंशः तन्मनोरन्तरं रुद्रसावर्णिमन्वन्तरं सत्यमहसः पुंसः सूनृतायाः सुतः ॥ ३० ॥

छलारी — सत्यमहसस्तन्नामकस्य सूनृतायास्तन्नाम्न्याः स्त्रियश्च सुतः सन् स्वधामाख्यो हरेरंशोऽवतारस्तस्य रुद्रसावर्णिनाम्नो मनोरन्तरं साधयिष्यति पालयिष्यति ॥ ३० ॥

लिङ्गेरी — सत्यमहसोनामकात्सूनृताख्यायां जातः सर्वकार्यसमर्थः स्वधामाख्यो हरेरंशो द्वादशरुद्रसावर्णिमन्वन्तरं पालयिष्यति ॥ ३० ॥

मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ।
चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३१ ॥

सत्यधर्मीया — आत्मवान् मनस्वी ॥ ३१ ॥

छलारी — देवसावर्णेर्देहजा आत्मजाः ॥ ३१ ॥

लिङ्गेरी — आत्मवान्देवसावर्णिस्त्रयोदशो मनुर्भविष्यति । चित्रसेनविचित्रादिनामानो देवसावर्णिपुत्राः ॥ ३१ ॥

देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः ।
निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा ॥ ३२ ॥

सत्यधर्मीया — दिवस्पतिर्नाम्ना । दिवः पतिः । षष्ठ्या पतिपुत्रेति सत्वविधानसामर्थ्याल्लोक-वेदसाधारण्येन वृद्धकुमारीवरन्यायेनालुक् ज्ञापितः कस्कादित्वात्सः । शतमन्युर्दिवस्पतिरित्यमरः ॥ ॥ ३२ ॥

छलारी — दिवस्पतिस्तन्नामेन्द्रः ॥ ३२ ॥

लिङ्गेरी — सुकर्मसुत्रामनामानो देवा दिवस्पतिरिन्द्रस्तदा देवसावर्णिमन्वन्तरे निर्मोकतत्त्व-दर्शादयः सप्तर्षयो भविष्यन्ति ॥ ३२ ॥

देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥ ३३ ॥

सत्यधर्मीया — देवहोत्रस्य । बृहत्यां हरेरंशो योगेश्वरः तन्नामा कुमारो दिवस्पतेरिन्द्रस्य । उपहर्ता उपकर्ता भविष्यति ॥ ३३ ॥

छलारी — यो योगेश्वरनामको हरेरवतारो बृहत्यां तन्नाम्न्यां स्त्रियां देवहोत्रस्य तनयः संभविष्यति ॥ ३३ ॥

लिङ्गेरी — देवहोत्रस्य बृहतीनाम्न्यां भार्यायां दिवस्पतिनामकेन्द्रस्यैश्वर्यादेरुपहर्ता दाता योगेश्वराख्यो हरेरंशः पुत्रो भविष्यति ॥ ३३ ॥

मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यते ।
जन्तुभीरववर्याद्या इन्द्रसावर्णिवीर्यजाः ॥ ३४ ॥

सत्यधर्मीया — चतुर्दशमोऽन्तिमः ॥ ३४ ॥

छलारी — इन्द्रसावर्णिवीर्यजाः पुत्राः ॥ ३४ ॥

लिङ्गेरी — इन्द्रसावर्णिश्चतुर्दशत्वसंख्यापूरकमनुर्भविष्यति । चतुर्दशम इत्यादिप्रयोगे मप्रत्ययः पूर्णार्थकः । जन्तुभीरववर्याद्या इन्द्रसावर्णिपुत्राः ॥ ३४ ॥

विचित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति ।
अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३५ ॥

सत्यधर्मीया — तपस्विनो ऋषयः ॥ ३५ ॥

छलारी — विचित्रादिनामानः शुचिनामक इन्द्रस्तपस्विनः सप्तर्षयः ।। ३५ ।।

लिङ्गेरी — विचित्रचाक्षुषनामानो देवाः शुचिर्नामेन्द्रो भविष्यति । अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः ।। ३५ ।।

सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ।
वितानायां महाराज क्रियातन्तून् वितायिता ।। ३६ ।।

सत्यधर्मीया — सत्रायणस्य वितानायां वनितायाम् । तदा तदनन्तरम् । हरिर्बृहद्भानुरिति नामा तनयः क्रियातन्तून् क्रियाकलापं, वितायिता । तायृ सन्तानपालनयोरिति स्मरणाद् विस्तारयितेति वा ।। ३६ ।।

छलारी — हरेरवतारमाह ।। सत्रायणस्येति । तदेन्द्रसावर्णिमन्वन्तरे हरिर्विनताख्यस्त्रियां सत्रायणाख्यस्य बृहद्भानुमनोस्तनयः सन् क्रियातन्तून् कर्मसमुदायान्वितायिता विस्तारयिष्यति ।।३६।।

लिङ्गेरी — नारायणस्य वितानायां हरिर्बृहद्भानुनामतनयः सन् क्रियासमुदायान्विस्तारयिष्यति ।। ।। ३६ ।।

राजन् चतुर्दशैतानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ।। ३७ ।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे द्वादशोऽध्यायः ।

सत्यधर्मीया — त्रिकालानुगतानि । अतीतानागतवर्तमानसञ्ज्ञान् कालाननुवर्तमानानि । मन्वन्तराणि अतीतानि षट् । सप्तमं वर्तमानम् । एष्यन्ति सप्तेति चतुर्दश । एभिर्मन्वन्तरैर्युग-चतुष्टयम् । महायुगानां सहस्रं साहस्रं तेन पर्ययः परिवर्तो यस्य सः । मित एतत्प्रमाणकः कल्पो ब्रह्मदिनकल्पः ब्रह्मणोऽहनि चैकस्मिंश्चतुर्दश मन्वन्तराणि भवन्तीति भावः ।। ३७ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे द्वादशोऽध्यायः ।। ८-१२ ।।

छलारी — चतुर्दशमन्वन्तराण्युपसंहरति ।। राजन्निति । त्रिकालानुगतान्यतीतवर्तमान-भविष्यत्कालेष्वनुगतान्यनुवर्तमानान्यतीतानि षट् । सप्तमं वर्तमानम् । भविष्याणि सप्तैवं चतुर्दशैतानि मन्वन्तराणि ते तव प्रोक्तानि । प्रसङ्गात् प्रमेयविशेषमाह ।। एभिरिति । युगचतुष्टयं महायुगमुच्यते ।

युगानां महायुगानां सहस्रेण पर्ययः परिवर्ति यस्य सः सहस्रयुगप्रमाणः कल्पो ब्रह्मयुगकल्पः । एभिश्चतुर्दशमन्वन्तरैर्मितः परिमितः सहस्रमहायुगपरिमिते ब्रह्मण एकस्मिन्नहनि चतुर्दशमन्वन्तराणि भवन्तीति भावः ।। ३७ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे द्वादशोऽध्यायः ।। ८-१२ ।।

लिङ्गेरी — हे राजन्! त्रिषु भूतभविष्यद्वर्तमानाख्येषु कालेष्वनुगतान्येतानि चतुर्दशमन्वन्तराणि ते तव प्रोक्तानि । येभिर्मन्वन्तरैश्चतुर्दशभिः कृतत्रेताद्वापरकलियुगसमुदायलक्षणमहायुगसहस्रनामतो दैनन्दिनकल्पो मितः परिमितः । एकस्मिन्दैनन्दिनकल्पे स्वायंभुवादयश्चतुर्दश मनवो भवन्तीति यावत् ।। ३७ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे द्वादशोऽध्यायः ।।८-१२।।

।। अथ त्रयोदशोऽध्यायः ।।

राजोवाच–

मन्वन्तरेषु भगवन् यथा मन्वादयस्त्विमे ।
यस्मिन् कर्मणि ये येन नियुक्तास्तद्वदस्व मे ।। १ ।।

सत्यधर्मीया — ते ते मनवस्ते ते मुनयः स स देवेन्द्रः स स भगवांश्च किं किं चक्रुरिति मुनिमवनीशः पृच्छति ।। मन्वन्तरेष्विति । मन्वन्तरेष्विमे मन्वादयः । ये येन यस्मिन् कर्मणि यथा येन प्रकारेण नियुक्ताः । भगवत्पक्षे प्रार्थितः । भगवन्निति शुकसम्बोधनं वा । तत्तेषां नियोजनं मे वदस्व गतम् ।। १ ।।

छलारी — चतुर्दशमन्वन्तरस्थानां मन्वादीनां पृथक् पृथक् कर्माणि निरूप्यन्तेऽस्मिन्नध्याये । हे भगवन् शुकाचार्य । यथा कथं य इमे मन्वादयो येन पुरुषेण यस्मिन्कर्मणि व्यापारे यथा येन प्रकारेण नियुक्ताः प्रेरिताः प्रवर्तन्ते । तत्सर्वं वदस्व ।। १ ।।

लिङ्गेरी — एवं श्रुतयज्ञादिनामकभगवान्परितोऽपि ईक्षिता परीक्षिद्विस्तरेण तच्छ्रवणकामः पुनः पृच्छतीत्याह सूतः ।। राजेत्यादिना । तत्रादौ राजा शुकं पृच्छति ।। मन्वन्तरेष्वित्यादिना । हे शुक ।

भगवान्नारायणो मन्वन्तरेषु स्वायंभुवादीन्द्रसावर्ण्यन्तचतुर्दशमनुकालेषु यथा केन प्रकारेण प्रवृत्तो भवति । तं प्रकारं इमे स्वायंभुवादिमनवः केन केन प्रकारेण वर्तन्ते एके येन केन यस्मिन्कस्मिन्कर्मणि नियुक्ता भवन्ति तत्सर्वं त्वं मे वदस्व ॥ १ ॥

ऋषिरुवाच–

मनवो मनुपुत्राश्च मुनयश्च महीपते ।
इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ ॥

सत्यधर्मीया — पुरुषस्य शासनं येषां ते तथा ॥ २ ॥

छलारी — तत्रादौ मन्वादिषट्कमध्ये भगवदवतारकर्माण्याह ॥ मनव इति । मुनयः सप्तर्षयः । येन नियुक्ता इत्यस्योत्तरम् ॥ पुरुषेति । पुरुषेण हरिणाऽऽशास्यन्ते नियुज्यन्त इति पुरुषशासनाः । ॥ २ ॥

लिङ्गेरी — इति परीक्षिता पृष्टो ऋषिः शुक उवाच ॥ मनव इति । येन नियुक्ता इत्यस्योत्तरमाह। हे महीपते । मनवो मनुपुत्राश्च मुनयश्चेन्द्राः सुरगणाश्चेते सर्वे पूर्णषड्गुणत्वादिनिमित्तेन पुरुषशब्दितविष्ण्वाज्ञानुवर्तिन एवेति ॥ २ ॥

यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ।
मन्वादयो जगद्यात्रां नयन्त्याभिः प्रचोदिताः ॥ ३ ॥

सत्यधर्मीया — स च पुरुषोऽयमिति दर्शयति ॥ यज्ञादय इति । पुरुषः पूर्णषड्गुणो भगवान् । तत्सम्बन्धिन्यः । आभिर्यज्ञादिभगवत्तनुभिः प्रचोदिता मन्वादयः स्वायम्भुवादयः । जगद्यात्रां जगज्जीवनोपायं नयन्ति कुर्वन्ति । जगद्यात्रां नयन्ति प्रापयन्तीति पृथक्पदं वा । यात्रा तु यापनोपाये गतौ देवार्चनोत्सव इति विश्वः ॥ ३ ॥

छलारी — तदेव विशदयति ॥ यज्ञादय इति । यज्ञादयो याः पौरुष्यः परस्य हरेः सम्बन्धिन्यस्तनवोऽवताराः कथिताः । मन्वन्तरेष्वाभिस्तनुभिः प्रचोदिताः सन्तो मन्वादयः । आदिपदेन मनुपुत्रा ऋषींद्रदेवा ग्राह्याः । जगद्यात्रां जगत्स्थितिं नयन्ति कुर्वन्तीत्यर्थः ॥ ३ ॥

लिङ्गेरी — ननु प्रकृतस्वायंभुवादीनां यज्ञाद्याज्ञानुवर्तनोक्तेः कथमिदानीं पुरुषाज्ञानुवर्तितोच्यत इति मन्दाशङ्कां प्रमादादुत्थां परिहरति ॥ यज्ञादय इति । हे नृप । यज्ञनामकभगवदादयो याः

पुरुषशब्दितविष्णुसंबन्धिन्यस्तनवोऽवताराः कथिता आभिस्तनुभिर्यज्ञाद्यवतारैः सम्यक् प्रेरिताः स्वायंभुवमन्वादयो जगत्प्रवृत्तिं कारयन्ति । अनेन येन यस्मिन्कर्मणि नियुक्ता इत्यस्य सामान्यत उत्तरमुक्तमिति ज्ञेयम् ।। ३ ।।

चतुर्युगान्ते कालेन ग्रस्तांच्छ्रुतिगणान् यथा ।
तपसा ऋषयोऽपश्यन् यतो धर्मः सनातनः ।। ४ ।।

सत्यधर्मीया — चतुर्युगान्ते दिनकल्पे । कालेन तद्बलेन । ग्रस्तानप्रतिभूतान् श्रुतिगणांस्तान् । यथा पूर्ववत् । ऋषयोऽपश्यन् अवलोकितवन्तः । तत्र हेतुस्तप इत्याह ।। तपसेति । वेदकर्म चेदमित्याह ।। यत इति । सनातनो धर्मो यतः सिद्ध्यति । अयं मुनिव्यापारः । हरिणोदिता इति सर्वत्र ग्राह्यम् ।। ४ ।।

छलारी — इदानीं ऋषिकर्माण्याह ।। चतुर्युगान्त इति । यतो येभ्यः श्रुतिगणेभ्यः सनातन अनाद्यनन्तकालेऽपि सर्वैः क्रियमाणो धर्मः सिध्यति । ताश्चतुर्युगान्ते दिनकल्पान्ते कालेन निमित्तेन ग्रस्तांस्तिरोहितान् श्रुतिगणान् ऋषयो यथा यथावत्तपसा सम्यक् तपः कृत्वेत्यर्थः । अपश्यन् ।। ४ ।।

लिङ्गेरी — तदेव विशिष्याह ।। चतुर्युगान्त इत्यादिना । चतुर्युगशब्दितदैनन्दिनान्तिममहायुगान्ते कालेन प्रलयरूपेण ग्रस्तान्प्रवर्तकाभावेन निगीर्णप्रायान् श्रुतिगणानृषयस्तपसा साधनेन यथावदपश्यन् ततः श्रुतिगणाद्धर्मो सनातनः सार्वकालिको ज्ञातव्यः ।। ४ ।।

ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ।
युक्ताः सञ्चारयन्त्यद्धा स्वे स्वे काले महीं नृपाः ।। ५ ।।

सत्यधर्मीया — तपः सत्यं दया शौचमिति पादचतुष्टयोपेतं धर्मं युक्ता उपायज्ञाः स्वे स्वे काले महीं संचारयन्ति । तत्र न्यून्यता नेत्याह ।। अद्धेति । अञ्जसा मह्यां धर्मं हरिप्रेरिताः प्रवर्तयन्ति । मनुव्यापारोऽयम् । नृपा राजानः ।। ५ ।।

छलारी — मनुकर्माण्याह ।। तत इति । हरिणोदिताः प्रेरिता मनवो युक्ताः सावधानमनसः सन्तः स्वे स्वे काले स्वस्याधिकारकाले महीं भूमिं, ततो वेदेषु विहितं चतुष्पादं, -तपः सत्यं दया शौचाख्यपादचतुष्टयवन्तं धर्मं सञ्चारयन्ति मह्यां धर्मं प्रवर्तयन्तीत्यर्थः ।। ५ ।।

लिङ्गेरी — ततस्तदनन्तरं ततः श्रुतिगणात् ऋषिभ्यश्चोक्तप्रकारं पादचतुष्टयोपेतं संपूर्णं धर्मं हरिणा च उदिता एतादृशो धर्म इत्युक्ताश्च । उक्तधर्मविषये युक्ताश्च युक्तायुक्तादिनियामकयुक्तियुक्ताश्च मनवः संचारयन्ति । अद्धा याथार्थ्येन ॥ ५ ॥

पालयन्ति प्रजापाला यावदन्तं विभागशः ।
यज्ञभागभुजो देवा ये च तत्रानुकीर्तिताः ॥ ६ ॥

सत्यधर्मीया — मनुतनुजनिकृत्यमाह ॥ पालयन्तीति । यावदन्तं तत्तन्मन्वन्तरावसानम् । विभागशः स्वस्वविभागानुसारेण पुत्रपौत्रपरंपरया वा । महीं पालयन्ति । देवकर्मैतदेवेति वदति ॥ यज्ञेति ॥ ६ ॥

छलारी — मनुपुत्रव्यापारमाह ॥ पालयन्तीति । प्रजापाला मनुपुत्रास्तत्तन्मनुकाले यावन्मन्वन्तरावसानं विभागशः पुत्रपौत्रादिक्रमेण महीं धर्मं पालयन्ति । देवव्यापारमाह ॥ यज्ञेति । तत्र मन्वन्तरे ये देवा अनुकीर्तिता अनुवर्णिताः । यज्ञभागभुजो यज्ञभागभोक्तारः ॥ ६ ॥

लिङ्गेरी — एवं स्वस्वकीयकाले प्रजापाला नृपा विभागशो विभागेन स्वस्वविभक्तदेशानुसारेण यावदन्तं स्वपाल्यभूमिमर्यादा तावन्महीं पालयन्ति संरक्षयन्ति । ये देवाश्चात्रानुकीर्तितास्ते यज्ञभागभुजः ॥ ६ ॥

इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् ।
भुञ्जानः पाति लोकांस्त्रीन् कामं लोके प्रवर्षति ॥ ७ ॥

सत्यधर्मीया — कामं यथेच्छम् ॥ ७ ॥

छलारी — इन्द्रव्यापारमाह ॥ इन्द्र इति ॥ ७ ॥

लिङ्गेरी — इन्द्रस्तु भगवता विष्णुना दत्तामुत्कृष्टां त्रैलोक्याधिपत्यादिसम्पदं भुञ्जानोऽनुभवन् त्रींल्लोकान् भूर्भुवःस्वर्लक्षणानि भुवनानि तत्स्थजनांश्च रक्षति । भूलोके कामं कर्षकप्रजेच्छापूर्तिर्यथा तथा मेघैर्वृष्टिं कारयति ॥ ७ ॥

ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ।
ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ॥ ८ ॥

सत्यधर्मीया — अनुयुगं युगानुसारम् । ज्ञानं तत्साधनं ब्रूते । कपिलादिः सनकादिभ्यः साक्षादसाक्षाद्रूपधरः सन् । ऋषिरूपधरः परशुरामपाराशररूपधरः । कर्मयोगं कर्ममार्गोपायम् । योगेशाश्च दत्तात्रेयादयः ।। ८ ।।

छलारी — प्रसङ्गाद्रूपान्तरैरपि जगद्धात्रा प्रवर्तनमाह ।। ज्ञानमिति । अनुयुगं प्रतियुगं हरिः सिद्धानां सनकादीनां स्वरूपधृक् । सनकाद्यन्तर्गतरूपेणेत्यर्थः । ज्ञानं ब्रूत उपदिशति । ऋषीणां याज्ञवल्क्यादीनां रूपधरः । याज्ञवल्क्याद्यन्तर्यामिणेत्यर्थः । कर्म यज्ञादिकर्ममार्गं ब्रूते । योगेशरूपधृक् योगप्रवर्तकदत्तात्रेयादिरूपधारी । तन्नामा साक्षाद्रूपेणेत्यर्थः । योगं प्राणायामादिप्रतिपादकं शास्त्रम् ।। ।। ८ ।।

लिङ्गेरी — हरिः सिद्धरूपधरः सन् कपिलाद्यवतारो भूत्वाऽनुयुगं प्रतियुगं ज्ञानं ब्रूते । चातुर्युगमिति पाठे कृतादियुगचतुष्टयम् । ऋषेर्व्यासादे रूपधारी कर्मयोगं ब्रूते । योगेशो दत्तात्रेयादि रूपवान् योगमणिमादिसाधनं ब्रूते ।। ८ ।।

सर्गं प्रजेशरूपेण दस्यून् हन्ति स्वराड्वपुः ।
कालरूपेण सर्वेषामभावाय पृथग्गुणः ।। ९ ।।

सत्यधर्मीया — प्रजेशरूपेण कृष्णदक्षादिप्रजापतिरूपेण सर्गम् । स्वराड्वपुर्दाशरथि-पृथ्वादिरूपी । दस्यून् हन्ति । कालरूपेण कल्क्यादिकालान्तर्गतरूपेण च सर्वेषामभावाय नाशाय । पृथग्गुणः कार्यार्थमुपात्तसत्त्वादिगुण इति पृथग्गुणोऽयथार्थज्ञानजनकतमोगुणप्रवर्तक इति वा ।। ९ ।।

छलारी — प्रजेशा मरीच्यादयस्तदन्तर्गतरूपेण । सर्गं करिष्यतीति शेषः । स्वराड्वपू-रामकृष्णादिराजन्यो दस्यून्हन्तीति । कालरूपेण सर्वेषामसतामभावाय नाशाय पृथग्गुणोऽयथार्थ-ज्ञानजनकतमोगुणप्रवर्तको भवति ।। ९ ।।

लिङ्गेरी — प्रजेशेषु ब्रह्मादिषु स्थितेन रूपेण सर्गं सृष्टिं करोति । स्वराडिन्द्रादिरूपेण दस्यूंश्चोरान् असुरांश्च हन्ति संहरति । पृथग्गुणस्तमोगुणप्रवर्तको भगवान् कालरूपेण सर्वसंहारकनृसंहादिरूपेण सर्वेषां जनानामभवाय नाशाय प्रवर्तते ।। ९ ।।

स्तूयमानो जनैरेभिर्मायायाऽनामरूपया ।
विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ।। १० ।।

सत्यधर्मीया — एभिः सात्त्विकैर्जनैः ऋष्यादिभिः स्तूयमानो दृश्यते । अनामरूपया मायया स्वशक्त्या विमोहितात्मभिर्नानादर्शनैर्नानाविधदुर्दर्शनवद्भिर्न च दृश्यते न ज्ञायते । विमोहितात्मभिर्मोहितात्मविरुद्धैरित्यर्थकं सत् सज्जनविशेषणमपि । चशब्दो दृश्यत इति समुच्चायकः ॥ १० ॥

छलारी — एवंविधो हरिरनामरूपयाऽप्रसिद्धस्वरूपाऽव्यक्तशब्दवाच्या, तयेत्यर्थः । मायया प्रकृत्या मोहित आत्मा मनो येषां तैरेभिर्जनैः कल्पितैर्नानादर्शनैरद्वैतादिशास्त्रैः स्तूयमानोऽपि निरूप्यमाणोऽपि न दृश्यते सम्यक् न ज्ञायते । चशब्दाद्भेदज्ञानिभिर्वेदादिसच्छास्त्रैः स्तूयमानो हरिर्ज्ञायत इति ज्ञेयम् ॥ १० ॥

लिङ्गेरी — ब्रह्मादिस्तूयमानो दृश्यते । प्राकृतनामरूपरहितया मायया नारायण्यादिरूपया मोहितात्मभिर्जनैः, स्वबुद्धिकल्पितैर्नानाप्रकारैरद्वैतादिभिर्दर्शनैः शास्त्रैरुक्तविधयोपासितो नैव दृश्यते । दृश्यते त्वग्रया बुद्ध्या, प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ इत्यादिश्रुतेः ॥ १० ॥

एतत् कल्पविकल्पस्य प्रमाणं परिकीर्तितम् ।
यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः ॥ ११ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे त्रयोदशोऽध्यायः ।

सत्यधर्मीया — पुराविदः प्राचीनविपश्चितः । यत्र चतुर्दशमन्वन्तराणि द्विविधानि भवन्तीत्याहुः । कल्पस्य महतः विकल्पस्यावान्तरकल्पस्य च प्रमाणं मानं परिकीर्तितं मया । त्वां प्रतीति शेषः ॥ ११ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे त्रयोदशोऽध्यायः ॥ ८-१३ ॥

छलारी — प्रासङ्गिकं निरूप्य प्रकृतमुपसंहरति ॥ एतदिति । पुराविदः पुरातनज्ञानिनो यत्र कल्पे चतुर्दश मन्वान्तराण्याहुस्तस्य कल्पे विकल्पस्य कल्पभेदस्यावान्तरकल्पस्येत्यर्थः । एतत्तु चतुर्दशमनुभोग्यकालस्य प्रमाणमुक्तम् ॥ ११ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे त्रयोदशोऽध्यायः ॥ ८-१३ ॥

लिङ्गेरी — हे राजन् । पुराविदः पुरातनस्थितिज्ञा यत्र चतुर्दश मन्वान्तराण्याहुस्तस्यैतत्कल्पविकल्पस्य दैनन्दिनात्मककल्पविशेषस्य प्रमाणं सहस्रयुगपर्ययो महायुगसहस्ररूपं प्रमाणमियत्ता परिकीर्तितमुक्ता ॥ ११ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे त्रयोदशोऽध्यायः ॥८-१३॥

॥ अथ चतुर्दशोऽध्यायः ॥

राजोवाच–

बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत ।
भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ॥ १ ॥

सत्यधर्मीया — याचमानाय हरये । योऽसौ भगवता बद्ध इति श्रुतहरियाचनोऽथ च श्रुतवैरोचनिबन्धश्च राजोभयासम्भावित्यमुपपाद्य तदुत्तरं श्रोतुं शुकं पृच्छति ॥ राजेति । ईश्वरः श्रीपतिः कृपणवद्दरिद्र इव । लब्धार्थः स्वयाचिततल्लब्धार्थः सन्नपि । तं कस्माद्बबन्ध ॥ १ ॥

छलारी — द्वादशाध्याये सावर्णिमन्वन्तरानुवर्णनसमये दत्वेमां याचमानायेति बलिं प्रति वामनयाचनोक्ता । तथाऽसौ भगवता बद्ध इति वामनेन बलिबन्धनं कृतमित्युक्तम् । तत्र हरियाचनबलिबन्धनयोर्निमित्तं पृच्छति राजा ॥ बलेः पदत्रयमिति । हरिः स्वयमीश्वरो भूत्वाऽपि कृपणवद्दरिद्रवद्बलेः सकाशाद्भूमेः पदत्रयं पादत्रयपरिमितां भूमिं कस्माद्धेतोरयाचत । लब्धः स्वीकृतोऽर्थस्त्रैलोक्यलक्षणो येन स तादृशो भूत्वाऽपि तं बलिं कस्माद्बबन्ध ॥ १ ॥

लिङ्गेरी — अत्रापि बलिबन्धनादि हरेर्माहात्म्यमेव प्रतिपाद्यते । तत्रादौ परीक्षिद्राजोक्तरूपं हरिमाहात्म्यं विस्तराच्छ्रोतुं शुकं पृच्छति ॥ बलेरिति । हे शुक । हरिर्नारायणः स्वयं सर्वलोकेश्वरो भूत्वाऽपि कृपणवद्बलेः सकाशाद्भूमेः पदत्रयं कस्माद्धेतोरयाचत । तथा लब्धः प्राप्तोऽर्थः स्वर्गाद्यपहरणलक्षणप्रयोजनोऽपि पुनस्तं बलिं कस्माद्बबन्ध ॥ १ ॥

एतद् वेदितुमिच्छामो महत् कौतूहलं हि नः ।
याच्ञेश्वरस्य पूर्णस्य बन्धनं वाऽप्यनागसः ॥ २ ॥

सत्यधर्मीया — प्रमेयस्य दुरुपपादताप्रतिपादनाय पुनर्विविच्याऽयाचनेऽबन्धने च हेतुमाह । पूर्णस्य शश्वत्सर्वगुणपूर्णस्य । अनागसः प्रतिज्ञातवितरणेन निरपराधस्येति ॥ २ ॥

छलारी — पूर्णस्येश्वरस्य याच्ञाऽनागसो निरपराधिनो बलेर्बन्धनं चेत्येतद्वेदितुमिच्छामोऽपेक्ष्यामः । कौतूहलमौत्सुक्यम् ॥ २ ॥

लिङ्गेरी — सर्वाभीष्टपूर्णस्येश्वरस्य याच्ञाऽनागसः निरपराधिनोऽपि बलेर्बन्धनमित्येतन्नोऽस्माकं महाकौतूहलमत्याश्चर्यकरं यस्मात्तस्मादेतत्सकारणं वेदितुं ज्ञातुं वयमिच्छामः । आगोऽपराधो मन्तुश्चेत्यमरः ॥ २ ॥

श्रीशुक उवाच–

पराजितश्रीरसुभिश्च हापितो इन्द्रेण राजन् गुरुभिः स जीवितः ।
सर्वात्मना तानभजद् भृगून् बलिः शिष्यो महान् स्वार्थनिवेदनेन ॥ ३ ॥

सत्यधर्मीया — असुभिरिन्द्रियैर्हापितोऽचेष्टां प्रापितो असुभिः स्वप्राणैः सह सजीवितो, जीवितेन जीवनेन सहित इति वा । तुल्यैश्वर्यवयःश्रीभिः स्वयूथैर्दैत्ययूथपैरिति वक्ष्यमाणत्वात् । गुरुभिः शुक्राचार्यैः । सर्वात्मना सर्वप्रकारेण । स्वार्थनिवेदनेन कृतकरिष्यमाणार्थविज्ञापनेन प्राप्तसर्वसमर्पणेन चाभजत् सिषेवे ॥ ३ ॥

छलारी — तत्र तावद्बलेस्त्रिलोकीमपहर्तुं याञ्चनादि छलं कृतवानित्युक्तम् । ब्राह्मणाराधनबलेनाखण्डलस्यैव स्वर्गविजयक्रममाह ॥ पराजित इत्यादिना यावदध्यायसमाप्ति । युद्धे पराजिता श्रीर्येन स इन्द्रेणासुभिः प्राणैश्च हापितस्त्याजितः सन् भृगुभिः शुक्राचार्यैर्जीवितस्तेषां शिष्यो महान् महात्मोदारचरितो स बलिस्तान् भृगून् भृगोर्वंशान् शुक्रादीन् अर्थानां द्रव्याणां निवेदनेन सर्वपदार्थसमर्पणेन सर्वात्मना मनोवाक्कायव्यापारैरभजदसेवत ॥ ३ ॥

लिङ्गेरी — एवं परीक्षिता पृष्टः शुक उवाच । हे राजन् । पुरेन्द्रेण देवासुरयुद्धे स बलिरपहृतैश्वर्योऽसुभिः प्राणैर्हापितस्त्याजितः पुनर्भृगुभिः शुक्रादिभिः संजीवितश्चास । तदनन्तरं महान् भृगूणां शिष्यो बलिः स्वकीयसर्वपदार्थसमर्पणेन गुरूंस्तान् शुक्रादीन् सर्वप्रकारेण सिषेवे ॥३॥

तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन् विश्वजिता त्रिलोकम् ।
जिगीषमाणं विधिनाऽभिषिच्य महाभिषेकेण महानुभावाः ॥ ४ ॥

सत्यधर्मीया — प्रीयमाणस्तत्कृतसर्वसमर्पणेन प्रीतिं कुर्वतः । त्रिलोकं जिगीषमाणं जेतुमिच्छन्तम् । विश्वजिता सर्वदक्षिणात्मकेन । अथात ऐन्द्रो महाभिषेकस्ते देवा अब्रुवन्नित्यादि ब्राह्मणबोधितविधिना अभिषिच्यतेऽनेनेत्यभिषेकस्तत्साधनं तेनाभिषिच्याभिषेकं कृत्वा । कर्मविशेषेणायाजयन् याजयामासुः । त्रिनाकमिति पठित्वा स्वर्गमिति तदर्थं वर्णयन्ति । यागमात्रेण कथं तद्योग इत्यत आह । महानुभावा महाननुभावः प्रभावो निश्चयो वा येषां ते तथा । अनुभावः प्रभावे स्यान्निश्चये भावसूचन इति विश्वः । अवितथाभिसन्धय इत्यर्थः ॥ ४ ॥

छलारी — महानुभावा अभीष्टसाधकमन्त्रसामर्थ्योपेताः प्रीयमाणाः सर्ववसुसमर्पणेन प्रीताः सन्तस्त्रिनाकं स्वर्गं जिगीषमाणं जेतुमिच्छन्तं बलिं महाभिषेकेण विधिना । अथ तमैन्द्रे महाभिषेके ते देवा अब्रुवन् । इति ऋग्वेदोक्तब्राह्मणोक्तप्रकारेणाभिषिच्य विश्वजिता तन्नामयज्ञेनायाजयन् ॥ ४ ॥

लिङ्गेरी — महान् अनुभावः स्वसामर्थ्यं येषां ते महानुभावाः । ब्रह्म भगवन्तं नारायणं वेदादींश्चाणन्त्यवगच्छन्तीति ब्राह्मणाः । व्यत्ययो बहुलमिति न्यायेन मध्यवर्णगताकारस्य पूर्वनिपातः । भृगवः शुक्रादयो बलिप्रीतिं कुर्वाणाः सन्तस्त्रिलोकं जेतुमिच्छन्तं बलिं महाभिषेकेण विधिनाऽभिषिच्य सर्वस्वदक्षिणावता विश्वजिन्नामकेन यागेन देवपूजाकारिणमकुर्वन् ॥ ४ ॥

ततो रथः काञ्चनपट्टबद्धो हयाश्च हर्यश्वतुरङ्गवर्णाः ।
ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिद्धात् ॥ ५ ॥

सत्यधर्मीया — काञ्चनपट्टः सुवर्णमयान्तरपीठादिस्तेन सम्बद्धः । पट्टो राजशासनान्तर-पीठयोरिति विश्वः । पट्टिकाभिरिति वा । हर्यश्वस्येन्द्रस्य । तुरङ्गाणां वर्ण इव वर्णो येषां ते तथा । हविर्भिः इद्धादभिवृद्धात् हुताशनादग्नेरास गतम् । आविर्बभूवुरित्यर्थः ॥ ५ ॥

छलारी — काञ्चनपट्टबद्धः सुवर्णमयपट्टिकाभिर्बद्धो हर्यश्वस्येन्द्रस्य ये तुरंगास्तेषामिव वर्णो हरितो येषां ते । हविर्भिरिद्धाद्दीप्ताद्धुताशनादग्नेरासाविर्बभूव ॥ ५ ॥

लिङ्गेरी — ततस्तदनन्तरं शुक्रादिप्रदत्तैर्हविर्भिरिद्धादभिवृद्धाद्धुताशनाद्यज्ञाग्नेः सुवर्णपट्टिकाबन्धो रथो हरयः श्वेता अश्वाः तुरंगा यस्येन्द्रस्य तस्य तुरंगा हयास्तेषां वर्ण इव वर्णो येषां ते हयाः गमनशालिनोऽश्वाश्च सिंहेन चिन्हरूपेणातिप्रकाशमानो ध्वजश्चास बभूव ॥ ५ ॥

धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ।
पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥

सत्यधर्मीया — पुरुटोपनद्धं कार्तस्वरसम्बद्धम् । तूणाविषुधी । अरिक्तौ बाणपूर्णाविदानीमुत्तर-त्राप्यक्षयिष्णुतत्कौ । पितामहः पितुर्विरोचनस्य पिता प्रह्लादः । अम्लानानि अक्षीणहर्षाणि पुष्पाणि यस्यां सा ताम् । शुक्रो जलजं शङ्खम् ॥ ६ ॥

छलारी — पुरटेन सुवर्णेनावबद्धमरिक्तावक्षयसायकौ तूणाविषुधी दिव्यं कवचं चेत्येतत्सर्वम् । हुताशनात् आसेत्यन्वयः । पितामहः प्रल्हादः । अम्लानपुष्पां नूतनपुष्पनिर्मिताम् । शुक्रो जलजं शङ्खं ददौ ॥ ६ ॥

लिङ्गेरी — पुरटेन सुवर्णेनोपनद्धं सम्यग्बद्धं दिव्यमलौकिकं धनुश्च, बाणैररिक्तावशून्यौ पूर्णौ तूर्णौ निषंगौ बाणाधारभूतौ, दिव्यं कवचं चेत्येतानि यज्ञाग्नेराविर्भूतानीति ज्ञेयम् । पितामहश्चतुर्मुखस्तस्य बलेरम्लानान्यतिरोहितकान्तिमन्ति पुष्पाणि यस्यां तां मालां ददौ । शुक्राचार्यश्च जलजं शङ्खं ददौ । विवक्षातः कारकाणि भवन्तीत्यत्र संप्रदानविवक्षाभावात्तस्येति षष्ठ्युपपत्तिः । अब्जः शङ्खे शशाङ्के चेत्यमरः ॥ ६ ॥

एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ।
प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार ॥ ७ ॥

सत्यधर्मीया — विप्राच्छक्रादार्जितः संपादितो योधनार्थः युद्धसाधनवान् । तैः शुक्राचार्यैः कल्पितस्वस्त्ययनः कृतपुण्याहवाचनादिमङ्गलक्रियः । विप्रान् । तानेव । प्रह्लादं चामन्त्र्य तेभ्यस्तस्मै च नमश्चकार ॥ ७ ॥

छलारी — एवं पूर्वोक्तप्रकारेण विप्रैः शुक्रादिभिरार्जितः संपादितो योधनार्थः युद्धपरिकरो यस्य सः । तैर्विप्रैरवकल्पितं स्वस्त्ययनं मङ्गलवाचनादिर्यस्य स बलिर्विप्रान्प्रदक्षिणीकृत्य कृतप्रणामः सन् प्रल्हादं पितामहमामन्त्र्य दृष्ट्वा नमश्चकार ॥ ७ ॥

लिङ्गेरी — एवमुक्तरीत्या स बलिर्विप्रैः शुक्रादिभिरार्जिताः संपादिता योधनस्य युद्धस्य साधनभूतपरार्था यस्य स तथा सन् तैः शुक्रादिभिः कल्पितं स्वस्त्ययनं क्षेममांगल्यादिकरं पुण्याहवाचनं यस्य स तथा सन् अथ शुक्रादीन्विप्रान्प्रदक्षणीकृत्य कृतः प्रणामो नमस्कारो येन स तथा सन् स्वपितामहं प्रल्हादमामन्त्र्य ''अहं कार्यसिद्ध्यै गच्छामि त्वमनुग्रहाण'' इत्युक्त्वा नमस्कारं कृतवान् ॥ ७ ॥

अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ।
सुस्रग्धरोऽथ सन्नद्धो धन्वी खड्गी धृतेषुधिः ॥ ८ ॥

सत्यधर्मीया — भृगुदत्तम् । वह्निमुखतः । स्रग्धरः प्रह्लाददत्तमाल्यधरः ॥ ८ ॥

छलारी — अथ रथमारुह्य रराजेत्युत्तरेणान्वयः । सुस्रग्धरः शोभनमालाधरः ॥ ८ ॥

लिङ्गेरी — अथ महारथो बलिर्भृगुभिर्दत्तं दिव्यं रथमारुह्य समीचीनपुष्पमालाधारी धनुष्मान् खड्गवान् गृहीतनिषंगश्चेत्येवं सन्नद्धः । निषङ्गा इषुधिर्द्वयोरित्यमरः ॥ ८ ॥

हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः ।
रराज रथमारुढो धिष्ण्यस्थ इव हव्यवाट् ॥ ९ ॥

सत्यधर्मीया — धिष्ण्यस्थ आहवनीयादिस्थानस्थः । हव्यं वहतीति स तथा ॥ ९ ॥

छलारी — हेमांगदाभ्यां सुवर्णांगदाभ्यां लसन्तौ बाहू यस्य सः । धिष्ण्यस्थः कुण्डलस्थो हव्यवाट् अग्निरिव ॥ ९ ॥

लिङ्गेरी — हेम्नः सुवर्णस्यांगदाभ्यां बाहुभूषणाभ्यां लसन्तौ प्रकाशमानौ बाहू यस्य सः । स्फुरती प्रकाशमाने मकराकारे कुण्डले यस्य सो बली रथारूढः सन् धिष्ण्ये आहवनीयादिरूपे स्वस्थाने वर्तमानो हव्यवाडग्निरिव रराज ॥ ९ ॥

तुल्यैश्वर्यवयःश्रीभिः स्वयूथैर्दैत्ययूथपैः ।
पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥ १० ॥

सत्यधर्मीया — परिधीन् यज्ञीयतरुविशेषान् । तरुशाखा वा । परिधिर्यज्ञीयतरौ शाखायां चेति विश्वः । अग्निरिव परिधीन् दिश इति वा ॥ १० ॥

छलारी — स्वतुल्यमैश्वर्यं रथश्च श्रीश्च येषां तैः स्वयूथैः स्वकीयैर्दैत्ययूथपैर्वृतो ऋद्धां समृद्धामिन्द्रपुरीं स्वर्गं प्रति ययाविति द्वयोः श्लोकयोरन्वयः । कथंभूतैर्दृग्भिः खमन्तरिक्षं पिबद्भिरिव परिधीन्दिशो दहद्भिरिव ॥ १० ॥

लिङ्गेरी — स बलिस्तुल्याः स्वैश्वर्यादिभिः समानैश्वर्यवयःकान्तयो येषां तैः स्वसेनासमूहसहितैर्दृग्भिष्टिभिः खमाकाशं पिबद्भिरिव स्थितैः, अग्निः परिधीन् समिध इव लोकान्दहद्भिर्दैत्यसेनासमूहरक्षकैर्वृतः सन् संख्याबाहुल्यादिना महतीमसुरसंबन्धिनीं ध्वजिनीं सेनां विकर्षन् तन्नियमने विभुः समर्थः सन् ऋद्धां संपदाभिवृद्धामिन्द्रपुरीं प्रति भूम्यन्तरिक्षे कंपयन्निर्ययौ । द्यावाभूमी तु रोदसीत्यमरः ॥ १०,११ ॥

वृतो विकर्षन् महतीमासुरीं ध्वजिनीं विभुः ।
ययाविन्द्रपुरीमृद्धां कम्पयन्निव रोदसीम् ॥ ११ ॥

सत्यधर्मीया — रोदसी द्यावापृथिव्यौ । ऋद्धां ससम्पत्काम् ॥ ११ ॥

छलारी — ध्वजिनीं सेनां विकर्षन् आकार्षन्प्रेरयन्नित्यर्थः । रोदसी द्यावापृथिव्यौ कंपयन्निव ॥ ॥ ११ ॥

रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः ।
कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ १२ ॥

सत्यधर्मीया — विहङ्गमिथुनैः पक्षिस्त्रीपुंसैर्युतैः ॥ १२ ॥

छलारी — अतिसमृद्धामित्युक्तम् । तां समृद्धिमेव वर्णयति ॥ रम्यामित्यादिभिः सार्धैरेकादशभिः । उपवनानि फलप्रधानानि । निकटानि चोद्यानानि पुष्पप्रधानानि दूरस्थानि वा तै रम्याम् । कथम्भूतैः । कूजन्ति विहंगमिथुनानि येषु तैर्गायन्तो मत्ता मधुव्रता भ्रमरा येषु तैः ॥ १२ ॥

लिङ्गेरी — प्रवालानां विद्रुमवतां सुवर्णपल्लवानां फलानां पुष्पाणां चोरूत्कृष्टो भारो यासां ताः शाखा येषां ते प्रवालफलपुष्पोरुभारशाखाः ॥ प्रवाले विद्रुमे च नपुंसकमिति नानार्थमुक्तामाला । ते चामरद्रुमाः पारिजातादिदेववृक्षा येषु तैः । श्रीमद्भिः पुष्पफलादि संपद्युक्तैर्नन्दनादिभिरुपवनोद्यानैः, कूजतां स्वजातिस्वरं कुर्वतां विहंगानां पक्षिणां मिथुनैः स्त्रीपुरुषैः गायद्भिरिव स्थितैः पुष्पादिरसपानमदोपेतैर्मधुव्रतैर्भ्रमरैः रम्यां मनोहरामिन्द्रपुरीं ययाविति पूर्वेणान्वयः । मधुव्रतो मधुकरो मधुलिण्मधुपालिन इत्यमरः । यत्रेन्द्रपुर्यां हंसचक्रवाककारण्डवपक्षिसमुदायसंदटिता नलिन्यः कमलसरोवराः सन्ति ॥ १२,१३ ॥

प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ।
हंससारसचक्राह्वकारण्डवकुलाकुलाम् ॥ १३ ॥

सत्यधर्मीया — अमरद्रुमै रम्यामित्यन्वयः । हंसादिपक्षिकुलैराकुला । ताम् ॥ १३ ॥

छलारी — प्रवालादीनां पल्लवादीनामुरुभारो यासु तादृशाः शाखा येषां तादृशा अमरद्रुमा येषु तैः ॥ १३ ॥

नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः ।
आकाशगङ्गया देव्या वृतां परिखभूतया ॥ १४ ॥

सत्यधर्मीया — यत्र प्रमदाः क्रीडन्ति सुरसेविताश्च । यत्र यस्यां नलिन्यः पद्मिन्यस्ताभिर्वृतामिति वा वर्तत इति वा शेषः । नलिनी पद्मिनी पद्मेत्यादिर्विश्वः । परिखभूतया । परिखाभूतया । परिवर्जितं खं विवरं यस्याः सा च सा भूश्च तया ऊता सम्बद्धा तयेति वा । सर्वां सर्वसहामभिव्याप्य वियद्गंगा वर्तत इति भावः । खेयं तु परिखेत्यमरः ॥ १४ ॥

छलारी — यत्र नलिनीषु सुरसेविता वनिताः क्रीडन्ति । ता एवं हंसादिपक्षिकुलेनाकुला व्याप्ता नलिन्यः सरांसि यत्र येषु वनेषु सन्ति । तैरुपवनोद्यानै रम्यामिति पूर्वेणान्वयः । परिखभूतया जलदुर्गवद्विद्यमानयेत्यर्थः । आकाशगङ्गया भागीरथ्याऽऽवृताम् ॥ १४ ॥

लिङ्गेरी — यत्र नलिनीषु सुरैः सेविता बहुमानिताः प्रमदाः स्त्रियः क्रीडन्ति । तामिन्द्रपुरीं ययाविति पूर्वेणान्वयः । तामेवेन्द्रपुरीं विशिनष्टि । परिखभूतया दुर्गस्य परितः खातपूर्णजलरूपया । देवसेवयाऽऽकाशगङ्गया वृताम् ॥ १४ ॥

प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ।
रुग्मपट्टकपाटैश्च द्वारैः स्फाटिकगोपुरैः ॥ १५ ॥

सत्यधर्मीया — पट्टमुपरिबन्धः । कं वातं शिरो वा पाटयन्तीति कपाटानि । कवं शब्दमटन्तीति तानि । कपाटमररं तुल्य इत्यमरः । द्वारैः प्रतीहारैः । स्त्री द्वार्द्वारं प्रतीहार इत्यमरः । स्फाटिकानि स्फटिककृतानि गोपुराणि पुरद्वाराणि तैः । पुरद्वारन्तु गोपुरमित्यमरः ॥ १५ ॥

छलारी — अग्निवर्णेन सौवर्णेन प्राकारेण चावृताम् । आट्टालाः प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन । रुक्मपट्टानि सुवर्णमयोपरिबन्धवन्ति कपाटानि येषु तैर्द्वारैर्गृहद्वारैः स्फटिकमयगोपुरैः पुरद्वारैश्च जुष्टां युक्ताम् ॥ १५ ॥

लिङ्गेरी — ज्वलदग्निवर्णसदृशवर्णेन । प्राकारान्तपरितः सञ्चारयोग्यकुड्यरूपाट्टालसहितेन प्राकारेण वृताम् । सुवर्णपट्टिकाबन्धकपाटवद्भिर्द्वारैः स्फटिकमणिनिर्मितपुरद्वारैश्च वृताम् । रुग्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यमरः । कपाटमररं तुल्ये । पुरद्वारं तु गोपुरमिति च ॥ १५ ॥

जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ।
सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ।
शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥

सत्यधर्मीया — प्रकृष्टाः पन्थानश्च प्रपथाः, विभक्तास्तत्तद्वीथीगमानार्थविभागिनो यस्यां सा रथ्या प्रतोली । विमानैर्व्योमयानैः । शृङ्गाटकैः । शृङ्गं प्राधान्यमटन्ति । अट गतौ । कर्मण्यण् । सञ्ज्ञायां कन् । तुल्ये शृङ्गाटकचतुष्पथेत्यमरः । चतुष्पथैः । वज्रविद्रुमात्मवेदिकाभिर्जुष्टाम् ॥ १६ ॥

छलारी — विभक्ता विसृताः प्रपथा राजमार्गा यस्यास्ताम् । सभा उपवेशस्थानानि चत्वराण्यङ्गणानि रथ्या उपमार्गास्तैराढ्यां सम्पन्नाम् । दशकोटिवाचकन्यर्बुदशब्दो बहुत्ववाचकः । तथा च बहुभिर्विमानैर्युताम् । वज्रैर्विद्रुमैश्च रचिता वेदयो वेदिका येषु तैर्मणिमयैर्नवरत्नखचितैः शृङ्गाटकैश्चतुष्पथैर्युताम् ॥ १६ ॥

लिङ्गेरी — जुष्टां नानाविधजनैः सेवितां, विविक्तप्रकृष्टमार्गोपेतां, सभाभिश्चत्वरैरंगणै रथ्याभिः रथवीथिकाभिश्चाढ्यां संपन्नां, न्यर्बुदसंख्याकैर्विमानैर्देवयानैर्वृतां, विश्वकर्मणा विनिर्मिताम् । अंगणं चत्वराजिरे । रथ्या प्रतोली विशिखेति चामरः । मणिमयैः रत्नप्रचुरैर्वज्रमणिभिर्विद्रुमैः प्रवालैश्च रचितवेदिकावद्भिः शृङ्गाटकैश्चतुष्पथैर्युक्तमिति पूर्वेणान्वयः । शृङ्गाटक चतुष्पथे । प्रवालं विद्रुमोऽस्त्रियामिति चामरः ॥ १६ ॥

यत्र नित्यवयोरूपाः श्यामा विरजवाससः ।
भ्राजन्ते रूपवन्नार्य अर्चिर्भिरिव वह्नयः ॥ १७ ॥

सत्यधर्मीया — रूपवन्नार्यो रूपवत्यः । श्यामाः षोडशवार्षिक्यः । वर्णतः श्यामा वा । ताश्च ता नार्यश्च ॥ १७ ॥

छलारी — यत्रेन्द्रपुर्यां नित्यं वयस्तारुण्यं रूपं च सौन्दर्यं च यासां ताः श्यामाः षोडशवत्सराः । श्यामाः षोडशवार्षिका इत्यभिधानात् । विरजवाससो निर्मलवस्त्राः रूपवत्यः स्वलङ्कृताः स्त्रियोऽर्चिभिर्ज्वालाभिर्वह्नय इव भ्राजन्ते ॥ १७ ॥

लिङ्गेरी — यस्यामिन्द्रपुर्यां नित्यानि बहुकालवन्ति वयो रूपाणि येषां ते । श्यामाः षोडशवार्षिकाः । विरजवाससो निर्मलवस्त्राः पुरुषाः स्त्रीभिर्वह्नयोऽग्नयोऽर्चिभिः स्वशिखाभि-

ज्वालाभिरिव भ्राजन्ते । श्यामः षोडशवर्षः स्यात् श्यामवर्णे च तद्वतीति नानार्थरत्नमाला । द्वयोर्ज्वालकीलावर्चिरित्यमरः ॥ १७ ॥

सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम् ।
यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ १८ ॥

सत्यधर्मीया — सौगन्धिकानाम् । सौगन्धिकं तु कल्हार इत्यमरः । तेषां स्रजः तासाम् । आमोदं परिमलम् ॥ १८ ॥

छलारी — यत्र मारुतः सुरस्त्रीणां केशेभ्यो विभ्रष्टानां पतितानां नवैर्नूतनैः सौगन्धिकैः स्थलचंपकैः पुष्पैर्विनिर्मितानां स्रजां मालानामामोदं परिमलमुपादाय मार्गे आवाति ॥ १८ ॥

लिङ्गेरी — यत्रेन्द्रपुर्यां मार्गे सुरस्त्रीकेशेभ्यो विभ्रष्टाया नूतनकल्हारपुष्पमालाया आमोदं परिमलमुपादाय मारुतो वायुर्वातीतस्ततो गच्छति । नूतनं नवम् । सौगन्धिकं तु कल्हारमिति चामरः ॥ १८ ॥

हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना ।
पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरस्त्रियः ॥ १९ ॥

सत्यधर्मीया — हेमजालाक्षेभ्यः सुवर्णगवाक्षेभ्यः । अगुरोः येगकस्येव गन्धो यस्याम् । उपमानाच्चेतीत्वम् । अगुरुः शिशुपायां स्यात्येगक इति विश्वः । कालागुर्वगुरुः स्यात्तु मङ्गल्यं मल्लिगन्धि यत् । वंशकागुरुराजार्हलोककृमिजजौङ्गकमित्यमरः । कृष्णागरुः ॥ १९ ॥

छलारी — अगरुगन्धिना कृष्णागरुगन्धवता पाण्डुरेण शुभ्रेण हेमलाजाक्षेभ्यः सुवर्णगवाक्षेभ्यो निर्गच्छता धूमेन प्रतिच्छन्ने व्याप्ते सुरप्रिया अप्सरसः ॥ १९ ॥

लिङ्गेरी — यत्रेन्द्रपुर्यां सुवर्णनिर्मितगवाक्षेभ्यो बहिरागच्छमानेन कृष्णागरुपरिमलवता पाण्डुरेण शुभ्रेण धूमेनाच्छादितमार्गे सुरस्त्रियो गच्छन्ति । श्वेतपाण्डुरा इत्यमरः ॥ १९ ॥

मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ।
शिखण्डिपारावतभृङ्गनादितां वैमानिकस्त्रीकलगीतमङ्गलाम् ॥ २० ॥

सत्यधर्मीया — मुक्तामयैर्वितानैरुल्लोचैः मणिहेमकेतवस्तदात्मकैकचिह्नध्वजाः तैः । नानापताकाश्च द्विजिह्वाश्च नानावलभ्यो वक्रदारूणि । छादनी वक्रदारुणीत्यमरः । ताभिः । वैमानिका विमानस्थानाश्च ताः स्त्रियश्च तासां कलमव्यक्तमधुरं यद्गीतं गानम् । तेन मङ्गलं यस्यां सा ताम् । कलः शुके कलो जीर्णेऽप्यव्यक्तमधुरध्वनावित्यमरः ॥ २० ॥

छलारी — मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिर्ध्वजैश्च नानाविधपताकायुक्ताभिः । वलिभीभिश्च विमानानां पुरोभागैरावृतां व्याप्ताम् । पताकावलिभिः समावृतामिति पाठे स्पष्टोऽर्थः । वैमानिकानां विमानोपर्युपविष्टानां स्त्रीणां कलगीतैर्मधुरगायनैर्मङ्गलां शोभितां शिखण्डिभिर्मयूरैः पारावतैः परभृतैर्भ्रमरैश्च नादिताम् ॥ २० ॥

लिङ्गेरी — मुक्तामालावलंबिवितानैर्गृहान्त उपरिबद्धपटैः रत्नखचितकेतुभिर्ध्वजैर्नानाप्रकार-पताकाभिर्वलिभीभिर्गृहस्य परितः श्रृङ्गारायावबद्धवक्रदारुभिरावृताम् । शिखण्डिपारावतभृङ्गैर्नादो ध्वनिस्तेन संजातो यस्यां ताम् । वैमानिकानां देवानां स्त्रीणां कलगीतैरस्पष्टाक्षरमनोहर-स्वरगानैर्माङ्गल्योपेताम् । नादितामित्यत्र तदस्य संजातं तारकादिभ्य इतजिति नादशब्दस्य इतच् प्रत्ययः । एवमेव जातीयकेऽपि ज्ञेयम् । ध्वनौ तु मधुरास्फुटे कल इत्यमरः ॥२०॥

मृदङ्गशङ्खानकदुन्दुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ।
नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितग्रहाम् ॥ २१ ॥

सत्यधर्मीया — सतालेत्यादिध्वनिसहितैर्मृदङ्गादिस्वनैर्जिताः पराजिता ग्रहा नव सूर्यादयो यया ताम् ॥ २१ ॥

छलारी — तालैः सहिताभिर्वीणादिभिः सवाद्यैर्नृत्यैरुपदेवानां गन्धर्वाणां गीतकैश्च मनोरमाम् । स्वप्रभया जिता तिरस्कृता ग्रहाः सूर्यादयो यया सा ताम् ॥ २१ ॥

लिङ्गेरी — मृदङ्गादीनां ध्वनिभिः सहिताम् । वाद्यसहितैर्नर्तनैरुपदेवानां गन्धर्वाणां गानैर्मनोरमाम् । स्वप्रभया जिताः अभिभूता ग्रहाः सूर्यादिनवग्रहा यया ताम् ॥ २१ ॥

यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः ।
मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्त्युत ॥ २२ ॥

सत्यधर्मीया — एभिरधर्मिष्ठत्वादिभिर्हीना रहिताः ॥ २२ ॥

छलारी — अधर्मिष्ठाः पापकर्तारः खला दुर्जना भूतद्रुहः प्राणिनामपकारकारिणः शठा गूढद्वेषिणो मानिनोऽहङ्कारिणः कामिनः कामुकाः । लुब्धाः सत्पात्रेऽदातारश्च । यां न व्रजन्ति । एभिः पूर्वोक्तैरधर्मादिभिर्दोषै रहिताः पुरुषाः यामिन्द्रपुरीं व्रजन्ति । यत्र नित्यवयोरूपा इत्यादि यच्छब्दानां तामित्युत्तरेणान्वयः ॥ २२ ॥

लिङ्गेरी — यामिन्द्रपुरीं खला गूढद्वेषा भूतान्प्राणिनो द्रुह्यन्तीति प्राणिद्रोहिणः शठाः स्तब्धा मानिनोऽहंकारिणः कामिनो निषिद्धापेक्षावन्तो लुब्धा अदानबुद्धय इत्येवमादयोऽधर्मिष्ठा अतिपापिनो न गच्छन्तीत्येभिर्गूढद्वेषादिभी रहिता गच्छन्त्यपि । अतिशायेने तमबिष्ठनावित्यधर्मशब्दस्येष्ठन् प्रत्ययः ॥ २२ ॥

तां देवधानीं स वरूथिनीपतिर्बहिः समन्ताद् रुरुधे पृतन्यया ।
आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुञ्जन् भयमिन्द्रयोषिताम् ॥ २३ ॥

सत्यधर्मीया — पृतन्यया पृतनया । देवधानीममरावतीम् । योषितामिति बहुवचनेन शच्यादयो बव्ह्यः पत्न्य इन्द्रस्येति ज्ञायते । श्रौतं च सपत्नीं मे पराधमेति ॥ २३ ॥

छलारी — तां देवधानीं देवपुरीं वरूथिनीपतिः सेनापतिः स बलिः पुर्या बहिः समन्तात्परितः पृतन्यया सेनया रुरुधे । आचार्येण शुक्रेण दत्तं जलजं शङ्खम् । प्रयुंजन् जनयन् ॥ २३ ॥

लिङ्गेरी — वरूथिनीनां पतिः पालकः स्वामी च स बलिस्तां पूर्वोक्तगुणां देवास्तिष्ठन्त्यस्यामिति देवधानीममरावतीं बहिः समन्तात्परितः पृतन्यया सेनया रुरुधे निरुद्धवान् । अथेन्द्रस्त्रीणां भयं जनयन् सन् शुक्राचार्यदत्तं महाध्वनियुक्तं जलजं शङ्खं दध्मौ ध्वनियुक्तमकरोत् । पृतना च वरूथिनीति हलः । स्त्री योषिदबला योषेत्यमरः ॥ २३ ॥

मघवांस्तदभिप्रेत्य बलेः परममुद्यमम् ।
सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥

सत्यधर्मीया — गुरुं बृहस्पतिम् ॥ २४ ॥

छलारी — मघवानिन्द्रो बृहस्पतिम् ॥ २४ ॥

लिङ्गेरी — मघवानिन्द्रो बलेस्तत्परममुद्यममुद्योगमभिप्रेत्य युद्धकरणाभिप्रायेणागत इति सम्यग्ज्ञात्वा सर्वदेवगणोपेतः सन् गुरुं बृहस्पतिं प्रत्येतद्वक्ष्यमाणमुवाच ॥ २४ ॥

इन्द्र उवाच–

भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः ।
अविषह्यमिदं मन्ये केनासीत् तेजसाऽसमः ॥ २५ ॥

सत्यधर्मीया — इदं तेजः । केन हेतुना असमः असदृशः । इतरोऽर्थस्तूत्तराननुगुणः ॥ २५ ॥

छलारी — भूयानुद्यमो महान्प्रयत्नो दृश्यते । इमं बलिमविषह्यं सोढुमशक्यं मन्ये । अयं केन हेतुनैवं तेजसोर्जित आसीत् ॥ २५ ॥

लिङ्गेरी — हे भगवन् पूज्य बृहस्पते । नः पूर्ववैरिणो बलेरुद्यम उद्योगो भूयान् । इमं बलिमविषह्यं सोढुं सहितुमशक्यमहं मन्ये । अयं बलिः केन तेजसा तप आदिरूपेणासमः समानरहितः आसीत् ॥ २५ ॥

नैनं कश्चित् कुतो वापि प्रतिवोढुमधीश्वरः ।
पिबन्निव मुखेनेदं लिहन्निव दिशो दश ॥ २६ ॥

सत्यधर्मीया — प्रतिवोढुमपवाहयितुम् । अधीश्वरः शक्रः । तत्तेजः एव वर्णयति पिबन्निवेत्यादिना ॥ २६ ॥

छलारी — कुतो वाऽपि कुतश्चित्कारणादपि प्रतिवोढुं प्रतियोद्धुमपाकर्तुं वाऽधीश्वरः समर्थः । इदं जगद्दश दिशो लिहन्नास्वादयन्निव ॥ २६ ॥

लिङ्गेरी — तदेव विवृणोति । नैनमिति । कश्चिदपि वीरः कुतः कस्मादपि साधनाद्येनं बलिं प्रत्याभिमुख्येन वोढुं शस्त्रादिकं धर्तुमधीश्वरः समर्थो न भवेत् । अयं बलिर्मुखेनेदं जगत्पिबन्निवास्ते । जिव्हया दश दिशो लिहन्नास्वादयन्निवास्ते ॥ २६ ॥

दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ २७ ॥

सत्यधर्मीया — संवर्ताग्निः प्रलयानलः ॥ २७ ॥

छलारी — दृग्भिर्नभोऽन्तरिक्षं दहन्निव सांवर्तकाग्निरिव प्रलयाग्निरिवोत्थितः ॥ २७ ॥

लिङ्गेरी — उत्थितोऽभिवृद्धः संवर्ताग्निः प्रलयाग्निरिव दृष्टिभिर्नभोऽन्तरिक्षं दहन्निव वर्तते । संवर्त प्रलय इत्यमरः ॥ २७ ॥

ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ।
ओजः सहो बलं तेजो यत एष समुद्यमः ॥ २८ ॥

सत्यधर्मीया — यत एतत्सर्वं तत्कारणं ब्रूहि ॥ २८ ॥

छलारी — यतः कारणाद्बलेरोजआदिकमासीत् । यत ओजआदेर्निमित्तादेष उद्यम आसीत् । मद्रिपोर्मम शत्रोर्बलेरेतस्यैतादृशस्य दुर्धर्षत्वस्य धर्षयितुमशक्यत्वस्य कारणं ब्रूहि ॥ २८ ॥

लिङ्गेरी — हे बृहस्पते । त्वं मद्रिपोर्बलेर्यदोजोऽवष्टंभशक्तिः, परनिरोधशक्तिः, सहनशक्तिर्बलं शारीरशक्तिस्तेजः प्रताप इत्येतेषां तत्प्रयुक्तदुर्धर्षत्वस्य च कारणं ब्रूहि । यत ओजादिभिरेषः समुद्यमो जातः ॥ २८ ॥

गुरुरुवाच–

जानामि मघवन् शत्रोरुन्नतेरस्य कारणम् ।
शिष्यायोपभृतं तेजो गुरुभिर्ब्रह्मवादिभिः ॥ २९ ॥

सत्यधर्मीया — शत्रोरुन्नतेरुच्छ्रयस्य । शिष्यायास्मै बलये । गुरुभिः शुक्राचार्यैः । तेज उपभृतं पूरितम् ॥ २९ ॥

छलारी — अस्य बलेरुन्नतेरुत्कर्षस्य कारणम् । तत्किं ब्रह्मवादिभिः ॥ २९ ॥

लिङ्गेरी — एवं मघवता पृष्टो बृहस्पतिरुवाच । हे मघवन् । तव शत्रोर्बलेरुन्नतेरुत्कर्षस्य कारणं ब्रह्मवादिभिर्गुरुभिर्भृगुभिः स्वशिष्यायोपभृतं विद्योपदेशादिना पूर्तं तेजः शौर्यमिति जानामि ॥ २९ ॥

भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम् ।
नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः ॥ ३० ॥

सत्यधर्मीया — भवान्भवद्विधस्त्वत्सदृशः । कृतान्तस्य जना पुरःस्थातुं यथा न शक्तास्तथा न शक्तः । तर्हि कोऽपि नास्ति किमित्यत आह । ईश्वरं हरिं वर्जयित्वा त्यक्त्वेति । स एकः शक्त इति भावः ॥ ३० ॥

छलारी — भवद्विधो भवत्सदृशो वाऽस्य बलेः पुरः स्थातुं न शक्तः । यथा कृतान्तस्य यमस्य पुरतो जनः स्थातुं न शक्तस्तद्वत् ॥ ३० ॥

लिङ्गेरी — हे मघवन् । जनाः कृतान्तस्य यमस्य पुरः स्थातुं यथा न शक्नुवन्ति तथा हरिं नारायणं विना भवत्सदृशोऽन्यो देवो भवानपि वाऽस्य बलेः पुरःस्थातुं शक्तो न । कृतान्तो यमुनाभ्राता शमनो यमराड्यम इत्यमरः ।। ३० ।।

तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् ।
यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ।। ३१ ।।

सत्यधर्मीया — अरण्यरोदनवदिदं जातं गुरो । किमुत्तरत्रास्माभिः कर्तव्यमित्यत आह ।। तस्मादिति । निलयं त्रिविष्टपं स्वर्गम् । प्रतीक्षन्तो यात । प्रतीक्षमाणो यतो यदवधिकः शत्रोर्विपर्ययस्तं कालम् ।। ३१ ।।

छलारी — अत्रोचितमुपायमाह ।। तस्मादिति । यूयं त्रिविष्टपं स्वर्गमुत्सृज्य निलयमदर्शनमित्यर्थः । यात प्राप्नुत । कथम्भूताः । यतः कालाच्छत्रोर्विपर्ययो विपत्तिः स्यात् । तं कालं प्रतीक्षन्तो प्रतीक्ष्यमाणाः ।। ३१ ।।

लिङ्गेरी — हे मघवन् । यत उक्तरीत्या शत्रोर्बलेर्विपर्ययो वैपरीत्यं भवदपकृष्टशौर्यादिमत्वं तस्य तदपेक्षयोत्कृष्टशौर्यादिमत्वं तस्माद्यूयं सर्वे•स्वोत्कर्षकालं प्रतीक्षन्तः सन्तो निलयमाश्रयभूतं त्रिविष्टपं स्वर्गमुत्सृज्यान्यत्र यात गच्छत ।। ३१ ।।

एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः ।
एषामेवावमानेन सानुबन्धो विनङ्क्ष्यति ।। ३२ ।।

सत्यधर्मीया — अन्ततो गत्वैतच्छामकं किं वदेत्यतो वक्ति ।। एष इति । संप्रतीदानीम् । एषामेव शुक्राचार्याणामेव ।। ३२ ।।

छलारी — केनास्य विपर्ययः स्यादित्यत आह ।। एष इति । एष बलिर्विप्राणां बलेनोदर्कोऽभिवृद्धोऽत एवं संप्रतीदानीमुत्कृष्टपराक्रमः । एषामेव भृगूणामेवापमानेन सानुबन्धः सकुटुम्बो विनंक्ष्यति नाशं प्राप्स्यति ।। ३२ ।।

लिङ्गेरी — एषो बलिः संप्रतीदानीं शुक्रादिविप्राणामनुग्रहेण बलेन शरीरशक्त्योदर्क उत्कृष्टः ऊर्जितपराक्रमश्च । तथाऽप्युत्तरकाले एषामेव शुक्रादीनामवमानेन स्वकृतेन सानुबन्धो देहिसंबन्ध्यादिभिः सहितः सन् विनष्टो भविष्यति । एतर्हि संप्रतीदानीमित्यमरः ।। ३२ ।।

श्रीशुक उवाच—

एवं सुमन्त्रितार्थास्ते गुरुणाऽर्थानुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥ ३३ ॥

सत्यधर्मीया — अर्थानुदर्शिना । एष्यदर्थज्ञेन तत्प्रदर्शकेन वा । बहिः पृतनावृत्तेः कथं त्रिविष्टपं त्यक्त्वा गता गीर्वाणा इत्यत आह ॥ कामरूपिण इति । गुर्वाज्ञाकारित्वादेतत्पूर्तिसामर्थ्यम् । अर्थपरिज्ञातता च तेषामिति भावः ॥ ३३ ॥

छलारी — अर्थानुदर्शिना देशकालोचितकार्यदर्शिना गुरुणैवं सुमन्त्रितो विचारितोऽर्थः कार्यं येषां ते गीर्वाणा देवास्त्रिविष्टपं स्वर्गं हित्वा कामरूपिणः प्रच्छन्नाकाराः सन्तो निलयनं जग्मुः ॥३३॥

लिङ्गेरी — ते गीर्वाणा देवा अर्थानुदर्शिना भविष्यत्प्रयोजनाभिज्ञेन गुरुणा बृहस्पतिनैवमुक्तरीत्या सुमन्त्रिता विचारिता अर्थाः प्रयोजनानि यैस्ते सन्तः स्वेच्छानुसारिरूपधारिणश्च सन्तस्त्रिविष्टपं परित्यज्य गतवन्तः । गीर्वाणा दानवारय इत्यमरः ॥ ३३ ॥

देवेष्वतिविलीनेषु बलिर्वैरोचनः पुरीम् ।
देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ॥ ३४ ॥

सत्यधर्मीया — अतिविलीनेषु अत्यन्तमदर्शनं गतेषु ॥ ३४ ॥

छलारी — अतिविलीनेष्वदर्शनं गतेषु सत्सु देवधानीं देवाश्रयां पुरीं स्वर्गमधिष्ठायाश्रित्य । निन्ये चक्रे ॥ ३४ ॥

लिङ्गेरी — विरोचनपुत्रो बलिर्देवेष्विन्द्रादिषूक्तरीत्या विलीनेष्वाच्छादितस्वरूपेषु सत्सु स्वयं देवधानीं पुरीममरावतीम् । पुर्यामिति यावत् । अधिष्ठाय स्थित्वा भूर्भुवःस्वर्लक्षणं जगत्त्रयं स्ववशं चक्रे । अधिशीङ्स्थासां कर्मेति अध्युपपदानां स्वप्नगतिनिवृत्त्युपवेशनार्थानां शीङ्स्थासामधिकरणस्य कर्मसंज्ञाविधानाद्देवधानीमिति कर्मणि द्वितीया ॥ ३४ ॥

तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ।
शतेन हयमेधानामनुव्रतमयाजयन् ॥ ३५ ॥

सत्यधर्मीया — हयमेधानां शतेन । इन्द्रमुख्यलक्षणत्वात्तस्येति भावः ॥ ३५ ॥

छलारी — एवं प्राप्तमिन्द्रपदं स्थिरं कर्तुं भृगवो बलिमयाजयन्नित्याह ।। तमिति । अनुव्रतमनुवर्तिनं हयमेधानामश्वमेधानां शतेन ।। ३५ ।।

लिङ्गेरी — शिष्ये बलौ वात्सल्योपेता भृगवः शुक्रादयः सर्वजगद्विजयवन्तं स्वेषामनुव्रतमनुकूलं शिष्यं तं बलिमश्वमेधानां यज्ञानां शतेनायाजयन् देवपूजाकारिणमकुर्वन् ।। ३५ ।।

ततस्तदनुभावेन भुवनत्रयविश्रुताम् ।
कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव ।। ३६ ।।

सत्यधर्मीया — वितन्वानो विततां कुर्वाणः ।। ३६ ।।

छलारी — तदनुभावेनाश्वमेधमहिम्ना । उडुराडिव चन्द्र इव ।। ३६ ।।

लिङ्गेरी — ततः स बलिस्तेषां शुक्रादीनामनुभावेन समग्रानुग्रहरूपेण भुवनत्रये प्रसिद्धां कीर्तिं दिक्षु विस्तारयन् उडूनां नक्षत्राणां राडधिपतिश्चन्द्र इव दीप्तिमानभूत् ।। ३६ ।।

बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम् ।
कृतकृत्यमिवात्मानं मन्यमानो महामनाः ।। ३७ ।।

इति श्रीमद्भागवते अष्टमस्कन्धे चतुर्दशोऽध्यायः ।

सत्यधर्मीया — स्वृद्धां सम्यगभिवृद्धाम् । द्विजदेवाः शुक्राचार्याः तैरुपलम्भितां प्रापिताम् । आत्मानं स्वं कृतकृत्यमिव मन्यमानो महामनाः श्रियं बुभुज इत्यन्वयः । इव महामना इत्येताभ्यां हरिकरुणासंपादितमिदं नेति तदस्थिरताऽप्येकत्र वर्तत इति सूचयति ।। ३७ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे चतुर्दशोऽध्यायः ।

छलारी — द्विजदेवैर्ब्राह्मणैरुपलंभितां प्राप्तामृद्धामतिसमृद्धाम् ।। ३७ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे चतुर्दशोऽध्यायः ।

लिङ्गेरी — महामना बलिरात्मानं स्वं कृतकृत्यं मुक्तमिव मन्यमानो द्विजैः शुक्रादिभिर्देवेन हरिणा चोपलंभितां प्रापितामभिवृद्धां श्रियं त्रैलोक्यसंपदं बुभुजेऽनुभुक्तवान् ।। ३७ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे चतुर्दशोऽध्यायः ।।

॥ अथ पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच–

एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ।
हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ १ ॥

सत्यधर्मीया — नष्टेष्वदर्शनं गतेषु । अनाथेवानाथवत् ॥ १ ॥

छलारी — परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ इति स्ववचनं सत्यं कर्तुं देवानां संकटे प्राप्ते हरिणा वामनावतारः कृत इति वक्तुं तदुपयुक्तां कथामाह ॥ एवमिति । अदितिर्नष्टेष्वदर्शनं गतेषु । पर्यतप्यत्सन्तापं प्राप ॥ १ ॥

लिङ्गेरी — अत्रापि पुत्रादर्शनप्रयुक्तव्यथयाऽदितेः कश्यपोपदेशकथनव्याजेन भगवन्महिमैवोच्यते । तत्रादाविन्द्रादिगमनानन्तरमदितिस्थितिमाह शुकः परीक्षितम् ॥ एवमित्यादिना । हे राजन् । एवमुक्तरीत्या पुत्रेष्विन्द्रादिषु नष्टेषु दृष्ट्यगोचरेषु सत्स्विन्द्रादिदेवानां माताऽदितिस्तदा दैत्यैस्त्रिविष्टपेऽपहृते सति संरक्षकस्वामिरहिता स्त्रीव पर्यतप्यत्संतापवती बभूव ॥ १ ॥

एकदा कश्यपस्तस्या आश्रमं भगवानगात् ।
निरुत्सवं निरानन्दं समाधेर्विरतश्चिरात् ॥ २ ॥

सत्यधर्मीया — चिरात् पुरुकालिकात् । समाधेर्विरत उपरतः । निरुत्सवं निरानन्दम् । पुत्रतापत्रयशोकेन । तस्या अदितेः ॥ २ ॥

छलारी — तस्या अदित्याश्चिरकालीनात्समाधेर्ध्यानाद्विरत उपरतः ॥ २ ॥

लिङ्गेरी — एकस्मिन्काले चिराद्बहुकालकृतात्समाधेश्चित्तैकाग्रतपसो भगवद्ध्यानाद्विरतः शान्तः । ध्यानपरित्यागीति यावत् । भगवान्कश्यपो मुनिरुत्सवरहितं सुखरहितं च तस्या अदितेराश्रमं गतवान् ॥ २ ॥

स पत्नीं दीनवदनां कृतासनपरिग्रहः ।
सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ३ ॥

सत्यधर्मीया — सः पत्नीम् ॥ ३ ॥

छलारी — स कश्यपः कृत आसनस्वीकारो येन सः । यथान्यायं विध्युक्तप्रकारेण, सभाजितः पूजितः सन् दीनवदनां म्लानमुखीं पत्नीमिदमाह ॥ ३ ॥

लिङ्गेरी — हे कुरुकुलोद्धारक राजन् । स कश्यपः कृत आसनपरिग्रहः स्वीकारो येन सः । यथान्यायं शास्त्रमनतिक्रम्यादित्या सभाजितः पूजितः सन् स्वपत्नीमदितिं दैन्योपेतमुखीं दृष्ट्वा तां प्रतीदं वक्ष्यमाणमाह ॥ ३ ॥

अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनाऽऽगतम् ।
न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः ॥ ४ ॥

सत्यधर्मीया — हे भद्रे । विप्राणामभद्रममङ्गलमधुनेदानीं नागतम् । लोके स्वर्गे धर्मस्यापि न । छन्दानुवर्तिनः स्वेच्छाप्रवृत्तेर्मृत्योः सकाशादपि । लोकस्य छन्दानुवर्तिनो लोकानुसारेणागच्छेत्युक्तावागच्छतो मृत्योः मदिच्छानुवर्तिन इति वा । स्थलतपो महिम्ना । एतत्त्रिकमपि नात्रेति किं कारणमत्रेति भावः । नागतं किमिति वाऽन्वयः ॥ हे भद्रे । पूर्वं नानागतमभद्रादिकमिदानीमागतं किमित्यपि पूर्वमित्यध्याहृत्य योजयन्ति ॥ ४ ॥

छलारी — दीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन्पृच्छति ॥ अप्यभद्रमिति सप्तभिः । हे भद्रे शोभनेऽदिते । स्वर्गलोकेऽधुना विप्राणामभद्रममङ्गलं नागतमपि । अपिशब्दः किंशब्दार्थः । अभद्रं मृत्युरूपं नाप्राप्तं किम् । धर्मस्याभद्रं नागतं किम् । मृत्योश्छन्दामिच्छामनुवर्तत इति मृत्योर्वशवर्तिनो जनस्येत्यर्थः । छन्दानुवर्तिनो मृत्योः सकाशाल्लोकस्येति वा । अभद्रं मृत्युरूपं नागतं किम् ॥ ४ ॥

लिङ्गेरी — हे भद्रे मङ्गलरूपे गृहमेधिनि गृहस्थाश्रमोपयुक्तधर्मसाधनि अदिते । विप्राणामभद्रममङ्गलमनिष्टं नागतं न प्राप्तमपि किम् । ब्राह्मणानामनिष्टं प्राप्तं किम् । एवमग्रे ज्ञातव्यम् । अधुना लोके धर्मस्याभद्रं नागतं किम् । स्वेच्छानुवर्तिनो मृत्योर्मारकदेवस्य सकाशाल्लोकस्य जनस्याभद्रं नागतं किम् ॥ ४ ॥

अपि वाऽकुशलं किं वा गृहेषु गृहमेधिनि ।
धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥ ५ ॥

सत्यधर्मीया — हे गृहमेधिनि । गृहेषु किं वा अकुशलमक्षेमः । यत्र गृहेषु । अयोगिनां सांसारिकाणां धर्मस्यार्थस्य कामस्य एत्रिकस्य योगो घटना भवति । तत्राकुशलं किंवा जातम् । येनैवं दृश्यस इति विकल्पाशयः । न हि नेत्यन्वयो वा ॥ ५ ॥

छलारी — अपि वाऽथवा । गृहमेधिनां गृहस्थाश्रमोपेतानाम् । यत्र गृहेष्वयोगिनामपि संसारिणामपि धर्मादेर्योगः प्राप्तिर्भवति । स्वधर्मानुष्ठानेन धर्मार्थकामसिद्धिर्भवतीत्यर्थः । तेषु गृहेषु किञ्चिदप्यकुशलम् । न हीति च तत्रानुकर्षः कर्तव्यः ॥ ५ ॥

लिङ्गेरी — अयोगिनां हरीच्छादिरूपमोक्षोपायविधुराणां यत्र धर्मार्थकामेषु गृहेषु सद्मादिषु योगः स्नेहलक्षणसंबन्धः । तेषां मध्येऽपि कस्यचिदकुशलमक्षेमम् । किंवाशब्दौ पक्षान्तरसूचकौ । इत्युत्तरत्रापि ॥ ५ ॥

अपि वाऽतिथयोऽभ्येत्य कुटुम्बासक्तया त्वया ।
गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥ ६ ॥

सत्यधर्मीया — कुटुम्बासक्तया तल्लालनपालनाद्यासक्तया । प्रत्युत्थानेन वा । तावन्मात्रेण तदादिना वाऽपूजिता असम्भाजिता गृहात् याताः किम् । अनन्तरं तदनुसन्धानेनैवंभूतेत्याशयः ॥६॥

छलारी — कुटुम्बे पुत्रादिपोषणे आसक्तयाऽतिथयो गृहमभ्युपेत्य प्रत्युत्थानादिनाऽपूजिता इव गृहाद्याता न हि ॥ ६ ॥

लिङ्गेरी — हे गृहमेधिनि । अतिथयो देहसंबन्धस्वग्रामीयत्वोपकारित्वादिरहिता अन्नाद्यर्थिनो विप्रादयस्तव गृहमभ्येत्य कुटुम्बे पुत्रपोषणादावासक्तया त्वया प्रत्युत्थानादिभिरपूजिताः सन्तः क्वचित्कदाचित्स्वगृहाद्बहिर्याताः किम् ॥ ६ ॥

गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं प्रेतराजगृहोपमाः ॥ ७ ॥

सत्यधर्मीया — तथैव गमने को दोषः येनैवं भाषसे पत इत्यत आह ॥ गृहेष्विति । ते गृहाः प्रेतराजगृहोपमाः संयमनीसदृशाः श्मशानसमा वा ॥ ७ ॥

छलारी — नार्चिता अनर्चिताः सन्तो ये निर्गच्छन्ति ते गृहाः प्रेतराजगृहस्य श्मशानस्य समास्तुल्याः ॥ ७ ॥

लिङ्गेरी — गृहादतिथीनां विमुखतया गमने गृहस्थस्यानिष्टमाह ॥ गृहेष्वित्यादिना । हे गृहमेधिन्यदिते । अतिथयोऽत्यैश्वर्याभावे सलिलैरपि येषु गृहेष्वपूजिता यदा निर्गच्छन्ति तदा ते गृहाः प्रेतराजस्य यमस्य गृहस्थानीयाः श्मशानतुल्याः । गृहशब्दस्य, गृहाः पुंसि च भूम्न्येवेति बहुवचने पुल्लिंगस्यानुशासनात् त इरिति पुल्लिङ्गेन गृहपरामर्शोपपत्तिः ॥ ७ ॥

अप्यग्नयस्तु वेलायां न हुता हविषा सति ।
त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥ ८ ॥

सत्यधर्मीया — वेलायां विहितकाले । मयि प्रोषितेऽन्यत्र गते सति ॥ ८ ॥

छलारी — हे सति । मयि प्रापिते सति । गृहादन्यत्र स्थिते सति उद्विग्ना संभ्रान्ता धीर्यस्यास्तथा त्वया वेलायां होमकालेऽग्नयो कर्हिचिन्न हुताः किम् ॥ ८ ॥

लिङ्गेरी — भद्रे हे सति पतिव्रते । कर्हिचित्कदाचिन्मयि प्रोषिते प्रवासङ्गते सत्युद्विग्नधिया चञ्चलबुद्धिमत्या त्वयाऽग्नय आहवनीयगार्हस्पत्यदाक्षिणाख्या वेलायां विहितहोमकाले हविषा क्षीरादिरूपेण न हुता अपि किम् । गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपीत्यमरादत्रापिशब्दः प्रश्नार्थकः ॥ ८ ॥

यत्पूजया कामदुघान् यान्ति लोकान् गृहान्विताः ।
ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥ ९ ॥

सत्यधर्मीया — तन्महिम्ना सह पूर्वोदीरितविप्रमाहात्म्यमप्याह ॥ यस्याग्नेः पूजयेति । गृहान्विता गृहस्थाश्रमिणः । सर्वदेवात्मनः तत्स्वामिनो विष्णोर्ब्राह्मणोऽग्निश्च मुखम् । ब्राह्मणोऽस्य मुखमासीत्, मुखादिन्द्रिश्चाग्निश्चेत्यादेः । यतस्ततः कामदुघान् । दुहः कब् घश्च । कामपूरकान् लोकान् यान्ति । तेऽग्नयो वेलायां न हुताः किमित्यन्वयः ॥ ९ ॥

छलारी — यस्याग्नेः पूजया । गृहेणान्वितः पुरुषः । तत्र हेतुमाह ॥ ब्राह्मण इति । सर्वदेवानामन्तर्यामिणो विष्णोर्ब्राह्मणोऽग्निश्चेति द्वयं मुखं यतोऽत इत्यर्थः ॥ ९ ॥

लिङ्गेरी — हे अदिते । गृहान्विता गृहस्थाश्रमिणो येषां गार्हस्पत्यादीनां पूजया सर्वाभीष्टप्रदान् स्वरादिलोकान् यान्ति । अग्नेः पूज्यत्वे निमित्तमाह ॥ ब्राह्मण इत्यादिना । सर्वेषां देवानां ब्रह्मादीनामात्मनः स्वामिनो विष्णोर्ब्राह्मणो विप्रोऽग्निश्च मुखाज्जातत्वान्मुखं मुखस्थानीयोऽतः पूज्य

इति । वा इत्यनेनोक्तार्थे, ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । मुखादिन्द्रश्चाग्निश्च । ब्राह्मणोऽस्य मुखमासीत् । अग्निर्वै देवानामवमो विष्णुः परमः । विष्णुमुखा वै देवाः'' इत्यादिश्रुतिप्रसिद्धिं सूचयति ॥ ९ ॥

अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ।
लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥ १० ॥

सत्यधर्मीया — ज्ञातसर्वोऽपि लौकिकीं रीतिमनुकुर्वन् विकल्प्यान्तिमं तन्मनःस्थितं पृच्छति ॥ अपीति । भवत्यास्तव लक्षणैश्चिह्नैरात्मानं मनोऽस्वस्थं लक्षये ॥ १० ॥

छलारी — हे मनस्विनि । तव पुत्राः सर्वेऽपि कुशलिनः क्षेमवन्तः किम् । प्रश्नबीजमाह ॥ लक्षय इति । भवत्याः आत्मानं मनोऽस्वस्थं चिन्तायुक्तलक्षणैर्मुखम्लानादिभिर्लक्षये तर्कयामि ॥१०॥

लिङ्गेरी — हे प्रशस्तमनस्के । तव सर्वे पुत्राः कुशलिनः क्षेमवन्तोऽपि किम् । अहं भवत्याः लक्षणैर्मुखवैकांत्यादिरूपैश्चिन्हैरात्मानं मनोऽस्वस्थं चञ्चलं लक्षये जानामि । कुशलं क्षेममस्त्रियाम् । आत्मा जीवे धृतौ चित्ते देहे च परमात्मनीति नानार्थमुक्तामाला । चिन्हं लक्ष्म च लक्षणमित्यमरः ॥ ॥ १० ॥

अदितिरुवाच–

भद्रं द्विजगवां ब्रह्मन् धर्मस्यास्य जनस्य च ।
त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे ॥ ११ ॥

सत्यधर्मीया — शङ्किताशङ्कितकुशलं लपन्ती स्वमनोरथं विज्ञापयति ॥ भद्रमिति । त्रिवर्गस्य धर्मादेः । परं क्षेत्रं मुख्यं स्थानम् । किं तदित्यत आह ॥ इमे गृहा इति ॥ ११ ॥

छलारी — अस्वास्थ्यकारणमन्यदस्तीति वक्तुं त्वत्पृष्टमभद्रादिकं नास्तीत्याहुः ॥ भद्रमिति द्वाभ्याम् । द्विजानां भद्रमेवास्ति । त्रिवर्गस्य धर्मार्थकामरूपस्य परं क्षेत्रमुद्भवस्थानरूपा इमे गृहाश्च सर्वे कुशलिनः ॥ ११ ॥

लिङ्गेरी — एवं कश्यपेन पृष्टाऽदितिरुवाच । ब्रह्मन् ज्ञानादिपूर्ण गृहमेधिन् गृहस्थाश्रमोचित-कर्मकरणपटो । एतद्गृहपते कश्यप । द्विजगवां धर्मस्यास्य जनस्य धर्मार्थकामरूपत्रिवर्गस्य च भद्रं क्षेममेव परमुत्कृष्टं क्षेत्रं भूमिरिमे गृहाः ॥ ११ ॥

अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः ।
सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥

सत्यधर्मीया — लिप्सवः सर्वे न वृथा गताः । सर्वं भगवतस्तवानुध्यानात्,त्वत्स्मरणादिरूप-सेवाया । न रिष्यति न नश्यति ॥ १२ ॥

छलारी — भिक्षवो भिक्षुका लिप्सवो बान्धवाश्चाग्नय इत्यादि सर्वं भगवतस्तवानुध्यानान्मया क्रियमाणान्न रिष्यति ॥ १२ ॥

लिङ्गेरी — हे ब्रह्मन् । अग्नयोऽतिथयो भृत्या दासा भिक्षवः सन्यासिनो ये चान्ये लिप्सवोऽन्नादिप्राप्तीच्छवस्तत्सर्वं भगवतस्तवानुध्यानात्स्मरणान्नरिष्यति नष्टं न भविष्यति ॥ १२ ॥

को नु मे भगवन् कामो न सम्पद्येत मानसः ।
यस्या भवान् प्रजाध्यक्ष एवं धर्मान् प्रभाषते ॥ १३ ॥

सत्यधर्मीया — मानसो मनसि स्थितः । प्रजाध्यक्षो भवान् पतिरेवं धर्मांश्च प्रभाषते । तस्या मम को नु कामो न संपद्येत सर्वं संपद्येतैवेत्यर्थः ॥ १३ ॥

छलारी — प्रस्तुतं विज्ञापयितुमाह ॥ को न्विति । मानसो मनस्यपेक्षितः कामो विषयो न संपद्येत न सिध्येत् । प्रजाध्यक्षः प्रजानां कुशलाकुशलयोरध्यक्षः साक्षित्वेन द्रष्टा भवान्यस्य ममैवं पूर्वोक्तप्रकारेण धर्मान् अग्न्यतिथ्यादिपूजारूपान्प्रभाषते उपदिशाति । तस्या ममेत्यन्वयः ॥ १३ ॥

लिङ्गेरी — हे भगवन् । यस्या मम भवान्प्रजाध्यक्षः सन्तानस्वामी । पतिरिति यावत् । एवमुक्तविधान्धर्मान्प्रभाषते कर्तव्यतया विधत्ते तस्या मम मनसि स्थितः को नु कामः को वा मनोरथो न प्राप्येत प्राप्येतैव ॥ १३ ॥

तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः ।
मनोरथं तासु सुरादिषु प्रभो यथाविभागं भजते महेश्वरः ॥ १४ ॥

सत्यधर्मीया — हे मारीच मरीचपुत्र । मनोजाः काश्चन । काश्चन प्रजाः शरीरजाः । सत्त्वरजस्तमोजुषः सात्त्विकादिप्रकृतयस्तासु सुरादिषु प्रजासु । यथाविभागं गुणानुगुण्येन महेश्वरो भगवान् मनोरथमभिलाषम् । भजते विभज्य ददाति । एतेन दैतेयाभिवृद्धिकालोऽयमिति तत्कटाक्षयति अदितिरिति भावः । सुराश्चादिनो राक्षसाश्चेति तेष्विति वा ॥ १४ ॥

छलारी — ननु सर्वस्यापि भद्रत्वेन तव म्लानमुखत्वं किं निमित्तमित्यतस्तत्र निमित्तं वदतीति स्वापेक्षितं प्रार्थयते ।। तवैवेति चतुर्भिः । हे मरीच मरीचपुत्र । सत्त्वरजस्तमोजुषः सात्त्विकराजसतामसस्वभावास्तवैव मनःशरीरजा मनसा शरीरेण वा जाता या इमाः प्रजाः सुरासुरादयस्तासु सुरासुरादिषु महेश्वरो हरिर्विभागं सत्त्वादिगुणानुकूल्येन मनोरथं भजते करोति । अद्य दैत्यानां मनोरथं साधयतीति हृदयम् ।। १४ ।।

लिङ्गेरी — एवमदितिः पतिसमाधानं कृत्वाऽपि स्वान्तःकरणचाञ्चल्यनिमित्तं भगवान्नारायण एव परिहर्ता नान्यस्तथाऽपि तदहं कथयामीत्याह ।। तवैवेत्यादिना । हे मारीच मरीचिपुत्र कश्यप । सत्त्वरजस्तमोगुणसेविन इमाः प्रजा देवमानुषासुररूपा जनास्तव मनःपूर्वकशरीरजा एव । हे प्रभो अपेक्षितप्रदानसमर्थ कश्यप । महेश्वरो मुख्यस्वामी हरिस्तासु सुरादिषु प्रजासु मनोरथं यथाविभागं तत्तद्योग्यताविभागमनतिक्रम्य भजते ददाति । यथाविभागमित्यस्य यस्य यस्य देहिनो यस्मिन्यस्मिन्काले सुखं दुःखं वा देयमिति स्वसंकल्पस्तथा तत्तत्करोति भगवान् । इदानीं त्वसुराणां मनोरथं करोतीति भावः ।। १४ ।।

तस्मादंशं भजन्त्या मे श्रेयश्चिन्तय सुव्रत ।
हृतश्रियो हृतस्थानाः सपत्नैः पाहि नः प्रभो ।। १५ ।।

सत्यधर्मीया — अंशं तवार्धमङ्गम् । देवदैत्यमध्ये देवांशं सुकृतांशं वा । दायमिति वा । सपत्नैर्हृतस्थाना अपहृतस्वर्गा नः सुता इति तान् पाहि ।। १५ ।।

छलारी — हे ईश पते । श्रेयः क्षेमं चिन्तय साधय । सपत्नैर्दैत्यैर्हृता श्रीर्येषां ते तान् । हृतं स्थानं स्वर्गो येषां तान् । नोऽस्मान् । पुत्रापेक्षया पुल्लिङ्गबहुवचने ।। १५ ।।

लिङ्गेरी — हे शोभनव्रतसंपन्न पते । यस्मात्त्वद्विधपत्न्या मम सर्वमनोरथः सिद्ध्येत्तस्मात्त्वं, तवांशं त्वत्संपादितद्रव्यभागं भजन्त्याः सेवमानायास्तद्योग्याया देहार्धं भजन्त्या मे श्रेयश्चिन्तय । हे प्रभो आपत्परिहारसमर्थ । सपत्नैर्मत्समानस्त्रीपुत्रैः शत्रुभिरपहृतसंपदः स्थाना नोऽस्मान्पाहि रक्षस्व ।। १५ ।।

परैर्विवासिता साऽहं मग्ना व्यसनसागरे ।
ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ।। १६ ।।

सत्यधर्मीया — प्रलापकाल इत्युक्तं पुनरुक्तीकरोति । विवासिता सुतदेशभ्रंशभ्रंसितेति ॥ १६ ॥

छलारी — उक्तमेव विशदयति ॥ परैरिति । शत्रुभिरित्यर्थः । विवासिता बहिष्कृता स्वस्थानाच्च्याविता । व्यसनसागरे दुःखसागरे । मे मम । पुत्राणामिति शेषः । ऐश्वर्यादीनि हृतानि ॥ ॥ १६ ॥

लिङ्गेरी — अहं परैः शत्रुभिर्विवासिता स्वस्थानात्प्रच्याव्य प्रवासं प्रापिता, व्यसनानां क्लेशानां सागरे मग्ना च । ममैश्वर्यं श्रीःकान्तिर्यशः कीर्तिः स्थानमाश्रय इत्येतानि प्रबलैः शत्रुभिर्हृतानि ॥१६॥

यथा तानि पुनः साधो प्रपद्येरन् ममात्मजाः ।
तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥

सत्यधर्मीया — कल्याणकृत्तम मङ्गलकारिवरीयः ॥ १७ ॥

छलारी — कल्याणं मङ्गलं विधेहि । धिया बुद्ध्या । अन्तःकरणपूर्वकमिति यावत् । कल्याणकर्तॄणामुत्तमः ॥ १७ ॥

लिङ्गेरी — साधो मङ्गलकारिणामुत्तम । ममात्मजाः पुत्राः पुनर्यथा येन प्रकारेण तान्यैश्वर्यादीनि प्रपद्येरन् प्राप्ता भवेयुस्तथा तेन प्रकारेण त्वं धिया बुद्धिपूर्वं कल्याणं मङ्गलं विधेहि कुरु ॥ १७ ॥

श्रीशुक उवाच–

एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ।
अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥

सत्यधर्मीया — कः प्रजापतिसामान्यवाची कशब्दः इति केचित् । वस्तुतस्तु श्यप इति वर्णद्वयलोपेन क इति । स्मयन् स्मयमानः कश्यप इति भवति । बृहद्देवतिकायां ''वर्णस्य वर्णयोर्लोप'' इति विशेषाभिधानदर्शनेन अनुज्ञया वर्तामहे । कश्यपः हरिः करुणां कुर्यादेवेति आ सम्यक् कं यस्य स वा । हासस्तु अहो स्नेहमोहो महीयान् लोकानामिति । किञ्चिदाश्वासनाय तत्त्वमुपदिशति ॥ अहो इत्यादिना ॥ १८ ॥

छलारी — कः प्रजापतिः कश्यपः स्मयन्निवाश्चर्यं कुर्वन्निव प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति ॥ अहो इति । मायाया मोहिन्या इच्छाया बलं सामर्थ्यम् ॥ १८ ॥

लिङ्गेरी — एवमुक्तरीत्याऽदित्या प्रार्थितो मुनिः कश्यपः स्मयन्निव तामदितिं प्रत्याह । हे अदिते । विष्णोर्मायाबलमहो आश्चर्यकरम् । येन मायाबलेनेदं चेतनरूपं जगत्स्वपुत्रादिषु स्नेहबद्धं भवति ॥ १८ ॥

क देहो भौतिकोऽनात्मा क चात्मा प्रकृतेः परः ।
कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥

सत्यधर्मीया — अनात्मा जडो भौतिको भूतविकृतः । आत्मा जीवः । प्रकृतेरुपादानभूतायाः परो विलक्षणः । मोहः कारणं ममताप्रयोजकमज्ञानम् ॥ १९ ॥

छलारी — अनादिष्वात्मसु जडरूपो भौतिको भूतविकारः । प्रकृतेः परो विलक्षणः । आत्मा जीवः क । के कस्य पतिपुत्राद्याः । संबन्धाभावादिति संम्बन्धः । एषु स्वसम्बन्धिज्ञाने मोह एव मिथ्याज्ञानमेव.॥ १९ ॥

लिङ्गेरी — भौतिक आकाशादिपञ्चभूतनिर्मितोऽत एवानात्मा जडो देहः क । प्रकृतेर्जडरूपात्पञ्चमहाभूतादेः परो विलक्षणोऽत्यन्तभिन्न आत्मा जीवः क च । नैतयोरैक्यमिति भावः । एवं सति देहापेक्षया पतिपुत्रादिसंबन्धिनः कस्य चेतनस्य के पतिपुत्रादयो भविष्यन्ति । न कस्य केऽपि । ननु गौरोऽहं कृष्णोऽहमिति देहात्मनोरभेदावगमात्कथमेवमुच्यत इत्यत आह ॥ मोह एवेति । गौरोऽहमित्यादिज्ञानेन मुह्यते भ्रान्तो भवत्यनेनेति मोहोऽज्ञानमेव कारणं, हि श्रुत्यादिप्रमितम् ॥१९॥

उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् ।
सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥ २० ॥

सत्यधर्मीया — आत्यन्तिकमस्या आवश्यकं स्वस्यापीदमिति विद्वान् तां सुमुखीं विधातुमुपायमभिधत्ते । उपतिष्ठस्वेति ॥ गतम् । स क वर्तते इति न भज चिन्तामित्याह । वासुदेवमिति । तत्पदप्रवृत्तिनिमित्तं सर्वभूतगुहावासमिति ॥ २० ॥

छलारी — अत्रापरितुष्यन्तीं प्रत्याह ॥ उपतिष्ठस्वेति । उपतिष्ठस्वोपास्व । सर्वभूतानां सर्वप्राणिनां हृदयगुहावासम् ॥ २० ॥

लिङ्गेरी — हे स्त्रि । त्वं पुरुषं बह्वभीष्टदातारं अभीष्टविरोधिदुष्टजनमर्दकं सर्वप्राणिहृद्गुहावस्थितमत एव वासुदेवशब्दितं जगतः ब्रह्मादेश्चेतनसमूहस्य गुरुं हिताहितोपदेष्टारं भगवन्तं

नारायणमुपतिष्ठस्व सेवस्व । अनेन क्व देह इत्याद्युक्तरीत्या यद्यपि पुत्रादिस्नेहेन तदभीष्टसिद्धिर्नापेक्ष्या तथाऽपि तत्स्नेहत्यागाशक्तस्तदर्थम् । यो वेद निहतं गुहायां परमे व्योमन्नित्यादिश्रुतिभिरवश्यं मुमुक्षुणाऽपि ज्ञातव्यतयोक्तसाक्षात्परब्रह्मरूपनारायण एवोपास्यो नान्य इत्यसूचि ।। २० ।।

स विधास्यति ते कामान् हरिर्दीनानुकम्पनः ।
अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ।। २१ ।।

सत्यधर्मीया — दीनेष्वनुकम्पनं यस्य । दीनाननुकम्पयतीति स तथा वा । इतरा भक्तेः ।।२१।।

छलारी — विधास्यति करिष्यति । दीनेष्वनुकंपावान् । नन्वेवंभूतकामप्राप्तिहेतुर्देवान्तर-सेवाप्रसिद्धस्तत्राह ।। अमोघेति । भक्तिर्भजनम् । इतरा इतरदेवादिविषया ।। २१ ।।

लिङ्गेरी — तद्विशदयति । स इत्यादिना । हे अदिते । दीनेषु दैन्योपेतभक्तिजनेष्वनुकंपनो दयालुः स हरिस्ते कामान्मनोभीष्टान्विधास्यति करिष्यति । यतो भगवति नारायणे भक्तिरमोघाऽव्यर्थेतरदेवताविषया भक्तिर्मोघेति निश्चयो नास्तीति मे मम मतिः ।। २१ ।।

अदितिरुवाच—

केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् ।
यथा मे सत्यसङ्कल्पो विदध्यात्स मनोरथम् ।। २२ ।।

सत्यधर्मीया — उपस्थास्ये भजिष्ये ।। २२ ।।

छलारी — उपस्थास्ये भजिष्ये । सत्यसङ्कल्पो हरिर्यथा मम मनोरथं विदध्यात् ।। २२ ।।

लिङ्गेरी — एवं कश्यपेन समाहिताऽदितिरुवाच । हे ब्रह्मन् पृष्टोत्तरज्ञानपूर्ण द्विजश्रेष्ठ । अहं केन विधिना प्रकारेण जगत्पतिं हरिमुपस्थास्ये । यथा च सत्यसंकल्पः स हरिर्मे मम मनोरथं विदध्यात् ।। ।। २२ ।।

आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् ।
आशु तुष्यति मे देवः सीदन्त्याः सह पुत्रकैः ।। २३ ।।

सत्यधर्मीया — तं विधिं तदुपधावनमुपासनं च । आदिशोपदिश । सह पुत्रकैः । सीदन्त्याः क्लिश्यन्त्याः ।। २३ ।।

छलारी — यथा च पुत्रकैः सह सीदन्त्याः क्लेशितायाः मे, देव आशु तुष्यति तथा तस्य हरेरुपधावनं सेवाविषयं विधिं प्रकारमादिश ॥ २३ ॥

लिङ्गेरी — यथा च पुत्रैः सह सीदंत्याः कष्टं प्राप्ताया मे स देव आशु तुष्टो भविष्यति । तथा तदुपासनसाधनं विधिं त्वमादिश ॥ २३ ॥

कश्यप उवाच–

एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥

सत्यधर्मीया — प्रजाकामस्य मे मया । केशवतोषणं तद्व्रतम् । ते प्रवक्ष्यामि ॥ २४ ॥

छलारी — मे मया पृष्टः पद्मजो ब्रह्मा प्रजाकामस्य पुत्रकामस्य यद्व्रतमाहैतत्केशवतोषणं व्रतं ते वक्ष्यामीत्यन्वयः ॥ २४ ॥

लिङ्गेरी — एवमदित्या पृष्टः कश्यप उवाच । हे अदिते । मया प्रजाकामनया पृष्टो भगवान्पद्मजश्चतुर्मुखः प्रजाकामस्य मे केशवस्य ब्रह्मरुद्रादिनियामकस्य हरेस्तोषणं तुष्टिकरं यद्व्रत-माह तदेतद्व्रतं ते प्रवक्ष्यामि ॥ २४ ॥

फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्चयेदरविन्दाक्षं भक्त्या परमयाऽन्वितः ॥ २५ ॥

सत्यधर्मीया — अमले शुक्ले । पयसो व्रतं यस्य स्वीकारः । स साक्षात्स्वं प्रति ब्रह्मोपदेशप्रकारेणान्ववदिदीषतीति पुल्लिङ्गं सम्भवति । तथा चातन्त्रं तदिति भावः । परमया भक्त्याऽन्वितोऽरविन्दाक्षमर्चयेत् ॥ २५ ॥

छलारी — व्रतानुष्ठानप्रकारमेवाह ॥ फाल्गुनस्येत्यादिना । फाल्गुनस्य मासस्यामले शुक्लपक्षे द्वादशाहं द्वादशदिनेषु पयोव्रतः । परमया भक्त्याऽन्वितः पुरुषोऽरविन्दाक्षं हरिमर्चयेत् । पयोव्रत इति पुल्लिङ्गप्रयोगस्तु व्रतस्य साधारणत्वज्ञापनार्थः ॥ २५ ॥

लिङ्गेरी — एवं व्रतं प्रवक्ष्यामीति प्रतिज्ञातं कालदेवतादि दर्शयन्नाह ॥ फाल्गुनस्येत्यादिना । एतद्व्रतं करिष्यमाणः फाल्गुनस्य मासस्यामले शुक्ले पक्षे द्वादशदिवसपर्यन्तं क्षीरव्रतः सन्

अरविन्दाक्षं कमलवद्विशालनेत्रं हरिं परमयोत्कृष्टया भक्त्या व्रतः सन्नर्चयेत् । पयोव्रत इत्यादि-निर्देशेनादितिं प्रति कर्तव्यतयैतद्व्रतविधानेन चास्य व्रतस्य स्त्रीपुरुषोभयाधिकारिकत्वमुक्तम् ।। २५ ।।

सिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् ।। २६ ।।

सत्यधर्मीया — सिनीवाल्यां चतुर्दशीयुक्तामावास्यायाम् । क्रोडविदीर्णया । क्रोडो वराहः । क्रोडः सूकरमातंग्योरिति विश्वः । यदि सा मृत् लभ्येत । स्रोतसि । स्रोतोऽम्बुवेगाद्रिपयोरिति विश्वः । नदीप्रवाहे स्नास्यन् । इमं वक्ष्यमाणम् ।। २६ ।।

छलारी — तत्रादौ व्रतारंभात्पूर्वेद्युः कृत्यमाह ।। सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तद्रात्र्यामित्यन्तेन ग्रन्थेन । सिनीवाल्यां चतुर्दशीयुक्तायाममावास्यायाम् । सा नष्टेन्दुः सिनीवाली सा नष्टेन्दुः कलाकुहुरित्यभिधानात् । यदि वन्यवराहोत्खातमृत्तिका लभ्येत तर्हि क्रोडेन वन्यवाराहेण विदीर्णयोत्खातया मृदाऽऽलिप्य स्रोतसि सप्रवाहवति जले स्नायात् । अन्यथा प्रशस्तमृत्तिकयैव स्नायादित्यर्थः । मृत्तिकालेपन एवं वक्ष्यमाणं मन्त्रमुदीरयेत्पठेत् ।। २६ ।।

लिङ्गेरी — यदि स्रोतः प्रवाहोदकं नद्यादि लभ्येत तस्मिन्स्रोतसि तदलाभेऽन्यवाप्यादिशुद्धजले सिनीवाल्यां चतुर्दशीयुक्तायां किञ्चिच्चन्द्रदर्शनोपेतायाममायाम् । हे भूदेवि त्वं जनानां स्थानमिच्छताऽऽदिवराहेण रसातललोकादुद्धृताऽसि तुभ्यं नमोऽस्तु । त्वं मे पाप्मानं पापं प्रणाशय विनाशयेति मन्त्रमुदीरयन्नुच्चारयन्, क्रोडेन वराहेण विदीर्णया भेदितया मृदा मृत्तिकया स्वशरीरमालिप्य स्नानं कुर्यात् । साऽदृष्टेन्दुःसिनीवाली । मृन्मृत्तिका । क्रोडो भूधरः इति । स्रोतोऽम्बुसरणम् । पाप्मा पापङ्किल्बिषमिति चामरः ।। २६,२७ ।।

त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ।
उद्धृताऽसि नमस्तुभ्यं पाप्मानं मे प्रणाशय ।। २७ ।।

सत्यधर्मीया — रसाया रसातलात् । स्थानं लोकानामिच्छता । आदिवराहेण हरिणा । उद्धृताऽसि तुभ्यं नमः । मे पाप्मानं प्रणाशयेति ।। २७ ।।

छलारी — तमेव मन्त्रमाह ।। त्वं देवीति । हे देवि! त्वं भूमौ भूतानां स्थानमाश्रय-मिच्छताऽऽदिवराहेण हरिणा रसाया रसातलादुद्धृताऽसि । तुभ्यं नमो नमः । मे पाप्मानं पापं

प्रकर्षेण नाशय निवर्तितात्मनियमो नित्यनैमित्तिकात्मकः संध्योपासनादिको येन सः समाहित एकाग्रचित्तः सन् दैवमर्चयेत् ।। २७ ।।

निर्वर्तितात्मनियमो देवमर्चेत् समाहितः ।
अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ।। २८ ।।

सत्यधर्मीया — निर्वर्तितः समापित आत्मनियमो नित्यान्हिकसन्ध्यावन्दनः । तत्स्थानान्याह ।। अर्चायां प्रतिमायामित्यादिना ।। २८ ।।

छलारी — पूजास्थानान्याह ।। अर्चायामिति । अर्चायां सालग्रामप्रतिमायां सुवर्णादिरचितप्रतिमायां वा । अर्चाद्यन्यतरस्मिन्नधिष्ठान इति ज्ञेयम् ।। २८ ।।

लिङ्गेरी — एवं निर्वर्तितात्मस्नानसंध्यादिनियमः सन् समाहितः स्वस्थान्तःकरणश्च सन् अर्चायां प्रतिमायां, स्थण्डिले मार्जितपरिलिप्तशुद्धस्थले, सूर्ये जले वन्हौ गुरौ वाऽधिष्ठाने देवं नारायणमर्चयेत्पूजयेत् । अर्चा पूजाप्रतिमयोरिति नानार्थरत्नमाला ।। २८ ।।

नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ।। २९ ।।

सत्यधर्मीया — तद्ध्यानमन्त्रनवकमाह ।। नम इत्यादिना ।। २९ ।।

छलारी — तत्रावाहने नव मन्त्राण्याह ।। नमस्तुभ्यमित्यादिना । एतैर्मन्त्रैर्हृषीकेशमित्यन्तेन ।। पद्यादौ द्वादशाक्षरं वक्ष्यति । महीयसे महत्परिणामोपेताय ।। २९ ।।

लिङ्गेरी — पूजासाधनमन्त्रानाह ।। नमस्तुभ्यमित्यादिना प्रसीदतामित्यन्तेन । महीयसे पुरुषायोत्तमचेतनाय भगवतेऽव्याहतैश्वर्यादिषड्गुणवते तुभ्यं नमोऽस्तु ।

वासनाद्वासुदेवोऽसि वासितं ते जगत्त्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ।। इति स्मृतेः ।। २९ ।।

नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ।। ३० ।।

सत्यधर्मीया — चतुर्विंशद्गुणज्ञाय चतुर्विंशतितत्त्वगुणज्ञाय । गुणसङ्ख्यानं समीचीनसाङ्ख्यशास्त्रम् । तद्धेतवे कपिलात्मने ॥ ३० ॥

छलारी — अव्यक्तायाप्रत्यक्षाय । सूक्ष्मायाणुपरिमाणाय । प्रधानपुरुषाय सर्वोत्तमपुरुषाय । चतुर्विंशद्गुणा अव्यक्तादिपृथिव्यन्तानि चतुर्विंशतितत्त्वानि जानातीति तथा तस्मै । गुणानां तत्त्वानां सङ्ख्यानं प्रतिपादनं यस्मिंस्तस्मिन् तद्गुणसङ्ख्यानं साङ्ख्यशास्त्रं तस्य हेतवे कर्त्रे कपिलात्मन इत्यर्थः ॥ ३० ॥

लिङ्गेरी — अव्यक्ताय स्वप्रसादमन्तरेणाधिकारिप्रयत्नेन दृष्ट्याद्यगोचरायात एव सूक्ष्मायाव्यक्ततोपयुक्तस्थूलदृष्ट्यगोचरशक्तिमते । तदव्यक्तमाह हि । सूक्ष्मं तु तदर्हत्वादित्यादेः । प्रधानस्य प्रकृतेश्चेतनायाः पुरि शरीरेऽचेतनाया अप्याकाररूपे शरीरे नियमनार्थं शेत इति पुरुषः । तस्मै । शरीररूपकविन्यस्तगृहीतेः । प्रकृतिं प्रविश्य भगवानित्यादेश्च । रूपादिशब्दान्तचतुर्विंशद्गुणज्ञाय चतुर्विंशतितत्त्वरूपस्वापेक्षया प्रधानपदार्थज्ञाय गुणसंख्यानाख्यग्रन्थकर्त्रे कपिलरूपाय नमोऽस्तु ॥ ॥ ३० ॥

नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥

सत्यधर्मीया — चत्वारि शृङ्गा त्रयो अस्य पादा इति पातञ्जला जजल्पुः । स्फोटः प्रतिपाद्य इति तत्खण्डनमुखेन हरिपरतया व्याकरोति ॥ नम इति । द्विशीर्ष्णे द्वे शिरसी यस्य । शीर्ष्णे इति वक्तुं शक्यं तथाऽपि छन्दोभङ्गमविधाय द्वे शीर्षे इत्येतत् प्रति द्विशीर्ष्णे इत्युक्तिरिति ज्ञेयम् । प्रायणीयोदयनीयनामके । त्रिपदे प्रातर्मध्याह्नतृतीयसवनाख्यानि त्रीणि पदानि यस्य तस्मै । चत्वारि शृङ्गाणि वेदा यस्य तस्मै । तन्तवे यज्ञात्मकाय तत्स्वामिने । प्रस्तुतत्वात् सन्ततिकृते वा । सप्त छन्दांस्येव हस्ता यस्य स तस्मै । यज्ञाय तन्नामकाय । यज्ञो विष्णुर्देवतेति हि श्रुतिरित्युक्तेः । रोरवीतीत्यादेरर्थः । त्रयीविद्यात्मन इति वेदविद्याप्रतिपाद्याय ।

चत्वारि शृङ्गा वेदास्तु पादास्त्रिसवनानि च ।
प्रापणीयं शिरस्त्वेकमन्यच्चोदयनीयकम् ।
हस्तास्तु सप्त छन्दांसि तैर्गृण्हाति फलान्यसौ ।
मन्त्रब्राह्मणकल्पैस्तु त्रिधा बद्ध इतीर्यते ।

शाखोद्गातृस्तुतिरवै रोरवीत्यृत्विजो मुखात् ।
वृषभो महान्स्वधर्मत्वाद्देवस्तु फलभावनात् ॥

इति मानत एतच्छ्रुत्यर्थो विवृतः ॥ ३१ ॥

छलारी — चत्वारिशृङ्गा त्रयोऽस्य पादा इति मन्त्रोक्तयज्ञरूपेण विष्णुं प्रणमति ॥ नम इति । द्वे शीर्षे प्रायणीयोदनीयाख्ये यस्य तस्मै । त्रीणि पदानि पादाः प्रातर्माध्यन्दिनसायंसवनाख्यानि यस्य तस्मै । चत्वारि शृङ्गाणि ऋगादिचत्वारो वेदा यस्य तस्मै । तंतवे फलविस्तारकाय सन्ततिहेतवे वा । सप्त गायत्र्यादिछन्दासि हस्ता यस्य तस्मै । त्रय्यां विद्यायां मन्त्रब्राह्मणकल्पाख्यायामात्मा स्वरूपं यस्य तस्मै । मन्त्रादिभिस्त्रिभिर्यज्ञस्वरूपस्य निष्पद्यमानत्वादिति भावः । यज्ञायैतादृशय-ज्ञसंनिहितत्वेन यज्ञरूपाय विष्णवे नमो नमः ।

चत्वारिशृङ्गा वेदास्तु पादास्त्रिसवनानि च ।
प्रायणीयं शिरस्त्वेकमन्यच्चोदयनीयकम् ।
हस्तास्तु सप्त छन्दासि तैर्गृण्हाति फलान्यसौ ।
मन्त्रब्राह्मणकल्पैस्तु त्रिधाबद्ध इतीर्यते ।
शाखोद्गातृस्तुतिरवै रोरवीत्यृत्विजो मुखात् ।
वृषभो महान्स्वधर्मत्वाद्देवस्तु फलभावनात् ॥

इति चत्वारि शृङ्गेति श्रुतिव्याख्यानरूपप्रमाणोक्त एवार्थ इति ज्ञेयम् ॥ ३१ ॥

लिङ्गेरी — द्वे प्रायणीयोदनीयसंज्ञके शीर्षे शिरसी यस्य तस्मै, प्रातर्मध्यन्दिनसायं-सवनाख्यत्रिपादवते । ऋग्यजुः सामाथर्वाख्यचतुःशृङ्गाय, तंतवे कर्मसमुदायहेतवे सन्तत्यभिवृद्धि-कराय, सप्तछन्दोलक्षणहस्तवते त्रयीविद्या ऋग्यजुःसामरूपवेदविद्या । तत्राग्निमीळ इत्यादिना प्रतिपाद्य आत्मा स्वरूपं यस्य तस्मै तुभ्यं नमः । चत्वारि शृङ्गा त्रयोऽस्य पादा इत्यादि श्रुतिमुख्यप्रतिपाद्यायाग्न्यन्तर्यामिणे तुभ्यं नम इत्यर्थः ।

''चत्वारिशृङ्गा वेदास्तु पादास्त्रिसवनानि च ।
प्रायणीयं शिरस्त्वेकमन्यच्चौदयनीयकम् ।
हस्तास्तु सप्त छन्दांसि तैर्गृण्हाति फलान्यसौ ।

मन्त्रब्राह्मणकल्पैस्तु त्रिधा बद्ध इतीर्यते ।
शस्त्रोद्गातृस्तुतिरवै रोरवीत्यृत्विजो मुखात् ।
वृषभो महान्स्वधर्मत्वाद्देवस्तु फलभावनात्'' ॥

इत्यादिस्मृतेरुक्त एव स्मृत्यर्थः ॥ ३१ ॥

नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥

सत्यधर्मीया — शिवाय मङ्गलरूपिणे । रुद्राय रोगद्रावकाय । शक्तिधरायेति पाङ्क्तः पाठः ॥ ॥ ३२ ॥

छलारी — शिवान्तर्यामित्वेन हरिं नमति ॥ नम इति । शिवाय शिवान्तर्यामिणे मङ्गलरूपायेति वा । रुद्राय रुजं संसाररोगं द्रावयति नाशयतीति तथा तस्मै रुद्रशब्दवाच्याय । शक्तेर्लक्ष्म्याः शक्त्याख्यायुधस्य वा धराय धर्त्रे ॥ ३२ ॥

लिङ्गेरी — शिवाय सुखरूपतया मङ्गलाय । रुजं दुःखहेतुभूतरोगादिकं संसाराख्यरोगं च द्रावयतीति रुद्रस्तस्मै तुभ्यं नमः । सर्वप्राण्यंतर्यामिरूपेषु साधारणाय गुणशक्त्यादिभिः समाय । सर्वविद्यानामधिपतये मुख्यस्वामिने । भूतानामाकाशादीनां रमाब्रह्मादिचेतनानां च पतये पालकाय स्वामिने च ते नमोऽस्तु । शिवः सुखात्मकत्वेन । रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः । सर्वेषां भूतानामन्तरपुरुषः । स आत्मेति विद्यात् । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् । ईशानादेव चेशानेत्यादि ब्रह्माण्डपुराणैतरेयतैत्तरैयश्रुतिभ्यः उक्त एवार्थः । एतेन पार्वतीपत्यभेदेन हरेरत्र शिवादिशब्दवाच्यतेति निरस्तम् । एवमग्रे ज्ञेयम् ।

तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः ।
न क्वापि किञ्चिन्नास्ति तमृते पुरुषोत्तमम् ।

शास्त्रमन्तर्यामीत्यादेः ॥ ३२ ॥

नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥

सत्यधर्मीया — हिरण्यं कोशे गर्भे यस्य स तस्मै । हिरण्यगर्भः पुत्रोऽस्यास्तीति स तथा तस्मै वा । प्राणाय सकलचेष्टकाय । जगदात्मने प्राणस्वामिने । तद्व्यापिने । योगैश्वर्यशरीराय योगैश्वर्यादि एव शरीरं यस्य तस्मै । लोकानां योगहेतवेऽणिमादेरुपायस्य वा कारणाय ॥ ३३ ॥

छलारी — हिरण्यगर्भाद्यन्तर्यामित्वेन नमति ॥ नम इति । हिरण्यगर्भाय चतुर्मुखसंनिहिताय । प्राणाय सूत्रनामकवाय्वंतर्गताय । जगत आत्मने स्वामिने । योगैश्वर्यमणिमाद्यैश्वर्यं शरीरं यस्य तस्मै । योगस्य प्राणायामादिप्रतिपादकयोगशास्त्रस्य हेतवे कर्त्रे ॥ ३३ ॥

लिङ्गेरी — हिनोति परिहरति दुःखं, राति ददाति सुखमिति हिरं, बलज्ञानात्मकत्वाण्यं, हिरं च तत् ण्यं च हिरण्यं वीर्यं ब्रह्माण्डोत्पादकं यस्य गर्भे स हिरण्यगर्भः चतुर्मुखान्तर्यामी तस्मै हिरण्यगर्भाय । प्रकृष्टचेष्टकत्वात्प्राणशब्दवाच्याय मुख्यप्राणान्तर्यामिणे । जगतश्चेतनाचेतनात्मकस्यात्मनेऽन्तर्यामिणे स्वामिने चाणिमाद्यष्टयोगैश्वर्योपेतशरीराय योगानां च हेतवे दत्तात्रेयादिरूपाय ते नमोऽस्तु । हिरण्यगर्भः समवर्तताग्र इत्यादिश्रुतेः ॥ ३३ ॥

नमस्त आदिदेवाय देवदेवाय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥

सत्यधर्मीया. — नमस्त आदिदेवायेति पाठः । देवदेवाय देवस्तुत्याय नरायाविनाशिने ॥ ३४ ॥

छलारी — ऋषये ऋषिरूपाय ॥ ३४ ॥

लिङ्गेरी — आदौ चतुर्मुखादिचेतनमहदाद्यचेतनोत्पत्तेः प्राक् देवाय क्रीडादिगुणविशिष्टाय । देवानां चतुर्मुखादीनां देवाय ते नमः । ऋषये ज्ञानरूपाय, नारायणाय ज्ञानानन्दादिगुणवते, सर्वदा क्षयरहिततया नरशब्दवाच्याय, हरयेऽरिष्टपरिहारकायेष्टप्रापकाय ते नमः । एको नारायण आसीत् । न ब्रह्मा न च शङ्कर इत्यादेः । आनीदवातं स्वधया तदेकमित्यादेः ॥ ३४ ॥

नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥

सत्यधर्मीया — अधिगता श्रीर्यं तस्मै ॥ ३५ ॥

छलारी — अधिगता प्राप्ता श्रीर्येन तस्मै । केशवाय कश्चेशश्च केशौ । तयोः प्रवर्तकाय ॥ ३५ ॥

लिङ्गेरी — मरकतमणिवच्छ्यामवर्णवच्छरीराय सर्वाधिकसर्वदाप्राप्तसंपदे तुभ्यं नमः । कश्चेशश्च केशौ ब्रह्मरुद्रौ वर्तयति प्रेरयतीति केशवस्तस्मै तुभ्यं नमः । पीताम्बरवते नमः ॥ ३५ ॥

त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ।
अतस्ते तपसा धीराः पादरेणुमुपासते ॥ ३६ ॥

सत्यधर्मीया — यतः सर्वे ये वरास्तान्ददातीति स तथा । वरेण्य । गतम् । अतस्ते पादरेणुं धीरा बुद्धौ रममाणा उपासते ॥ ३६ ॥

छलारी — हे वरदानां ऋषभ । वरेण्य भक्तैर्वरणीय । हरे । त्वं पुंसां यतः सर्ववरदोऽस्यतस्ते पादरेणुमुपासते ॥ ३६ ॥

लिङ्गेरी — हे हरे । त्वं पुरुषाणां सर्वाभीप्सितप्रद! यतस्त्वं वरदेभ्यो ब्रह्मादिभ्यो वृषभः श्रेष्ठोऽतस्त्वं पुरुषाणां वरेण्यो भजनीयोऽतस्त्वां धीरा ज्ञानिनः श्रेयसे मोक्षादिपुरुषार्थाय ते पादरेणुं भजन्ति ॥ ३६ ॥

अन्ववर्तन्त यं देवाः श्रीविनिर्जितपद्मयोः ।
स्पृहयन्त इवामोदं भगवान् मे प्रसीदताम् ॥ ३७ ॥

सत्यधर्मीया — श्रिया कान्त्या विनिर्जिते पद्मे याभ्याम् । तयोः पादयोरिति शेषः । आमोदं परिमलं स्पृहयन्तः काङ्क्षन्तो देवा अन्ववर्तन्त । स भगवान्मे प्रसीदताम् ॥ ३७ ॥

छलारी — देवाः श्रीश्च, तत्पादपद्मयोस्तस्य हरेः पादपद्मयोरामोदं परिमलं स्पृहयन्त इवेच्छन्त इव यमन्ववर्तन्त सो मे प्रसीदताम् ॥ ३७ ॥

लिङ्गेरी — देवा ब्रह्मादयः, श्रिया कांत्यादिसंपदा विनिर्जिते पराजिते पद्मे कमले याभ्यां तयोस्ते पादकमलयोरामोदं परिमलं स्पृहयन्तोऽभिलषन्त एव यमन्ववर्तन्तानुकूलाः सेवितवन्तः स भगवान्नारायणो मे प्रसीदतां प्रसन्नो भूयात् ॥ ३७ ॥

एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्सरम् ।
अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥

सत्यधर्मीया — पाद्यं पादार्घ्याभ्यां चेति यत् । उपस्पर्शनं आचमनादि । स्यादुपस्पर्शनास्पर्शौ स्नानाचमनयोरिति विश्वः ॥ ३८ ॥

छलारी — एभिर्नवमन्त्रैरुपस्पर्शनमाचमनम् ॥ ३८ ॥

लिङ्गेरी — भगवदर्चकः श्रद्धयाऽस्तिक्यबुद्ध्या युक्तः सन् चाभिलषितमहाफलाय हृषीकाणां मन आदीन्द्रियाणामीशं प्रेरकं स्वामिनं चैतैरुक्तैर्मन्त्रैः पाद्यमुपस्पर्शनमाचमनादि येषां तैरुपचारैरा-वहनपूर्वकमर्चयेत् । यदेव श्रद्धया करोति तदेव वीर्यवत्तरं भवेदित्यादेः ॥ ३८ ॥

अर्चितं गन्धमाल्याद्यैः पयसा स्नापयेद् विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ ३९ ॥

सत्यधर्मीया — माल्यं माला पुष्पाणि च तदाद्यैः । पयसा क्षीरेण ॥ ३९ ॥

छलारी — पयसा क्षीरेण । उपवीतं यज्ञोपवीतम् ॥ ३९ ॥

लिङ्गेरी — आदौ पयसा क्षीरेण विभुं हरिं स्नापयेत् । तदनन्तरं वस्त्रोपवीताभरणपाद्योप-स्पर्शनैर्गन्धपुष्पैस्तुलस्यादिभिरर्चितं कुर्यात् । तुलसीवर्जितैः पुष्पैरिति तुलस्यतिरिक्तपूजायाः शतापराधेषु गणनात् ॥ ३९ ॥

गन्धधूपादिभिश्चार्चेत् द्वादशाक्षरविद्यया ।
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ४० ॥

सत्यधर्मीया — द्वादशाक्षरविद्यया वासुदेवद्वादशाक्षरमन्त्रेण । पयसि क्षीरे शृतं पक्वमन्नम् । पायसम् । विभवे संपदि सतीति । सम्बुध्यन्तमपि । शाल्यन्नं कलमान्नम् । शालस्तु गन्धमार्जारे कलमादिषु च स्मृत इति विश्वः । अणुव्रीहिविशेषः ॥ ४० ॥

छलारी — पद्यादौ मन्त्रमाह ॥ द्वादशाक्षरविद्ययेति । ॐ नमो भगवते वासुदेवायेति मन्त्रेण । पयसि शृतं पक्वं पायसम् ॥ ४० ॥

लिङ्गेरी — गन्धेन परिमलेनोपेतधूपसाधनद्रव्यादिभिश्च तमर्चयेत् । ॐनमो भगवते वासुदेवायेति द्वादशाक्षरविद्यया स्वस्य विभवे ऐश्वर्ये सति पयसि शृतं पक्वं राजान्नाख्यशाल्यन्नं गुडगोघृतसहितं

नैवेद्यं दत्वा मूलविद्यया नारायणमन्त्रेण होमं कुर्यात् । निवेदितं समर्पितमन्नं हरिभक्ताय दद्यात्तदभावे स्वयं वा भुंजीत ॥ ४०,४१ ॥

ससर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया ।
निवेदितं तद्भक्ताय दद्याद् भुञ्जीत वा स्वयम् ॥ ४१ ॥

सत्यधर्मीया — ससर्पिः सघृतम् । मूलविद्यया प्रस्तुतवासुदेवद्वादशाक्षरमन्त्रेणैव । तद्भक्ताय वासुदेवदासाय दद्यात् । वाशब्दः समुच्चये । तद्भक्तदत्तान्नशेषं स्वयं च भुञ्जीत । विकल्पार्थकतायां नाहं तथाद्मीत्यादेरनानुगुण्यम् । असाक्षिकं भक्षणं चाविहितं चेति दोषप्राप्तेः ॥ ४१ ॥

छलारी — सर्पिः सगुडं दत्वा हरौ समर्प्य मूलविद्यया द्वादशाक्षरेणैव । निवेदितं होमशेषं तदन्नं स्वयं वा भुंजीत ॥ ४१ ॥

दत्वाऽचमनमर्चित्वा ताम्बूलं च निवेदयेत् ।
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥ ४२ ॥

सत्यधर्मीया — अष्टोत्तरशतं तमेव मन्त्रम् ॥ ४२ ॥

छलारी — अर्चित्वा छत्रचामरादिराजोपचारैः पूजयित्वा । अष्टोत्तरशतं द्वादशाक्षरं जपेत् । स्तुतिभिः पूर्वोक्ताभिरन्वभिश्च ॥ ४२ ॥

लिङ्गेरी — भगवते नैवेद्यसमर्पणानन्तरमाचमनं दत्वा पुष्पादिभिरर्चयित्वा तांबूलं च समर्पयेत् । अनन्तरं नारायणो नरः शौरीत्याद्यष्टोत्तरशतं भगवन्नाम जपेत् । स्तोत्रैः स्तुतिं कुर्वीत ॥ ४२ ॥

कृत्वा प्रदक्षिणं भूमौ प्रणमेद् दण्डवन्मुदा ।
कृत्वा शिरसि तच्छेषं देवमुद्वासयेत् ततः ॥ ४३ ॥

सत्यधर्मीया — दण्डवन्निरभिमानेन । तच्छेषं पुष्पादिकम् । ततो देवमावाहितं पूर्वोक्तस्थाने उद्वासयेत् ॥ ४३ ॥

छलारी — तस्य हरेः शेषं निर्माल्यं पुष्पादिकमुद्वासयेद्विसृजेत् ॥ ४३ ॥

लिङ्गेरी — तदनन्तरं प्रदक्षिणं कृत्वा मुदा हर्षेण भूमौ दण्डवत्पतित्वा नमस्कुर्यात् । तस्य हरेः शेषं निर्माल्यं शिरसि स्थितं कृत्वा ततो देवं नारायणमुद्वासयेदुपसंहरेत् ॥ ४३ ॥

द्व्यवरान् भोजयेद् विप्रान् पायसेन यथोचितम् ।
भुञ्जीत तैरनुज्ञातो हुतशेषं सभाजितैः ॥ ४४ ॥

सत्यधर्मीया — द्व्यवरान् द्वाववरौ येषु तान् । केवलमवरपक्षे द्व्युक्तिः । द्वादशेति मुख्यपक्षे ततोऽधिकानां न निषेधः । सभाजितैः सत्कृतैस्तैरनुज्ञातो हुतशेषमग्नौ विप्रमुखे च हुतस्य शेषं भुञ्जीत ॥ ४४ ॥

छलारी — द्वाववरौ येषां तान् । अवरपक्षेऽपि द्वाववश्यं भोजयेदित्यर्थः । मुख्यतस्तु द्वादशेति भावः । सभाजितैर्भोजनादिना पूजितैस्तैर्विप्रैरनुज्ञातः सन् सेष्टो बन्धुभिः सहितो भुञ्जीत ॥ ४४ ॥

लिङ्गेरी — द्वाववरौ कनिष्टपक्षप्राप्तौ येषां तान् द्विजान् पायसेन यथोचितं घृतशर्करादि दत्वा भोजयेत् । अनन्तरं तांबूलदक्षिणादिभिः सभाजितैर्बहुमानितैस्तैर्ब्राह्मणैरनुज्ञातः स्वयं हुतशेषं भुंजीत ॥ ४४ ॥

ब्रह्मचार्यथ तद्रात्र्यां श्वो भूते प्रथमेऽहनि ।
प्रातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ ४५ ॥

सत्यधर्मीया — तद्रात्र्यां व्रतारम्भप्राग्दिनरात्र्याम् । ब्रह्मचारी विविक्तशायी । श्वो भूते उषसि जाते । तत्रापि प्रातः पूर्वेद्युः । पूर्वेद्युरिष्यते प्रातरिति विश्वः । श्वो भूते जातप्राय इति वा ॥ ४५ ॥

छलारी — तस्यां रात्रौ ब्रह्मचारी च भवेत् । एवं व्रतारम्भात्पूर्वदिनकृत्यमुक्त्वाऽथ व्रतदिनकृत्यमाह ॥ श्वो भूत इत्यादिना । श्वो भूते प्रभाते सति यथा यथावत् । न केवलं दण्डपूजनं प्रथमदिनमात्रे किन्तु यावद्व्रतसमापनं द्वादशदिनात्मकं व्रतसमाप्तिपर्यन्तमर्चयेत् । पयोभक्षः क्षीरमात्राहारः । विष्ण्वर्चने आदृत आदरवान् ॥ ४५,४६ ॥

लिङ्गेरी — प्रथमदिवसे तद्रात्र्यां ब्रह्मचारी गुह्येन्द्रियनियमवान् शयीत । अथ श्वो भूते परदिने प्रातः उक्तेन विधिना सुतरां स्वस्थान्तःकरणः सन् स्नानादिना शुचिः सन् हरिं पयसा स्नापयित्वाऽर्चयेत् । एवमेव प्रतिदिनं व्रतसमाप्तिपर्यन्तं कुर्यात् । एवं विष्णुपूजायामादरवान्पयःपानवदिदं पयोव्रतं चरेत् ॥ ४५,४६ ॥

पयसा स्नापयित्वाऽर्चेद् यावद् व्रतसमापनम् ।
पयोभक्षो व्रतमिदं चरेद् विष्ण्वर्चनादृतः ॥ ४६ ॥

सत्यधर्मीया — व्रतसमापनं यावत्तावद्द्वादशदिनपर्यन्तम् । पयोभक्षः । क्षीरमात्रं भक्षयतीति स तथा । असाधारण्येन न्यायात् ॥ ४६ ॥

पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।
एवं त्वहरहः कुर्याद् द्वादशाहं पयोव्रतम् ॥ ४७ ॥

सत्यधर्मीया — अहरहर्निरन्तरमुक्तं नक्तंदिवसमध्ये ॥ ४७ ॥

छलारी — अहरहः प्रतिदिनम् । होमरूपमर्हणमग्निपूजनम् ॥ ४७ ॥

लिङ्गेरी — पूर्ववज्जुहुयादग्निमिति श्लोकः सुगमार्थः ॥ ४७ ॥

हरेराराधनं होममर्हणं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ४८ ॥

सत्यधर्मीया — प्रतिपद्दिनम् । प्रतिपत्तिथिः तदभिन्नं दिनम् । शुक्लत्रयोदशीति दीर्घान्तपाठे यावत् त्रयोदशी भवति तावत्पर्यन्तम् । ह्रस्वपाठे यावच्छुक्लत्रयोदशीति अव्ययीभावः ॥ ४८ ॥

लिङ्गेरी — हरेराराधनं पूजादिरुपं होममर्हणं ब्राह्मणपूजाऽन्नदानादिना द्विजानां तर्पणं तृप्तिकरणम् । ब्रह्मचर्यमुक्तम् ॥ ४८ ॥

ब्रह्मचर्यमधःस्वापं स्नानं त्रिषवणं चरेत् ।
वर्जयेदसदालापं भोगनुच्चावचांस्तथा ॥ ४९ ॥

सत्यधर्मीया — अधो भूमौ । उच्चावचान् अनेकप्रकारान् ॥ ४९ ॥

छलारी — अधः स्वापमधःशयनं त्रिषवणं प्रातर्मध्यान्हसायंकालीनं स्नानम् । असद्भिर्दुर्जनैः सहालापनं संभाषणमुच्चावचान् बहून् आलापान्वा । भोगान् ॥ ४९ ॥

लिङ्गेरी — अधः शुद्धभूमौ स्वापं निद्रां त्रिषवणस्नानं च । फाल्गुणशुद्धप्रतिपद्दिवसमारभ्य शुक्लत्रयोदशीपर्यन्तमेवं साधारण्येन हरिमर्चयेत् । तथाऽसद्भिरसज्जनैरालापं संभाषणमुच्चावचानुत्कृष्टा-पकृष्टांश्च भोगान्विषयांश्च वर्जयेत् ॥ ४९ ॥

अहिंस्रः सर्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यामथो विष्णोः स्नापनं स्नापकैर्विभोः ॥ ५० ॥

सत्यधर्मीया — अहिंस्रोऽहिंसाशीलः । स्नापकैर्द्विजैः ॥ ५० ॥

छलारी — अहिंस्रोऽहिंसकः । पञ्चकैः पञ्चामृतैः ॥ ५० ॥

लिङ्गेरी — समस्तप्राणिहिंसारहितो वासुदेवैकनिष्ठश्च भूयात् । अथो त्रयोदश्यां प्राप्तायां शास्त्रदृष्टेन विधिना विधिकोविदैर्भगवत्पूजाप्रकारकुशलैरुदीरितैः स्नापकैर्महाभिषेकसाधनसूक्ताद्यैर्विष्णुं स्नपयन्विष्णोर्महापूजां वित्तशाठ्यविवर्जितः सन् कुर्यात् ॥ ५०,५१ ॥

कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।
पूजां च महतीं कुर्याद् वित्तशाठ्यविवर्जितः ॥ ५१ ॥

सत्यधर्मीया — कोविदैः कुशलैः ॥ ५१ ॥

छलारी — विधिकोविदैर्ब्राह्मणैर्ऋषिभिः । विभवे सति वित्तशाठ्येन द्रव्यलोभेन वर्जिताः ॥५१॥

चरुं निरुप्य पयसि शिपिविष्टाय विष्णवे ।
सृतेन तेन पुरुषं यजेत सुसमाहितः ॥ ५२ ॥

सत्यधर्मीया — शिपिविष्टाय व्याख्यातम् । श्रायाके सृतेन । चरुं निरुप्य चर्वा वापं कृत्वा । वप धातो रूपमिदम् । निरूप्येति क्वचित्पाठः श्रुत्यननुगुणः । सौर्यं चरुं निर्वपेदित्यादेः ॥ ५२ ॥

छलारी — शिपौ गरुडे विष्टाय रूढाय विष्णवे विष्णुमुद्दिश्य निरूप्य श्रपयित्वा । शृतेन पक्वेन तेन चरुणा पुरुषं हरिमुद्दिश्य यजेताग्नौ जुहुयात् ॥ ५२ ॥

लिङ्गेरी — चरुं होतव्यान्नं गरुडारूढाय विष्णवे निरूप्य संस्कारपूर्वकं स्थापयित्वा । समर्प्येति यावत् । सुसमाहितः सृतेन तेन चरुणा पूर्णषड्गुणं हरिमुद्दिश्य यजेत जुहुयात् ॥ ५२ ॥

नैवेद्यं चापि गुणवद् दद्यात् पुरुषतुष्टिदम् ।
आचार्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ॥ ५३ ॥

सत्यधर्मीया — ज्ञानसंपन्नमाचार्यं तोषयेदित्यन्वयः ॥ ५३ ॥

छलारी — गुणवन्माधुर्यादिषड्रसोपेतम् । पुरुषस्य हरेस्तुष्टिदम् ॥ ५३ ॥

लिङ्गेरी — मधुरादिषड्गुणोपेतं पुरुषतुष्टिदं नैवेद्यं दद्यात् । तत्त्वज्ञानादिसंपन्नमाचार्यं वस्त्रालङ्कारगोभिः सन्तोषयेत् ॥ ५३ ॥

तोषयेद् ऋत्विजश्चैव तद् विध्याराधनं हरेः ।
भोजयेत् तान् गुणवता सदन्नेन शुचिस्मिते ॥ ५४ ॥

सत्यधर्मीया — तदेव हरेराराधनं विद्धि । गुणवता रसवता । सदन्नेन शोधितकेशादिना ॥५४॥

छलारी — ऋत्विजश्च ऋत्विग्भूतान् ब्राह्मणांश्च । तत् आचार्यादिपूजनं हरेराराधनं विद्धि ॥५४॥

लिङ्गेरी — ऋत्विजश्च । यदाचार्याद्याराधनं तत्तदन्तर्यामिहर्याराधनं जानीहि । हे शुचिस्मिते । तानाचार्यादीन् गुणवता निर्दुष्टान्नेन भोजयेत् ॥ ५४ ॥

अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ।
दक्षिणां गुरवे दद्याद् ऋत्विग्भ्यश्च यथार्हतः ॥ ५५ ॥

सत्यधर्मीया — यथार्हतो यथायोग्यम् ॥ ५५ ॥

छलारी — गुणवता मधुरादिगुणोपेतेन सदन्नेन । हे शुचिस्मितेऽदिते । ये च तत्र तस्मिन्महोत्सवे समागतास्तानन्यान् ब्राह्मणांश्च शक्त्या भोजयेत् । यथार्हतो यथायोग्यमाश्वपाकांश्चाण्डालपर्यन्तान् जनान् ॥ ५५,५६ ॥

लिङ्गेरी — ये तत्र ब्राह्मणा भोजनादिकाले समागतास्तान्न वारयेत् । ऋत्विग्भ्योऽन्यान् ब्राह्मणांश्च शक्त्यनुसारेण भोजयेत् । तेभ्यो गुरवे आचार्याय ऋत्विग्भ्यश्च तत्तद्योग्यतानुसारेण दक्षिणांश्च दद्यात् ॥ ५५ ॥

अन्नाद्येनाश्वपाकांश्च प्रीणयेत् समुपागतान् ।
भुक्तवत्सु च विप्रेषु दीनान्धकृपणादिषु ॥ ५६ ॥

सत्यधर्मीया — अन्नाद्येन अन्नवस्त्रादिना ॥ ५६ ॥

लिङ्गेरी — अन्नादिना तदर्थितया समागतान् श्वपचपर्यन्तांश्च प्राणिनः प्रीणयेत् तृप्तान्कुर्यात् । विप्रेषु दीनांधकृपणादिषु च भुक्तेषु तद्विप्रादिप्रीतिकरणं विष्णोः प्रीतिकरं जानन्सन् तैरनुज्ञातः स्वबन्धुभिः सह भुंजीत ॥ ५६ ॥

विष्णोस्तत्प्रीणनं विद्वान् सह भुञ्जीत बन्धुभिः ।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ ५७ ॥

सत्यधर्मीया — बन्धुभिः सह भुञ्जीत ॥ ५७ ॥

छलारी — ननु दीनान्धादिभोजनं विष्णोः प्रीणनं प्रीतिकरमिति विद्वान् जानन् । स्वस्तिवाचकैः स्वस्तिवाचनैः ॥ ५७ ॥

कारयेत् तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥ ५८ ॥

सत्यधर्मीया — परं पुरुषाराधनम् ॥ ५८ ॥

छलारी — तस्य हरेः कथाभिरन्वहं निरन्तरम् । उपसंहरति ॥ एतदिति ॥ ५८ ॥

लिङ्गेरी — एवमन्वहं प्रतिदिनं नृत्यादिभिर्विष्णोर्महापूजां कारयेत् । पुरुषस्याराधनं साधनं परमुत्तमं पयोव्रतं नाम व्रतं मम पितामहेन चतुर्मुखेनोक्तं तन्मया ते तुभ्यं समुदाहृतम् । हे महाभागे । त्वं च भजनीयमव्ययं केशवं सम्यक् कृतेनानेन पयोव्रतेन शुद्धस्वभाववताऽत्मनाऽन्तःकरणेन भज ॥ ॥ ५८,५९,६० ॥

पितामहेनाभिहितं मम ते समुदाहृतम् ।
त्वं चानेन महाभागे सम्यक् चीर्णेन केशवम् ॥ ५९ ॥

सत्यधर्मीया — पितामहो ब्रह्मा ॥ ५९ ॥

छलारी — पितामहेन ब्रह्मणा मह्यमभिहितं मया च ते तव समुदाहृतम् । एवं पयोव्रतविधिमुक्त्वेदं त्वमपि कुर्वित्युपदिशति ॥ त्वं चेति । हे महाभागेऽदिते । सम्यक् चीर्णेन

कृतेनानेन पयोव्रतेन शुद्धभावेन शुद्धस्वभावेनात्मना मनसा त्वं भजनीयं केशवं भज । आदरजननाय पयोव्रतं स्तौति ।। अयं वा इति । अयं पयोव्रताख्यो यज्ञः सर्वयज्ञफलप्रदत्वात्सर्वयज्ञाख्य इत्युच्यते । इदं सर्वव्रतफलप्रदत्वात्सर्वव्रतमिति च स्मृतम् ।। ५९,६० ।।

आत्मना शुद्धभावेन भजनीयं भजाव्ययम् ।
अयं वै सर्वयज्ञाख्यः सर्वैव्रतमिदं श्रुतम् ।। ६० ।।

सत्यधर्मीया — आत्मना प्रयत्नेन । शुद्धभावेन शोभनमनसा । अयं मयोक्तो व्रतविशेषः । सर्वयज्ञ इत्याख्या यस्य सः । सर्वव्रतमिदं श्रुतम् ।। ६० ।।

तपःसारमिदं भद्रे दानं चेश्वरतर्पणम् ।
त एव नियमाः साक्षात् त एव च यमोत्तमाः ।। ६१ ।।

सत्यधर्मीया — तपःसारं तच्छ्रेष्ठम् । तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् । सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् । एते तु नियमाः प्रोक्तास्तांश्च सर्वान् पृथक् शृणु । अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽर्जवम् । क्षमा धृतिर्मिताहारः शौचं चैते यमाः स्मृता इति तपआदिकं ज्ञेयम् ।। ६१ ।।

छलारी — इदं तपःसारभूतमिदमेव महादानफलहेतुरीश्वरस्य तर्पणं तृप्तिकरणं च । पयोव्रतस्य यमनियमत्वं चाह ।। त एवेति । येन सर्वसाधनोत्तमेन पयोव्रतेनाधोक्षजस्तुष्यति । यमनियमाश्च ।

तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ऱ्हीर्मतिश्च पयोव्रतम् ।
एते तु नियमा प्रोक्तास्तांश्च सर्वान्पृथक् शृणु ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं वैते यमाः स्मृताः ।।

इति वचनोक्ता ज्ञेयाः ।। ६१ ।।

लिङ्गेरी — हे भद्रे मङ्गलरूपे । इदं पयोव्रतं सर्वयज्ञादिसमफलमीश्वरतृप्तिकरं च ।। ६१ ।।

तस्मादेवं व्रतं भद्रे प्रयता श्रद्धया चर ।
भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥ ६२ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे पञ्चदशोऽध्यायः ।

सत्यधर्मीया — प्रयता नियमवती वराणां विधानं वितरणम् ॥ ६२ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे पञ्चदशोऽध्यायः ॥ ८-१५ ॥

छलारी — प्रयतैकाग्रचित्ता । आचर कुरु व्रतान् ॥ ६२ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे पञ्चदशोऽध्यायः ।

लिङ्गेरी — येन यैः साधनैरधोक्षजः । न चक्षुषा पश्यति न श्रोत्रेण शृणोति न मनसा मनुते इत्यादि श्रुतेरिन्द्रियजन्यज्ञानाविषयः श्रीनारायणस्तुष्टो भवति त एव नियमादयः । हे भद्रे । यस्मादेतत्पयोव्रतमुक्तगुणं तस्मादेतदेवमुक्तविधिना प्रयता शुचिर्भूता सती श्रद्धयोपेता च सती समाचर । त्वत्कृतेनानेन व्रतेन भगवान्नारायणस्ते तव सन्तुष्टः सन् वरानपेक्षितान् पुरुषार्थान्विधास्यति करिष्यति ॥ ६२ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे पञ्चदशोऽध्यायः ।

॥ अथ षोडशोऽध्यायः ॥

श्रीशुक उवाच–

इत्युक्ता साऽदिती राजन् स्वभर्त्रा कश्यपेन वै ।
अन्वतिष्ठद् व्रतमिदं द्वादशाहमतन्द्रिता ॥ १ ॥

सत्यधर्मीया — प्रयत्नानां सहस्रेणाव्यक्तस्वभावो भक्त्या व्यक्तीभवति भगवानित्येतमर्थं दर्शयत्यध्यायद्वयेन । तावत्तत्र भर्त्रा बोधिताऽदितिर्व्रतं चचार तथेत्याह ॥ इत्युक्तेति । अतन्द्रिताऽनालस्या ॥ १ ॥

छलारी — अदित्या पयोव्रताचरणं वक्ति ॥ इत्युक्तेति । चिन्तयन्ती स्मरन्तीदं पयोव्रतमन्वतिष्ठत् आचरदिति सम्बन्धः । अतन्द्रिताऽऽलस्यरहिता ॥ १ ॥

लिङ्गेरी — स्वानुग्रहमन्तरेणाधिकारिप्रयत्नेनाप्रत्यक्षोऽपि भगवान्नारायणस्तद्योग्यकालेऽधिकारि-भक्त्यादिना प्रसन्नो भूत्वा प्रत्यक्षो भवतीत्यादि हरिमहिमाऽत्राध्यायद्वयेन प्रतिपाद्यते । तत्रादावदितेः पयोव्रताचरणप्रकारमाह ।। इत्युक्तेत्यादिना । हे राजन् । साऽदितिः स्वभर्त्रा कश्यपेनेत्युक्ता सत्यतन्द्रिताऽऽलस्यरहिता च सती द्वादशदिनपर्यन्तमिदं पयोव्रतमन्वतिष्ठत्कृतवती । वा इति उक्तार्थे प्रमाणप्रसिद्धिं सूचयति ।। १ ।।

चिन्तयन्त्येकया बुद्ध्या भगवन्तमधोक्षजम् ।
प्रगृह्येन्द्रियदुष्टाश्वान् मनसा बुद्धिसारथिः ।। २ ।।

सत्यधर्मीया — दुष्टाश्वांस्तानिव कुपथगामिनः । मनसा प्रगृह्य निगृह्य । बुद्धिः सारथिर्यन्ता यस्याः सा ।। २ ।।

छलारी — तदेव विवृणोति ।। प्रगृह्येति । प्रगृह्येन्द्रियाख्यदुष्टाश्वान् । बुद्धिः सारथिर्यस्याः सा ।। ।। २ ।।

लिङ्गेरी — साऽदितिः श्रोत्रादीन्द्रियलक्षणदुष्टाश्वान् बुद्धिलक्षणसारथिमती सती मनसा प्रगृह्य दुर्विषयेऽप्रवृत्तान् कृत्वा भगवन्तमधोक्षजमेकया सर्वोत्तमत्वविषयिण्या बुद्ध्या चिन्तयन्ती बभूव ।।२।।

मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ।
वासुदेवे समाधाय चचार ह पयोव्रतम् ।। ३ ।।

सत्यधर्मीया — अखिलात्मनि व्याप्ते । निरवधिकस्वामिनीति वा ।। ३ ।।

छलारी — अखिलानामन्तर्यामिणि ।। ३ ।।

लिङ्गेरी — अनन्तरमखिलचेतनात्मकजगत आत्मन्यन्तर्यामिणि स्वामिनि च भगवति नारायणे एको भगवानग्रे विषयतया च यस्यास्तया बुद्ध्या शास्त्रजनितनिश्चयेन मनोऽन्तःकरणं वासुदेवे समाधाय स्थापयित्वा पयोव्रतं चचार कृतवती । हेति प्रमाणप्रसिद्धिः ।। ३ ।।

तस्याः प्रादुरभूत् तात भगवानादिपूरुषः ।
पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ।। ४ ।।

सत्यधर्मीया — फलमलब्धा ललना किलानालस्येनेत्यालपति ।। तस्या इति ।। ४ ।।

छलारी — व्रताचरणफलमाह ॥ तस्या इति । तस्या अदित्याः । हे तात राजन् ॥ ४ ॥

लिङ्गेरी — तावत्तदैवं चिन्तयन्त्या तस्या अदितेः पीताम्बरः शङ्खचक्रगदाधरश्चतुर्बाहुरादिपुरुषो भगवन्नारायणः प्रत्यक्षोऽभूत् ॥ ४ ॥

तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् ।
ननाम भुवि कायेन दण्डवत् प्रीतिविह्वला ॥ ५ ॥

सत्यधर्मीया — सादरमादरसहितं यथा तथा । आदरं निर्भयम् । पतिबोधनस्मृतिरिति । सहसा झडिति । हसेनाभिलषितं फलितमित्युत्पन्नेन सहितेति वा ॥ ५ ॥

छलारी — नेत्रयोर्गोचरं विषयम् । प्रीत्या विह्वला ॥ ५ ॥

लिङ्गेरी — अदितिर्नेत्रयोर्गोचरं विषयं प्रत्यक्षं तं वीक्ष्य सहसोत्थाय भुवि दण्डवत्कायेन पतिता सती भगवति प्रीत्या भक्त्यतिशयेन विह्वला चलदेहा सती सादरं ननाम ॥ ५ ॥

सोत्थाय बद्धाञ्जलिरीडितुं स्थिता नोत्सेह आनन्दजलाकुलेक्षणा ।
बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥

सत्यधर्मीय — तदापरोक्ष्येण तत्पारवश्यमीरयति ॥ सेति । पुलकै रोमाञ्चैः । गात्रे वेपथुः कम्पो यस्याः सा तथा । वेपथुः कम्प इत्यमरः ॥ ६ ॥

छलारी — तस्या भक्तिलक्षणं दर्शयति । सोत्थाय बद्धाञ्जलिः स्थिता बद्धाञ्जलिर्भूत्वेत्यर्थः । ईडितुं स्तोतुं नोत्सहे न शशाक । अपि तु तूष्णीमास । कथम्भूता । आनन्दजलैराकुलिते पूरिते ईक्षणे यस्याः सा । पुलकैः रोमाञ्चैराकुला व्याप्ताऽऽकृतिर्देहो यस्याः सा । तस्य हरेर्दर्शनेन योऽत्युत्सवस्तेन गात्रे शरीरे वेपथुः कंपो यस्याः सा ॥ ६ ॥

लिङ्गेरी — साऽदितिर्भुव उत्थाय बद्धाञ्जली सती भगवन्तमीडितुं स्तोतुं स्थिताऽपि तस्य भगवतो दर्शनाख्यात्युत्सवेन गात्रे शरीरे वेपथुः कंपा यस्याः सा सती, पुलकैरोमांचैराकुलिता सन्दधिताऽऽकृतिराकारो यस्याः सा । आनन्दजलेनाकुलेऽक्षिणी यस्याः सा च सती ईडितुं नोत्सहे शक्ता न बभूव । तूष्णीमेव बभूव ॥ ६ ॥

प्रीत्या शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ।
उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥

सत्यधर्मीया — उद्वीक्षती उद्वीक्ष्यमाणा ॥ ७ ॥

छलारी — ततः किमकरोदित्यत आह ॥ प्रीत्येति । चक्षुषा पिबतीवोद्वीक्षतीक्षमाणा ॥ ७ ॥

लिङ्गेरी — हे कुरूद्वह । साऽदितिर्देवी लक्ष्मीपतिं यज्ञपतिं जगत्पतिं हरिं चक्षुषाऽऽदरातिशयेन पिबतीवेक्षती सती प्रीत्या गद्गदयाऽस्पष्टाक्षरया गिरा वाचा शनैर्हरिं तुष्टाव स्तुतवती ॥ ७ ॥

अदितिरुवाच–

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रव श्रवणमङ्गलनामधेय ।
आपन्नलोकवृजिनोपशमोदयाद्य
शं नः कृधीश भगवन्नवसन्ननाथ ॥ ८ ॥

सत्यधर्मीया — यज्ञेश तत्स्वामिन् । ई च लक्ष्मीश्च तदुपलक्षिताः प्रेक्षावन्तश्चाज्ञाश्च मदादयश्च तेषामीशेति वा । यज्ञपुरुष तन्मुख्योद्देश्य । तीर्थानि पादे यस्य । तीर्थं पवित्रं श्रवः कीर्तिर्यस्य तत्सम्बुद्धिः । श्रवणयोर्मङ्गलं तत्करं नामधेयं यस्य तत्सम्बुद्धिः । आपन्नाः शरणागतलोकास्तेषां वृजिनस्य पापस्योपशमो येन । स उदयो यस्य स तत्सम्बुद्धिः । आद्य उपजीव्य । तदुदयवत् आद्येति पदमेकं वा । अवसन्ननाथ दीननाथ । शं सुखं कृधि कुरु । यथा आपन्न भवेत्तथा शं शाश्वतिकं कुरु । लोकवृजिनार्दनेति वा ॥ ८ ॥

छलारी — स्वाभीष्टोदयकरगुणविशिष्टत्वेन स्तौति ॥ यज्ञेशेत्यादि त्रिभिः । यज्ञानामीश संपादक । यज्ञो विष्णुदेवतेति श्रुतेः । पुरुष पूर्णषड्गुणाच्युत गुणैश्चयुतिरहित । तीर्थादीनि पादयोर्यस्य स तथा । तीर्थं पवित्रं श्रवः कीर्तिर्यस्य तस्य सम्बुद्धिः । श्रवणयोः कर्णयोर्मङ्गलं नामधेयं यस्य सः । आपन्नानां शरणागतानां लोकानां व्रजिनस्य दुःखस्योपशमाय परिहारार्थमुदयोऽवतारो यस्य स तस्य सम्बुद्धिः । हे ईश अनघ शं सुखं कुरु ॥ ८ ॥

लिङ्गेरी — स्तुतिप्रकारमाह ॥ यज्ञेशेति । यज्ञानामश्वमेधादीनामीश स्वामिन् । अत एव यज्ञनामन् । पूर्णषड्गुण, देशकालगुणैरच्युत पूर्ण, भागीरथ्याख्यतीर्थपादपद्म । तीर्थं शुद्धिकरं श्रवो

यशो यस्य तादृशात् एव श्रवणयोः श्रोत्रेन्द्रिययोर्मङ्गलकरनामन् आपद्युक्तस्वशरणागतजनानां वृजिनानि पापान्युपशमयति परिहरतीत्युपशम उदयः प्रादुर्भावो यस्य तादृश । अवसन्नानां ज्ञानादिशून्यतया नष्टानां तद्योग्यानां नाथ । हे भगवन्नारायण! अद्यास्माकं शं सुखं कुरुष्व ॥ ८ ॥

विश्वाय विश्वभवन स्थितिसंयमाय
स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वच्छाय शश्वदुपबृंहितपूर्णबोध-
व्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥

सत्यधर्मीया — विश्वाय तन्नाम्ने । भवनमुत्पादनम् । विश्वस्य तदादयो यस्मात्तत्संबुद्धिः । तन्नामाह ॥ आयेति ॥ स्वैरं स्वेच्छया । भूम्ने पूर्णाय । स्वच्छाय निर्मलाय । तदेव देवनैर्मल्यं प्रकटयति । शश्वदुपबृंहितः पूर्णो बोधस्तेन व्यापादितं नाशितम् । अनङ्कुरितमिति यावत् । आत्मनः स्वस्य । नाशितम् । आत्मान आत्मीयास्तेषां च तमो येन तस्मै । उपबृंहितपदं पूर्णपदादतिरिक्तं सत्, विश्वेति तद्रूपमुपस्थापयति । मध्यमं तु गजाकारमित्युक्तेः । बृंहितं करिगर्जितमित्युक्तेः । बृंहितं न स्वस्वरेण जातो यः पूर्णो बोधः तेन व्यापादितं आत्मीयतमो येन स तस्मा इति वा । अनेन ऐरावतारूढशक्रदर्शनं त्वरया भवितव्यमिति कटाक्षयतीति ध्वन्यते । स्वच्छायाः । स्वस्य छाया रीतिः प्रकारश्चेति तात्पर्यान्तरात् प्रकारो येषाम् । स्वप्रतिबिम्बाश्च ते मुक्तौ शश्वदुपबृंहितेन योग्यतानुसारेण पूर्णेन बोधेन ज्ञानेन व्यापादितमात्मतमः स्वाज्ञानं येषां ते । तेन तस्मा इति वा । विश्वभवनस्थितिभ्यां सहितश्चासौ संयमः संहारश्च । तदर्थं स्वैरं गृहीताः पुरुशक्तयो गुणाश्च येन तस्मा इति वा । पुरेति पाठे पुराणि शरीराणि । इतरत् यथापूर्वम् ॥ ९ ॥

छलारी — भूम्ने महते हरये नमः । विश्वाय विश्वशब्दवाच्याय । विश्वस्य जगत उत्पत्तिस्थिति-संहारार्थं स्वैरं स्वेच्छया गृहीताः पुरुशक्तेः प्रकृतेर्गुणा सत्त्वादयो येन तस्मै । तथाऽपि स्वस्थायाच्युतस्वरूपाय । कुतः । शश्वदुपबृंहितेनाभिव्यक्तेन पूर्णबोधेन संपूर्णज्ञानेन व्यापादितं नित्यनिरस्तमात्मनि तमोऽज्ञानलक्षणं येन तस्मै ॥ ९ ॥

लिङ्गेरी — विश्वाय सर्वजगत्पूर्णाय । विश्वभुवनस्थितिसंयमाय सर्वजगदुत्पत्तिस्थितिनाशकर्त्रे । स्वैरं स्वेच्छया गृहीताः पुरवो बव्ह्यः शक्तयो जगदुत्पादनादिविषया गुणाः सत्त्वादयश्च येन तस्मै । भूम्ने सुखादिगुणपूर्णाय पारतन्त्र्यादिदोषरहिततया स्वच्छायातिशुद्धाय शश्वदुपबृंहितः

स्वपराखिलगोचरतयाऽत्यभिवृद्धोऽतः पूर्णो यो बोधो विज्ञानं तेन व्यापादितं दूरोत्सारितमात्मनस्तमोऽज्ञानं यस्य तस्मै हरये नमोऽस्तु ॥ ९ ॥

आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणस्त्रिवर्गः ।
ज्ञानं च केवलमनन्त भवन्ति तुष्टात् त्वत्तो नृणां किमुपसन्नजनाधिनाशः ॥१०॥

सत्यधर्मीया — नाहं परायुरित्यादेः परमायुर्द्विपरार्धावसानलक्षणं ब्रह्मणः । परमायुर्नित्यायुर्मुक्तिरिति वा । वपुर्देहः । अभीष्टमपेक्षितम् । अभीष्टं वपुरिति सामानाधिकरण्यं च । अतुल्य असदृश । अतुल्या लक्ष्मीरिति वा । द्यौर्द्युलोकः । भूः रसाः मधुरादयो रसातलादिलोका वा । सकलो विद्याभिः सहितो योगोऽणिमादिः समग्रः स इति वा । तस्य गुणस्त्रिवर्गो धर्मादिः । केवलं जडामिश्रं ज्ञानं च । तुष्टात् त्वत्तो नृणां भवन्ति । उपसन्नजनाधिनाशः । उपसन्नाश्च ते जनाश्च आश्रितजनाः तेषामाधिर्मानसी व्यथा । तस्य नाशो भवेदिति किं नाद्भुतमिति भावः ॥ १० ॥

छलारी — अस्मन्मनोरथमीषत्करणमेव तवेति कैमुत्यन्यायेनाह ॥ आयुरिति ॥ परमायुर्द्विपरार्धायुस्तल्लक्षणं ब्रह्मायुः । वस्तुनि सकला योगेन लभ्या गुणा अणिमादयस्त्रयाणां धर्मार्थकामानां वर्गः केवलं ज्ञानं तत्ज्ञानम् । हे अनन्त । तुष्टात्त्वत्तो नृणां भवन्ति यतोऽतोऽस्माकं सपत्नानां शत्रूणां दैत्यानां सकाशाज्जयस्तेभ्योऽस्मद्राज्यापहरणं आदिशब्देन गृह्यते । एतदादिराशिः कामः सिद्ध्यतीति किमु वाच्यम् ॥ १० ॥

लिङ्गेरी — हे अनन्त देशकालगुणैरपरिच्छिन्न! नृणामधिकारिणां ब्रह्मादीनां तुष्टात्प्रसन्नात्त्वत्तः परं द्विपरार्धादिरूपमायुरभीष्टमपेक्षितं वपुर्ब्राह्मणादि- शरीरमतुल्यलक्ष्मी असमाना संपदो द्यौरन्तरिक्षं भूरसातलादिस्थानं, सर्वेऽणिमादयो गुणा धर्मार्थकामलक्षणस्त्रिवर्गः केवलमज्ञानसंशयविपर्ययासमानाधिकरणं ज्ञानं चेत्येतानि भवन्ति । त्वामुपसन्नानां शरणागतानां जनानामाधिनाशो मनोव्यथापरिहारो भवतीति किमु वक्तव्यम् । पुंस्याधिर्मानसी व्यथेत्यमरः ॥ १० ॥

श्रीशुक उवाच–

अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः ।
क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥

सत्यधर्मीया — सर्वभूतानां क्षेत्रज्ञोऽन्तर्यामी । इति वक्ष्यमाणप्रकारेण ॥ ११ ॥

छलारी — सर्वभूतानां क्षेत्रज्ञोऽन्तर्यामी वक्ष्यमाणप्रकारेणोवाच ॥ ११ ॥

लिङ्गेरी — हे भरतकुलोत्पन्न राजन् । पुष्करवत्कमलवदीक्षणे नेत्रे यस्य सः । सर्वेषां भूतानां प्राणिनां क्षेत्रे शरीरे क्रियमाणं कर्म जानातीति क्षेत्रज्ञो भगवान्नारायणोऽदित्यैवं स्तुतः सन् इति वक्ष्यमाणप्रकारेणोवाच ह ॥ ११ ॥

श्रीभगवानुवाच–

देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षितम् ।
यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥

सत्यधर्मीया — देवमातः । चिरकाङ्क्षितं मे मया ज्ञातम् । किं तदित्यत आह ॥ यदिति । हृता श्रीर्येषां ते तथा तेषाम् । वामीति नदीसंज्ञायाम् । ह्रस्वनद्यापो नुडिति नुट् । स्वधामतः स्वर्गरूपाद्देहतः । च्यावितानां तत्सम्बन्धि यद्विज्ञानम् । बाधितानामिति पाठे बाधाऽप्येतद्रूपिणी निरूपणीया ॥ १२ ॥

छलारी — देवानां मातरदिते । सपत्नैर्हृता श्रीर्येषां स्वधामतः स्वपक्षपाताच्च बाधितानां भ्रंशितानां पुत्राणां देवानामर्थे भवत्या यच्चिरं बहुकालेन काङ्क्षितं तन्मया विज्ञातमित्यन्वयः ॥ १२ ॥

लिङ्गेरी — हे देवानां मातरदिते । भवत्यास्तव चिरं बहुकालं कांक्षितमपेक्षितं मे मया विज्ञातम् । तत्किमित्यत आह । यत्सपत्नैरिति । शत्रुभिरपहृतैश्वर्याणां स्थानात्प्रच्यावितानां देवानां यदैश्वर्यादिप्रत्यावर्तनमिति ॥ १२ ॥

तान् विनिर्जित्य समरे दुर्मदानसुरर्षभान् ।
प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥

सत्यधर्मीया — उपासितुं स्वस्थतया स्थातुं मामिति शेषः। सेवितुमित्यर्थः ॥ १३ ॥

छलारी — काङ्क्षितमेवाह ॥ तानिति त्रिभिः श्लोकैः । प्रतिलब्धा जयश्रीर्जयसंपद्यैस्ते । प्रतिलब्धा जयश्च श्रीश्च यैस्तैरिति वा । पुत्रैः सहोपासितुम् । मामिति शेषः । यद्वा । उप समीपे एकत्रेत्यर्थः । उवासितुं स्थातुमिच्छसि ॥ १३ ॥

लिङ्गेरी — हे अदिते । त्वं दुष्टमदेन गर्वेण युक्तानसुरश्रेष्ठान्समरे युद्धे विनिर्जित्य पुनः प्राप्तजयसंपद्भिः पुत्रैः सह मामुपासितुमिच्छसि ॥ १३ ॥

इन्द्रज्येष्ठैश्च तनयैर्हतानां युधि विद्विषाम् ।
स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥

सत्यधर्मीया — इन्द्रो ज्येष्ठो येषां ते तथा तैः । रुदन्ती रुदतीः ॥ १४ ॥

छलारी — इन्द्रो ज्येष्ठो येषां तैः । विद्विषां दैत्यानां स्त्रियो गृहिणीरासाद्य समीपं प्राप्य ॥१४॥

लिङ्गेरी — युधि, इन्द्र एव ज्येष्ठो येषां तैस्तव पुत्रैर्हतानामतिद्वेषिणामसुराणां, स्वपतीनासाद्यातिदुःखिता रुदंतीः स्त्रियो द्रष्टुमिच्छसि ॥ १४ ॥

आत्मजान् सुसमृद्धान् स्वान् प्रत्याहृतयशःश्रियः ।
नाकपृष्टमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥

सत्यधर्मीया — प्रत्याहृते यशश्च श्रीश्च यैस्ते तान् । नाकपृष्टं स्वर्गम् ॥ १५ ॥

छलारी — प्रत्याहृतं पुनः प्राप्तं यशश्च श्रीश्च यैस्तान्नाकपृष्टं स्वर्गमधिष्ठायाश्रित्य क्रीडतः सुखेन स्वस्य व्यापारान्कुर्वतः ॥ १५ ॥

लिङ्गेरी — हे अदिते! त्वं प्रत्याहृतयशःश्रियोऽसुरेभ्यः पुनरपहृतकीर्तिसंपदो नाकपृष्टं स्वर्गस्थानमाश्रित्य क्रीडां कुर्वतो बलादिभिरभिवृद्धान्स्वात्मजान् द्रष्टुमिच्छसि ॥ १५ ॥

प्रायोऽधुना तेऽसुरयूथनाथा अवारणीया इति देवि मे मतिः ।
यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥

सत्यधर्मीया — हतानामित्यादि स्ववादमपवदति ॥ प्राय इति । अनुकूलः स्वकार्यसहकारी चेश्वरो यस्य स चासौ विप्रश्च शुक्रस्तेन गुप्ता रक्षिता इति । हे देवि । अधुना अवारणीया अनिवार्या इति मे मम मतिः । तेऽपि समश्वितमत्का इति भावः । विक्रमस्तत्र तेषु । पराक्रमं दृष्टवतोऽपि न मे पराक्रमकालोऽयमिति भावः ॥ १६ ॥

छलारी — नैतत्कार्यं क्षिप्रं साध्यमित्यत आह ॥ प्राय इति । अधुनाऽसुरयूथानां नाथास्ते प्रायो बाहुल्येनावारणीया अनिवारणीया इति मे मतिर्निश्चयः । कुत इत्यत आह ॥ यदिति । यद्यस्मात्ते दैत्या अनुकूल ईश्वरो हरिर्येषां तैर्विप्रैर्भृगुभिर्गुप्ता रक्षिता अनुकूलैरीश्वरैः समर्थैर्विप्रैर्गुप्ता इति वा । तस्मात्तत्र तेषु दैत्येषु विषये देवानां विक्रमः सुखं न ददाति ॥ १६ ॥

लिङ्गेरी — हे अदितिदेवि । अधुनाऽसुरसेनासमूहस्वामिनस्तेऽसुराः प्रायः प्राचुर्येण देवैर्निवारयितुमशक्या यस्मात्तेऽसुरा अनुकूलः स्वकार्यसहाय ईश्वरो नारायणो येषां विप्राणां शुक्रादीनां तैः संरक्षितास्तस्मात्तत्र तद्विषये कृतो विक्रमः पराक्रमो देवानां सुखं न ददाति । न दास्यतीति मे मतिर्निश्चिता ॥ १६ ॥

अथाप्युपायो मम देवि चिन्त्यः सन्तोषितस्य व्रतचर्यया ते ।
ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १७ ॥

सत्यधर्मीया — अथाऽप्येवं सत्यपि । ते व्रतचर्यया सन्तोषितस्य मम उपायस्तदपायोपायश्चिंत्यः । भवतु भवतोऽश्चनमकिञ्चिदुदंचकमिति न चेत्याह ॥ ममेति । श्रद्धानुरूपं विश्वासानुगुणम् । यन्ममार्हणमर्चनमन्यथा वृथा गन्तुं नार्हति । फलहेतुकत्वात् । फलस्य हेतुर्ज्ञानं यस्मात्तत्तथा । तस्य भावस्तत्त्वम् । तस्मात् फलोपलम्भकापरोक्षोपलब्धिकारणत्वादित्यर्थः ॥ १७ ॥

छलारी — इदानीं विक्रमासम्भवे तूष्णीमेवास्थेयमित्यत आह ॥ अथाऽपीति । यद्यपीदं पराक्रमं साध्यं न भवति तथाऽपि । हे देवि । मम मयोपायश्चिन्त्य एव विचार्य एव । व्रतस्य चर्ययाऽनुष्ठानेन सन्तोषितस्य । हेतुगर्भमिदम् । त्वद्व्रतेन मम प्रीतत्वादित्यर्थः । तदेव विवृणोति ॥ ममेति । ममार्चनमन्यथा निष्फलत्वेन गन्तुं भवितुं नार्हति । श्रद्धानुरूपमिति क्रियाविशेषणम् । मदर्चनस्य श्रद्धानुसारेण फलहेतुत्वात्पुरुषार्थनिमित्तकत्वात् । कप्रत्ययः स्वार्थे ॥ १७ ॥

लिङ्गेरी — हे देवि । यद्यपीत्थं अथाऽपि ते व्रताचरणेन सन्तोषितेन मया तव पुत्रश्रेय उपायश्चिन्तितः । यतो ममार्चनं तत्तद्भक्तविश्वासानुसारिफलदमतोऽन्यथा व्यर्थं गन्तुं नार्हति ॥ १७ ॥

त्वयाऽर्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ।
स्वांशेन पुत्रत्वमुपेत्य ते सुतान् पातास्मि मारीचतपस्यवस्थितः ॥ १८ ॥

सत्यधर्मीया — त्वयाऽहमर्चितोऽनुगुणमित्युभयानुगुणं समीडितश्च । ते सुतानित्यप्यन्वेति त इति । मारीचस्य तपस्यवस्थितः सन्निहितः ॥ १८ ॥

छलारी — उक्तानुवादेन चिन्तितोपायमेवाह ॥ त्वयेति । अपत्यानां पुत्राणां गुप्तये रक्षणायानुगुणं योग्यतानुसारेण समीडितः स्तुतश्च स्वांशेन स्वरूपभूतांशेन मारीचस्य मरीचिपुत्रस्य कश्यपस्य तपस्यवस्थितः सन् ते पुत्रत्वमुपेत्य ॥ १८ ॥

लिङ्गेरी — हे अदिते । अहं त्वया तेऽपत्यानां पुत्राणां देवानां गुप्त्यै संरक्षणाय पयोव्रतेनार्चितः स्वज्ञातैर्गुणैः संस्तुतश्चातोऽहं स्वांशेन ते पुत्रत्वमुपेत्य सुतान्संरक्षिताऽस्मि । यतश्च मरीचिपुत्रः कश्यपस्तपोनिमित्तेनापि च पुत्रपालने संस्थितोऽतोऽपि त्वत्पुत्रपालने तव संशयो माऽभूदिति भावः ॥ १८ ॥

उपधाव पतिं भद्रे प्रजापतिमकल्मषम् ।
मां च भावय तेऽपत्यमेवंरूपमवस्थितम् ॥ १९ ॥

सत्यधर्मीया — उपधावोपास्व । एवंरूपमवस्थितं मां चापत्यं पुत्रम् । भावय तत्त्वेन चिन्तय ॥ ॥ १९ ॥

छलारी — अतः पतिमुपधाव पतिमुपास्व । इदानीं ते पुरतोऽवस्थितमेवंरूपमेवामाकारं मां चापत्यत्वेन पुत्रत्वेन भावय चिन्तय ॥ १९ ॥

लिङ्गेरी — हे भद्रे! यतोऽहं त्वत्तः प्रधानकश्यपतपसाऽपि त्वद्वांछितकर्ताऽतस्त्वं कामादि-दोषविधुरं स्वाश्रितप्रजानां पालकं ते पतिं कश्यपमुपधाव सेवय तुष्टं च कुरु । एवं परिदृश्यमान-रूपमवस्थितं मां च ते पुत्रत्वेनोपास्व ॥ १९ ॥

नैतत् परस्मा आख्येयं देवगुह्यं कथञ्चन ।
सर्वं सम्पद्यते देवि देवगुह्यात् सुसंवृतात् ॥ २० ॥

सत्यधर्मीया — योषितां शापान्न हृदि स्थिरीभवति बोधितमिति तां शिक्षयति ॥ नैतदिति । परस्मै यस्मै कस्मै वा नान्यस्मै सुसंवृतात् अत्यन्ताच्छादितादेवगुह्यात् । सर्वं संपद्यते ॥ २० ॥

छलारी — परस्मा अयोग्याय शत्रवे वा एतदेव रहस्यं नाख्येयं न वक्तव्यं देवगुह्यं सर्वं यस्मात्सुसंवृतमाच्छादितं सत्संपद्यते सिद्ध्यते इति ॥ २० ॥

लिङ्गेरी — हे देवि । एतन्मदुक्तं प्रमेयं यस्मादेवानां गुह्यं गोप्यं स्वानाप्तेभ्यः कथनायोग्यं तस्मात्त्वयाऽपि कथंचन केनापि प्रकारेण परस्मा अनाप्तायान्यस्मै न वक्तव्यम् । यस्मात्सुतरां संवृतादाच्छादितादुक्तादेवगुह्यात्ते कार्यं संपद्यते प्राप्तं भवेत् ॥ २० ॥

श्रीशुक उवाच–

एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत ।
अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥
उपाधावत् पतिं भक्त्या परया कृतकृत्यवत् ॥ २१ ॥

सत्यधर्मीया — प्रभोर्हरेः । उपाधावत् ॥ २१ ॥

छलारी — प्रभोर्हरेरात्मनि स्वस्मिन् जन्म लब्ध्वा मयि हरिर्जनिष्यतीति निश्चित्येत्यर्थः । कथं भूतम् । दुर्लभमल्पपुण्यैरप्राप्यमत एव हरेः स्वपुत्रत्वसिद्ध्यर्थं पतिमुपाधावदभजत् ॥ २१ ॥

लिङ्गेरी — भगवान्नारायणोऽदितिं प्रति एतावत्प्रमेयमुक्त्वा तत्रैवादृश्योऽभूत् । अदितिरयोग्यजनानामप्राप्यमात्मनि प्रभोः सर्वकार्यसमर्थस्य हरेर्जन्म प्रादुर्भावलक्षणं वरं लब्ध्वा कृतकृत्यवत्स्थिता सती स्वपतिं कश्यपमुत्कृष्टया भक्त्या सेवामकरोत् । अवितथमव्यर्थं यथार्थमीक्षणं ज्ञानं यस्य स कश्यपः स्वस्मिन्प्रविष्टं हरेस्तमंशं स्वसमाधिलक्षणोपायेन ज्ञातवान् । स कश्यपः स्वकृतेन तपसा निमित्तेन स्वस्मिन् बहुकालसंपादितं वीर्यं अदित्यां, आधत्त वायुरग्निमथनकाष्ठेऽग्निं यथा तथा स्थापयामास ॥ २१-२३ ॥

स वै समाधियोगेन कश्यपस्तदबुध्यत ।
प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥ २२ ॥

सत्यधर्मीया — कश्यपः समाधियोगेन तदबुद्ध्यत तज्ज्ञातवान् । किं तदित्यत आह ॥ प्रविष्टमिति । तदवबोधो बाधितार्थः किं न स्यादित्यत आह । अवितथमनन्यथाभवदीक्षणं प्रेक्षा यस्य स तथेति ॥ २२ ॥

छलारी — अभजतेत्यनुवादाद्धरिः पितृमातृक्रमानुसारेण पूर्वं कश्यपे प्राविशदिति विशेषो ज्ञेयः अवितथं यथार्थेक्षणं दर्शनं यस्य सः कश्यपो हरेस्तत्तं स्वरूपांशमात्मनि प्रविष्टमबुद्ध्यत । तत्र साधनं समाधियोगेन ध्यानलक्षणोपायेनेति ॥ २२ ॥

सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतम् ।
समाहितमना राजन् दारुण्यग्निं यथाऽनिलः ॥ २३ ॥

सत्यधर्मीया — चिरसम्भृतमूर्ध्वरेतस्कतया तपःकाले सञ्चितम् । सङ्गृहीतमिति वा । अनिलो वायुर्दारुणि च परस्परसङ्घर्षात् अग्निं यथा तथा स वीर्यमदित्यां समाधत्तेत्यन्वयः ।। २३ ।।

छलारी — स कश्यपस्तपसा चिरकालसंचितं बहुकालीनेनोर्ध्वरेतस्कत्वादिरूपेण तपसा संगृहीतम् । इदं वीर्यं दैत्यनाशकरं भवेदिति समाहितं मनो यस्य स तथा । तथाऽनुसन्धानः सन् अदित्यां वीर्यमाधत्त । तत्र दृष्टान्तः ।। दारुणीति । अनिलो वायुर्यथा सर्वत्र समोऽपि दारुणि वृक्षे परस्परं सङ्घर्षणं वनदाहकमग्निमाधत्ते । एवं स्वयं पुत्रेषु समोऽपि दैत्यक्षपणं वीर्यमाधत्तेत्यर्थः ।।२३।।

अदित्यां निहितं गर्भं भगवन्तं सनातनम् ।
हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ।। २४ ।।

सत्यधर्मीया — भगवन्तं तद्रूपम् ।। २४ ।।

छलारी — हिरण्यगर्भश्चतुर्मुखो भगवन्तं हरिमदित्यां विहितं गर्भं विज्ञाय समीडे तुष्टावेत्यर्थः ।। ।। २४ ।।

लिङ्गेरी — हिरण्यगर्भश्चतुर्मुखोऽदित्यां कश्यपेन निहितं वीर्यद्वारा स्थापितं भगवन्तमधोक्षजं नारायणं ज्ञात्वा गोप्यनामधेयैर्भगवन्तं स्तुतवान् ।। २४ ।।

ब्रह्मोवाच–

जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ।
नमो ब्रह्मण्यदेवाय त्रिगुणाय नमोऽस्तु ते ।। २५ ।।

सत्यधर्मीया — उरुगाय रमादिस्तुत्याय । उरु पदार्थं सर्वं गच्छतीत्यवगच्छतीति वा उरुगस्तस्मै वा । त्रिगुणाय तत्प्रवर्तकाय । त्वं जय । ते नमः । जयोऽर्जुन उरुगायो महत्स्तुत्यो येन तत्सम्बुद्धिरिति वा । उरुक्रमेति भाविज्ञानं स्वस्यास्तीति ध्वनयति ।। २५ ।।

छलारी — गुह्यतमान्याह ।। जयेत्यादिना । उरुभिरुत्वृष्टैर्देवैर्ब्रह्मादिदेवैर्गीयत इति तथा तस्य सम्बुद्धिरुरुगायेति । उरवः क्रमाः पादविक्षेपा वा यस्योरुक्रमेति सम्बुद्धिः । ब्रह्मणि जातो हितो ब्रह्मण्यस्तस्मै देवाय । त्रिगुणाय सत्त्वादिगुणप्रवर्तकाय ।। २५ ।।

लिङ्गेरी — स्तुतिप्रकारमाह ॥ जयेत्यादिना । उरुगाय सर्वोत्तमतया श्रुत्यादिप्रतिपाद्य, उत्कृष्टपादप्रक्षेप हे भगवन् । त्वं जय शत्रूनभिभावय । ते नमोऽस्तु । ब्राह्मणादिषु दयालुतया ब्रह्मण्याय क्रीडादिगुणविशिष्टाय, त्रयो लोका गुणा अप्रधाना यस्मात्तस्मै त्रिगुणाय ते नमोऽस्तु । पृश्न्याख्याया गर्भाय बालकतया पोषिताय देवाय, देवानां गर्भाय प्रसिद्धगर्भवद्गोप्याय वेधसे ज्ञानरूपाय सत्त्वादिगुणत्रयनियामकाय वैकुण्ठश्वेतद्वीपानन्तासनाख्यत्रिषु स्थलेषु पृष्टमवस्थानं यस्य तस्मै गरुडारूढाय व्याप्ताय ते नमोऽस्तु ॥ २५,२६ ॥

पृश्निगर्भाय देवाय वेदगर्भाय वेधसे ।
त्रिगुणाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥ २६ ॥

सत्यधर्मीया — पृश्निगर्भाय पृश्निनाम्न्यपत्याय । पृश्नेर्गर्भोऽर्भक इति वा । गर्भो भ्रूणेऽर्भके कक्षाविति विश्वः । वेदगर्भाय वेदरहस्याय । देवगर्भायेति पाठे देवा गर्भे यस्य स तस्मै । वेधसे संवित्स्वरूपाय । त्रिपृष्ठाय त्रीणि पृष्ठाणि वैकुण्ठदिस्थानानि यस्य सः । त्रयाणां लोकानां पृष्ठ उपरिभागे स्थिताय । शिपिविष्ठाय । शिपिशब्दः पशुवाची । पशवश्चात्र देवादयस्तत्र विष्टः । यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः । शिपयो रश्मयो ज्ञानकला विष्टाः प्रविष्टा यं तस्मा इति वा । शिपिर्गरुडस्तत्र विष्टायोपविष्टाय वा । विष्णवे व्याप्ताय वा । विष्णुपदार्थः ऐतरेयादिभाष्यबिलासे प्रकाशितोऽस्माभिः षष्ठस्पष्टनेऽनुसन्धेयः ॥ २६ ॥

छलारी — अदितेरेव पूर्वस्मिन् जन्मनि प्रश्निरिति नाम । इदं च दशमस्कन्धादौ प्रसिद्धम् । तस्या गर्भाय पुत्राय । वेदा गर्भे यस्य तस्मै । वेदानां गर्भाय वेदेषु प्रकाशमानायेति वा । वेधसे सर्वज्ञाय । यत्र ये भूरादयो लोका नाभौ यस्य सन्निनाभस्तस्मै । त्रीणि पृष्ठानि त्रिलोकेभ्य उपरि स्थितानि वैकुण्ठादीनि गृहभूतानि सन्ति यस्य तस्मै । शिपिविष्टाय । शिपिशब्देन पशुशब्दवाच्या ग्राह्याः । तेष्वन्तर्यामित्वेन प्रविष्टाय । यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतिष्ठितीति श्रुतेः । यद्वा । शिपयो रश्मयस्तैर्विष्ठितायेत्यर्थः । विष्णवे व्यापिने ॥ २६ ॥

त्वमादिरन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः ।
कालो भवानाक्षिपतीश विश्वं स्रोतो यथाऽम्भःपतितं गभीरम् ॥ २७ ॥

सत्यधर्मीया — गभीरं स्रोतः अगाधजलप्रवाहः । अम्भः पतितं यथा आक्षिपति तीरं प्रापयति तथेश त्वमन्तः इति विश्वं कालः भवानाक्षिपतीत्यन्वयः ॥ २७ ॥

छलारी — यथाऽन्तः पतितं तृणादिकं गभीरं स्रोतो नद्याक्षिपत्याकर्षति तथा कालात्मा भवान्विश्वमाक्षिपति स्वोदरे प्रवेशयति ॥ २७ ॥

लिङ्गेरी — हे ईश । त्वं भुवनस्यादिरुत्पादको मध्यं स्थितिहेतुरन्तो नाशक इत्यपरिमितशक्तिं पुरुषं त्वामागमा ज्ञानिनश्चाहुः । गभीरं निम्नभूमिस्थं स्रोतस्तीव्रेण स्रवज्जलं यथा स्वान्तः पतितं तृणाद्याक्षिपति तीव्रं नयति तथा विश्वं समस्तजगद्यः काल आक्षिपति स कालनियामकतया कालनामा भवान् ॥ २७ ॥

त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि सम्प्रविष्टः ।
दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥ २८ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे षोडशोऽध्यायः ॥ ८-१६ ॥

सत्यधर्मीया — हे देव । दिवश्च्युतानां दिवौकसामिति प्रस्तुतविवक्षया स्तुतिः । परायणं मुख्याश्रयः मज्जतो जन्तोरप्सु जले नौर्नौकेव ॥ २८ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे षोडशोऽध्यायः ।

छलारी — इदानीं सर्वान्तर्यामित्वेन सर्वाश्रयत्वं प्रतिपादयन् स्वाभीष्टं सूचयति ॥ त्वमिति । हे देव । स्थिरजङ्गमानां प्रजानां चराचरप्राणिनामित्यर्थः । दिवश्च्युतानां स्वर्गाद्भ्रंशितानां परायणं परमाश्रयो यतः सर्वाश्रयोऽतः सांप्रतं देवकार्यसाधनायावतीर्णस्त्वं स्वर्गच्युतान्पुनः स्वर्गे स्थापयेति भावः ॥ २८ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे षोडशोऽध्यायः ।

लिङ्गेरी — हे देव । त्वं स्थावरजंगमरूपाणां प्रजानां जीवानां तथा प्रजापतीनामन्तःप्रविष्टः सन्पुरुषरूपेण संरक्षिताऽसि यतोऽतो दिवः स्वर्गाच्च्युतानामिन्द्रादिदेवानां जलेषु मज्जमानजनस्य नैरिव परायणं मुख्याश्रयः ॥ २८ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे षोडशोऽध्यायः ॥ ८-१६ ॥

॥ अथ सप्तदशोऽध्यायः ॥

श्रीशुक उवाच–

इत्थं विरिञ्चिस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ।
चतुर्भुजः शङ्खगदाब्जचक्रः पिशङ्गवासा नलिनायतेक्षणः ॥ १ ॥

सत्यधर्मीया — अमृतभूरमृतं भावयतीति स तथा । देवानाममृतप्राप्त्याश्रयो मुक्ताश्रयो वा । अब्जं कमलम् ॥ १ ॥

छलारी — इत्थं विरिञ्चेन स्तुतं कर्म चरितं देवकार्यक्षमं वीर्यं प्रभावश्च यस्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः । कथम्भूतः । अमृतानां मुक्तानां भूराश्रयः । यद्वा । अमृतभूर्मृति-जन्मशून्य इत्यर्थः । शङ्खगदाब्जचक्राण्यस्य सन्तीति तथा । अर्शादित्वेन मत्वर्थीयेऽच् प्रत्ययः । अब्जं पद्मं ।स चासौ पिशङ्गवासाश्चेति तथा । नलिनवत्कमलवदायते विस्तृते ईक्षणे चक्षुषी यस्य सो नलिनायतेक्षणः । प्रादुरयं वोपसर्गपूर्वक वणिक् बभूव । भू सत्तायामिति लिट् ॥ १ ॥

लिङ्गेरी — एवं चतुर्मुखस्य स्तुत्या प्रसन्नस्य हरेरदित्यां प्रादुर्भावादिरूपं माहात्म्यं निरूप्यतेऽस्मिन्नध्याये । अमृतं पीयूषं मोक्षोऽमराणां भवश्च भवति प्रसन्नादस्मादित्यमृतभूरमृतानां मुक्तानां भूराश्रयश्च यश्च भगवान्नारायण इत्थमुक्तरीत्या विरिञ्चेन स्तुतान्युत्कृष्टतया कीर्तितानि कर्माणि चरितानि वीर्यं पराक्रमो यस्य स तथा सन् अदित्यां प्रादुर्बभूव । प्रादुर्भूतं विशिनष्टि ॥ चतुर्भुज इत्यादिना । शङ्खचक्रगदापद्मसहितहस्तचतुष्टयवान् पीतांबरधारी कमलवद्विस्तृतलोचनः ॥१॥

श्यामावदातो झषराजकुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान् ।
श्रीवत्सवक्षा वलयाङ्गदोल्लसत्किरीटकाञ्चीगुणचारुनूपुरः ॥ २ ॥

सत्यधर्मीया — त्विषा स्वरोचिषा । झषराजो मीनेनः । उल्लसदिति वायसलोचनन्यायेन वलयाङ्गदकिरीटान्वयी । चार्विति काञ्चीगुणनूपुरान्वयीति ज्ञेयम् ॥ २ ॥

छलारी — झषराजो मकरस्तदाकारयोः कुण्डलयोस्त्विषा कान्त्योल्लसतीः श्रीर्वदनांबुजे यस्य सः । श्रीवत्सो वक्षसि यस्य सः । वलयैः कङ्कणैरङ्गदैश्च सहोल्लसन्ति किरीटादीनि यस्य सः । काञ्चीगुणः काञ्चीसूत्रम् ॥ २ ॥

लिङ्गेरी — श्यामवर्णेनावदातः शुद्धः । निर्दुष्टश्यामवर्ण इति यावत् । झषराजवन्मीनश्रेष्ठवद्दिद्य-मानयोः कर्णाभरणयोस्त्विषा कान्त्योल्लसदतिप्रकाशनादिसंपदुपेतमुखकमलः पुंस्त्वशक्तिमान् श्रीव-त्साख्यचिन्हितवक्षस्थलः कटकबाहुभूषणैः प्रकाशमाननिर्दुष्टकिरीटबाह्वाभरणपादाभरणयुक्तः ॥ २ ॥

मधुव्रतव्रातविघुष्टया स्वया विराजितश्रीवनमालया हरिः ।
प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कण्ठनिविष्टकौस्तुभः ॥ ३ ॥

सत्यधर्मीया — मधुव्रतानां व्रातेन सङ्घेन विघुष्टया स्वरन्त्या श्रीवनमालया विराजितः । शङ्खगदाब्जैः सहितं चक्रं यस्य सः । एवमुत्तरत्रापि । प्रजापतेः कश्यपस्य । वेश्मनस्तमोऽन्धकारं विनाशयन् । कण्ठनिविष्टकौस्तुभः इदं भगवदवगमार्थविशेषणं न तु तत्प्रकाशप्रकाश्यत्वज्ञापनार्थम् । भास्वत्कौस्तुभभासकमिति श्रीमदुक्तेः ॥ ३ ॥

छलारी — मधुव्रतानां भ्रमराणां व्रातेन विघुष्टया स्वकीयया श्रीमत्या वनमालया विराजितः प्रजापतेः कश्यपस्य वेश्मतमो गृहस्थान्धकारं स्वरोचिषा स्वदेहकान्त्या विनाशयन्कण्ठे निविष्टो बद्धः कौस्तुभो यस्य सः ॥ ३ ॥

लिङ्गेरी — मधुव्रतानां भ्रमराणां व्रातेन समूहेन विघुष्टया ध्वनिमत्या स्वकीयया वैजयन्त्या श्रीवनमालया विराजितः प्रजापतेः कश्यपस्य वेश्मतमो गृहांधकारं स्वरोचिषा स्वाभाविकस्वकीयदेहकान्त्या विनाशयन् कण्ठनिविष्टः संस्थितः कौस्तुभो मणिर्यस्य स तादृशो हरिरदित्यां प्रादुरभूत् ॥ ३ ॥

दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ।
द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः सञ्जहृषुर्नगाश्च ॥ ४ ॥

सत्यधर्मीया — सलिलाशया ह्रदादयः प्रसेदुरित्यन्वयः । ऋतवो वसंतादयो गुणान्विता युगपत् । द्यौरन्तरिक्षम् । द्युलोकान्तरिक्षलोकौ । क्षितिर्भूरग्निर्जिह्वा सोमरसास्वादनसाधनं येषां ते निमिषा । द्विजा विप्रा अण्डजाश्च । नगाः पर्वता वा वृक्षा वा । तत्तदभिमानिनो यत्रानुपपत्तिस्तत्र ग्राह्याः । संजहृषुर्हृष्टाः ॥ ४ ॥

छलारी — प्रसेदुर्निर्मला बभूवुः । सलिलाशयाः सचितः सरांसि ऋतवः सर्वेऽपि वामनोत्त्पतिकाल एव गुणैः स्वकालोचितपुष्पफलैरन्विताः । अग्निजिह्वा देवा अग्निमुखेन हविर्भुज इत्यर्थः । नगाः पर्वताश्च जहृषुर्हर्षं प्रापुः ॥ ४ ॥

लिङ्गेरी — तदा तत्प्रादुर्भावकाले प्राच्यादिदिशः प्रसेदुः प्रसन्ना बभूवुः । तथा सलिलाशया ह्रदादयः प्रसेदुः । प्रजा जनाः प्रहृष्टाः । ऋतवस्तद्वृतुस्थवृक्षादयो गुणैः फलपुष्पादिभिरन्विताः । द्यौः स्वर्गोऽन्तरिक्षं क्षितिर्भूमिः स्वर्गादिदेवता अग्निर्जिव्हास्थानी येषां ते देवा, गावो, द्विजा, नागाः पर्वतवृक्षादिचेतनाः सन्तुष्टा बभूवुः ।। ४ ।।

श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।
सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ।। ५ ।।

सत्यधर्मीया — तज्जन्मसमयं शंसति ।। श्रोणायामिति । भाद्रपदे मासि श्रवणयुक्तायां द्वादश्याम् । तत्रापि श्रोणायां श्रवणस्थे चन्द्रे । तत्रापि श्रवणप्रथमांशेऽभिजिदिति नक्षत्रे अभिजिन्नामनक्षत्रमुपरिष्टादाषाढनामाद्यस्ताच्छ्रोणाया इति श्रुतेः । उत्तराषाढान्त्यपादद्वयं श्रवणाद्य-पादद्वयमभिजिन्नामेति मौहूर्तिकाः । यः प्रभुः प्रादुर्बभूव । सर्वे नक्षत्रताराद्याः नक्षत्राण्यश्विन्यादीनि तारास्तारारमणशुक्राद्या एवाद्या येषां ते तथा । तज्जन्म दक्षिणम् । उदारम् । दक्षिणे सरले केदारावित्यमरः । चक्रुः ।। ५ ।।

छलारी — प्रादुर्भावमाह ।। श्रोणायामिति । भाद्रपदशुद्धद्वादशी श्रवणद्वादशीति प्रसिद्धा । तस्यां श्रावणमासशुक्लद्वादश्यां श्रवणयोगस्य कदाऽप्यसंभवाददर्शनाच्चेदं व्याख्यातम् । तत्राऽपि श्रोणायां चन्द्रे श्रवणनक्षत्रे स्थिते सतीत्यर्थः । तत्रापि श्रवणस्य प्रथमे अंशे अभिजिति तन्नामके नक्षत्रे उत्तराषाढान्त्यपादद्वयं श्रवणाद्यपादद्वयमभिजिन्नामोच्यते । एतच्च श्रुत्या दर्शितम् । अभिजिन्नामनक्षत्रे उपरिष्टादाषाढोनामवत्तायां श्रोणायामिति । एवं विशिष्टे मूहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः । किञ्च नक्षत्राण्यश्विन्यादीनि । ताराशब्देन ग्रहा गुरुशुक्रादयः । ते आद्या येषां ते । सूर्यादयोऽपि तस्य हरेर्जन्म दक्षिणमुदारं चक्रुः । दक्षिणः सरलोदारेत्यभिधानात् । जन्ममुहूर्ते गुणा बहवो बभूवुरित्यर्थः ।। ५ ।।

लिङ्गेरी — श्रोणायां श्रावणमासि श्रवणनक्षत्रयुक्तद्वादश्यामभिजिति मुहूर्ते सूर्येऽन्तरिक्षमध्यगे काले प्रभुः सर्वजगदीशो वामनः प्रादुरभूत् । तस्य वामनस्य जन्मराशिं सर्वे नक्षत्रताराद्याः प्रदक्षिणीचक्रुः । अश्विन्यादिसप्तविंशति नक्षत्राणि, इतरास्ताराः ।। ५ ।।

द्वादश्यां सविताऽतिष्ठन्मध्यंदिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ।। ६ ।।

सत्यधर्मीया — श्रवणद्वादशीति प्रसिद्धाया एव विद्वत्सम्मत्या नामान्तरमाह ।। द्वादश्यामिति । यस्यां द्वादश्यां हरेर्जन्म । यस्यां च सविता मध्यन्दिनगतोऽतिष्ठत् सा विजया प्रोक्तेति विदुर्विद्वांसः । नाम प्रसिद्धमिदं प्रमेयमित्यर्थः ।। ६ ।।

छलारी — विशेषान्तरमाह ।। द्वादश्यामिति । यस्यां द्वादश्यां हरेर्जन्मेत्युक्तम् । तज्जन्म तस्याहन्येवेति विदुर्ज्ञानिनस्तदा मध्यन्दिनगतः सविता तिष्ठन् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ।। ६ ।।

लिङ्गेरी — हे नृप । यस्यां तिथौ हरेर्वामनस्य जन्म प्रादुर्भावं जना विदुर्दृष्टवन्तस्तस्यां द्वादश्यां सविता सूर्यो मध्यन्दिनगतोऽतिष्ठत् सा द्वादशी विजयानाम्नी प्रोक्ता ।। ६ ।।

शङ्खदुन्दुभयो भेर्यो मृदङ्गपणवानकाः ।
चित्रवादित्रतूर्याणां निर्घोषस्तुमलोऽभवत् ।। ७ ।।

सत्यधर्मीया — शङ्खादयो नेदुरिति शेषः ।। ७ ।।

छलारी — शङ्खादयो ये नेदुस्तेषां अन्येषां च चित्रवादित्रतूर्याणां वाद्यविशेषाणां निर्घोषस्तुमुलोऽतिशयितोऽभवत् ।। ७ ।।

लिङ्गेरी — शङ्खादय आनकान्ता नेदुः । मृदंगा मुरजाप्रभेदा आनकाः पटाहः पणवश्चित्राणां वादित्राणां तूर्याणां कहलीति भाषितानां ध्वनिः संदटितोऽभवत् ।। ७ ।।

प्रीताश्चाप्सरसोऽनृत्यन् गन्धर्वपतयो जगुः ।
तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ।। ८ ।।

सत्यधर्मीया — प्रीता इत्यभिप्रेतसर्वान्वयि ।। ८ ।।

छलारी — देवा मुनय इत्यादयः कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ।। ८ ।।

लिङ्गेरी — तस्मिन्नुत्सवे प्रीता उर्वश्यादयोऽप्सरसः स्वर्गवेश्या नर्तनं चक्रुः । हाहा हूहू प्रभृतयो गन्धर्वश्रेष्ठा गानं चक्रुः । नारदादयो मुनयो ब्रह्मादयो देवाः स्वायंभुवादयो मनवोऽग्निष्वात्तादयश्च पितर आहवनादयोऽग्नयस्तथा सिद्धादयः पक्षिसर्पश्रेष्ठगरुडशेषादयश्च वामनं स्तुवन्तः ।। ८,९ ।।

सिद्धविद्याधरगणाः सकिम्पुरुषकिन्नराः ।
चारणा यक्षरक्षांसि सुपर्णभुजगोत्तमाः ॥ ९ ॥

सत्यधर्मीया — सकिंपुरुषकिंन्नरा इत्यपरस्य पूर्वस्य वा विशेषणम् । सुपर्णोत्तमा भुजगोत्तमाश्च तुष्टुवुः । रक्षांसि सन्ति सन्ति ॥ ९ ॥

छलारी — किं पुरुषैः सहिताः किंनराश्च । सुपर्णाः पक्षिणो भुजगोत्तमाः ॥ ९ ॥

गायन्तोऽभिप्रशंसन्तो नृत्यन्तो विबुधानुगाः ।
अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥

सत्यधर्मीया — विबुधानुगा गन्धर्वाः ॥ १० ॥

छलारी — अभिप्रशंसन्तः स्तुवन्तो विबुधानुगा गन्धर्वाः ॥ १० ॥

लिङ्गेरी — विबुधा ज्ञानिनो नरा मनुष्याः केचिद्गायन्तः केचित्प्रशंसन्तः केचिन्नर्तनं कुर्वन्त आसन् । अदितेरपत्यान्यादित्या देवाः कश्यपस्याश्रमस्थानं पुष्पैः सेचितवन्तः ॥ १० ॥

दृष्ट्वाऽदितिस्तं निजगर्भसम्भवं परं पुमांसं मुदमाप विस्मिता ।
गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥ ११ ॥

सत्यधर्मीया — निजगर्भात्स्वोदरात्सम्भवतीति स तथा तम् । गर्भः कुक्षौ सन्धौ पनसकण्टक इति विश्वः । निजगर्भसम्भवं तमित्युक्तिप्रतीतशुक्लशोणितविकृतत्वं प्रतिषेधति ॥ गृहीतदेहं निजमाययेति । प्रजापतिः कश्यपश्च विस्मितः सन् । जयेत्याह ॥ ११ ॥

छलारी — निजगर्भे सम्भवो यस्य तं परं पुमांसं दृष्ट्वाऽदितिर्विस्मिताऽत्यन्तं मुदं प्राप । प्रजापतिः कश्यपोऽपि निजमायया स्वेच्छया गृहीतदेहं हरिं प्रति जय जयेति विस्मितः सन् ॥ ११ ॥

लिङ्गेरी — अदितिः स्वकीयोदरप्रादुर्भूतं परमपुरुषं वामनं दृष्ट्वा विशिष्टमन्दहासा सती मुदं हर्षमाप । प्रजापतिश्च कश्यपोऽपि स्वकीयाघटितघटनोपायभूतयेच्छयैव गृहीतवामनरूपं दृष्ट्वा विशेषमन्दहासः सन् हे वामन त्वं जयोत्कृष्टो भवेत्याह ॥ ११ ॥

यत् तद् वपुर्भाति विभूषणायुधैरव्यक्तवद् व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः सम्पश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥

सत्यधर्मीया — अव्यक्तवत् व्यक्तं व्यक्तिस्तदस्यास्तीति व्यक्तवद्व्यक्तिमत्तन्न भवतीति तदव्यक्तवत् । व्यक्तमिदानीम् । यदधारयद्यद्वपुर्विभूषणायुधैर्भाति तेनैव स वामनो विष्णुर्दिव्यगतिरलौकिकमार्गोऽप्रतिहतज्ञानो वा । पित्रोः संपश्यतः सतोः । नटो यथा तथा वटुः खर्वो ब्रह्मचारी च बभूव । वामनो वटुवैकुण्ठखर्वदक्षिण इति दिग्गज इति विश्वः ॥ १२ ॥

छलारी — हरिः प्रादुर्भावानन्तरं किं कृतवानित्यत आह ॥ यत्तद्वपुरिति ॥ हरिरव्यक्तवत्सर्वात्मनाऽव्यक्तसदृशम् । अव्यक्तमेवेति यावत् । स्वभावतोऽव्यक्तमेव यद्वपुर्भक्तानुकंपया व्यक्तमधारयदकरोत् । तद्वपुर्विभूषणायुधैर्व्यक्तं भाति शोभते । तेनैव विभूषणादिविशिष्टेन रूपेण दिव्यगतिरद्भुतचेष्टितः अनभिभूतज्ञानो हरिर्मातापित्रोः संपश्यतोः सतोर्वामनोऽणुपरिमाणो वटुर्ब्रह्मचारी बभूव । मूलरूपावतारैरभेदज्ञानाय तेनैवेत्याद्युक्तिः । एतदभिप्रायेणैव नट इति दृष्टान्तः । यथा नट पुरुष एक एव स्त्रीपुरुषाद्यनेकाकारान्दर्शयति तथा हरिरप्येक एवानेकाकारान्दर्शयति ॥१२॥

लिङ्गेरी — हरिर्नारायणो यत्स्वस्य वपुर्ज्ञानानन्दात्मकं शरीरमव्यक्तमचलमित्यादिश्रुत्या सर्वथा ध्यानादौ कृतेऽप्यव्यक्तवत्दृष्ट्याद्यगोचरवत्प्रतीयते तद्ध्यानादौ स्वविषये कृते सति व्यक्तं प्रकाशश्च कर्मण्यभ्यासादित्याद्युक्तरीत्या भवतीति ज्ञापनायादितेः स्वप्रत्यक्षकाले विभूषणायुधैर्व्यक्तमधारयत् । तदैवं रूपमनुपमर्द्य तेनैव रूपेणादितिकश्यपयोः पश्यतोः सतोः स वामनो वटुर्बभूव । तत्र दृष्टान्तमाह । दिव्या लोकविलक्षणा गतिः स्थितिर्यस्य स नटो यथा तथेति । अनेन मूलरूपावताररूपयोर्निर्विशेषाभेदः सूचितः ॥ १२ ॥

तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः ।
कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥ १३ ॥

सत्यधर्मीया — प्रजापतिं कश्यपम् ॥ १३ ॥

छलारी — महर्ष्यादयो वसिष्ठादयः कर्माणि जातकर्मादीनि प्रजापतिं कश्यपं पुरस्कृत्य ॥ १३ ॥

लिङ्गेरी — भृग्वादयो महर्षयो ब्रह्मचारिणं तं वामनं दृष्ट्वा मोदमानाः सन्तः प्रजापतिं कश्यपं पुरस्कृत्य जातकर्मादि कारयामासुः ॥ १३ ॥

तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् ।
बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपो ददौ ॥ १४ ॥

सत्यधर्मीया — सविता सूर्यः । सावित्रीं स्वदेवताकां गायत्रीम् । अब्रवीदुक्तवान् । ब्रह्मसूत्रं यज्ञोपवीतम् । मेखलां मौञ्जीम् ॥ १४ ॥

छलारी — उपनीयमानस्य तस्य बटोः सविता सूर्यः सावित्रीं सवितृदेवातां गायत्रीमब्रवीदुपदिदेश । ब्रह्मसूत्रं यज्ञोपवीतं मेखलां मौंजीम् ॥ १४ ॥

लिङ्गेरी — सविता सूर्य उपनयनसंस्कारं प्राप्स्यमानस्य तस्य वामनस्य सावित्रीं गायत्रीमुक्तवान् । बृहस्पत्याचार्यो ब्रह्मसूत्रं यज्ञोपवीतं ददौ । कश्यपो मेखलां मौंजीं ददौ ॥ १४ ॥

ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः ।
कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥ १५ ॥

सत्यधर्मीया — कृष्णाजिनम् । भूमिर्वनस्पतिः । सोमो दण्डम् । माताऽदितिः कौपीनरूपमाच्छादनं च । कौपीनसहितमाच्छदनं वा । द्यौस्तदभिमानिनी छत्रम् ॥ १५ ॥

छलारी — भूमिर्भूदेवता । वनस्पतिर्वनानां पतिः सोमश्चन्द्रः । कौपीनमाच्छादनं च माता अदितिः । द्यौर्द्युलोकाभिमानिनी देवी ॥ १५ ॥

लिङ्गेरी — भूमिः कृष्णाजिनं ददौ । वनस्पतिः सोमश्चन्द्रो दण्डं ददौ । माताऽदितिराच्छादनं कौपीनं ददौ । द्यौः स्वर्गाभिमानी देवः छत्रं जगत्पतये वामनाय ददौ ॥ १५ ॥

कमण्डलुं वेदगर्भः कुशान् सप्तर्षयो ददुः ।
अक्षमालां महाराज सरस्वत्यक्षयात्मनः ॥ १६ ॥

सत्यधर्मीया — कमण्डलुं करकम् । वेदगर्भो ब्रह्मा । अक्षमालाम् । कमण्डलुः स्यात्करके । अक्षमालाऽक्षसूत्रे स्यादिति विश्वौ । सरस्वती ददौ ॥ १६ ॥

छलारी — वेदगर्भश्चतुर्मुखः । अक्षमालां जपमालाम् ॥ १६ ॥

लिङ्गेरी — वेदगर्भो ब्रह्मा कमण्डलुं ददौ । सप्तर्षयः कुशान्ददुः । हे महाराज । सरस्वती चतुर्मुखपत्नी क्षयरहितदेहस्य वामनस्याक्षमालां ददौ ॥ १६ ॥

तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ।
भिक्षां भगवती साक्षादुमाऽदादम्बिका सती ॥ १७ ॥

सत्यधर्मीया — यक्षराट् कुबेरः । पात्रिकां भिक्षापात्रम् । भगवती साक्षादुमा अम्बिका सती भिक्षामदात् । सती न काचित्कामिनीत्याह ॥ अम्बिकेति । साऽपि न काचिदम्बैवाम्बिकेति कस्यचिन्मातेत्याह ॥ साक्षादुमेति । ओः रुद्रस्य मा संपत् यया सा । भिक्षामटतस्त्र्यक्षस्य स्त्रीति कथं तद्ददावित्यतो भगवतीति । तदटनं नटनमिति भावः । स्वरूपनिरूपकमितरद्विशेषणं वा ॥ १७ ॥

लिङ्गेरी — यक्षराट् कुबेर इत्युक्तप्रकारेणोपनयनसंस्कारवते तस्मै वामनाय पात्रिकां पात्रं भिक्षार्थं ददौ । सती निर्दुष्टा भगवत्यैश्वर्यादिगुणवती उमा वागभिमानितयोत्कृष्टज्ञानप्रदाऽबिका पार्वती भिक्षामदात् ॥ १७ ॥

स ब्रह्मवर्चसेनैव सभां सम्भावितो वटुः ।
ब्रह्मर्षिगणसञ्जुष्टामात्यरोचत मारिषः ॥ १८ ॥

सत्यधर्मीया — ब्रह्मवर्चसेन । ब्रह्महस्तीत्यच् आत्यरोचतात्यरोचयत् । मारिष आर्यः । मारिषेति पाठे परीक्षित्सम्बोधनम् । मारिषश्चार्ये मारिषः कनकेऽम्बुधाविति विश्वः ॥ १८ ॥

छलारी — एवं पूर्वोक्तप्रकारेण संभावितो मानितो मारिषः श्रेष्ठः स वटुर्ब्रह्मवर्चसेन कान्तिविशिष्टेन ब्रह्मर्षीणां गणेन संजुष्टां सभामतिक्रम्यारोचत ब्रह्मर्षिसभापेक्षयाऽतिशयेन शुशुभ इति भावः । सभामरोचयदिति वा ॥ १८ ॥

लिङ्गेरी — हे मारिष ज्ञानभक्त्यादिभिः श्रेष्ठ । राजन् । वटुः स वामन उक्तरीत्या ब्रह्मादिभिः संभावितो बहुमानितः सन् देवर्षिगणेन संसेवितां सभां स्वब्रह्मवर्चसेनैवातिप्रकाशितमकरोत् । आर्यस्तु मारिष इत्यमरः ॥ १८ ॥

समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ।
परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद् द्विजः ॥ १९ ॥

सत्यधर्मीया — आहितं विहितप्रकारेण स्थापितम् । एह्यग्ने मम सन्मुखो भवेत्यावाहितं वा । समिद्धं सम्यग्दीप्तं वह्निं कृत्वा, परिसमूहनं अप्परिषेचनादिकं च कृत्वा । परिस्तीर्य कुशास्तरणं कृत्वा । द्विजः समिद्भिरजुहोत् हुतवान् ॥ १९ ॥

छलारी — आहितमग्न्युत्पत्तिविधिना समिद्धम् । परिसमूहनम् अग्नेः समन्तादुदकैः प्रोक्षणं कृत्वा दर्भैः परितः परिस्तीर्य परिस्तरणं कृत्वा । द्विजो बटुः ॥ १९ ॥

लिङ्गेरी — द्विज उपनयनं प्राप्तो वामन आहितमग्निं समिद्धं ज्वालयाऽभिवृद्धं कृत्वा परितः समूहनं च कृत्वा दर्भैः परिस्तीर्याक्षतादिभिः समभ्यर्च्य समिद्भिर्देवेभ्योऽवदानमकरोत् । यदा लेलीयते ह्यर्चिः समिद्धे हव्यवाहने । तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेदिति श्रुत्या समिद्धस्याग्नेर्होमाधिकरणत्वं समिद्धोमो वटुरिति स्मृत्या ब्रह्मचारिणः समिद्द्रव्यावदानं चावगम्यते ॥ १९ ॥

श्रुत्वाऽश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ।
जगाम तत्राखिलसारसम्भृतो भारेण गां सन्नमयन् पदे पदे ॥ २० ॥

सत्यधर्मीया — यजमानं यजन्तमुपकल्पितैरश्वमेधैः । श्रुत्वा लोकमनुकुर्वन् । अखिलसारसम्भृतः सकलबलपूर्णः भारेण गरिम्णा गां भूमिम् । पदे पदे प्रतिपदपातम् । संनमयन् निम्नां कुर्वन् । तत्र ततः श्रवणानन्तरम् उपनयनानन्तरं वा । जगाम ॥ २० ॥

छलारी — यदर्थं बटूर्बभूव तदाह ॥ श्रुत्वेत्यादिना यावत्समाप्तिः । भृगूणां भृगुभिरुपकल्पितैः प्रवर्तितैरश्वमेधैर्यजमानं यजन्तमूर्जितं बलिं श्रुत्वा । तत्राखिलैः सारैर्गुणैः संभृतः पूर्णो वामनो जगाम। कथम्भूतः । भारेण गरिम्णा पदे पदे प्रतिपादविक्षेपे गां भूमिं नमयन् प्रदक्षिणीकुर्वन् ॥ २० ॥

लिङ्गेरी — वामनस्ततः स्वोपनयनानन्तरं शुक्रादिभिर्भृगुकुलोद्भवैरुपकल्पितैः प्रदर्शितप्रकारैरश्वमेधैरैश्वर्यादुत्कृष्टं बलिं चक्रवर्तिनं यजमानं देवान्पूजयन्तं श्रुत्वा स्वयमखिलशब्देभ्यः सारैः ऋगादिवेदैः संभृतः पूर्णस्तत्प्रवचनपटुः । निगमवाक्पटवे बटवे नम इति स्मृतेः । अखिलेभ्यो ब्रह्मचार्यन्तरधृतसमस्तकौपीनादिब्रह्मचारिसाधनेभ्यः संभृतः पूर्णः, अखिलजगतः सारो ज्ञानानन्दादिगुणैः संभृतः पूर्णः सन् स्वगौरवेण गां भूमिं पदे पदे प्रतिपादविक्षेपं नमयन्निव जगाम ॥ २० ॥

तं नर्मदायास्तट उत्तरे बलेर्यऋत्विजस्ते भृगुवत्ससंज्ञिके ।
प्रवर्तयन्तो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥ २१ ॥

सत्यधर्मीया — भृगुवत्सेति संज्ञा नाम यस्य तस्मिन् । येऽत्र बलेः क्रतूत्तमं प्रवर्तयन्तो भृगवस्ते आराद्दूरे उदितं रविं यथा तथा व्यचक्षतापश्यन् ॥ २१ ॥

छलारी — नर्मदाया नद्या उत्तरे तटे भृगुवत्ससंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयन्तो ये बलेर्ऋत्विजो भृगव आसंस्ते तं बटुं व्यचक्षतापश्यन् । कमिव । आरात्समीप एवोदितं रविं यथा सूर्यमिव । यज्ञर्त्विज इति पाठे यज्ञे ऋत्विग्भूता इत्यर्थः ॥ २१ ॥

लिङ्गेरी — भृगुवत्ससंज्ञिके नर्मदाया उत्तरे तीरे क्रतूत्तममश्वमेधं प्रवर्तयन्तो बलेर्यज्ञर्त्विजो भृगवश्च तं वामनमारात्समीप उदितं उदयगतं सूर्यं यथा तथा सम्यगपश्यन् । सप्ततन्तुर्मखः क्रतुः । आराद्दूरसमीपयोरिति चामरः ॥ २१ ॥

तत्रर्त्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ।
सूर्यः किमायात्यथवा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ २२ ॥

सत्यधर्मीया — यज्ञर्त्विज इति पाठे यज्ञे ऋत्विक्त्वेन वृता इत्यर्थः । हतत्विषो गतकान्तयः । विभावसुरग्निः ॥ २२ ॥

छलारी — ऋत्विजं एव सदस्या नामकाः केचन यज्ञे आवश्यकाः सन्ति ते ऋत्विजः । य एष सूर्यः किलोत वा विभावसुरग्निः । अथवा सनत्कुमारो हरिः क्रतोर्यज्ञस्य दिदृक्षया द्रष्टुमिच्छयाऽऽयातीति । व्यतर्कयन्निति शेषः ॥ २२ ॥

लिङ्गेरी — हे नृप । तत्र यज्ञशालायां तस्मिन्काले विद्यमाना ऋत्विजो यजमानो बलिरन्ये च सभास्थिता वामनशरीरकान्त्या तिरस्कृतकान्तयो बभूवुः । अनन्तरं सूर्यः क्रतोरश्वमेधस्य दिदृक्षयाऽऽयाति । विभावसुरग्निः क्रतुदर्शनेच्छयाऽऽयाति । अथवा । सनत्कुमारो मुनिरायाति । चित्रभानुर्विभावसुरित्यमरः ॥ २२ ॥

इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः ।
सदण्डछत्रं सजलं कमण्डलुं विवेश बिभ्रद् हयमेधवाटम् ॥ २३ ॥

सत्यधर्मीया — बहुधा सूर्यादित्वेनानेकधा । वितर्क्यमाण ऊह्यमानः । अनुवादेन वादेऽप्यायाति किमित्यतर्कयन्निति शेषः । कर्तव्य इत्यसूचि । हयमेधवाटमश्वमेधशालाम् । हयमेधस्य वाटो वृत्तिर्यत्र तत्स्थलं वा । वाटौ वृत्तौ च मार्गे चेति विश्वः ॥ २३ ॥

छलारी — सशिष्येषु भृगुषु । भृगुभिरिति यावत् । इत्थं पूर्वोक्तप्रकारेणानेकधा वितर्क्यमाणो विचार्यमाणः स वामनः । दण्डेन सहितं छत्रं कमण्डलुं बिभ्रद्वामनो हयमेधवाटमश्वमेधमण्टपं विवेश ॥ २३ ॥

लिङ्गेरी — एवं सशिष्येण बलिना सहितैर्भृगुभिर्बहुप्रकारेणोह्यमानो भगवान्स वामनो दण्डेन सहितं छत्रमुदकसहितं कमण्डलुं च बिभ्रत्सन् अश्वमेधशालां प्रविवेश । वाटं शाला वाटिका चेति नाममहोदधौ ॥ २३ ॥

मौञ्ज्या मेखलयाऽऽवीतमुपवीताजिनोत्तरम् ।
जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥

सत्यधर्मीया — मुञ्जाकृता मौंजी तया मेखलया कांच्या । आवीतं कटितटे । उपवीतं यज्ञोपवीतं तेन सहितं कृष्णाजिनमैणेयं चर्म । तदेवोत्तरमुत्तरीयं यस्य स तम् । वामनं तन्नामानम् । ह्रस्वमिति वा । माययैव माणवकम् ॥ २४ ॥

छलारी — मौंज्या मौंजनामकतृणनिर्मितयाऽऽवीतं कटिदेशे परिवीतमुपवीतवद्धृतमजिनं कृष्णसारचर्म वा उत्तरं उत्तरीयवस्त्रं यस्य तम् । उपवीताजिनोत्तरमुपवीतमजिनाख्योत्तरीयं च यस्य तमिति वा । जटिलं जटाधारिणं मायया स्वेच्छया माणवकं बटुभूतं हरिम् ॥ २४ ॥

लिङ्गेरी — भृगवः शिष्येण बलिना सहितास्ते, मुंजानिर्मितकटिसूत्रपरिवेष्टित मुपवीतकृष्णाजिनाभ्यामुत्कृष्टं जटायुक्तं स्वेच्छया ब्रह्मचारिणं बलिवञ्चनेच्छया ब्रह्मचारिवेषं ब्राह्मण-रूपं वामनं हरिं यज्ञशालायां प्रविष्टं दृष्ट्वा वामनस्य ब्रह्मवर्चसेन तिरस्कृताः सन्त आहवनीयाद्यग्निभिः सह वामनं प्रत्युत्थानं कृत्वा स्वीकृतवन्तः ॥ २४,२५ ॥

प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ।
प्रत्यगृह्णन् समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ २५ ॥

सत्यधर्मीया — सशिष्याः सबलयः । तस्य तेजसा संक्षिप्ताः । अग्निभिराहवनीयादिभिः सह समुत्थाय प्रत्यगृह्णन् । इत आगन्तव्यमिति स्वीकृतवन्तः ॥ २५ ॥

छलारी — प्रविष्टं वीक्ष्य सशिष्या भृगवोऽग्निभिराहवनीयगार्हपत्यदक्षिणाग्निभिः सह समुत्थाय प्रत्यगृण्हन् अत्रागच्छत्विति स्वीकृतवन्तः । आहूतवन्त इति यावत् । कथम्भूताः । तस्य बटोस्तेजसा संक्षिप्ता अभिभूताः सन्तः ॥ २५ ॥

यजमानः प्रमुदितो दर्शनीयं मनोरमम् ।
रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥

सत्यधर्मीया — रूपानुरूपावयवम् । रूपस्याकारस्यानुरूपा अवयवा यस्य तम् । मनोरमं यजमानो वीक्ष्येत्यनुकर्षः । तस्मै दर्शनीयं मनोहरमासनमाहरदानीतवान् । ददाविति यावत् ॥ २६ ॥

छलारी — यजमानो बलिर्दर्शनीयं सुन्दरं मनोरमम् । मनःसुखकररूपस्य देहाकारस्यानुरूपा अनुकूला अवयवा हस्तादयो यस्य तम् । दृष्ट्वेति शेषः ॥ २६ ॥

लिङ्गेरी — यजमानो बलिर्दर्शनीयमतिसुन्दरमत एव मनःसन्तोषजनकं स्वाकारानुगुणकरचरणाद्यवयवं वामनं दृष्ट्वाऽतिहृष्टः सन् तस्मै वामनायासनं ददौ ॥ २६ ॥

स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः ।
अवनिज्यार्चयामास मुक्तसङ्गं मनोरमम् ॥ २७ ॥

सत्यधर्मीया — मुक्तसङ्गं विवाहादिविरहात् ॥ २७ ॥

छलारी — अयमासने उपवेशानन्तरं स्वागतेन सकुशलं किम् ? एमेवं रूपेणाभिनन्द्यापृच्छ्य सन्तोष्य भगवतः पादाववनिज्य प्रक्षाल्य, मुक्तः सङ्गो विषयासक्तिर्येन तं विरागिणमर्चयामास ॥ २७ ॥

लिङ्गेरी — अथ बलिर्वामनं प्रति त्वया सम्यगागतमिति स्वागतवचनेन वामनं सन्तोषयित्वा स्वयं च सन्तुष्टः सन्ननन्तरं भगवतो वामनस्य पादौ शुद्धोदकेन प्रक्षाल्य साधनान्तरैः पूजयामास । मुक्तः सङ्गः यस्य तम् । दर्शनीयं मनोरममिति वामनविशेषणद्वयेन विषयवैराग्यब्रह्मवर्चसोः पूज्यताहेतुता सूच्यते । स्पष्टयिष्यते चैतद्वामनेन यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते इति ॥ २७ ॥

तत्पादशौचं कलिकल्मषापहं स धर्मविन्मूर्ध्न्यदधात् सुमङ्गलम् ।
यद् देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥

सत्यधर्मीया — तदवनेजनजलमाहात्म्यमाह ।। यत्पादशौचमिति । धर्मवित्स बलिः मूर्ध्नि सुमङ्गलमदधात् ।। नैतच्चित्रमित्याह । देवदेव इन्द्रादिस्तुत्यश्चन्द्रमौलिर्गिरिशो हिमवत्सुखदः परया भक्त्या मूर्ध्ना यद्दधार तत्तादृशम् ।। २८ ।।

छलारी — धर्मविद्विप्रप्रक्षालनोदकधारणजन्यपुण्यवित्स बलिः कलेः कल्मषान् दोषान् अपहन्ति नाशयतीति तथा सुमङ्गलम् । तस्य बटोः पादशौचं पादोदकं मूर्ध्न्यदधात् । कीदृशं तत् । देवानां देवः, चन्द्रो मौलौ यस्य स गिरीशश्च महादेवोऽपि परमया भक्त्या यत्पादोदकं गङ्गारूपं मूर्ध्ना दधार तादृशमित्यर्थः ।। २८ ।।

लिङ्गेरी — ब्राह्मणपूजादिधर्मज्ञः स बलिः कलिकालप्रसक्तपापनाशकं तस्य वामनस्य पादशौचं प्रक्षालनोदकं यतोऽत्यन्तमङ्गलकरमतः शिरसा दधार । हरिपादोदकस्य कलिकल्मषनिवर्तकत्वे मङ्गलदत्वे च पुरा भगीरथप्रार्थितश्चन्द्रः कलारूपो मौलौ शिरसि यस्य स इन्द्रादि देवो गिरिशो रुद्रो यद्धरिपादोदकं परया भक्त्या शिरसा दधारेति हरिपादोदकस्योक्तफलकत्वे संप्रदायो दर्शितः । स्मर्यते च । यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिधृतेन शिवः शिवोऽभूत् । अथाऽपि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणांभं शेषं पुनातीति । अत्र पर्वते शयानदेवतान्तरव्यावृत्त्यर्थं चन्द्रमौलिरिति रुद्रविशेषणं ज्ञेयम् ।। २८ ।।

बलिरुवाच–

स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ।
ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वाऽऽर्य वपुर्धरम् ।। २९ ।।

सत्यधर्मीया — ते स्वागतमस्तु । तुभ्यं नमः । ते किं करवाणीत्यन्वयः । ब्रह्मर्षीणां साक्षात्तप एव । आर्य । तु विशेषतो वपुर्धरम् एतच्छरीरस्य धरं मन्ये । त्वा त्वाम् । तप एव साक्षाद्वपुर्धरं मन्य इति वा ।। २९ ।।

छलारी — हे ब्रह्मन् । ते स्वागतं कुशलं किम् । हे आर्य । त्वां साक्षात्प्रत्यक्षं ब्रह्मर्षीणां तप एव मन्ये । कथम्भूतम् । तपो वपुर्धरं मूर्तिमत् ।। २९ ।।

लिङ्गेरी — बलिनोक्तस्वागतवचनादिप्रकारमाह शुकः ।। बलिरुवाचेत्यादिना । हे ब्राह्मण । ते त्वया सुष्ठ्वागतं तुभ्यं नमोऽस्तु । वयं ते किं करवाम? कान्त्यादिना श्रेष्ठशरीरधारिणं त्वा त्वां ब्रह्मर्षीणां साक्षात्तपोरूपं मन्ये ।। २९ ।।

अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ।
अद्य स्विष्टः क्रतुरयं यद् भवानागतो गृहान् ॥ ३० ॥

सत्यधर्मीया — अयं क्रतुः स्विष्टोऽङ्गसाकल्येनेष्टः । सर्वत्रापि निमित्तं यद्भवानागतो गृहानिति ॥ ॥ ३० ॥

छलारी — अयं क्रतुरद्य स्विष्टः सम्यगिष्टः । अत्र सर्वहेतुमाह ॥ यदिति । यद्भवान्नो गृहान् प्रत्यागतोऽत इत्यर्थः ॥ ३० ॥

लिङ्गेरी — हे ब्रह्मन् । यस्माद्भवानद्यास्मद्गृहान्प्रत्यागतस्तस्मादद्य नोऽस्माकं पितरस्तृप्ताः । अस्माभिर्दीयमानकव्ये विषयेऽलम्बुद्धिमन्तो जाताः । अद्य नः कुलं पवित्रीकृतम् । अद्यायमश्वमेध-क्रतुः सुष्विष्टः कृतः ॥ ३० ॥

अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ।
हतांहसो वार्भिरियं च भूमिरद्धा पुनीता तनुभिः पदैस्तव ॥ ३१ ॥

सत्यधर्मीया — त्वच्चरणावनेजनैर्वार्भिरुदकैस्तनुभिरणुभिः । तनुः काये कृशे लये च विरलेऽपि च वाच्यवदिति विश्वः । पदैस्तद्विन्यासैर्भूमिरद्धा सम्यक् पुनीता पवित्रिता ॥ ३१ ॥

छलारी — हे द्विजात्मज । त्वच्चरणयोरवनेजनैः पादप्रक्षालनरूपैर्वार्भिर्जलैर्हतानि नष्टान्यंहांसि दुरितानि यस्य तस्य मेऽग्नयो यथाविध्यद्य सुहुताः । अहो बटु । इयं च भूस्तनुभिः कोमलैर्वा तव पादैः पादस्पर्शेनेत्यर्थः । पुनीता पवित्रीकृताऽभूत् ॥ ३१ ॥

लिङ्गेरी — हे ब्राह्मणपुत्र । अद्य त्वत्पादप्रक्षालनोदकैर्विनष्टपापस्य मेऽग्नयो विधिमनतिक्रम्य सम्यगवदानयुक्ता जाताः । त्वत्पादप्रक्षालनवार्भिरुदकैरियं संनिहिता भूमिः पवित्रीकृता । तथा त्वदाश्रममारभ्येतत्स्थानपर्यन्तं च भूमिस्तनुभिरल्पैस्तव पादैः पादप्रक्षेपजपादचिन्हैरद्धा प्रत्यक्षं यथार्थेन पुनीता पवित्रीकृता । अंहो दुरितदुष्कृतम् । अद्धा प्रत्यक्षसत्ययोरित्यमरः । दभ्रं कृशं तन्विति च ॥ ३१ ॥

यद् यद् वटो वाञ्छसि तत् प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ।
गां काञ्चनं गुणवद् वाऽथ धाम मृष्टं तथाऽन्नमुत वा विप्रकन्याम् ।
ग्रामान् समृद्धान् तुरगान् गजान् वा रथांस्तथार्हत्तम संप्रतीच्छ ॥ ३२ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे सप्तदशोऽध्यायः ।

सत्यधर्मीया — प्रतीच्छ प्रतिगृहाण । यद्यदिति स्वोक्तं विविच्याह ।। गामित्यादिना । विप्रसुतेति दानपात्रतामाह । गुणवदिति धामविशेषणम् । अन्तःसाहितीसहितमिति तदर्थः । मृष्टमन्नं शाश्वतिकं समीचीनं च । कन्यां पुनरपि सम्प्रतीच्छेत्यनेन न सन्देहः कार्य इति ध्वनयति ।। ३२ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे सप्तदशोऽध्यायः ।

छलारी — हे बटो । त्वं यद्यत्कामं वाञ्छसि तत्तत्कामं मे मत्सकाशात्प्रतीच्छ गृहाण । हे विप्रसुत । त्वामर्थिनमर्थापेक्षयाऽऽगतमनुतर्कये ऊहयामि । अतो गां धेनुं भूमिं वा । गुणा धान्यादिवस्तून्यस्मिन्सन्तीति गुणवत्सर्वसंपत्समृद्धमित्यर्थः । धाम गृहं वा मृष्टं प्रशस्तमन्नं वा । हे विप्र । विवाहार्थं कन्यां वा समृद्धग्रामादीन्वा । हे अर्हत्तम पूज्यतम । तं प्रतीच्छ स्वीकुरु ।। ३२ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे सप्तदशोऽध्यायः ।। ८-१७ ।।

।। अथ अष्टादशोऽध्यायः ।।

श्रीशुक उवाच–

इति वैरोचनेर्वाक्यं धर्मयुक्तं सुसूनृतम् ।
निशम्य भगवान् प्रीतः प्रतिनन्द्येदमब्रवीत् ।। १ ।।

सत्यधर्मीया — अध्यायद्वयेन बलिभक्तिं दिदर्शयिषुरादौ प्रतिगृह्णानेन धाटीयमाटीकनीयेति लोकाननुकुर्वल्लोकेश इदमतनोदित्याह ।। इतीति । प्रतिनन्द्य महावंश्यस्येदं युक्तमित्यभिनन्दनं कृत्वा ।।१।।

छलारी — वैरोचनेर्बलेः सूनृतेन कुशलप्रश्नेन सहितं प्रतिनन्द्यानुमोद्य ।। १ ।।

लिङ्गेरी — अत्रापि हरौ भक्त्यभिवृद्धये भगवतो वराहस्य भुव उद्धारेण सर्वप्रजापालनादि-माहात्म्यं निरूप्यते । तत्रादौ बलिस्तुस्त्या प्रसन्नवामनवाग्मितोच्यते ।। इति वैरोचनेरिति । भगवान्वामन इत्युक्तप्रकारं धर्मयुक्तं सुसूनृतमतियथार्थतया श्रोतृमनःप्रीतिजनकं विरोचनपुत्रबलेर्वचनं श्रुत्वा सन्तुष्टः सन् बलिं सन्तोषयित्वा वक्ष्यमाणप्रकारं वाक्यमाह ।। १ ।।

श्रीभगवानुवाच–

वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ।
यस्य प्रमाणं भृगवः साम्पराये पितामहः कुलवृद्धः प्रशान्तः ॥ २ ॥

सत्यधर्मीया — जनदेव नृप । यस्य सांपराये मोक्षसाधनधर्मविषये । भृगवो गुरवः । कुलवृद्धः पितामहः प्रह्लादश्च प्रमाणं तद्रूपा बोधका इत्यर्थः । तस्य तवैतद्वचो धर्मयुतं यशस्करं कुलोचितम् ।।२।।

छलारी — दातुः स्तुतिः कर्तव्या । प्रस्तावोचितं वक्तव्यमिति भिक्षुकान् शिक्षयंस्तत्प्रकारमाह वामनः ।। वचस्तवैतदिति षोडशभिः श्लोकैः । हे जनदेव राजन् । यस्य तव सांपराये पारलौकिक-धर्मविषये भृगवः शुक्रादयः कुरुवृद्धः प्रशान्तः सात्विकस्वभावः पितामहः प्रल्हादश्चैते प्रमाणं बोधकाः । तस्य तवैतत्सूनृतादिरूपं वच उचितमेव ॥ २ ॥

लिङ्गेरी — हे जनदेव राजन् बले । तवैतद्वचः सूनृतं त्वत्कुलोचितं पुण्ययुक्तं कीर्तिकरं च । यस्य तव सांपराये मोक्षादिश्रेयसाम् ? भृगवः प्रमाणम् । तथा त्वत्कुलवृद्धः प्रशान्तो हरिनिष्ठस्तव पितामहः प्रल्हादश्च प्रमाणं ज्ञापकः । नरहरिचरणारविन्दभक्तिमत्प्रल्हादपौत्रत्वात् शुक्रादिशिष्यत्वाच्च तव मोक्षादिसर्वपुरुषार्थो निश्चित इति भावः ॥ २ ॥

न ह्येतस्मिन् कुले कश्चिन्निस्सत्वः कृपणः पुमान् ।
प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥ ३ ॥

सत्यधर्मीया — तं भाविकार्यानुगुण्या प्रोत्साहयति ।। न हीति । सत्त्वोऽस्त्री जन्तुषु क्लीबे व्यवसाये पराक्रमे । आत्मभावे पिशाचे च रदे द्रव्यस्वभावयोरिति यादवः । निःसत्त्वो बलहीनः । कृपणो दीनः । प्रतिश्रुत्य ददानीत्युक्त्वा प्रत्याख्याता निषेद्धा । तथाऽदाता वा न नास्तीत्यर्थः ।।३।।

छलारी — एतस्मिन्कुले भवत्कुले कश्चित्पुमान्निःसत्त्वः कृपणश्च नास्ति हि । निःसत्त्वस्य लक्षणं किम् । यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्तव्यः स निःसत्त्वः । कृपणस्य लक्षणं तु प्रथमं दास्यामीति प्रतिश्रुत्य प्रतिज्ञाय यो द्विजातयेऽदाता सः कृपणः ॥ ३ ॥

लिङ्गेरी — हे बले । तवैतस्मिन्कुले कोऽपि पुरुषो निःसत्त्वो दुर्बलः कृपणो दातव्यलोभवान्दैन्योपेतश्च । तथा द्विजातये ब्राह्मणायाहं ददामीति प्रतिज्ञायादाता दानमकुर्वन्न दास्यामिति प्रतिवक्ता च न हि ॥ ३ ॥

न सन्ति तीर्थे युधि वाऽर्थिनाऽर्थिताः पराङ्मुखा ये त्वमनस्विनो नृप ।
युष्मत्कुले यद् यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ४ ॥

सत्यधर्मीया — तीर्थेऽध्वरे तत्समये । युधि तद्विषये । तीर्थं शास्त्राध्वरोपायेति विश्वः । अर्थिना धनायोधनापेक्षावता । अर्थिताः अमनस्विनः पराङ्मुखाश्च युष्मत्कुले न सन्ति । पूर्वे भवन्तु भवतोक्ता भगवंस्तथेदानीं न दानवान्ववाये तादृशः कोऽप्यस्तीत्यत आह ॥ यद्यस्मादिति । यथा खे आकाशे उडुपश्चन्द्र उद्भाति तथाऽमलेन यशसा प्रह्लादस्ते पितामह उद्भाति प्रकाशते ॥ ४ ॥

छलारी — दानावसरेऽर्थिना द्रव्यार्थिनाऽर्थिता याचिता नृपा ये तु । यच्छब्दः किंशब्दार्थे केऽपीत्यर्थः । अमनस्विनो हर्यमनस्का न सन्ति । तथा युधि युद्धसमयेऽर्थिना युद्धार्थिना नृपाः केऽपि पराङ्मुखा न सन्ति । यद्यस्मिन्युष्मत्कुलेऽमलेन शुद्धेन यशसा प्रल्हादस्ते पितामह उदुत्कर्षेण भाति भासते । खे आकाशे उडुपो चन्द्रो यथा इव ॥ ४ ॥

लिङ्गेरी — हे नृप बले । युष्मद्वंशे तीर्थे शुद्धिकरे भागीरथ्यादिक्षेत्रे श्रीरङ्गादौ च दानार्थिना प्रतिग्राहिणाऽर्थिता याचिताः सन्तो दाने विमनस्का अत एवार्थिनां पराङ्मुखा विमुखाश्च न सन्ति । तथा युद्धेऽपेक्षावता युद्धमर्थिताः सन्तो विमनस्का विमुखाश्च न सन्ति । यस्मान्निर्दुष्टकीर्त्या प्रतापवान्पितामहः प्रल्हादः खे आकाशे उडुपश्चन्द इवोद्भाति विराजते ॥ ४ ॥

यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ।
प्रतिवीरं दिग्विजये नाविन्दत गदायुधः ॥ ५ ॥

सत्यधर्मीया — यतो यत्र कुले एको निःसहायः । प्रतिवीरं द्वन्द्वसमासज्जमानं प्रतिभटम् । दिग्विजये तत्काले । नाविन्दत न लब्धः ॥ ५ ॥

छलारी — इदानीं बलिप्रपितामहौ हिरण्याक्षहिरण्यकशिपौ स्तौति ॥ यत इत्यादिना । यतो यस्मिनकाले जात एकोऽसहाय एव दिग्विजयविषये प्रतिवीरं प्रतिपक्षिणं नाविन्दत न लब्धवान् ॥५॥

लिङ्गेरी — यस्मिंस्तव कुले जातो हिरण्याक्ष इमां भूमिमेक एव गदायुधश्चरन्सन् दिग्विजयकाले प्रतियोद्धारं नालभत ॥ ५ ॥

यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगते ।
नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६ ॥

सत्यधर्मीया — क्ष्मोद्धारे आगते आसन्ने । विष्णुः कृच्छ्रेण कष्टेन । यं हिरण्याक्षं त्वत्प्रपितामहं विनिर्जित्य । आत्मानं स्वं जयिनं जयवन्तं न मेने नानुसन्दधे । तत्र हेतुमाह । तस्य वीर्यं भूरि बहुलमनुस्मरन्निति । स्तुतिसमयत्वाद्वा नटनं देवस्येति ज्ञेयम् । निरालम्बाः स्वावलम्बा जना इति तत्कृच्छ्रेण विनिर्जित्य प्रागनन्तरं नात्मानं निर्जीवं चानुस्मरन् । तद्वीर्यं तत्स्वप्रतिभटीभवनं योग्यं वीर्यं यस्य तम् । जयिनं विजयावेशिनं भूरि मेने बहु मेने । आत्मानं जयिनमिदानीं न मेन इत्यपि योजयन्ति । अस्मदेतदर्थस्त्वान्तरङ्गिको ज्ञेयः ।। ६ ।।

छलारी — विष्णुः क्ष्माया भूमेरुद्धारे उद्धरणकाले आगतं हिरण्याक्षं कृच्छ्रेण निर्जित्य हत्वाऽऽत्मानं स्वं जयिनं न मेने । भूरि तस्य हिरण्याक्षस्य वीर्यं पराक्रमं स्मरन् । कृच्छ्रेणेत्यादि जनमोहनायेति ज्ञेयम् ।। ६ ।।

लिङ्गेरी — क्ष्मोद्धारे भुव उद्धरणकाले प्राप्ते सति भूम्यपहारकं हिरण्याक्षं कृच्छ्रेणातिकाठिण्येन विनिर्जित्य पराभूय तस्य हिरण्याक्षस्य भूरि बहुलं पराक्रममनुस्मरन्सन् स्वं जयवन्तं न मेने । कृच्छ्रेण विनिर्जित्येति हिरण्याक्षप्रशंसार्थं तमोयोग्यमोहनार्थं चोक्तमिति ज्ञेयम् ।। ६ ।।

निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ।
हन्तुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ।। ७ ।।

सत्यधर्मीया — भ्रातृहणं हिरण्याक्षहन्तारम् । एकाजुत्तरपदे ण इति णत्वम् ।। ७ ।।

छलारी — तस्य हिरणाक्षस्य वधं भ्रातृहणं स्वभातृहंतारं विष्णुं हन्तुं हरेर्निलयं वैकुण्ठं जगाम ।। ७ ।।

लिङ्गेरी — तथा हिरण्याक्षभ्राता सहोदरो हिरण्यकशिपुः पूर्वं तस्य हिरण्याक्षस्य वधं वराहरूपेण हरिणा कृतं श्रुत्वा कुपितः सन् स्वभ्रातृहन्तारं नारायणं हन्तुं हरेर्निलयमाश्रयं वैकुण्ठं जगाम ।। ७ ।।

तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् ।
चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः ।। ८ ।।

सत्यधर्मीया — कृतान्तवत् यममिव । मायाविनां सहजशक्तियुतां वरः श्रेष्ठः । कालज्ञो न समयोऽयं स मया कालान्तरे रूपान्तरेण वध्य इति प्रच्यावनकालज्ञानी ।। ८ ।।

छलारी — कृतान्तवद्यमवत् । कालज्ञो नायमेतद्धननकालः किन्तूत्तरो नृसिंहावतारकाल इति जानन्मायाविनां समर्थानां वरो महाशक्त इत्यर्थः ॥ ८ ॥

लिङ्गेरी — मायाविनां परमोहनशक्तिवतां ज्ञानवतां च वरः श्रेष्ठो विष्णुर्यस्मिन्यस्मिन्काले यद्यत्कार्यं तत्तज्ज्ञानसंपूर्णो यतो यत इत्यादि वक्ष्यमाणप्रकारेणालोचनमकरोत् । मेधा मायास्रजाविनिरिति मायाशब्दस्य मत्वर्थे विनिप्रत्ययः । कृतान्तो यमसिद्धान्तावित्यमरः ॥ ८ ॥

यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ।
अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ९ ॥

सत्यधर्मीया — पराग्दृशो बहिर्दृष्टेर्दूरप्रसारितचक्षुष इति वा । मम मायाविषये पराची दृग्यस्य । तज्ज्ञानहीनस्येति वा । यतो यतोऽहं तत्र तत्रासौ हिरण्यकशिपुरायाति । अतोऽसमयत्वादस्य हृदयं प्रवेक्ष्यामि । तेन किमित्यत आह । प्राणभृतां मृत्युरिव । अहमपरिहार्य इत्यान्तरङ्गिको भावः, बाह्यस्तु स्फुट इति ॥ ९ ॥

छलारी — चिन्ताप्रकारमेवाह ॥ यत इति । अहं यतो यतो यत्र यत्र गच्छेयं तत्रासौ हिरण्यकशिपुरागमिष्यत्येव । कथम् । प्राणवतां देहिनां मृत्युरिव । अतः पराक् दृशः । बाह्यदृष्टेः शरीराद्बहिरिव पश्यति न त्वन्तरित्यर्थः । दूरस्थवस्तुदर्शन इति वा । अस्य हिरण्यकशिपोर्हृदयं प्रवेक्ष्यामि ॥ ९ ॥

लिङ्गेरी — अहं यतो यतो यत्र यत्र गमिष्यामि तत्र तत्रासौ हिरण्यकशिपुः प्राणिनां मृत्युरिवायास्यत्यतोऽहं पराग्दृशो बहिर्दृष्टेरस्य हिरण्यकशिपोर्हृदयं प्रवेक्ष्यामीति चिन्तयामास हरिरित्यन्वयः ॥ ९ ॥

एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेन्द्र ।
श्वासानिलान्तर्हितसूक्ष्मदेहस्तद्घ्राणरन्ध्रेण विविग्नचेताः ॥ १० ॥

सत्यधर्मीया — आधावतः स्वं प्रति । स हरिरेवं विनिश्चित्य । तस्य रिपोर्हिरण्यकशिपोः शरीरं निर्विविशे । तत्प्रकारमीरयति ॥ श्वासेति । घ्राणरन्ध्रेण नासिकाछिद्रेण । घ्राणं घ्राते च नासिकायामिति विश्वः । विग्नमुद्विग्नम् । तन्नेति विविग्नमनुद्विग्नं चेतो यस्य स तथाऽन्तरङ्गे । उद्विग्नचेता इति बहिः ॥ १० ॥

छलारी — हे असुरेन्द्र बले । स विष्णुर्बहिर्दृष्टिरयमसुरो हृदये स्थितं मां न ज्ञास्यतीत्येवं निश्चित्याधावतोऽभिमुखमापततो रिपोः शरीरं श्वासानिले श्वासवायावन्तर्हितः सूक्ष्मदेहो यस्य सः श्वासानलान्तर्हित सूक्ष्मदेहः सन् तस्य हिरण्यकशिपोर्घ्राणरन्ध्रेण नासिकाछिद्रेण निर्विविशे प्रविष्टवान् । कथम्भूतः । विग्नमुद्विग्नं भीतं चेतो यस्य स उद्विग्नचेताः । इदं मोहकं विशेषणम् ॥१०॥

लिङ्गेरी — हे असुरेन्द्र बले । विविक्तचेताः कर्तव्याकर्तव्यविषयज्ञानसंपन्नः स विष्णुरेव-मुक्तरीत्या स्वस्मिन्निश्चयं कृत्वा स्वं प्रत्याधावतः शीघ्रमागच्छतः शत्रोर्हिरण्यकशिपोः शरीरम् । तस्य हिरण्यकशिपोर्घ्राणछिद्रेण निःश्वासवायोः प्रविश्य सूक्ष्मशरीरः सन् हिरण्यकशिपोर्देहमाविवेश । छिद्रं निर्व्यधनं लोको रंध्रमित्यमरः ॥ १० ॥

स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ।
क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन् न ददर्श वीरः ॥ ११ ॥

सत्यधर्मीया — तस्य हरेर्निकेतं गृहरूपं वैकुण्ठादि । तन्निकेतं शून्यं हरिविरहितं परिमृश्य विमृश्य । तमपश्यमानोऽपश्यन् कुपितो ननाद ॥ ११ ॥

छलारी — स हिरण्यकशिपुः शून्यं हरिणा रहितं तन्निकेतं तस्य हरेर्निकेतं निलयं वैकुण्ठं परिमृश्यान्विष्य हरिमपश्यमानः कुपितो ननाद गर्जितवान् । तथा क्ष्मां भूमिं द्यां स्वर्गं खमन्तरिक्षं विवरान्पातालादिबिलानि च विचिन्वन्मृगयन्न ददर्श । अन्तः प्रविष्टत्वात् ॥ ११ ॥

लिङ्गेरी — स हिरण्यकशिपुस्तस्य विष्णोर्निकेतमाश्रयं वैकुण्ठं परिमृश्य शोधयित्वा विष्णुना शून्यं ज्ञात्वा विष्णुमपश्यन्कुपितो ननाद । वीरो हिरण्यकशिपुः क्ष्मां भूम्यां द्यामन्तरिक्षे प्राच्यादि दिक्ष्वाकाशेऽतलवितलादिविवरेषु समुद्रेषु च विष्णुं मृगयन्नपि न ददर्श ॥ ११ ॥

अपश्यन्निति होवाच मयाऽन्विष्टमिदं जगत् ।
भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥ १२ ॥

सत्यधर्मीया — यतो यत्र गतः पुमान्नावर्तते तत्र गतो नूनं निश्चयः । मृत इति यावत् ॥ १२ ॥

छलारी — अन्विष्टं विचारितं मे भ्रातृहा हरिर्नूनं गतः । कुत्र । पुमान्यतः सकाशान्नावर्तते तत्रेत्यर्थः । मृत इति भावः ॥ १२ ॥

लिङ्गेरी — विष्णुमपश्यमानो हिरण्यकशिपुर्मयेदं जगत्तद्विचारार्थं प्रविष्टमथाऽपि मे भ्रातृहंता स विष्णुः, पुरुषो यं लोकं प्राप्तः पुनर्नावर्तते तं लोकं गतो नूनं निश्चय इति होवाच ॥ १२ ॥

वैरानुबन्ध एतावानामृत्योरिह देहिनाम् ।
अज्ञानप्रभवो मन्युरहम्मानोपबृंहितः ॥ १३ ॥

सत्यधर्मीया — अज्ञानप्रभवोऽज्ञानात्प्रभवतीति स तथा । अहंमानेनाहन्तया उपबृंहितोऽभिवृद्धो मन्युः कोपो वैरानुबन्धश्च । इह लोके एतावानेतत्पर्यन्तः । सोऽवधिः क इत्यतोऽभिधत्ते ॥ आमृत्योरिति । अरिमरणानन्तरमपि वैरं कुर्वन्तोऽप्युर्वीशा वर्तन्त इत्यत आह ॥ अज्ञानप्रभव इति । न विद्यते ज्ञानमामृत्योर्वैरानुबन्ध इति येषाम् । ते च ते प्रभवो राजानश्चेत्यावृत्त्याऽर्थो ज्ञेयः ॥ १३ ॥

छलारी — ततो विष्णौ वैरं त्यक्तवानित्याशयेनाह ॥ वैरानुबन्ध इति । देहिनां देहे निरूढाभिमानवतां शूराणामिह संसारेऽज्ञानेन प्रभव उत्पन्नोऽहंमानेनाहंकारेणोपबृंहितोऽभिवृद्धो मन्युः कोपो वैरानुबन्धश्चैतावान् एतावत्पर्यन्तम् । तदेव विवृणोति ॥ आमृत्योरिति । मरणपर्यन्तं भवति वर्तते ततो निवर्तत इति भावः ॥ १३ ॥

लिङ्गेरी — देहधारिणां शत्रुषु वैरानुबन्धो द्वेषानुवृत्तिरेतावान्वैर्यदर्शनपर्यन्तः यदा शत्रुर्मृग्यमाणोऽपि न दृश्यते ततः प्रभृति तद्द्वेषो ह्रसतीति भावः । ननु हरेः सर्वज्ञत्वेन स्वतन्त्रतया च वैषम्यनैर्घृण्यरहिततया तत्कर्मानुसारेण फलदातृत्वात्कथं हरौ हिरण्यकशिपौ द्वेषापरनाममन्युरित्यत आह ॥ अज्ञानेत्यादिना ॥ १३ ॥

पिता प्रह्लादपुत्रस्ते तद्विद्वान् द्विजवत्सलः ।
स्वमायुर्द्विजलिङ्गेभ्यो देवेभ्योऽदात् स याचितः ॥ १४ ॥

सत्यधर्मीया — प्रह्लादपुत्रः प्रह्लादस्य पुत्रस्ते पिता विरोचनस्तद्विद्वान् तान्वेत्तीति तद्विद्वान् । द्विजानां लिङ्गं येषां ते तथा । तेभ्यः । तैर्याचितः स्वमायुर्ददौ ॥ १४ ॥

छलारी — पितामहप्रपितामहौ स्तुत्वा तत्पितरं विरोचनं स्तौति ॥ पितेति । प्रल्हादस्य पुत्रस्ते पिता विरोचनो द्विजवेषधारिणो मद्वैरिणो देवाः । एतेन तु द्विजा इति तद्विद्वानपि तज्ज्ञानमानोऽपि स याचितः सन् तेभ्यो देवेभ्यः स्वं स्वकीयमायुरदात् । शत्रुत्वेन ज्ञात्वाऽपि किमर्थं दत्तवानित्यत उक्तम् ॥ द्विजवत्सल इति । ब्राह्मणभक्तत्वादित्यर्थः ॥ १४ ॥

लिङ्गेरी — वामनो बलिं प्रति यत्प्राक् तद्वंशजस्य युद्धाविमुखत्वमुक्तं तद्यतो जातो हिरण्याक्ष इत्यादिना विचिन्वन्न ददर्शेत्यन्तेनोपपाद्य यद्दानाविमुखत्वमुक्तं तदुपपादयति ।। पितेति । हे बले । प्रल्हादस्य पुत्रस्ते पिता यो विरोचनः सः, ''देवा द्विजवेषेण स्वस्यायुषमपहर्तुमागता इति यत्तज्ज्ञानवानपि ब्राह्मणेषु वात्सल्यवान् देवैस्त्वदायुर्देहीति याचितः सन् द्विजलिंगेभ्यो देवेभ्यः स्वमायुर्दत्तवान् । अनेन दानशीलेनापि स्वेष्टायुरभिवृद्धये दातव्यानि वस्तूनि दीयन्ते न त्वायुरपि । तदप्यनेन दत्तमिति कैमुत्येन दानावैमुख्यं विरोचनस्य सूचितम् ।। १४ ।।

भवानाचरिता धर्मानास्थितान् गृहमेधिभिः ।
ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ।। १५ ।।

सत्यधर्मीया — गृहमेधिभिरास्थितान् अनुष्ठितान्धर्मान्भवानाचरिता । ते चैतदादय इत्याह ।। ब्राह्मणैरिति । उद्दामा उत्कृष्टा कीर्तिर्येषां तैः ।। १५ ।।

छलारी — इदानीं बलिं च स्तौति ।। भवानिति । गृहमेधिभिर्ब्राह्मणादिभिराचरितान्धर्मान् भवानास्थितोऽनुष्ठितवान् । उद्दामोत्कृष्टा कीर्तिर्येषां तैः ।। १५ ।।

लिङ्गेरी — भगवान्वामन एवं बलिपित्रादीन्स्तुत्वा प्रकृतमनुसरन्स्वाभिलषितदानाय बलिमपि स्तौति ।। भवानिति । हे बले । गृहमेधिभिर्गृहस्थाश्रमैः पूर्वजैर्ब्राह्मणैः शूरैः क्षत्रियैरुत्कृष्टयशस्कैर-न्यैश्चास्थितानाश्रितान्क्रियमाणान् धर्मान् भवानप्याचरिता कर्तेति ।। १५ ।।

तस्मात् त्वत्तो महीमीषद् वृणेऽहं वरदर्षभ ।
पदानि त्रीणि दैत्येन्द्र सम्मितानि पदा मम ।। १६ ।।

सत्यधर्मीया — ईषत् । अमो लोपोऽव्ययत्वात् । अमहीयसीं महीमित्यर्थः । ईषत्तव मम दातुरनीषदिति नेति भाषते ।। पदानीति । तान्यपि न बहूनीत्याह ।। त्रीणीति । मम पदा संमितानि । एतेनेत्यनुक्त्या महांत्यपि तानि न स्वत्वं व्यभिचरन्तीति नालीकं वचनं च हरेरित्यन्तरङ्गे ।। १६ ।।

छलारी — यस्मात्त्वं पुण्यवतां कुले जातो धार्मिकस्तस्माद्वरदानामृषभात्त्वत्तो महीमीषत्किञ्चिद्वृणे । किञ्चत्वमेवाह ।। पदानीति । मम पदा पादेन संमितानि सदृशानि त्रीणि पदानि पादत्रयं भूमिं वृण इत्यर्थः । मम पदा संमितानीति त्रिविक्रमपादाभिप्रायेण न तु दृश्यमानपादाभिप्रायेण । न चानृतवादित्वम् । तत्रापि स्वपादत्वानवगमात् ।। १६ ।।

लिङ्गेरी — हे वरदर्षभ याचकाभिलषितदातृषु श्रेष्ठ बले । यस्मात्त्वं पूर्वाचरितधर्म-करणशीलस्तस्मादहं त्वत्तोऽपीषदल्पां भूमिं वृणे स्वीकर्तुमिच्छामि । ईषदित्युक्तं स्पष्टयति ॥ पदानीति ॥ १६ ॥

नान्यं ते कामये राजन् वदान्याज्जगदीश्वरात् ।
नैनः प्राप्नोति वै विद्वान् यावदर्थं प्रतिग्रहात् ॥ १७ ॥

सत्यधर्मीया — इयतीमेव कुतः कुं कामयस इत्यत आह ॥ नान्यमिति । अधिकाशा चेत्प्रत्यवेयामहमित्याह । यावदर्थं यावत्स्वप्रयोजनं प्रतिग्रहात् । विद्वान् प्रतिग्रहो दोषकृदिति तत्प्रायश्चित्तादिकं जानन् । एनः पापं न प्राप्नोति । अतोऽन्यं न कामये । लोभिनो मत्तः को लाभो भवितेत्यतो नेत्याह ॥ वदान्यादिति । यद्यप्यतिदाता । तथाऽपि परायत्त इत्येवं पृच्छसि तुच्छं वरं किमित्यतो नेत्याह ॥ जगदीश्वरादिति ॥ १७ ॥

छलारी — इतोऽपि महत्तरं कामयस्व दास्यामीति तत्राह ॥ नेति । वदान्याद्दानशूरात् । राजप्रतिग्रहात्तव दोषो न स्यात्किं नेत्याह ॥ नेति । यावदर्थमेव यावत्प्रयोजनमेव प्रतिग्रहो यस्य सः । यावता प्रतिग्रहेण स्वप्रयोजनं सिद्ध्यति तावत्प्रतिग्रहवानित्यर्थः । विद्वान्प्रतिग्रहदोषदहनपटुर्ज्ञानवान् एनं प्रतिग्रहदोषं न प्राप्नोति । अतो नाधिकं कामय इति भावः ॥ १७ ॥

लिङ्गेरी — हे दैत्येन्द्र राजन् बले । जगत्स्वामिनो वदान्याद्दानशूरात्तव सकाशादहं ममाणोः पदा पादेन संमितानि परिमितानि भूमेः त्रीणि पदानि कामये वाञ्छामि । अन्यन्न कामये । इत्यनेन यत्पदानीति बहुवचनस्यापर्यवसानात्पदानां च महत्वेऽपि महत्या भूम्या भाव्यमिति बलिमानसशंका त्रीणि मम पादसंमितानीति वदता परिहृता । ननु मम जगदीश्वरत्वाद्दानशूरत्वाच्च बहुपदार्थयाचनं त्वया कर्तुमुचितम् । किमल्पं याचितमिति तत्राह ॥ नैनः प्राप्नोतीति । विद्वान्याचकज्ञानिपुरुषो यावतैव स्वशरीरयात्रादिसिद्धिस्तावद्द्रव्यस्य प्रतिग्रहात्स्वीकारादेनः पापं न प्राप्नोति । अत एव चर्मकारं प्रति ब्राह्मणेन स्वप्राणात्ययसमये तच्चर्मस्थकुलित्था याचयित्वा भक्षिताः । उदकं गृहाणेति चर्मकृता प्रार्थितेन ब्राह्मणेनोदकस्य स्वयमेव ग्रहीतुं शक्यत्वेन न प्रतिगृहीतम् । तदेतत् ''अजीविष्यन्निमानखादन्काममुदकम्'' इत्यादि श्रुतिसिद्धम् ॥ १७ ॥

बलिरुवाच–

अहो ब्राह्मणदायाद वाचस्तेऽवृद्धसम्मताः ।
त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ॥ १८ ॥

सत्यधर्मीया — दायादौ सुतबान्धवावित्युक्तेर्ब्राह्मणदायादसुत ब्राह्मणसुत । ते वाचोऽवृद्धसंमताः । त्वं च बाल इत्यनुरूपमिदमिति भावः । बालत्वं व्यभिचीर्णं ध्रुवादिषु पण्डितेष्वित्यत आह ॥ बालिशमतिरिति । बालिशानां मूर्खाणां मतिरिव मतिर्यस्य स तथा । बालिशः शाबके मूर्खेति विश्वः । कुत एवमित्यत आह । यथा यस्मात्स्वार्थं प्रत्यबुधोऽज्ञातेति । अनेन बलिना स्वबन्धने बीजवाप ईश्वरतिरस्कारात्माऽनुष्ठित इति ध्येयम् ॥ १८ ॥

छलारी — एवमीश्वरस्यापि हरेर्याञ्चा किमर्थमिति प्रश्नस्य देवकार्यार्थमेवेत्युत्तरत्वेन याचनाप्रकारमुक्त्वा निरपराधिनो बलेर्बन्धनं कुत इति प्रश्नस्योत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह ॥ अहो इति त्रिभिः । अहो ब्राह्मणस्य दायाद पुत्र । ते वाचो वृद्धानां संमतास्त्वं तु बालो बालिशमतिश्च । बालिशानामज्ञानामिव मतिर्यस्य सः । त एव स्वार्थं प्रति स्वकार्यं प्रति यथा यथावदबुधो यावदपेक्षितं स्वकार्यं न जानन्तीत्यर्थः । यद्वा ते वाचोऽवृद्धसंमता वृद्धानां संमता न भवन्ति । कुतः । यतो बालोऽसीत्युक्तिर्युक्तं वचो ग्राह्यं न तु पुरुषगौरवमिति न्यायात् । बुद्धिवैशेष्ये बालत्वमप्रयोजकमाह ॥ बालिशेति । मन्दमतिः स्वप्रयोजनं ज्ञातुं शक्तोऽपीत्यर्थः ॥ १८ ॥

लिङ्गेरी — अहो ब्राह्मणदायाद पुत्र । ते वाचो द्रव्यार्जकेषु वृद्धानामसंमताः । यथा यतस्त्वं बालोऽत ईदृश्यो वाचः केषाञ्चिद्बालानामपि स्वार्थे बुद्धिमत्वं दृश्यते । त्वं तु स्वार्थं प्रत्यबुधोऽज्ञानी । अत एव बालिशा मतिः ॥ १८ ॥

मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ।
पदत्रयं वृणीते योऽबुद्धिमान् द्वीपदाशुषम् ॥ १९ ॥

सत्यधर्मीया — वचोभिः कुलादि प्रशस्य बाहुविध्याद्वचोभिरिति बहुवचनम् । द्वीपदाशुषम् । तदपि दातारम् । दाश्वानिति निपातितः शब्दः अतोऽबुद्धिमान् ॥ १९ ॥

छलारी — अबुद्धत्वमेवाह ॥ मामिति । यो भवान् लोकानामेकं मुख्यमीश्वरं द्वीपस्य जंब्वादेर्दाशुषं दातारं मां वचोभिः प्रीतिजनकाभिः समाराध्य स्तुत्वा पदत्रयं वृणीते सोऽबुद्धिमान् स्वप्रयोजनं ज्ञातुं न शक्तः । यतो बहु दातारं मां प्राप्य स्वल्पं वृणीषे । अतोऽज्ञानीति भावः ॥१९॥

लिङ्गेरी — ननु मम बालिशत्वं स्वार्थाज्ञत्वं च कथं त्वया बुद्धमित्यत आह ।। मामिति । हे द्विज । स्तुतिरूपैर्वचोभिर्लोकानामीश्वरं सप्तद्वीपानामपि दानसमर्थं मां समाराध्य संसेव्य यो भवान् भूमेः पदत्रयं वृणीते स भवान्न बुद्धिमान् बालिशश्चेति । अनेन यद्वामनेन बलिं प्रति जगदीश्वर दानशूरेत्यादि स्तुतिं कुर्वता, तवैतादृशत्वेऽपि यावदर्थप्रतिग्रहो दोषाभावेनैतावदेव मया प्रार्थ्यत इति स्वाभिप्रायप्रकटनं कृतम् । तदज्ञानिना बलिनैवमुच्यत इति ज्ञातव्यम् ।। १९ ।।

न पुमान् मामनुव्रज्य भूयो याचितुमर्हति ।
तस्माद् वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे ।। २० ।।

सत्यधर्मीया — त्वत्त इयदस्तु पुनरन्यतोऽन्यद्ग्रहीष्यामीति वा त्वत्त एव समयान्तर इति न वद वटो इत्याह ।। नेति । मामनुव्रज्यागत्य । अन्यमिति शेषः । भूयो मां वा याचितुं पुमान्नार्हति तस्मात् । वृत्तिकरीं तव जीवनोपायभूताम् । कामं यथेच्छं मे मत्तः । वटो प्रतीच्छ ग्रहाण ।। २० ।।

छलारी — कुतो मामपहससीत्यत्राह ।। नेति । पुमान्मामुपव्रज्य प्राप्य मया दत्तां गृहीत्वेदं नालमिति भूयो मां याचितुं नार्हति । यावदपेक्षितस्वीकारात् । त्वं यावदपेक्षितं याचितुं न जानासि । अल्पस्यैव स्वीकृतत्वात् । अतोऽपहास इति भावः । वृत्तिकरीं जीवनहेतुं कामं यथेष्टम् ।। २० ।।

लिङ्गेरी — बलिरेवं वामनमप्रबुद्धतया विनिंद्य स्वस्य स्वकीर्त्यर्थं तस्य हितोपदेशं करोति ।। न पुमानिति । हे वटो ब्रह्मचारिन्वामन । कश्चिदपि पुमान्स्वस्य जीवनोपयुक्तद्रव्यार्थी सन्मामनुव्रज्य तद्द्रव्यं याचितुं प्राप्य भूयः पुनस्तद्द्रव्यमन्यं याचितुं नार्हति यस्मात्तस्मात्त्वं तव यावज्जीववृत्तिकरीं जीवनोपायभूतां भूमिं मे सकाशात्कामं यथेच्छं स्वीकुरु ।। २० ।।

श्रीभगवानुवाच–

यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेन्द्रियम् ।
न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ।। २१ ।।

सत्यधर्मीया — एवं बलिनोक्तो वामनस्तया वा मनस्तृप्यति किं नेत्याह ।। यावन्त इति । अजितेन्द्रियमजितान्यस्वाधीनानीन्द्रियाणि यस्य तं पुमांसम् । प्रतिपूरयितुं तर्पयितुं न शक्नुवन्ति ।। २१ ।।

छलारी — पुनरपि निस्पृहामाविष्कुर्वन्नेवाह ॥ यावन्त इति सप्तभिः । प्रेष्ठा अत्यन्तप्रीतिविषयाः पदार्थाः सन्ति ते सर्वेऽजितेन्द्रियजनं बुद्धिरहितं पुरुषमिति शेषः । परिपूरयितुं तृप्तं कर्तुं न शक्नुवन्ति ॥ २१ ॥

लिङ्गेरी — एवं बलिना बोधितो वामनोऽलम्बुद्धिरहितस्य स्ववृत्तिकरिभूम्या पूर्तिर्न भवेदिति कैमुत्येनाह ॥ यावन्त इति । हे नृप बले । त्रिलोक्यां प्रेष्ठाः अतिप्रीतिविषया यावन्तो विषया भोगसाधनपदार्थाः सन्ति सर्वेऽपि तेऽजितं मनोलक्षणेन्द्रियं येन तं पुरुषं प्रतिपूरयितुं विषयान्तरापेक्षारहितं कर्तुं न शक्ता भवन्ति ॥ २१ ॥

त्रिभिः क्रमैरसन्तुष्टो द्वीपेनापि न पूर्यते ।
नववर्षसमेतेन सप्तद्वीपधरेच्छया ॥ २२ ॥

सत्यधर्मीया — नवभिर्वर्षैः खण्डैः समेतेन युक्तेन द्वीपेनापि न पूर्यते न तृप्यति । सप्तद्वीपवती या धरा भूमिस्तदिच्छया ॥ २२ ॥

छलारी — तदेवोपपादयति ॥ त्रिभिरिति । न नदी द्वीपोऽत्र कथ्यत इत्यत आह ॥ नवेति । नवभिर्नवसंख्याकैर्वर्षैर्भरतादिखण्डैः समेतेन द्वीपेनापि न पूर्यते पूर्णो न भवति । कुतः । सप्तानां द्वीपावरणानामिच्छया ॥ २२ ॥

लिङ्गेरी — तदेवोपपादयति ॥ त्रिभिरिति । यः पुरुषो भूमेस्त्रिभिः क्रमैः पादविक्षेपपरिमितैः स्थलैरसन्तुष्टो नालंबुद्धिः स नवखण्डसमेतेन जंब्वाख्येनैकेन द्वीपेन समग्रप्राप्तेनापि न पूर्यतेऽलंबुद्धिमान्न भवति । पुनः सप्तद्वीपानपि धरिष्यामि प्रतिगृहीष्यामीति जातेच्छावत्त्वात् ॥ २२ ॥

सप्तद्वीपाधिपतयो नृपा वैन्यगदादयः ।
अर्थैः कामैर्गता नान्तं तृष्णाया इति नः श्रुतम् ॥ २३ ॥

सत्यधर्मीया — तादृशान्कांश्चिन्निदर्शयित्वा निःस्पृहतां स्वस्य दर्शयति ॥ सप्तद्वीपेति । वैन्यः पृथुः । अन्तमवसानम् । कामैः काम्यैरर्थैः । कामैरर्थैरिति यथायथं विशेषणविशेष्यभावः । नोऽस्माभिः श्रुतम् । आर्यमुखत इति शेषः ॥ २३ ॥

छलारी — नैतावताऽपि पूर्तिरित्याह ॥ सप्तेति । वैन्यो वेनपुत्रः पृथुश्चक्रवर्ती । गदस्तन्नामको राजा । अर्थैः कामैस्तृष्णाया विषयाभिलाषस्यान्तमवसानं न गता इत्यस्माभिः श्रुतम् ॥ २३ ॥

लिङ्गेरी — तथा सप्तद्वीपानामधिपतयो वेनजपृथुचक्रवर्ती गदराजादयो नृपा अर्थैर्द्रव्यैः कामैर्विषयभोगैश्च पुनरपि मे भूयादितीच्छारूपायास्तृष्णाया अन्तं समाप्तिं न प्राप्ता इति नोऽस्माभिः श्रुतम् ॥ २३ ॥

यदृच्छयोपपन्नेन सन्तुष्टो वर्तते सुखम् ।
नासन्तुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥

सत्यधर्मीया — यदृच्छयेशेच्छया सन्तुष्टः सुखं वर्तते । अजितात्मा । उपसादितैस्त्रिभिर्लोकैरसन्तुष्टः सुखं न वर्तते ॥ २४ ॥

छलारी — अलम्बुद्धिरेव सुखसाधनमित्याह ॥ यदृच्छयेति । हरीच्छयोपपन्नेन लब्धेन वित्तेन सन्तुष्टोऽलम्बुद्धिमान्सुखं यथा भवति तथा वर्तते । असन्तुष्टस्त्वजितमात्मा मनो येन सः । मनोजयरहित इत्यर्थः । उपसादितैः प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्तते ॥ २४ ॥

लिङ्गेरी — यस्मादेवं तस्मादीश्वरेच्छाप्राप्तद्रव्येण शरीरयात्रादिकं करिष्य इत्यलंबुद्धिरेव सुखहेतुरित्यन्वयव्यतिरेकाभ्यां दर्शयति ॥ यदृच्छयेति । यः पुमान् यदृच्छा हि तदिच्छा स्यादिति स्मृत्युक्तहरीच्छया प्राप्तेनालंबुद्धिमान्स्वस्य सुखं यथा स्यात्तथा वर्तते । अस्य धर्मस्येशावास्यमिदं सर्वं तेन त्यक्तेन भुंजीथा इति श्रुतिविहितत्वेनैहिकपारत्रिकानन्दहेतुत्वादित्यन्वयो दर्शितः । व्यतिरेकमपि दर्शयति । अलंबुद्धिरहितोऽत एवाजितान्तःकरणस्त्रिभिर्लोकैः स्वस्य प्राप्तैरपि सुखं न वर्तत इति ॥२४॥

पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः ।
यदृच्छयोपपन्नेन सन्तोषो मुक्तये स्मृतः ॥ २५ ॥

सत्यधर्मीया — अर्थकामयोरसन्तोषस्तत्सम्बन्धिन्यनलम्बुद्धिः । पुनः संसृतेर्हेतुः कारणम् । मुक्तये मोक्षार्थम् । स्मृत इति स्वोक्तेः प्रमाणसंमतिमाचष्टे ॥ २५ ॥

छलारी — इतोऽपि सन्तोष एव संपाद्यो मुक्तिहेतुत्वान्नासन्तोषः संसारहेतुत्वादित्याह ॥ पुंस इति । अर्थकामयोर्विषये ॥ २५ ॥

लिङ्गेरी — इदानीमलंबुद्ध्यनलंबुद्ध्योः क्रमेण मोक्षसंसारहेतुत्त्वाद्यदृच्छया प्राप्तेनालंबुद्धिरेव संपाद्येत्याह ।। पुंस इति । पुरुषस्य योऽयमर्थकामयोर्विषयेऽनलंबुद्धिरूपोऽसन्तोषः सः संसृतेः संसारस्य कारणम् । यश्चायमर्थकामयोर्यदृच्छया प्राप्तेन सन्तोषः स मोक्षहेतुतया यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सर इत्यादिस्मृत्युक्तः ।। २५ ।।

यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते ।
तत् प्रशाम्यत्यसन्तोषादम्भसेवाशुशुक्षणिः ।। २६ ।।

सत्यधर्मीया — तत्तेजो बलादिकम् । असन्तोषात्प्रशाम्यति । शान्तं गतं भवतीति यावत् । आशुशुक्षणिरग्निरम्भसेव गतम् ।। २६ ।।

छलारी — तेजो ब्रह्मवर्चसः वर्धतेऽभिवृद्धो भवति । असन्तोषात्तत्तेजः प्रशाम्यति नश्यतीति । आशुशुक्षणिरग्निः ।। २६ ।।

लिङ्गेरी — इतोऽपि स्वादृष्टप्रेरकेश्वरप्रापितद्रव्यादावलंबुद्धिरेव ब्रह्मवर्चसादिहेतुस्तद-भावश्चानर्थकरः इत्याह ।। यदृच्छालाभतुष्टस्येति । यदृच्छालाभेनालंबुद्धिमतो ब्राह्मणस्य तेजो ब्रह्मवर्चोऽभिवृद्धं भवति । यदृच्छालाभेऽप्यनलंबुद्धिकरणादस्य ब्राह्मणस्य तद्ब्रह्मवर्चो ज्ञानभक्त्यादिरूपं सामर्थ्यं चांभसोदकेनाशुशुक्षणिरग्निरिव प्रशाम्यति नष्टं भवति । अलंबुद्धिहेतुवैराग्याभावेन वैराग्यहेतुक-भक्त्यादेरसंभवात् । अंभोऽर्णस्तोयमिति । शिखावानाशुशुक्षणिरित्यमरकोशात् ।। २६ ।।

तस्मात् त्रीणि पदान्येव वृणे त्वद् वरदर्षभात् ।
एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ।। २७ ।।

सत्यधर्मीया — षड्भिः स्वनिःस्पृहतां व्युत्पाद्य सप्तमेनोपसंहरति ।। तस्मादिति । वित्तं यावत्प्रयोजनम् । नैनः कारणमेतावतैवाहं सिद्धः पूर्णमनोरथ इति त्रीणि पदान्येव वृणे याचे । पदानि त्रीणि दैत्येन्द्रेत्यारभ्य तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभादित्यन्तं यत्र यत्राङ्घ्रिवाचक-शब्दप्रयोगस्तत्र तत्र पदादिशब्दमप्रयुंजानः प्रयुञ्जानश्च पदपदं वामनस्तत्रापि वामनतां बोधयामासेति चातुरी मन्तव्या । त्रीणि पदा विचक्रमे । त्रेधा निदधे पदमिति श्रुतिरपि शिर आन्दोलयति ।। २७ ।।

छलारी — त्वत्त्वत्त एतावतैव पदत्रयेणैवाहं सिद्धः कृतार्थः । एतावतैव सर्वस्वापहारसिद्धेरिति गूढाभिप्रायः । कुत इत्यत आह ।। वित्तं हि यावत्प्रयोजनमेव सुखसाधनमधिकस्य क्लेशा-वहत्वादित्यर्थः ।। २७ ।।

लिङ्गेरी — यस्मादुक्तरीत्या स्वादृष्टप्रेरकेश्वरप्रेरितस्वेच्छा यावद्रव्यमात्रविषयिणी स्वप्रयोजनायालं तावन्मात्रग्रहणेन ब्रह्मवर्चसादिश्रेय:प्राप्तिस्तस्मादहं सर्वाभिलषितदानसमर्थतया वरदश्रेष्ठादपि त्वत्त-स्त्रीण्येव पदानि स्वीकरोमि । एतावतैवाहं सिद्धोऽलंबुद्धिमान् । यस्मात्स्वोपजीवनादिप्रयोजनं यावत्तावत्साधनमेव द्रव्यमाकांक्ष्यं नातोऽधिकमिति तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनमिति श्रुत्या विधीयत इति भावः ॥ २७ ॥

श्रीशुक उवाच–

इत्युक्तः स हसन्नाह वाञ्छितं प्रतिगृह्यताम् ।
वामनाय महीं दातुं जग्राह जलभाजनम् ॥ २८ ॥

सत्यधर्मीया — इत्युक्तो वामनेन स बलिर्हसन्नाह । सहसन्नाह । दानोपयोगिसन्नाहसहितेत्यावृत्तं वामनवाचि चेति ज्ञेयम् । जलभाजनमम्ब्वमत्रम् ॥ २८ ॥

छलारी — वाञ्छितमपेक्षितं प्रतिगृह्यतामित्याह । एवमुक्त्वा जलभाजनं कमण्डलुं जग्राह ॥२८॥

लिङ्गेरी — इति वामनेनोक्तो बलिः प्रहासं कुर्वन्सन् । हे बटो । यावदपेक्षितं तावदेव तर्हि त्वया प्रतिगृह्यतामित्युक्त्वा वामनाय तद्याचितभूमिं दातुं जलपात्रं गृहीतवान् ॥ २८ ॥

विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरम् ।
जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः ॥ २९ ॥

सत्यधर्मीया — उशना असुरेश्वरमित्यत्र सवर्णदीर्घाभावः शुक्रस्य बलेश्चासन्धिसूचकः । विदां वरो विद्वद्वरिष्ठः ॥ २९ ॥

छलारी — शुक्राचार्यो 'विदुषा गुरुणा शिष्याय हितोपदेशः कर्तव्य' इति शिक्षयन्नाह ॥ विष्णव इति । उशनाः शुक्राचार्यो विष्णोर्वामनरूपस्य चिकीर्षतं विष्णुना क्रियमाणं कार्यं जानन्विदां वरो ज्ञानिनां श्रेष्ठः ॥ २९ ॥

लिङ्गेरी — विदां कर्तव्याकर्तव्यज्ञानिनां नीतिज्ञानां वरः श्रेष्ठ उशनाः शुक्राचार्यो विष्णोर्वामनस्य स्वचिकीर्षितं कर्तुमपेक्षितं देवकार्यसाधनं जानन्सन् वामनरूपाय विष्णवे क्ष्मां भूमिं प्रदास्यन्तं दातुमिच्छन्तमसुराणामीश्वरं स्वस्य शिष्यं बलिं प्रति वक्ति ॥ २९ ॥

उशना उवाच–

एष वैराचने साक्षाद् भगवान् विष्णुरव्ययः ।
कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥

सत्यधर्मीया — वैरोचने बले । एषोऽव्ययः साक्षाद्भगवान्विष्णुः । कश्यपाददितेः प्रजातश्चेत्किं बहुस्तोष इत्यतो भाषते । देवानां त्वत्सपत्नानां कार्यस्याभिलषितस्य साधकः साधयितेति ॥ ३० ॥

लिङ्गेरी — हे विरोचनपुत्र बले । त्रिपदयाचको बटुः साक्षादनुपचारेण परममुख्यवृत्त्या भगवच्छब्दवाच्योऽव्ययः पूर्णैश्वर्यो विष्णुरेव कश्यपाददित्यां प्रादुर्भूतः सन् देवानां कार्यसाधकः सन्निहायातः ॥ ३० ॥

प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ।
न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१ ॥

सत्यधर्मीया — अनर्थं भाविनम् । अजानताऽविदुषा त्वया । एतस्मै वामनाय मेदिनीं ददानीतीदानीं यत्प्रतिश्रुतं तत् दैत्यानां साधु मङ्गलं न मन्ये । महाननयोऽन्यायो दैत्यानामुपगतः प्राप्तः ॥ ३१ ॥

छलारी — एषो वामनः । वैरोचने । कश्यपाददितेरदित्यां जातः । अनर्थमुत्तरत्र प्राप्यमाणमात्मबन्धनादिरूपमजानता त्वयैतस्मै वामनाय यत्प्रतिश्रुतं दास्यामीति यत्प्रतिज्ञातं तत्साधु क्षेमकारीति न मन्ये । कुतः । दैत्यानां महान् असह्योऽनयोऽन्यायः । अनर्थ इति यावत् । उपगतः प्राप्तः ॥ ३१ ॥

लिङ्गेरी — हे बले । अस्यापरिच्छिन्नस्वरूपतया तत्पादत्रयपरिमितभूमेरपि दानाशक्तेन बन्धनस्वस्थानापहरणमजानता त्वयाऽस्मै वामनायाभिलषितं भूदानं यत्प्रतिज्ञातं तदहं साधु समीचिनं न मन्ये । यस्मादेतत्प्रतिज्ञया दैत्यानां महाननयोऽनीतिरागता ॥ ३१ ॥

एष ते स्थानमैश्वर्यं श्रुतं तेजो यशस्करम् ।
दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥

सत्यधर्मीया — आत्मनाऽवगतमन्यायच्छायां दर्शयति ॥ एष इति । श्रुतं प्रसिद्धं यश आच्छिद्य बलाद्गृहीत्वा शक्राय दास्यति ॥ ३२ ॥

छलारी — अन्यायमेवाह ॥ एष इति । स्थानं स्वरूपमैश्वर्यं प्रभुत्वं श्रियं संपदं बलादिकं यशः कीर्तिं श्रुतं ज्ञानम् । सर्वस्वापहरणे बुद्धेर्भ्रंशादिति भावः । आच्छिद्यापहृत्य मायया स्वेच्छया माणवकः बटुः ॥ ३२ ॥

लिङ्गेरी — मायया तद्वंचनेच्छया माणवको ब्रह्मचारीरूप एष वामनात्मा हरिस्ते ॥ ३२ ॥

त्रिभिः क्रमैरिमाँल्लोकान् विश्वकायः क्रमिष्यति ।
सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथम् ॥ ३३ ॥

सत्यधर्मीया — विश्वकायो व्याप्तकायस्त्रिभिः क्रमैरिमांल्लोकान्क्रमिष्यति । सर्वस्वं श्वोऽनन्न्य-गतिकं यथा तथा वर्तिष्यसे । जीवसि कथम् । अकथं, कं च खं च थं अन्नं च कथे । ते न स्तः यस्मिन् कर्मणि । असुखान्नं यथा तथा वर्तसे इति वा । एतावज्ज्ञानहीनतया मूढेत्युक्तिः ॥ ३३ ॥

छलारी — ननु पदत्रयमेव प्रतिश्रुतं नाधिकमतः स्थानाधिकं सर्वमपहरेदित्युक्तिः कथमित्यत आह ॥ त्रिभिरिति । क्रमैः पादन्यासैर्विश्वकायो व्याप्तदेहः क्रमिष्यत्याक्रमिष्यति । आक्रमतामिति चेत्तत्राह ॥ सर्वस्वमिति । कथं तिष्ठसि जीवनोपायाभावादिति भावः ॥ ३३ ॥

लिङ्गेरी — हे मूढ भाविकार्यानभिज्ञ बले । एषो वामनो विश्वकायो ब्रह्माण्डपर्यन्तं पूर्णदेहः सन् त्रिभिः पादविक्षेपैरिमांल्लोकान्नाक्रमिष्यति । त्वदीयं सर्वं द्रव्यं विष्णवे वामनाय दत्वा कथं वर्तिष्यसे प्रवर्तिष्यसे जीविष्यसि । जीवनोपायाभावात् ॥ ३३ ॥

क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ।
खं च कायेन महता तार्तीयस्य कुतो गतिः ॥ ३४ ॥

सत्यधर्मीया — पदत्रयक्रमणप्रकारमाह ॥ क्रमतो गामिति । गां भूमिम् । द्वितीयेन पदा दिवं क्रमतो विभोः कायेन मध्यदेहेन खमाकाशं च क्रमतस्तार्तीयस्य तृतीयपादसम्बन्धिनः क्रमणस्य गतिः का । न किञ्चिदपि तावकमुर्वरितमित्याशयः ॥ ३४ ॥

छलारी — त्रिपदैः सर्वलोकाक्रमणप्रकारं स्पष्टयन्प्रतिज्ञातं संपादनीयमेवेति वदन्तं प्रत्याह ॥ क्रमत इति । एकेन पदा पदन्यासेन गां भूमिं द्वितीयेन पदा दिवं द्युलोकं महता स्थूलेन कायेन खं चान्तरिक्षं च क्रमत आक्रममाणस्य विभोस्तार्तीयस्य तृतीयपादन्यासस्य का गतिः स्थलं कुतः क्व वर्तते न क्वापीत्यर्थः ॥ ३४ ॥

लिङ्गेरी — इमांल्लोकानित्युक्तलोकनामग्रहणपूर्वकं प्रतिज्ञातभंगमाह ।। क्रमत इति । एकेन पादेन गां भूमिमाक्रमिष्यतो द्वितीयेन पदा दिवं स्वर्गमाक्रमिष्यतो महता कायेन स्वदेहेन तदन्तरस्थमाकाश-मप्याक्रमिष्यतोऽस्य वामनस्य तार्तीयस्य तृतीयस्य पादस्य तत्परिमितिस्थलदानस्य तव गतिः कुतः क्वास्तीति ।। ३४ ।।

निष्ठान्तं नरकं मन्ये ह्यप्रदातुः प्रतिश्रुतम् ।
प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ।। ३५ ।।

सत्यधर्मीया — प्रतिश्रुतं प्रतिज्ञातम् । अदातुर्निष्ठान्तं दिशामीति प्रतिज्ञातवितरणपर्यन्तम् । निष्ठान्ते इति पाठे मरणानन्तरमित्यर्थः । नरकं लोकं तत्र भोक्तव्यं दुःखं वा । प्रतिश्रुतस्य प्रतिश्रुतं प्रतिपादयितुं दातुं यो भवाननीशस्तस्य नरकं मन्य इत्यन्वयः।। ३५ ।।

छलारी — तृतीयपादन्यासस्य स्थलाभावादेव स्थलं न दास्यामि किं बाधकमिति चेत्तत्राह ।। निष्ठामिति ।। प्रतिश्रुतं वस्त्वप्रदातुः । ते नरके निष्ठां स्थितिं मन्ये । निष्ठान्तं नरकमिति क्वचित्पाठः । तत्र निष्ठान्तं प्रतिश्रुतं दानपर्यन्तं नरकं दुःखमित्यर्थः । प्रतिश्रुतस्याप्रदाने निमित्तमाह ।। य इतिं । यो भवान्प्रतिश्रुतस्य प्रतिश्रुतं वस्तु प्रतिपादयितुमनीशोऽसमर्थस्तस्मादित्यर्थः ।। ३५ ।।

लिङ्गेरी — हे बले । यो भवान् भवता प्रतिज्ञातस्य समर्पयितुमसमर्थस्तस्य ते निष्ठान्तं नियतं प्रतिज्ञातदानपर्यन्तं नरकं मन्ये । यतः प्रतिज्ञातमदातुर्नरकं नरकः प्रतिश्रुतः । वाचा दत्तं मनोदत्तं धारादत्तं न दीयते । षष्ठिवर्षसहस्राणि विष्टायां जायते कृमिरिति श्रुत्या प्रतिज्ञातः ।। ३५ ।।

न तद्दानं प्रशंसन्ति येन वृत्तिर्विपद्यते ।
दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ।। ३६ ।।

सत्यधर्मीया — वृत्तिर्जीवनं विपद्यते नश्यति । वृत्त्यभावेऽपि प्रवृत्तिनिवृत्तिः कुत इत्यतो वक्ति । वृत्तिमतः पुरुषस्य यतो यस्मात् । दानं यज्ञस्तपः कर्मेत्यादिकं संपद्यतेऽतस्तन्नाशे सर्वनाश इति भावः । वृत्तिर्जीवनसाधनं वा ।। ३६ ।।

छलारी — ननु शरीरत्यागानन्तरं यत्किञ्चिद्भवत्वीदानीं सर्वस्वदानात्कीर्तिस्तावद्भविष्यतीति चेत्तत्राह ।। नेति । न प्रशंसन्ति न श्लाघयन्ति । कुतो न प्रशंसन्तीत्यत आह ।। येनेति । वृत्तिर्जीवनं जीवनसाधनं विपद्यते नश्यति । तन्नाशे किन्नश्छिन्नमत आह ।। दानमिति । लोके वृत्तिमत एव

दानादिकं सिद्ध्यति । वृत्त्यभावे तु तदभावं स्यादिति भावः । तपश्चित्तैकाग्र्यं कर्म पूर्तं तस्मात्सर्वस्वदानं न कर्तव्यमिति भावः ॥ ३६ ॥

लिङ्गेरी — ननु दानं यज्ञानां वरूथमिति श्रुत्या दानस्य विहितत्वात् । लोके दातारो गुणसर्वभूतान्युपजीवन्ति दानेनारातिरपानुदन्तो दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परं वदन्तीति प्रशंसितदानकर्तुर्मे कथमनर्थप्राप्तिरित्यत आह ॥ न तद्दानमिति । हे बले । येन दानेन वृत्तिः स्वजीवनमेव विपद्यते नश्यति तद्दानमुक्तश्रुत्यादयो न प्रशंसन्ति । किन्तु स्वोपजीवनाविरोधि दानमेव प्रशंसन्ति । यस्माद्वृत्तिमतः स्वजीवनोपायद्रव्यादिमत एव दानयज्ञतप आदिकर्म विधीयते ॥ ३६ ॥

धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥ ३७ ॥

सत्यधर्मीया — दात्रेत्थं भवितव्यमित्याह ॥ धर्मायेति । धर्माय पुण्यार्थं विप्रप्रमुखेभ्यः । यशसे नटनर्तकादिभ्यः । कामाय स्वभोगार्थम् । स्वजनाय सतीसुतादिभ्यः । अर्थाय व्यवहारमुखेन तद्विवृद्धिसिद्ध्येऽभीप्सितार्थान्तरार्थं वा । एवं पञ्चधा ॥ ३७ ॥

छलारी — ननु सर्वस्वं न दातव्यं चेत्तर्हि किं दातव्यमित्यत आह ॥ धर्मायेति । धर्माय सत्पात्रदानादिपुण्यसंपादनाय । यशसे मठादिभ्यो दानेन कीर्त्यर्थम् । अर्थाय कोशाभिवृद्ध्ये । कामाय विषयभोगार्थम् । स्वजनाय बन्धुभ्यो दानार्थम् । एवं वित्तं पञ्चधा विभजन्पुरुष इह लोकेऽमुत्र च परलोके मोदते । तथा चैवमार्जितं द्रव्यं पञ्चधा विभज्य पञ्चमांशं सत्पात्रे दद्यादिति भावः ॥ ३७ ॥

लिङ्गेरी — किञ्च यावज्जीवनसाधनद्रव्यमवशेष्यान्यद्रव्यस्य वक्ष्यमाणरीत्या दातुरैवैहिकपारत्रिकसुखं भवति नान्यथेत्यतोऽपि स्वजीवनविरोधि दानमनुचितमित्याह ॥ धर्मायेत्यादिना । धनीपुरुषो वित्तं स्वन्यायार्जितं द्रव्यं धर्माय पुण्याय यशसे कीर्त्यै अर्थाय स्वजीवनोपायद्रव्याय कामाय विहितविषयभोगाय स्वशरीरसंबन्धिजनाय चेत्येवं पञ्चधा विभागः कुर्वन्नेवेह लोकेऽमुत्र परलोके च मोदते सन्तुष्टो भवति ॥ ३७ ॥

अत्रापि बह्वृचैर्गीतं शृणुष्वासुरसत्तम ।
सत्यमोमिति यत् प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥

सत्यधर्मीया — न मयैवं शिष्य इति दययोच्यतेऽपि तु बृहतीसहस्र ऐतरेयके ऋग्वेदिभिरावेदितं न स्ववृत्तिविच्छित्तिवितरणं कार्यमितीत्येतत्प्रतीकयति ।। अत्रापीति । बव्हृचैर्बहवो ऋचो येषां ते तथा। ऋक्पूरब्धूरित्यप्प्रत्ययः । ओमिति यदर्थिनं प्रति प्राह तत्सत्यं प्रोक्तम् । यन्नेत्याह तदनृतं प्रोक्तम् । ओमिति सत्यं वदनेत्यनृतं तदेतत्पुष्पं फलम् । वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भवतोः पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलम् । वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवेमवानृतं वदन्नाविर्मूलमात्मानं करोति । स शुष्यति स उद्वर्त्तते तस्मादनृतं न वदेत्तत्त्वेन । पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति । तद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यते। स यत्सर्वमोङ्कुर्यात् रिच्यादात्मानं स कामेभ्यो नालं स्यात् अथैतत्पूर्णमभ्यात्मं यन्नेति तत्सर्वं नेति ब्रूयादित्यपि काऽस्य कीर्तिर्जायेत । सैनं तत्रैव हन्यात्तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनी करोति । तयोर्मिथुनात्प्रजायते भूयान्भवति यो वैतां वाचं वेद । यस्या एष विकारः स सम्प्रति विदकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति तस्या इतीति । तद्भाष्ये च सम्यग्वक्तृत्व इत्यारभ्य विष्णुगुणब्रुवा इत्यन्तेन छायया तृतीयाध्यायाष्टादश-खण्डोऽयं व्याख्यातो व्याकृतं तद्भाष्यटिप्पणकृद्भिरिति विशेषस्ततोऽनुसन्धेयः । विस्तरदरतो न वितायितः । अनृतं विना न सत्यसंपत्तिः कुतश्चिदपि भवतीति भावः ।। ३८ ।।

छलारी — ननु सत्यमुक्तं त्वया । तथाऽपि प्रतिश्रुत्य न दास्यामीति कथमनृतं वक्तव्यम् । नानृतात्पातकं परमित्यनृतस्य महादोषोक्तेरिति चेन्न । वृत्तिसङ्कटादिष्वनृतस्यादोषत्वात् । किमत्र प्रमाणमित्यतो बह्वृचश्रुतिः प्रमाणमित्याह ।। अत्रापीति । अत्रापि सत्यस्य प्रायशो गुणत्वं कुत्रचिद्दोषत्वमनृतस्य प्रायशो दोषत्वं कुत्रचिददोषत्वमित्येवं सत्यानृतव्यवस्थायामित्यर्थः । बह्वचैर्ऋग्वेदादिभिर्गीतिमुक्तं शृणु । बह्वृचश्रुत्यादि प्रथमं तावत् । ॐमिति सत्यं वद नेत्यनृतं हि । तदेतत्पुष्पं फलं वाचं यत्सत्यं स ईश्वरो यशस्वी कल्याणकीर्तिर्भवतोः पुष्पं हि फलं वचः सत्यं वदत्यथैन्मूलं वाचो यदनृतम् । तद्यथा । वृक्ष आविर्मूलः शुष्यति स उद्वर्त्ततैवमेवानृतं वदन्नाविर्मूल आत्मानं करोति स शुष्यति स उद्वर्त्तते । तस्मादनृतं न वदेत्यनेन श्रुत्या सत्यानृतयोर्लक्षणकथनपूर्वकं स्तुतिनिन्दाभ्यां सत्यं विहितमनृतं निषिद्धम् । तमिमं श्रुत्यर्थं दर्शयन्नाह ।। सत्यमित्यादिना । ओमिति यत्प्रोक्तमर्थिनं प्रति तत्सत्यमिति ज्ञेयम् । नेति यदाहार्थिनं प्रति तदनृतमिति ज्ञेयम् ।। ३८ ।।

लिङ्गेरी — स्वोक्तार्थे ऐतरेयवाक्यं प्रमाणमित्याह ।। अत्रापीति । हे असुरेष्वत्युत्तम बले । त्वमत्रापि स्वजीवनोपयोग्यन्यद्रव्यदानमेव कर्तव्यमित्यत्रापि बह्वृचैर्ऋग्वेदिभिर्गीतमुक्तं वचनं शृणुष्व ।

तदेकदेशग्रहणेन तदर्थविवरणेन च दर्शयति ।। सत्यमोमिति । याचकं प्रति त्वद्याचितं सर्वं दास्यामीत्येवमर्थकमोमिति यत्प्रोक्तं तत्सत्यमित्युच्यते । यत्तन्नास्तीति वक्ति तदनृतं ह्यत्र प्रसिद्धम् ।। ३८ ।।

सत्यं पुष्पफलं विद्यादात्मवृक्षस्य जीवतः ।
वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ।। ३९ ।।

सत्यधर्मीया — कुत एवमित्यतः सनिदर्शनमन्वयव्यतिरेकमुखेनाह ।। सत्यमिति । आत्मवृक्षस्य जीवतो जीवारण्यवृक्षस्य सत्यं तत्पुष्पफलम् । यथा जीवतो महीरुहस्य स्यातां फलपुष्पे । तथा जीववृक्षस्य सत्यं पुष्पं फलं च विद्याज्जानीयात् । सर्वे द्वन्द्वन्यायेन वा समाहारेण वोत्तरपदलोपसमासेन वोपपत्तिः । चेत्किमित्यत आह ।। वृक्ष इति । आत्मवृक्षे दात्राख्यजीववृक्षे अजीवति सर्वस्वार्पणेन वृत्तिविच्छित्त्या निरुपाये सति । तत् पुष्पफलरूपं सत्यं न स्यात् । आत्मनो जीवने तदनृतं मूलस्थितिहेतुः ।। ३९ ।।

छलारी — तत्सत्यं किञ्चिदनृतं विना न सिद्ध्यतीत्याशयेनाह ।। सत्यमिति । जीवत आत्मवृक्षस्य देहाख्यवृक्षस्य सत्यं सत्यवचनं पुष्पफलं फलस्थानीयं विद्याज्जानीयात् । यद्यपि श्रुत्या वाचो वाक्यस्य सत्यं पुष्पं फलं चेत्युक्तम् । तथाऽपि वचो देहे निर्वाहाधीनत्वादात्मवृक्षस्येत्युक्तम् । भवतु पुष्पफलस्थानीयं सत्यं ततः किमित्यत आह ।। वृक्ष इति । आत्मवृक्षेऽजीवति सति शुष्कत्वरूपं मरणं प्राप्नुवति सति तत्पुष्पफलस्थानीयं सत्यं न स्यात् । देहश्चानृतेन रक्षणीय इत्याशयेनाह ।। अनृतमिति । अनृतं त्वात्मनो देहाख्यवृक्षस्य मूलं स्थितिहेतुः । अनेनानृतमपि न परित्याज्यमित्युक्तं भवति ।। ३९ ।।

लिङ्गेरी — जीवतः प्राणधारिणो देहाख्यवृक्षस्योक्तविधं सत्यं पुष्पफलसाधनं जानीयात् । आत्मलक्षणे वृक्षेऽजीवति जीवनसाधनद्रव्यरहिते तत्सत्यलक्षणतज्जन्यपुष्पं फलं स्वर्गादिलक्षणं न स्यात् । यत आत्मनो जीववृक्षस्यानृतं स्वसर्वस्वदानानङ्गीकारवचनं वृक्षस्य मूलमिव मूलमभिवृद्धिहेतुः । अनेन श्लोकेन पुष्पं हि फलं वाचः सत्यं वदति । अथैतन्मूलं वाचो यदनृतमित्युपनिषद्भागो वक्ष्यमाणार्थे प्रमाणतया सूचितः ।। ३९ ।।

यद् यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ।
एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ।। ४० ।।

सत्यधर्मीया — यथोन्मूल उत्खातबेरः । वृक्षः शुष्यत्यचिरादुद्वर्तते नश्यति च । एवं नष्टं स्वस्थितिहेतुबीजस्थानीयमनृतं यस्य स तथा । आत्मा शुष्येत् । विना जीवनोपायं कृशः स्यादनन्तरमुद्वर्तेत नश्येत् । तत्र नालस्यमित्याह ॥ सद्य इति । मन्दसन्देहं न कुर्वित्याह ॥ न संशय इति । दानविषये संशयः समीचीनः शयः पाणिर्यस्य स नेत्यप्यर्थः । कुरु मां बहुदायिनः करमित्याद्युक्तिरपि स्वजीवनाविरोधिवितरितकरपरेति ज्ञेयम् । अतः पूर्वोत्तरमपरामृश्य कलितजल-कलशस्तव शयो न सुशय इत्याशयः ॥ ४० ॥

छलारी — विपक्षे बाधकं दृष्टान्तेन स्पष्टयति । तदित्यस्य लिङ्गविपरिणामेन स इत्यर्थः । यथा सः प्रसिद्धवृक्ष उन्मूल उत्पाटितमूलः सन् शुष्यति । अचिरादेवोद्वर्तते पतति च । एवं नष्टं त्यक्तमनृतरूपं यस्य स आत्मा देहः शुष्येत् । न संशयः । भागवतेऽनृतं न त्याज्यमित्युच्यते श्रुतौ त्वनृतं न वदेत्यनृतं निषिद्ध्यते । तथा च कथमिमं श्रुतिरुक्तार्थे प्रमाणं भवेत् । उभयोर्विरुद्धार्थ-कत्वादिति चेन्न । श्रुतौ नापद्यनृतविषये विषयत्वेन भागवतस्यापद्यनृतस्वीकारविषयत्वेनोभयोर-विरोधात् । तथा चानापद्यनृतनिषेधकर्त्र्या श्रुत्याऽऽपद्यनृतमभ्यनुज्ञातम् । कुत एवं कल्प्यत इति चेन्न । सत्यानृते मिथुनीकरोतीत्युपसंहारवाक्येऽनृतस्वीकारस्याप्यनुज्ञानात् । तमिमं श्रुत्यर्थं मनसि निधायैवं नष्टानृत इति वाक्यं प्रवृत्तम् । तस्य चायमर्थः । अनृतेनैव परिहरणीयायामापद्यात्मानष्टानृतश्चेच्छुष्येत् । अतः संकटेऽनृतं न दोष इत्युक्तं भवति ॥ ४० ॥

लिङ्गेरी — उत्खातितमूलवान्वृक्षो यथाऽऽशु शुष्यति शोषं प्राप्नोत्युद्वर्तते नष्टश्च भवति तथैवेदं नष्टानृत उक्तविधानृतमवदन् आत्मत्वाधिकारी शुष्येन्नश्येच्चात्र संशयो नास्ति । एवं नष्टानृतो यस्मात्तस्मादिति वा । अनेन पद्येन तद्यथा वृक्षोऽनिर्मूलः शुष्यति स्वोद्वर्तत एवमेवानृतं वदन्नानिर्मूलमात्मानं करोति । स शुष्यति स उद्वर्तत इत्युपनिषद्भागः सूचितः ॥ ४० ॥

पराग्रिक्तमपूर्णं वा अक्षरं यत् तदोमिति ।
तद् यत् किञ्चोमिति ब्रूयान्न स रिच्येत वै पुमान् ॥ ४१ ॥

सत्यधर्मीया — यदोमित्यक्षरं तत्पराक् । परं दूरमञ्चतीति तत्तथा । सर्वस्ववितरणपरमोमिति तद्दूरे कर्तव्यमित्यर्थः । रिक्तमिति श्रुतिपदं व्याकरोति ॥ अपूर्णं वा इति । स्वजीवनोपायापायावहमिति अपूर्णम् । असर्वस्वविषयकमोमित्यक्षरं ब्रूयादिति । फलितमभिलपति । यत्किञ्चिदस्वजीवनोच्छित्ति स्वल्पम् । ओमिति दास्यामिति ब्रूयाच्चेत् तेन पुमान् रिच्येतोद्रिच्येत । पुमानिति प्रस्तुतं पुरस्कृत्याधि-कारीत्यर्थः । न स रिष्येतेति पाठे न नश्येदित्यर्थः ॥ ४१ ॥

छलारी — सर्वथा सत्यवचने देहो न निर्वहेदिति स्फुटीकर्तुं प्रथमं तावत्सत्यस्य दोषान्वक्तुं पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यत स यत्सर्वमोङ्कुर्याद्रिंच्यादात्मानं स कामेभ्यो नालं स्यादिति श्रुतिः प्रवृत्ता । तमिमं श्रुत्यर्थं दर्शयति ॥ परागिति । यदोमित्येकाक्षरं दास्यामीत्यङ्गीकारं प्रतिपादकमक्षरं तत्पराक् स्वस्य प्रतिकूलम् । कुत इति शङ्कापरिहारार्थं प्राप्तं रिक्तमिति श्रुतिपदं व्याचष्टे ॥ अपूर्णं वेति । स्वस्यापूर्णत्वापादकत्वादित्यर्थः । इति यत् यस्मात्पुमान्यत्किञ्चिद्वस्त्वर्थिने ॐ दास्यामीति ब्रूयात्तेन वस्तुना रिच्यते न्यूनो भवेत् । यदि भिक्षवे याचमानाय सर्वं सर्वस्वं ॐकुर्वन् दास्यामीत्यंगीकुर्यात्तर्ह्यात्मने कामेभ्यो नालं पर्याप्तो न भवति । सर्वेषां विषयाणां दत्तत्वात् । तस्य भोगो न सिद्ध्यतीत्यर्थः । जीवनोपायरहितो भवतीति भावः ॥ ४१ ॥

लिङ्गेरी — पराक् परविषये यदोमित्यक्षरं तदपेक्षितं सर्वं दास्यामीति रूपं तद्रिक्तमर्थशून्यं स्वजीवनद्रव्यदानस्योक्तरीत्याऽनर्थहेतुत्वेन बाधितत्वादत एवापूर्णं च स्वायोग्यदानस्यैवापूर्णत्वात् । यस्मादेवं स्वसर्वस्य दानमनुचितं तस्माद्यत्किञ्चिद्दास्यामीत्येवमर्थकमोमिति वाक्यं यो ब्रूयात् स पुमान्न रिष्येत नष्टो न भवेत् । वै प्रसिद्धम् । अनेन पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति । तद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यतेत्युपनिषद्भागः प्रमाणीकृतः ॥ ४१ ॥

भिक्षवे सर्वमोङ्कुर्वन्नालं कामेभ्य आत्मने ।
अथैतत् पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥ ४२ ॥

सत्यधर्मीया — सर्वथा सर्वस्वदानं दानवेन्द्राविहितमिति रीत्यन्तरेण दृढयति ॥ भिक्षव इति । भिक्षवे याचकाय सर्वमोङ्कुर्वन्दाताऽऽत्मने आत्मनः स्वस्य कामेभ्यो हेतुभ्यो दत्तेभ्यः । आत्मने स्वदेहाय तत्पोषायेति यावत् । अलं शक्तो न भवति । अथ तस्मान्नेत्यनृतं वच एतदभ्यात्मम् । आत्मानमभि प्रति पूर्णं तत्त्वापादकम् । व्ययाभावादिति भावः ॥ ४२ ॥

छलारी — इदानीमनृतस्य गुणं वक्तुमथैतपूर्णमभ्यात्मं यन्नेति श्रुतिः प्राप्ता । तच्छ्रुत्यर्थं दर्शयति ॥ अथेति । नेति यदनृतं वचोऽर्थिने न दास्यामीति निषेधवचनमेतदभ्यात्ममात्मानं प्रति पूर्णं पूर्णत्वसंपादकम् । अर्थव्ययाभावादिति भावः ॥ ४२ ॥

लिङ्गेरी — उक्तार्थे तात्पर्यं सूचितं पुनरुक्तमेव विशदयति ॥ भिक्षव इति । भिक्षवे याचकाय सर्वस्वं दास्यामीत्यङ्गीकुर्वन्स्वकामेभ्यः । उपलक्षणमेतत् । अर्थादिभ्योऽलं समर्थो नात्मने स्वजीवनाय

च पर्याप्तो न भवति । यस्मादथ तस्माद्यत्सर्वस्वं न ददामीत्यनृतं वच एतदभ्यात्म-मात्मनोऽभिवृद्धिकरम् । स्वजीवनोपायस्यावशेषितत्वात् । स कामेभ्यो नालं स्यादथैतत्पूर्णमभ्यात्मं यन्नेति भागोऽनेन सूचितः ॥ ४२ ॥

सर्वं नेत्यर्थिनं ब्रूयात् स दुष्कीर्तिः श्वसन्मृतः ।
स्त्रीषु नर्मे विवाहे च वृत्त्यर्थे प्राणसङ्कटे ।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥ ४३ ॥

इति **श्रीमद्भागवतेऽष्टमस्कन्धे अष्टादशोऽध्यायः** ॥ ८-१८ ॥

सत्यधर्मीया — न दास्यामीति वदेति कवेः तात्पर्यं किमित्यतो वदति ॥ सर्वमिति । यदि यः कोऽपि सर्वं न दास्यामीति ब्रूयात्स दुष्कीर्तिरपयशःपात्रः स्यात् श्वसन्नपि लोकदृष्ट्या जीवन्नपि मृतस्तत्प्रायः । अत्रेदमाकूतम् । कवेःसर्वस्ववितरणे स्वजीवहानिरवितरणे दुर्यशसाऽऽसादितेन जीवन्मृतता । तस्माद्यथा स्वजीवनं स्यात्स्यान्नार्थी सर्वथा प्रत्याख्यातस्तथा देयं वित्तमिति । तथाऽपि किञ्चित्संकुचितताऽनृत एवायातेति न च मननीयमेतदादावदोषत्वात्तस्येत्याह ॥ स्त्रीष्विति । नर्मे नर्मकाले । विवाहे तत्काले । नर्मविवाहे इति पाठे तत्सहितो विवाहस्तत्कार्यद्वयेऽपि नर्मणा सहितो इविवाहः । इना स्वेच्छयाऽऽगतं विवाह इत्यैक पद्यं वा । वृत्त्यर्थे जीवनोपायविषये । वृत्तिनिवृत्तौ प्राप्यायामिति वा । प्राणसङ्कटे प्राप्ते । गवां ब्राह्मणानां त्रैवर्णिकानामर्थहिंसायां सर्वार्थीनां चेत्येतद्धिंसायां प्रसक्तायाम् । अनृतं जुगुप्सितं निन्दितं न स्यात् । इत्येव नापि तु तद्विहितमेव । यथाह याज्ञवल्क्यः । वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति । अन्यत्रापि विवाहकाले रतिसम्प्रयोगे पञ्चानृतान्याहुरपातकानीत्युक्तेस्त्वं स्वजीवनोपायमनतिहायास्मै दिश । तेन नानृतवाक्त्वप्रयुक्तदोषवान् स्यादिति कविहृदयम् ॥ ४३ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे अष्टादशोऽध्यायः ॥ ८-१८ ॥

छलारी — ननु तर्हीदमनृतमेव सर्वदा सेव्यं स्यादित्यतो नेति वक्तुं स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यादिति श्रुतिः प्राप्ता । तच्छ्रुत्यर्थमाह ॥ सर्वमिति । यदि सर्वं न दास्यामीत्यर्थिने किमपि न दास्यामीत्यनृतं ब्रूयात्तर्हि स दुष्कीर्तिः श्वसन्मृतो जीवन्मृतश्च स्यात् ॥ अयं भावः । याचकाय सर्वस्वदाने स्वजीवननाशः किञ्चिदप्यदानेऽदृष्टविरोधेनापकीर्त्या

जीवन्मृतत्वं स्यात् ।। तस्य यावद्विहितं कार्यमिति । तथा च श्रुतिः । तस्मात्काल एव दद्यान्नाकाले दद्यात्तत्सत्यानृते मिथुनीकरोतीति । अतो वृत्तिसंकटादिष्वनृतं न दोषायेत्युक्तमुपसंहरति ।। स्त्रीष्विति । स्त्रीषु प्रोत्साहनेन वशींकरणे नर्मे नर्मणि परिहासे विवाहे च वरादिस्तुतौ वृत्त्यर्थे जीवनोपायार्थे । सर्वधनापाहार इति यावत् । प्राणस्य संकटे चौर्यादिभिः स्वस्य वधलक्षणे । न स्त्रीषु राजन्नविवाहकाले प्राणात्यये सर्वधनापाहार इत्युक्तेः । गवानां ब्राह्मणानां चार्थे हितार्थे हिंसायां च । कस्यचित्त्रैवर्णिकस्य प्राप्तायां वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति याज्ञवल्क्योक्तेः । येषु स्थलेष्वनृतं जुगुप्सितं निन्द्यं न स्यात् । तस्मात्तवापि सर्वस्वदाने प्रतिज्ञया वृत्तिनाशस्य प्राप्तत्वात्सर्वं न दास्यामीत्यनृतं ब्रूहीति । अनृतदोषाभावादिति भावः । ४३ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे अष्टादशोऽध्यायः ।। ८-१८ ।।

लिङ्गेरी — यया, स यत्सर्वमोङ्कुर्याद्रिच्यादात्मानमिति श्रुत्या यः सर्वस्वदानप्रतिज्ञाता स आत्मानं रिच्याच्छून्यं कुर्यादिति सर्वदानप्रतिज्ञा न युक्ता तथा याचकापेक्षितसर्वं नेत्युक्तिश्चेत्याह ।। सर्वं नेति । योऽर्थिनं याचकं प्रति तद्याचितं सर्वं नास्तीति ब्रूयात् स दुष्कीर्तिर्जीवन्मृतश्च भवतीत्यनेन स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्त्यानृते मिथुनीकरोति तयोर्मिथुनात् प्रजायते भूयान्भवति यो वै तां वाचं वेदेति भागः सूचितः । ननु तर्ह्येवमस्य विष्णुत्वमज्ञाय त्रीण्यपि पदानि न दास्यामीत्यनृतवचनेनानृतात्पातकं परमिति स्मार्तं जुगुप्सितमनृतपापं स्यादित्याशङ्कमानं बलिं प्रति शुक आह ।। स्त्रीष्वित्यादि । हे बले । स्त्रीषु कामुकासु नर्मे परिहासवेलायां विवाहे च जीवनोपायप्रयोजने गोब्राह्मणादिहिंसायां यदनृतं तज्जुगुप्सितं नेति । न स्त्रीषु राजन्नविवाहकाले प्राणात्यये सर्वधनापहार इत्यादिप्रमाणप्रसिद्धं यतोऽतस्तेऽत्र शङ्का मा भूदिति भावः ।। ४३ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे अष्टादशोऽध्यायः ।।८-१८।।

॥ अथ एकोनविंशोऽध्यायः ॥

श्रीशुक उवाच –

बलिरेवं गृहपतिः कुलाचार्येण भाषितः ।
तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ॥ १ ॥

सत्यधर्मीया — अत्र त्रिविक्रमपराक्रमं वक्तुमुत्कमना आदौ दानवेन्द्रस्य स्वसन्धाभिसन्धिमभिधत्ते ॥ बलिरिति । कुलाचार्येण कुलगुरुणा । अवहितः सावधानमानसः ॥ १ ॥

छलारी — बलिर्हरेः कपटं ज्ञात्वाऽपि अनृतभीतः सन् प्रतिज्ञातं पादत्रयं ददावित्याह ॥ बलिरिति । कुलस्याचार्येण शुक्रेणैवं भाषिते गृहपतिर्यज्ञाधिकारी गृहस्थः क्षणं तूष्णीं भूत्वा स्थित्वाऽवहितः स्थिरमनाः सन् ॥ १ ॥

लिङ्गेरी — अत्रापि हरौ भक्त्यभिवृद्ध्ये तदवतारत्रिविक्रममहिमोच्यते । तत्रादौ शुकबोधितस्यापि बलेर्बुद्धिनिश्चयमाह ॥ बलिरित्यादिना । गृहपतिर्गृहस्थधर्मो बलिरेवमुक्तरीत्या स्वकुलाचार्येण भाषितः क्षणकालं तूष्णीं भूत्वा पुनरवहितः स्वस्थांतःकरणः सन् गुरुं शुक्रमुवाच । हे राजन्निति शुकेन क्रियमाणं परीक्षित्संबोधनम् । गृहस्थाश्रमिणैवैमेव कार्यमिति द्योतनार्थम् ॥ १ ॥

बलिरुवाच–

सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् ।
अर्थं कामं यशो वृत्तं यो न बाधेत कर्हिचित् ॥ २ ॥

सत्यधर्मीया — यो गृहमेधिनां गृहस्थानामर्थं कामं यशो वृत्तिं कर्हिचिदपि न बाधेत न नाशयेत्स धर्म इति यद्भगवता प्रोक्तं तत्सत्यं यथार्थमित्यन्वयार्थः ॥ २ ॥

छलारी — भगवता त्वया प्रोक्तं सत्यमबाधितं तत् । यो दानादिधर्मः कर्हिचित्कदाप्यर्थादिकं न बाधेत न नाशयेत् सोऽयं गृहस्थानां धर्म इति ॥ २ ॥

लिङ्गेरी — हे शुक्र । यो धर्मो दानादिलक्षणोऽर्थं द्रव्यं कामं विषयेच्छां यशः कीर्तिं वृत्तिं जीवनोपायं च कर्हिचित्कदाऽपि न बाधते स एव गृहमेधिनां गृहस्थाश्रमिणां धर्म इति भगवतैश्वर्यादिगुणवता त्वया यत्प्रोक्तं यथार्थमेव । तथाऽप्यनृतापयशसोर्बिभ्यते ॥ २ ॥

स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ।
प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ।। ३ ।।

सत्यधर्मीया — प्रतिश्रवश्रवणात्पूर्वं जाग्रता भाव्यम् । अधुना तुष्यादस्य वितस्तं परिस्वोत्प्लवनीतिर्जातेति श्रुतं त्वदुक्तं न संमतं मम तदित्यदितिसुतो विज्ञापयति ।। स चेति । यः प्राल्हादिः प्रल्हादगोत्रापत्यम् । ननु द्विजव्याजनिर्जरेभ्यो विरोचनो विरोचमान एव व्यतारीच्छरीरमिति महामाहात्म्यं तं पितरमतिहाय पितामहानुबन्धं किमिति मतिमान् बलिरलपदिति चेत् । सत्यम् । आयुष्मन् दुष्परिहरेयं तव शङ्कापिशाची । गुरुभिः करुणापूर्वं पूर्वं व्रतमनुछ्रयम् । दृष्ट्वा मां विद्रुता द्राक् सा यात्यमन्त्रविदोऽपरान् । तथा हि विरोचनो ददौ शरीरम् । सोऽहं चेत्यनुक्त्वा उक्त्वा च स चेति । सचेत्यव्ययं सुखवाची । तथा च सुखेन कथं ददानीति तात्पर्यं ज्ञापयामास । स चासं श्रेति श्रुतेः । तद्भाष्ये च स चा सुखेनेत्युक्तेः । जीवन् श्रमं न बुभुजे न वरश्रियं चेति नानुरूपं निदर्शनमिति प्रल्हादार्थं भगवानवततार इवेदानीं मदर्थमवततारेति वा आवयोः समतेति सुखचेता ऊचे प्राल्हादिरिति तात्पर्यपर्यवसतिसम्भवात् । अत इञितीञ् । सोऽहं यथा कितवो धूर्तो मिथ्या वदति तथा द्विजं प्रति ददामीति प्रतिश्रुत्य प्रतिज्ञाय कथं वित्तलोभेन नेति प्रत्याचक्षे व्यासेधामि । कथं प्रत्याचक्षे यूयं वित्त इति वा ।। ३ ।।

छलारी — तर्हि स एव धर्मोऽनुष्ठेयः किं नेत्याह ।। स चेति । यो ददामीति प्रतिश्रुत्य स्थितः सोऽहं वित्तलोभेन जीवनाकांक्षया कथं द्विजं प्रति प्रत्याचक्षे न दास्यामीति निषेधं करोमि । कुतः । प्राल्हादिरनृतबिभ्यत्प्राल्हादिवंशोद्भवः । हेतुगर्भविशेषणम् । कितवो धूर्तः ।। ३ ।।

लिङ्गेरी — मम प्रतिज्ञातं न दास्यामीति वचनमशक्यमित्याह ।। स चाहमित्यादिना । प्रल्हादकुलोत्पन्नः स चोक्तगुणवानहं ब्राह्मणाय ददामीति प्रतिज्ञाय कितवो वञ्चको यथा तथा द्रव्यलोभेन न दास्यामीति द्विजं कथं प्रतिवक्ष्यामि ।। ३ ।।

न ह्यसत्यात् परोऽधर्म इति होवाच भूरियम् ।
सर्वं वोढुमलं मन्ये ऋतेऽलीकपरं नरम् ।। ४ ।।

सत्यधर्मीया — बधिरपुरतो गानमिव बव्हृचगीतं हितमित्यभिहितं न हितं तुभ्यं जातमिति न वदेयम् । सर्वसहापि दुःसहमेनं मेने । तथोवाच चेति तदाह ।। न हीति । असत्यात्परोऽधर्मो न हीति मही भूः सर्वं पर्वतादिकं वोढुं मामलं शक्तां मन्ये । तर्हि कं धर्तुं धरित्रि न शक्ता त्वमित्यतस्तत्त्वमाह

।। ऋत इति । अलीकं त्वप्रियेऽनृते इति विश्वः । मिथ्याभाषिणं नरमृते विना । तं धर्तुमहं न शक्तेत्युवाच । यदर्थमभूदियान् विवादस्तद्वचनं चेद्विश्वसनीयं स्यादिति तदेवाह ।। भूरिति ।। ४ ।।

छलारी — अल्पदोषत्वादनृतं वक्तव्यमित्यतोऽनृतस्य महादोषत्वे आर्यसंमतिमाह ।। न हीति । इयं भूमिः । असत्यात्परो धर्मो नास्ति । यतोऽतः । मां सर्वपापकरं नरं वोढुमलं समर्थेति मन्ये । तस्यापवादमाह ।। ऋतेति । अलीकपरमनृतवक्तारं ऋते विना । इत्युवाच ह सिद्धमेतत् ।। ४ ।।

लिङ्गेरी — असत्यादयथार्थवचनादथापरोऽन्योऽधर्मो नास्ति । हेत्यनेन नानृतात्पातकं परमिति प्रसिद्धिं सूचयति । अहं, मां सर्वं जगद्वोढुं धर्तुमलं शक्तां मन्ये । अलीकपरमयथार्थवचननिष्ठं नरं विना इतीयं भूरुवाच । इति होवाचेति वेदतुल्यत्वमस्य वाक्यस्य सूचयति । अलीकं त्वप्रियेऽनृतमित्यमरः ।। ४ ।।

नाहं बिभेमि निरयान्नाधर्मादसुखार्णवात् ।
न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलोभनात् ।। ५ ।।

सत्यधर्मीया — न च सर्वथा प्रत्याख्यातव्योऽयमिति मयोक्तं किल बालिशेत्यतस्तावानप्यधर्मो ममोद्वेगकृदित्याह ।। नाहमिति । अधर्मात्पापकरत्वेन मम सम्मताद्विप्रलोभनाद्वञ्चनाद्बिभेमि यथा तथा निरयात्तद्वद्विद्यमानात् असुखार्णवात् आगामिदौर्भाग्यहेतुकाद्दुष्पारदुःखराशेः । स्थानच्यवनात्स्वर्गभ्रंशात् । किमुत मृत्योर्मरणादपि न बिभेमि । हे विप्र! प्रलोभनात्प्रस्तुतवञ्चनादिति वा । तार्तीयस्य कुतो गतिरिति त्वदुक्तगत्यभावप्रयोजकप्रतिश्रुतादाननिमित्तादसुखार्णवा- न्नरकादाप्यादिति वा । यद्वा विगतः प्रः प्रवर्णो यस्मिंस्तद्विप्रम् । तच्च तत्प्रलोभनं च । ततश्च लोभनादिति पदलाभः । तस्माल्लोभनात् त्वदुपदिष्टवित्तवृत्तिगार्ध्याद्यथा बिभेमि तथा पूर्वस्मादन्यस्मान्न बिभेमीत्यर्थः ।। ५ ।।

छलारी — नन्वप्रत्याख्याने दोषा उक्ताः खलु तत्राह ।। नाहमिति । अहं विप्रप्रलोभनाद्वंचनाद्भ्रंशनाद्यथा बिभेमि तथा निरयान्नरकादधन्याद्दारिद्र्यात् । अधर्मादिति पाठे पापादित्यर्थः । असुखस्य दुःखस्यार्णवाद्यशःस्थानस्य च्यवानाद्भ्रंशात् । किं बहुना मृत्योरपि न बिभेमि ।। ५ ।।

लिङ्गेरी — हे शुक्र । अहं विप्रस्य प्रलोभनाद्वंचनाद्यथा बिभेमि भीतोऽस्मि तथा निरयाद्दुर्गतिदारिद्र्यादेरधर्माद्विप्रवंचनानृतभाषणातिरिक्तात्पापादसुखार्णवाद्दुःखसमुद्रात्स्थानच्यवनात्स्थानभ्रंशान्मृत्योर्मरणाच्च न बिभेमि ।। ५ ।।

यद् यद् हास्यति लोकेऽस्मिन् सम्परेतो धरादिकम् ।
तस्यात्यागे निमित्तं किं विप्रस्तुष्येत तेन चेत् ॥ ६ ॥

सत्यधर्मीया — सम्परेतो मृतो यद्यत् धरादिकं भूम्यादि अस्मिंल्लोक एव हास्यति त्यक्ष्यति सह किमपि न नेष्यति तेन धरादिना विप्रस्तुष्येत चेत् सन्तुष्टो भवति चेत् तस्य तादृशस्य स्वाननुयायिनो धरादेरत्यागेऽदाने निमित्तं किम् । न किमपि कारणं पश्यामीति भावः ॥ ६ ॥

छलारी — मरणानन्तरं सर्वं परित्यज्य गच्छतः पुंसस्तस्यादाने निमित्तं नास्तीत्याह ॥ यद्यदिति । हास्यति त्यक्षतिं । संपरेतो मृतो धनादिकं तस्य धनादेरत्यागेऽदाने किं निमित्तम् । न किमपि । प्रयोजनाभावेऽपि किमिति देयमित्यत आह ॥ विप्र इति । तेन वस्तुना विप्रस्तुष्येत चेत्तस्यात्यागे किं कारणमित्यर्थः ॥ ६ ॥

लिङ्गेरी — संपरेतो मृतोऽस्मिंल्लोके यद्यद्धरादिकं भूम्यादिकं हास्यति त्यजति चेद्यदि तेन धरादिनाऽपि विप्रो ब्राह्मणस्तुष्येततर्हि तस्यात्यागेऽदाने निमित्तं किं न किमपि । भूम्यादेः सदा स्वाधीनत्वाभावात् तत्र लोभोऽयुक्त इति भावः ॥ ६ ॥

श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः ।
दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥

सत्यधर्मीया — न च जीवनावनं न सिद्ध्यतीति वञ्चनं रचनीयमिति वचनं ममैतावच्छ्रुतवतो रुचिकरमितीरयति ॥ श्रेय इति । साधवो दुस्त्यजा येऽसवः प्राणास्तैर्भूतानां श्रेयः कुर्वन्ति । ते क इत्यतोऽभिधामभिधत्ते ॥ दध्यङ्शिबिप्रभृतय इति । दध्यङ् स्वदेहम् । शिबिः स्वमांसं कपोताय मत्पिता चेत्यादयो धरादिषु स्वत एव नश्यत्सु विकल्पो देयं वा न देयमिति सन्देहः कः किं प्रयोजनकस्तत्पुरत इदं नाद्भुतमिति भावः । प्रकर्षेण भृतिः पोषणं मम येन सः प्रभृतिः विरोचनः । उपलक्षणया अन्ये ग्राह्याः । यद्वा स दानवः न मुक्तियोग्य स्वयं कर्मदेव इति, मुक्तियोग्य इत्येतन्मुक्तपङ्क्तौ न साक्षात् पितृनाम जग्राह ॥ ७ ॥

छलारी — स्वजीवनमेव कारणं चेन्नेत्याह ॥ श्रेय इति । दध्यङ्नामा ऋषिः शिबीराजा एतादयः साधवो दुस्त्यजैरसुभिः प्राणैरपि स्वप्राणान् दत्वाऽपीत्यर्थः । भूतानां देवादिप्राणिनां श्रेयोऽभीष्टं कुर्वन्त्यकुर्वन् । तत्र दध्यङ् देवेभ्यः स्वदेहं दत्वा शिबिः कपोताय स्वमांसं दत्वेति ज्ञेयम् । ततः किं प्रकृतेऽपि तत्राह ॥ क इति । धरादिषु धरादिदानविषये कः विकल्पो विचारः॥७॥

लिङ्गेरी — कैमुत्यन्यायेनापि भूम्याद्यदाने कारणाभावं दर्शयति ॥ श्रेय इति । दध्यङ् अथर्वण: शिबि: राजा एतत्प्रमुखा: साधवो दयालुत्वादिसमीचीनगुणवन्तो भूतानामिन्द्रकपोतादीनां स्वकीयैस्त्यक्तुमशक्यैरसुभि: प्राणैरपि श्रेयो हितं कुर्वन्ति । दध्यङ् देवेन्द्राय स्वास्थीनि वज्रनिर्माणाय दत्तवानिति प्रसिद्धे: । शिबिरग्निरूपकपोतरक्षणायेन्द्ररूपश्येनपक्षिणे स्वमांसं ददाविति स्कान्दादिप्रसिद्धे: । एवं स्थिते धरादिषु विषये दास्यामि न वेत्येवंरूपो विकल्प: संशय: क:, न कोऽपीत्यर्थ: ॥ ७ ॥

यैरियं भुज्यते ब्रह्मन् दैत्येन्द्रैरनिवर्तिभि: ।
तेषां कालोऽग्रसील्लोकान् न यशोऽधिगतं भुवि ॥ ८ ॥

सत्यधर्मीया — को विकल्पो धरादिष्वित्यनेन कैमुत्येन धरादिवितरणस्य सुलभतोपपादिता स्वयं तथाऽपि वित्तादिस्पृहामाहात्म्यमनुसन्दधदिदानीं कीर्तिरेकैव सम्पाद्या सन्ततस्थायिनी सुमिला: कलेवरमुचो दुर्मिलाश्च धनत्यज इति द्वाभ्यामाह ॥ यैरिति । यैर्दैत्येन्द्रैरवनिवर्तिभिर्युद्धादप्रत्यावर्तनैरियं मही बुभुजे भुक्ता । तेषां समितिमृतानां लोकान् । ऐहिकानामुष्मिकांश्च । क्षीणे पुण्य इत्यादे: । काल ईश्वर: क्लृप्तकालान्यकालप्रेरकोऽग्रसीज्जग्रास । भुव्यधिगतं प्राप्तं यद्यशस्तन्नाग्रसीत् । अधुनाऽपि ~~तत्यजुर्दुस्त्यजं कायमिति तत्कीर्तिर्वर्तते अत: सैव संपाद्येति भाव: । तेषां चर्यैतादृशीत्यप्याह । तेषां~~ गतं भावे क्त: । गतिर्भुवि नयशोधि नयेन राजनीत्या शोधोऽस्यास्तीति तत्तथेति । केवलं कलहे कलेवरत्यज एतादृशयशो नाप्नुवन्तीति वाऽह ॥ नेति । तैर्भुवि यशो वित्तवितरणजं न सम्पादितमिति वा । कालस्तानेवाग्रसीत्तेषां लोकान्न यश: । लोकानामन्नं स्वोपभोगयोग्यं सर्वं तदर्पणजं यशो भुवि अतं गतमन्नदांस्तान् धिक् । ते निन्द्या इति वा । न यशोऽपयशश्च भुवि अतं प्राप्तमिति वा ॥ ८ ॥

छलारी — सति विभवे सत्पात्रेऽदातॄणामैहिकामुष्मिकसुखं न मेऽस्तीत्याशयेनाह ॥ यैरिति । यैर्दैत्येन्द्रैर्युद्धेऽनिवर्तिभिरियं भूर्बुभुजे उपभुक्त्वा तेषां लोकान्स्वर्गादिलोकान् । ऐहिकामुष्मिक-भोगान्वा। कालो यमोऽग्रसीत्संहृतवान् । यच्छोकादनशीलानां सतां नाप्नोति पुष्कलानित्युक्तम् । अदातॄणां स्वर्गादिलोका न सन्तीत्यर्थ: । भुव्यधिगतं प्राप्तं यशस्तु नाग्रसीत् । अत: कीर्तिरेव साध्या नान्यदिति भाव: ॥ ८ ॥

लिङ्गेरी — नश्वरस्वत्ववद्भूम्यादौ स्वत्वपरित्यागेन परस्वत्वापादानरूपदानेनानश्वरकीर्तिरेव संपाद्येत्याशयेन तदुपपादयति ॥ यैरिति । हे ब्रह्मन् । यैर्दैत्येन्द्रैरियं भूर्बुभुजेऽनुभुक्त्वा तेषां संबन्धिनो

लोकान् भूरादीन्कालः कालनामकभगवत्प्रेरितः प्रसिद्धकालोऽग्रसीद्ग्रस्तवान् । कालेन दैत्येन्द्राणां भूरादिस्वामित्वं नष्टमिति यावत् । ननु दैत्येन्द्राणामशक्ततया तदभूदित्यत आह ॥ अनिवर्तिभिरिति । युद्धापराङ्मुखैरित्यर्थः । तथाऽपि भुव्यधिगतं व्याप्तं तेषां यशः कीर्तिं कालो नाग्रसीदिति ॥ ८ ॥

सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ।
न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥

सत्यधर्मीया — हे विप्रर्षे । युधि अनिवृत्तास्तनुं त्यजन्तीति तनुत्यजः सुलभाः । बहव आहवे वपुरयगमका इत्यत्र हीति ये युद्ध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः । ये एव सहस्रदक्षिणा इत्युक्तिमनुभवं चाह । तर्हि के दुर्मिला इलापाला इत्यत आलपति । न तथेति । तीर्थे सत्पात्रे । किञ्च तीर्थेऽध्वरादावायाते स्वत एवागते । ये श्रद्धया भक्त्या धनत्यजो धनदाः । तथा न ते सुलभास्तनुत्यग्वन्न सुलभा इति भावः । दाता जायेत वा न वेत्यादेः ॥ ९ ॥

छलारी — देहत्यागादपि धनत्यागे कीर्तिर्भवतीत्याह ॥ सुलभा इति । यथा युध्यनिवृत्ता अपरावृत्ताः सन्तः । तनुत्यजः शरीरत्यागिनः सुलभाः । तथा तीर्थे पात्रे आयाते सति श्रद्धया भक्त्या ये धनत्यजो धनत्यागिनः सुलभा नेत्यन्वयः । अतोऽतिदुष्करो धन्यत्याग एव मया कार्य इति भावः ॥ ९ ॥

लिङ्गेरी — युद्धेऽनिवृत्ततया देहत्यागादपि सत्पात्रे द्रव्यत्यागः श्रेयानित्याशयेनाह ॥ सुलभा इति । हे विप्रर्षे । युध्यनिवृत्ता अपराङ्मुखास्तनुत्यजः शरीरत्यागिनः सुलभाः सर्वत्र बहवो वर्तन्त इत्यर्थः । तीर्थे सत्पात्रे आगते सति श्रद्धया धनत्यजो द्रव्यदातारो ये ते तथा न सुलभाः । कुत्रचित्केचन वर्तन्त इत्यर्थः । तीर्थं मन्त्राद्युपाध्याये शास्त्रेष्वंभसि पावने । पात्रोपायावतारेषु स्त्री पुष्पे योनियज्ञयोरिति यादवः ॥ ९ ॥

मनस्विनः कारुणिकस्य शोभनं यदर्थकामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वाञ्छितम् ॥ १० ॥

सत्यधर्मीया — सर्वस्ववितरणे क्लेशो महान्भवतीत्येतदुत्तरयति ॥ मनस्विन इति । अर्थिनो यादृशतादृशस्यापि कामस्याभिलषितस्योपनयः प्रापणं तेन । दुर्गतिर्नरको दारिद्र्यं वेति यत्तन्मनस्विनः प्रशस्तवित्तस्य कारुणिकस्य दयायुजः शोभनं मङ्गलमेव । दुर्गतिर्नरके निःस्व इति विश्वः । ब्रह्मविदां

भवादृशामर्थिकामोपनयेनेत्यतः कामोपनयेनेत्येतद्विश्लिष्य योज्यम् । कामोपनयेन प्राप्या दुर्गतिरिति यत्तच्छोभनमिति कुतः पुनर्व्याहर्तव्यं न वक्तव्यम् । कैमुत्यसिद्धत्वात् । इह क्लेशाय महते प्रेत्यानन्तसुखाय चेत्यादेः । फलितमभिलपति ॥ ततो वटोरिति । दुर्गतिः कुतो न भवेदेव । शोभनमेव यदेतीति यदागच्छदिति वा । भवादृशां ब्रह्मविदां पश्यतां सतामस्य वटोर्वांछितं ददामीति वा । महात्मसाक्षिकतया दत्तस्य महाफलोपलम्भकत्वादिति भावः । भवादृशां विदां ज्ञानिनां यद्ब्रह्म अस्य वटोः इति वा ॥ १० ॥

छलारी — ननु सर्वस्वदाने स्वस्य क्लेशः स्यादित्यत आह ॥ मनस्विन इति । यादृशाः तादृशानामप्यर्थिनां याचमानानां कामोपनयेन कामपूरणेन दुर्गतिदारिद्र्यलक्षणक्लेशो न भवतीति यत्तन्मस्विन उदारस्य कारुणिकस्य दयालोः शोभनमेवेहामुत्रसुखसाधनमेव स्यात् । भवादृशां तु युष्मत्सदृशानां ब्रह्मज्ञानिनां कामोपनयेन सर्वस्वसमर्पणेन दुर्गतिः क्लेशः सुखहेतुरिति किं वक्तव्यमित्यर्थः । इह क्लेशाय महते प्रेत्यानन्तसुखाय चेत्युक्तेः । फलितमाह ॥ तत इति ॥ १० ॥

लिङ्गेरी — नन्वेवं त्वत्प्रतिज्ञा, तदा वामनेनोक्तरीत्या सर्वस्वापहरणे तव दारिद्र्यप्राप्त्याऽशोभनं स्यादित्यत आह ॥ मनस्विन इति । दानशीलमनस्कस्य याचकेषु कृपावतो यदर्थकामोपनयेन द्रव्याकांक्षिणे द्रव्यदानेन पुनस्तद्गृहप्रापणेन दुर्गतिर्दारिद्र्यं तदपि शोभनमेव । किं पुनर्भवादृशां परब्रह्मादिज्ञानिनां द्रव्यदानेन शोभनं भवतीति वक्तव्यम् । कीर्तिकामस्यात एव दानशीलस्यापकीर्तेर्दारिद्र्यमेव वरमिति भावः । ततोऽहमस्य वटोर्वामनस्य वाञ्छितमपेक्षितं ददामि ॥ १० ॥

यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः ।
स एष विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥ ११ ॥

सत्यधर्मीया — यदुक्तमयं हरिरिन्द्रायाच्छिद्य राज्यं रातीति तत्सत्यमयमध्वरसम्भारो यदुद्देश्येन भवद्भिः क्रियते कार्यते चास्मदादिभिः स एव चेद्बहुलो लाभ इति भाषते ॥ यजन्तीति । यज्ञक्रतुभिः यज्ञैः क्रतवश्च सत्यसंस्थासंज्ञास्तैः । यज्ञाः साधरणाः क्रतवश्च वाजिमेधादयस्तैरिति वा । यज्ञानां क्रतुर्ज्ञानं तत्करणप्रकारज्ञानं येषां तैः सह स क्रतुर्ज्ञानरूपत्वादित्युक्तेः । यजिरेतत्पक्षे मुख्यार्थः । आम्नायविधाने वेदविदितकर्मकरणे कोविदाः कुशला भवन्तो यं आदृता यजन्ति पूजयन्ति स एष विष्णुर्वरदो वाऽस्तु परः शत्रुर्वाऽस्तु । अनुग्रहकृद्वा निग्रहकृद्वाऽस्तु । ईप्सितामेतदाकांक्षितां क्षितिं क्षोर्णी दास्यामि । हे मुने । अनेन मौनमेव तव गुणदमिति सम्बोधयामासैवमिति सूचितं भवति ॥ ११ ॥

छलारी — ननु नायं बटुः किन्तु विष्णुस्तव शत्रुरित्युक्तम् । तर्हि सुतरामेव दास्यामीत्याह । यजन्तीति । आम्नायानां वेदोक्तानां कर्मणां विधानेऽनुष्ठाने कोविदा भवन्त आदृता आदरवन्तः सन्तो विष्णुं यज्ञैरश्वमेधादिभिः क्रतुभिः सप्तसप्तसंज्ञकैः कर्मभिर्यजन्ति । स एषो विष्णुर्वरदो वाऽस्तु स शत्रुर्वाऽस्तु । अमुष्मा ईप्सितां क्षितिं दास्यामि । हे मुने शुक्राचार्य ॥ ११ ॥

लिङ्गेरी — हे मुने । आम्नायविधाने वेदविहितकरणे कोविदाः कुशला भवन्त आदृताः सन्तो यं यज्ञक्रतुभिरश्वमेधैः सप्तसंस्थज्योतिष्टोमादिभिश्च यजन्ति पूजयन्त्येषो वटुर्वरदः स विष्णुर्वाऽस्त्वन्यो वाऽस्तु तथाऽप्यहमीप्सितामपेक्षितां क्षितिं भूमिममुष्मै तस्मै दास्यामि ॥ ११ ॥

यद्यप्यसावधर्मेण मां बध्नीयादनागसम् ।
तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥ १२ ॥

सत्यधर्मीया — अनागसं मामसावधर्मेण यदि बध्नीयात्तथाऽप्येनं न हिंसिष्ये हनिष्यामि । तत्र निमित्तं भीतं ब्रह्मतनुं ब्रह्मणो ब्राह्मणस्य तनुः शरीरं यस्य तं रिपुमपीति ॥ १२ ॥

छलारी — ननु तवानिष्टकर्तृत्वादयं वध्य एव किं न स्यादिति चेत् । किमयं छद्मना राज्यमपहरेद्वा युद्धादिधर्मेण वा । तत्राद्यपक्षमाशङ्क्योत्तरमाह ॥ यद्यपीति । अधर्मेण छद्मनाऽनागसं निरपराधिनं माम् । भीतमत एव ब्रह्मतनुं ब्राह्मणवेषधारिणं रिपुमनिष्टकारिणमप्येनं बटुं न हिंसिष्ये न हन्याम् ॥ १२ ॥

लिङ्गेरी — कर्मदेवो बलिर्बलिनामासुरावेशेनाह ॥ यद्यपीति । यद्यप्यहं प्रतिज्ञातं दास्याम्येव । तथाप्यऽसौ वटुरनागसं निरपराधिनं मामधर्मेण बध्नीयादिति ज्ञायते तथाऽप्यहं मम भीतमत एव ब्राह्मणशरीरं रिपुं शत्रुमेनं न हिंसिष्ये न हनिष्यामि ॥ १२ ॥

एष वा उत्तमश्लोको न जिहासति यद् यशः ।
हत्वा मैनां हरेद् युद्धे शयीत निहतो मया ॥ १३ ॥

सत्यधर्मीया — यत् यद्येष उत्तमश्लोको यशो न जिहासति कीर्तिं त्यक्तुं नेच्छति । युद्धं कुर्यादिति यावत् । तर्हि मां हत्वैनां महीं हरेत् । मया निहतः शयीत वा । इदमेकं बन्धने बीजमिति ज्ञेयम् । एष उत्तमश्लोकः । एनां न जिहासति मां हत्वा न हरेत् । न युद्धे मया निहतः शयीत च । यद्यतस्ततो यश आगच्छन्न हिंसिष्ये न नाशयिष्यामीति बलेरान्तरङ्गिको भावः ॥ १३ ॥

छलारी — द्वितीयपक्षमाशङ्क्य परिहरति ।। एष वा इति । एष उत्तमश्लोको महाकीर्तिर्हरिर्यदि यशो न जिहासतीत्युक्तं नेच्छति । युद्धं कृत्वैव राज्यमपहरिष्यामीत्येवं कीर्तिकामुकश्चेदिति यावत् । तर्हि युद्धे मां हत्वेनां भूमिं हरेत् । मया निहतो वा भूमौ शयीत निद्रां प्राप्नुयात् । न चायं युद्धं कृत्वा राज्यमपहर्तुं समागतः किन्तु भीतः सन् छद्मनैव ब्राह्मणवेषं धृत्वा समागतोऽतः कथमयं वध्यः स्यादिति भावः ।। १३ ।।

लिङ्गेरी — एष उत्तमश्लोको विष्णुरन्यो वाऽस्तु । तथाऽप्यसौ कपटित्वेन मां हत्वैनां भूमिं हरेत् । मया निहतो युद्धे शयीत वा अहमेतद्वटुपादत्रयपरिमितं तद्याचितं मया प्रतिज्ञातं च दास्यामि । तत्परित्यज्य तेन यदि सर्वभूम्यपहारोद्योगं क्रियेत तदाऽन्यतरमरणादि स्यात् । तथाऽपि यद्यशः कीर्तिरपेक्षिता सा मां न जिहासति त्यक्तुं नेच्छति । पक्षद्वयेऽपि मम कीर्तिः स्यादेवेति भावः ।।१३।।

श्रीशुक उवाच–

एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ।
शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् ।। १४ ।।

सत्यधर्मीया — श्रद्धा सञ्जाताऽस्येति श्रद्धितः । स न भवतीत्यश्रद्धितस्तम् । अनादेश-करमस्वाज्ञाकारिणं शिष्यम् । दैवेन श्रीहरिणैव प्रहितो प्रेरितः मनस्विनं दातारं सत्यसन्धं गुरुः शशाप ।। १४ ।।

छलारी — अश्रद्धितं स्वस्मिन्नश्रद्धयोपेतमनादेशकरं स्वाज्ञाऽकारिणं सत्यसन्धं सत्यप्रतिज्ञं मनःस्विनं शुद्धान्तःकरणं शिष्यं बलिम् । दैवेनादृष्टप्रेरकेण प्रहितः प्रेषितो गुरुः शुक्राचार्यः शशाप ।। १४ ।।

लिङ्गेरी — गुरुः शुक्राचार्य एवमुक्तरीत्याऽनादेशकरं स्वाज्ञामकुर्वाणमत एव स्वस्मिन्नश्रद्धितं विश्वासरहितं शिष्यं बलिं दृष्ट्वा दैवेनादृष्टप्रेरकेश्वरेण प्रहितः प्रेरितः सन् सत्यप्रतिज्ञं प्रशस्तमनस्कं बलिं शशाप ।। १४ ।।

दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ।
मच्छासनातिगो यस्त्वमचिराद् भ्रश्यसे श्रियः ।। १५ ।।

सत्यधर्मीया — तं शापप्रकारमुपपादयति ।। दृढमिति । पण्डितमानी पण्डित इति मानो गर्वो यस्यास्तीति पण्डितमानी । सति पाण्डित्ये किं नाहन्ता कर्तव्येत्यतो न तथा भवानित्याह ।। अज्ञ इति । अस्मदुपेक्षयाऽस्मांकमुपेक्षौदासीन्यं तया । स्तब्धः शठोऽसि । त्वद्वदने के गुरवः केषां केषामिति वचोऽनुसर्तव्यमित्यस्मदुपेक्षयेति स्ववचनप्राप्तामाशङ्कां नास्मदिति बह्वभिप्रायकमिति प्रत्याख्याति ।। मच्छासनातिग इति । तथा चास्मदोर्द्वयोश्चेति वा गुरावात्मनीति वाऽस्मदित्युक्तिर्न तु गुरुसङ्ख्यागौरवादिति विभावितं भवति । पण्डितमान्य इति जानातीति पण्डितमान्यज्ञो दृढं स्तब्धोऽज्ञोऽसीति वा । मम शासनं मम शिक्षामतिगच्छतीति स तथा । यः स त्वम् । अचिरात्क्षिप्रं श्रियः सम्पदो भ्रश्यसे भ्रष्टो भविष्यसि । इति शशापेत्यन्वयः ।। १५ ।।

छलारी — पण्डितमान्यहं पण्डित इत्येवमहंकारवान् वस्तुतस्तु किमपि न जानातीत्यर्थः । अत एव स्तब्धोऽसि कस्याप्यनम्रोऽसि । अस्मदुपेक्षया अस्मान्न लक्षीकृत्वेति यावत् । मम शासनमाज्ञामतिगोऽतिक्रान्तवानसि । अतस्त्वमचिराच्छ्रियो राज्याद्भ्रश्यसे च्युतो भविष्यसि ।। १५ ।।

लिङ्गेरी — हे अज्ञ स्वहितज्ञानरहित बले । त्वं दृढं पण्डितमानी अहमेव विवेकीत्यहंकारवान् स्तब्धः शठश्चासि यत्तस्मादस्मदुपेक्षया मच्छासनातिगो मदाज्ञाऽतिक्रमी स त्वमचिराच्छीघ्रं श्रियः संपदो भ्रश्यसे भ्रष्टो भविष्यसि ।। १५ ।।

एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ।
वामनाय ददावेतामर्चित्वोदकपूर्वकम् ।। १६ ।।

सत्यधर्मीया — स बलिर्गुरुणा शुक्रेणैवं शप्तः । स्वगुरुणेति न तरुणः पाठः । सन्नपि सत्यान्न चलितस्तन्न तत्याज । उदकपूर्वकमर्चित्वा वामनाय भगवते एतां महीं ददौ ।। १६ ।।

छलारी — एवं गुरुणा शप्तोऽपि सत्यान्न चलितः सत्यं न त्यक्तवानित्यर्थः । अत एव महान्सज्जनः ।। १६ ।।

लिङ्गेरी — सत्यवचनादिगुणैर्महान् बलिरेवमुक्तप्रकारेण स्वगुरुणा शुक्रेण शप्तोऽपि सत्यात् यथार्थवाक्यान्न चलितः । तदेव दर्शयति ।। एवमिति । वामनमर्चित्वा पूजयित्वा वामनायैतां भूमिमुदकपूर्वकं ददाविति ।। १६ ।।

विन्ध्यावलिस्तदागत्य पत्नी जालकमालिनी ।
आनिन्ये कलशं हैममावनेजन्यपां भृतम् ॥ १७ ॥

सत्यधर्मीया — उदकपूर्वकं कथं ददावित्यतः सपरिकरं तदीरयति ॥ विन्ध्यावलिरिति । विंध्यावल्यभिधा बलिवधूः । अवनेजनस्येमाः आवनेजन्यस्ताश्च ता आपश्चावनेजन्यपास्तासाम् । समासान्तविधेरनित्यतया नाप्रत्ययः । तत्पादयुगमित्युत्तरत्रत्यमत्रान्वेतव्यम् । यत्पादयुगमवनेजनि अवनेजनं यावतीभिरद्भिर्भवेत्तावत्स्थानम् अपामद्भिर्भृतम् । हैमं हेमविकृतं गतं कलशमानिन्ये आनिनाय । जालकमालिनी । विनाभिधानं जालकं मुक्ताभरणविशेषस्तन्मालावतीतीतरे । जालकैः कुड्मलैः कृता माला अस्या अस्तीति जालकमालिनी । जालककोरककलिकाकुड्मलमुकुलानि तुल्यानीति हलायुध इति पूर्वे । सोमाध्वरप्रयोगे । अत्र पत्नीशिरसि कुम्बकुरीरमध्यहनमिति जालं कुम्बकुरीरमित्याचक्षते । तद्व्याख्याने रामाण्डारे कुम्बकुरीरं पत्न्यां शिरस्यध्वर्युः क्षिपति । कुंबकुरीरं जालं तन्तुमयं दर्भमयं वा जीवतो मेषस्योर्णानां कृष्णमिति विकल्पः । अत्रेति वचनादन्तर्वेद्यामानीय पत्नीजालाध्यहनमिति तथा सोमाध्वरप्रयोगे व्याख्यानान्तरे यजमानवत् पत्नी ब्रह्मचर्यम् । कृष्णं जीवोर्णानामिति वाजसनेयकम् । जीवतो मेषस्योर्णायाः कृष्णेन लोम्ना कृतेन जालेनेत्युक्तेर्जालस्य तन्तुमयस्य दर्भमयस्य जीवतो मेषस्योर्णायाः कृष्णेन लोम्ना कृतस्य के शिरसि माला यस्य अस्तीति जालकमालिनीति वा । वसुदेवयज्ञप्रकरणे तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससस्ताभिर्दुकूल-वलयहारनूपुरकुण्डलैः स्वलङ्कृताभिर्विभवैर्दीक्षितो जनसंवृतो दीक्षाशालामुपाजग्मुरालिप्या इति भागवतोक्तेः सर्वं सम्भावितं मन्तव्यम् । हयमेधत्वात् ॥ १७ ॥

छलारी — उदकपूर्वकं ददावित्येतद्विशदयति ॥ विंध्यावलिरिति । जालकं मुक्ताभरणविशेषः । तत्कृतमालावती । यद्वा । जालकानि कुड्मलानि तैः कृतमालाऽस्या अस्तीति जालकमालिनी । जालकं कोरककलिका कुड्मलानीति हलायुधः । विंध्यावलिस्तन्नाम्नी पत्नी बलिभार्याऽवनेजनी पादप्रक्षालनमिच्छती । अपां भृतमुदकैः पूर्णं कलशमानिन्ये ॥ १७ ॥

लिङ्गेरी — जालकानां कुड्मलानां मालाऽस्यामस्तीति जालकमालिनी नाम्ना विंध्यावलिर्बलेः पत्नी तदाऽऽगत्य हैममावनेजन्यपां पादप्रक्षालनयोग्यजलैर्भृतं पूर्णं कलशमानिन्ये । जालककोरक कलिकाकुलानि तुल्यानीति हलायुधः ॥ १७ ॥

यजमानः स्वयं तस्य श्रीमत्पादयुगं तदा ।
अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १८ ॥

सत्यधर्मीया — यदा विन्ध्यावलिः कलशमानिन्ये स्वयं यजमानः श्रीमत्पादयुगं अस्तं समस्तं वा । इदानीं चरणप्रसरणसमयत्वात्पदेत्यवदन्पादेति जगादेति तात्पर्यं ज्ञेयम् । अवनिज्य प्रक्षाल्य तदपो मूर्ध्नि मुदा यदाऽवहत् । उरु तन्माहात्म्यमाह ॥ विश्वपावनीरिति । विश्वं जगत्पावयन्तीति तास्तथा ताः । विश्वपो विश्वेश्वरो हरः स चावनिर्भूमिराश्रयो यासां ता इति वा । सेशं पुनाति यच्छौचेत्यादेः ॥ १८ ॥

छलारी — यजमानः स्वयं बलिस्तस्य वामनस्य श्रीमत्कान्तिमत्पादयुग्ममवनिज्य प्रक्षाल्य विश्वं समस्तं पावयन्ति पवित्रयन्तीति विश्वपावनीः तदपः प्रक्षालनोदकानि मूर्ध्नि स्वशिरस्यवहद्धृतवान् ॥ १८ ॥

लिङ्गेरी — यजमानो बलिः स्वयं तदा तस्य वामनस्य श्रीमत्कान्त्यादिसंपदुपेतं पादयुगं पादपद्मद्वयमवनिज्य प्रक्षाल्य विश्वपावनीः सर्वजगत्पावित्र्यकरास्तदपो मूर्ध्यवहद्भक्तिश्रद्धापूर्वकं दधार ॥ १८ ॥

तदाऽसुरेन्द्रं दिवि देवतागणा गन्धर्वविद्याधरसिद्धचारणाः ।
तत्कर्म सर्वेऽपि गृणन्त आर्जवं प्रसूनवर्षैः ववृषुर्मुदाऽन्विताः ॥ १९ ॥

सत्यधर्मीया — तदा दिवि देवतागणा गन्धर्वादय उपदेवाश्चेति सर्वे तत्कर्म आर्जवं च, रिपुमपि विदित्वा मेदिनीं ददाविति गृणन्तः स्तुवन्तो मुदान्विताः प्रसूनवर्षैर्ववृषुः । आर्यमिति पाठोऽप्यार्य-संमतः । ज्ञानिनमित्यर्थः ॥ १९ ॥

छलारी — यदा दिवि देवतागणादयः सर्वेऽपि तस्य बलेः कर्म गृणन्तः स्तुवन्त आचार्यं ज्ञानिनमसुरेन्द्रं बलिं प्रसूनैर्ववृषुः ॥ १९ ॥

लिङ्गेरी — तदा दिव्यन्तरिक्षे वामनपूजादर्शनार्थं स्थिता देवतागणा गन्धर्वविद्याधरचारणाश्च सर्वे तत्पूजारूपं कर्म वीक्ष्य मुदान्विताः सन्तो विशेषाकारेणार्यं ज्ञानादिवृद्धं बलिं स्तुवन्तः सन्तः पुष्पवृष्टिभिः सेचितवन्तः ॥ १९ ॥

नेदुर्मुहुर्दुन्दुभयः सहस्रशो गन्धर्वकिम्पूरुषकिन्नरा जगुः ।
मनस्विनाऽनेन कृतं सुदुष्करं विद्वानदाद् यद् रिपवे जगत्त्रयम् ॥ २० ॥

सत्यधर्मीया — मनस्विना उशनसा शासन इषति कृतेऽप्यवक्रीभूतचेतसा । विद्वान् यद्यतो रिपवे जगत्त्रयम् । अदात्तत्सुदुष्करमनेन कृतमिति जगुः ॥ २० ॥

छलारी — यद्यस्माद्विद्वान् शत्रुरिति ज्ञानी रिपवे वामनाय जगत्त्रयमदात् । अतो मनस्विना धीरेणानेन सुदुष्करं कर्म कृतमिति गन्धर्वादयो जगुः ॥ २० ॥

लिङ्गेरी — तदा सहस्रसंख्याका दुन्दुभयो भेर्यो मुहुर्मुहुर्नेदुर्ध्वनियुक्ता बभूवुः । गन्धर्वकिन्नर किंपूरुषा यस्मादयं बलिर्विद्वान् अयं दैत्यारिरिति स्वजातिरिपुत्वेन ज्ञानवानपि रिपवे वामनरूपाय जगत्त्रयमदात् तस्मादिदं मनस्विना बलिनैवं कृतमन्यैस्तु दुष्करमिति जगुर्गानं चक्रुः ॥ २० ॥

तद् वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयः सदासन् ॥ २१ ॥

सत्यधर्मीया — यद्यत्र रूपे भूः खं दिशो द्यौः, विवरा भूबिलानि, पयोधयः समुद्रास्तिर्यङ् पश्वाद्या नरो देवा ऋषय आसन् सावकाशं स्थिताः । तदनन्तस्यापरिच्छिन्नस्य हरेः गुणत्रयात्मकं गुणत्रयमात्मनि काये यस्य तत् । गुणत्रयात्मना कं सुखं तदुपलक्षितं योग्यं दुःखादिकं येन तदिति । गुणत्रयाणामात्मा स्वामी च तत्कं सुखात्मकमिति वा । वामनं खर्वं सदद्भुतं यथा यथा चावर्धत ॥ २१ ॥

छलारी — अनन्तस्यापरिच्छिन्नस्य हरेस्तद्वामनरूपमणुतमं रूपमद्भुतं यथा स्यात्तथाऽवर्धत । कथम्भूतमभिवृद्धं रूपम् । गुणत्रयं सत्त्वादिगुणत्रयमात्मनि यस्य तत् । अत एव भूमिः खमित्यादयो यद्यस्मिन्नासन् स्थितवन्तः । द्यौः स्वर्गो विवरा भूबिलानि पयोधयः समुद्रास्तिर्यञ्चः पश्वादयः ॥ २१ ॥

लिङ्गेरी — यद्यस्मिन् भूः, खमाकाशो, दिशो, द्यौः स्वर्गो, विवराः पातालादयः, पयोधयः समुद्रास्तिर्यङ् पश्वादयो, नृदेवा, नरा मनुष्या ऋषयश्चासन् सावकाशस्थितास्तद्गुणत्रयस्य सत्त्वादे-रात्मा धारणं भवत्यनेनेति गुणत्रयात्मकमद्भुतमाश्चर्यकरमनन्तस्य हरेर्वामनरूपमवर्धत । आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति यादवः ॥ २१ ॥

काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ।
ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥ २२ ॥

सत्यधर्मीया — महाविभूतेर्विभूतिरैश्वर्यं विविधभवनं वा । महती सा यस्य स तथा । तस्य विष्णोः काये देहे । ऋत्विजश्चाचार्यः शुक्रश्च सदस्याः सभास्ताराश्च तैः सहितो बलिः । तच्छरीरमितरशरीरविलक्षणमित्याह ।। गुणात्मके आनन्दज्ञानादिगुणरूप इति । भूतानि पञ्च इन्द्रियाणि दश वैकादश वा अर्थाः शब्दादयो आशयो बुद्धिर्मनो जीवाश्च तैर्युक्तम् । त्रिगुणं सत्त्वादिसहितं विश्वं ददर्शापश्यत् । सहर्त्विगाचार्यसदस्य इति सप्तम्यन्तं सत्कायविशेषणं वा ।।२२।।

छलारी — सहर्त्विगाचार्यसदस्यो ऋत्विगादिसहितो बलिर्महती विभूतिर्वृद्धिर्यस्य तस्याभिवृद्धस्य तस्य । गुणात्मके ज्ञानानन्दादिस्वरूपे देहे काये त्रयो गुणाः सत्त्वादयो यस्मिंस्तत् । त्रिगुणं भूतानि पृथिव्यादीनि इन्द्रियाणि चक्षुरादीन्यर्थाः शब्दादयः आशयो मनो जीवश्चैतैर्युक्तमेतद्विश्वं ददर्श ।।२२।।

लिङ्गेरी — ऋत्विगाचार्यसभ्यसहितो बलिर्महाविभूतेरणिमादिपूर्णैश्वरस्य वामनस्य देहे गुणत्रयाधारभूते भूतैराकाशाद्यभिमानिभिश्चक्षुरादीन्द्रियाभिमानिभिः शब्दाद्यभिमानिभिराशयशब्दित-मनोभिमानिभिरपि जीवैर्गणेशादिभिर्युक्तं परंपरया गुणत्रयोपादानकं विश्वं समस्तं जगद्ददर्श ।। २२ ।।

रसामचष्टाङ्घ्रितलेऽथ पादयोः महीं महीध्रान् पुरुषस्य जङ्घयोः ।
पतत्त्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मरुतामिन्द्रसेनः ।। २३ ।।

सत्यधर्मीया — विश्वस्वामिनो देहे विश्वमचष्टेत्येतत्स्पष्टयति ।। रसामिति । पुरुषस्य विश्वमूर्तेरिति सर्वान्वयि । रसां तदुपलक्षितसप्तातलादीन् । पादयोर्महीं तदुत्पन्नां तदाश्रिताम् । जङ्घयोर्जान्वधोभागयोर्महीध्रान्पर्वतान् । जानुनि पतत्त्रिणः पक्षिणः । उर्वोर्मरुतां गणं समूहम् । इन्द्रसेन इति बलेरेव नामान्तरमिति सम्प्रदायविदः । पादतले पादयोरित्याद्येकवचनद्विवचन-शाबल्येनावयवानां परस्परं न भेदः, व्यवहारमात्रं विशेषकृतमिति विशेषं सूचयामासेति ज्ञेयम् । तत्रापि प्रथमं पादतल इत्येकवचनेन विनिगमकं चोक्तमिति सन्तोष्टव्यम् ।। २३ ।।

छलारी — तदेव प्रपञ्चयति ।। रसामित्यादिभिः । विश्वमूर्तेर्व्याप्तदेहस्याङ्घ्रितले पादाधोभागे रसां रसातलादिसप्तबिलान्यचष्टापश्यत् । पादयोः पादोर्ध्वभागे महीं भूमिम् । जङ्घयोरधोभागे महीध्रान्पर्वतान् जानुनि पतत्त्रिणः पक्षिण ऊर्वोः मरुतां गणं वायुसङ्घमिन्द्रस्य सेनेव सेना यस्य सः । बलिरिन्द्रपदे स्थितत्वात् ।। २३ ।।

लिङ्गेरी — अथेन्द्रसेनो बलिर्वामनस्याङ्घ्रितले रसां रसातलादि, पादयोर्महीं भूमिं, पुरुषस्य जंघयोर्महीध्रान्पर्वतान्, जानुनि पतत्त्रिणः पक्षिणो, विश्वमूर्तेर्जगद्व्याप्तशरीरस्य वामनस्योर्वोः मरुतां गणमचष्ट ददर्श ।। २३ ।।

**सन्ध्यां विभोर्वाससि गुह्य ऐक्षत् प्रजापतीन् जघने स्वात्ममुख्यान् ।
नाभ्यां नभः कुक्षिषु सप्तसिन्धूनुरुक्रमस्योरसि ऋक्षमालाम् ॥ २४ ॥**

सत्यधर्मीया — वाससि पीते सन्ध्यां देवीम् । गुह्ये मेढ्रे प्रजापतीन् दक्षादीन् । जघने स्वात्ममुख्यमिति वा स्वात्ममुख्यानिति पाठौ सख्यं भेजाते । स्वात्मा बलिर्मुख्यो येषां तान् । स्वभृत्यसङ्घानित्यर्थः । स्वात्ममुख्यमिति पाठे दाससङ्घमित्यर्थः । नाभ्यां नभोऽन्तरिक्षम् । कुक्षिषु, अदितिः पाशानितिवत्प्रदेशबाहुल्याद्बहुवचनम् । उदरे सप्तसिन्धून् समुद्रान् । उरुक्रमस्येति सर्वत्रान्वेति । उरसि ऋक्षमालां नक्षत्रपंक्तिम् । ऐक्षदैक्षत ॥ २४ ॥

छलारी — वाससि पीताम्बरे संध्यां गुह्ये शिश्ने प्रजापतीन् दक्षादीन् जघने कट्यां स्वात्मा स्वयं बलिर्मुख्यो येषां तान् जनान् नाभ्यां नभोऽन्तरिक्षं कुक्षिषूदरप्रदेशेषु सप्तसिंधून् उरुक्रमस्य हरेरुरसि वक्षसि ऋक्षमालां नक्षत्रपङ्क्तिमैक्षत् ॥ २४ ॥

लिङ्गेरी — विभोर्व्याप्तस्य वामनस्य वाससि वस्त्रे संध्यां तदभिमानिनीं सावित्र्यादिनामिकां, गुह्ये लिङ्गे प्रजापतीन्, जघने कट्यां स्वात्ममुख्यं स्वप्रभृतिजीवजातं, नाभ्यां नभोऽन्तरिक्षं, कुक्षिषु सप्तसमुद्रान् उरुक्रमस्य त्रिविक्रमस्योरसि ऋक्षमालां नक्षत्रपंक्तिमिन्द्रसेन ऐक्षत् ॥ २४ ॥

**हृद्यङ्ग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेन्दुम् ।
श्रियं च वक्षस्यरविन्दहस्तां कण्ठे च सामानि समस्तरेफान् ॥ २५ ॥**

सत्यधर्मीया — अङ्ग हे राजन् । मुरारेर्हृदि धर्मम् । स्तनयोर्ऋतं यथार्थज्ञानं सत्यं यथार्थभाषणम् । मनसीन्दुम् । अरविन्दहस्तां श्रियं उरसि वक्षसि । कण्ठे सामानि रथन्तरादीनि । समस्तरेफान् समस्तशब्दान् । रेफो रवर्णे शब्दे च कुत्सिते वाच्यवत्पुनरिति धनञ्जयः ॥ २५ ॥

छलारी — हे अङ्ग राजन् ! हृदि धर्मं स्तनयोर्ऋतं यथार्थज्ञानं सत्यं यथार्थभाषणं च । मनसीन्द्रं चन्द्रं च । वक्षस्यरविन्दहस्तां श्रियम् । कण्ठे सामानि रथन्तरादिसामानि । समस्तान् रेफादीन् शब्दान् ॥ २५ ॥

लिङ्गेरी — हे अङ्ग प्रियपरीक्षित् । इन्द्रसेनो मुरारेर्वामनस्य हृदि धर्मं तदभिमानिनं स्तनयोर्ऋतसत्याभिमानिनौ, मनसि इन्दुं चन्द्रं, वक्षसि कमलहस्तां श्रियं देवीं, कण्ठे सामानि समस्तरेफांश्चैक्षत् ॥ २५ ॥

इन्द्रप्रधानानमरान् भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्धनि ।
केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥ २६ ॥

सत्यधर्मीया — इन्द्र एव प्रधानो येषां ते तानमरान् भुजेषु । तदित्यव्ययम् । तस्य कर्णयोः ककुभो दिशो, द्यौः द्याम् शिरसि, श्वसनं वायुं नासिकायां, अक्ष्णोः चक्षुषोः सूर्यं, वदने वह्निमचक्षत ॥ २६ ॥

छलारी — ककुभो दिशो द्यौः श्वसनं प्राणवायुम् ॥ २६ ॥

लिङ्गेरी — तथा वामनस्य भुजेषु इन्द्रमुख्यान्देवान्, तत्कर्णयोः ककुभो दिशस्तदभिमानिनश्चन्द्रमादीन् मूर्ध्नि शिरसि द्यामन्तरिक्षोपरितनदेशं, केशेषु मेघान् नासिकायां श्वसनं नासिक्यवायुमक्ष्णोर्नेत्रयोः सूर्यं, वदने मुखे वह्निमग्निम् ॥ २६ ॥

वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ।
अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥ २७ ॥

सत्यधर्मीया — वाण्यां छन्दांसि वेदान्वा गायत्र्यादीनि । रसे रसनायां जलेशं वरुणं, भ्रुवोर्निषेधमधर्मप्रतिषेधं, विधिं सत्कर्मणः । परस्य पुंसः पक्ष्मसु नेत्रलोमसु अहश्च रात्रिं च, ललाटे मन्युं कोपाभिमानिनं देवम् । अधरे ओष्ठे लोभं तदभिमानिनम् ॥ २७ ॥

छलारी — वाण्यां वागिन्द्रिये छन्दांसि वेदान् । रसे रसनेन्द्रिये जलेशं वरुणं भ्रुवोः निषेधमधर्मनिषेधम् । विधि धर्मविधिं च । पक्ष्मसु निमिषेष्वहश्च रात्रिं च । ललाटे मन्युं क्रोधाभिमानिनं देवम् । ओष्ठे लोभम् ॥ २७ ॥

लिङ्गेरी — तथा परस्य पुंस पुरुषोत्तमस्य वामनस्य वाण्यां छन्दांसि वेदान्, रसे जिव्हायां जलेशं वरुणं, भ्रुवोर्निषेधं विधिं च, पक्ष्मसु नेत्राच्छादकरोमसु अहश्च रात्रिं च, ललाटे मन्युं क्रोधाभिमानिनमधरोष्ठे लोभाभिमानिनं चैक्षत् । २७ ॥

स्पर्शे च कामं नृप रेतस्यमम्भः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ।
छायासु मृत्युं हसिते च मायां तनूरुहेष्वौषधिजातयश्च ॥ २८ ॥

सत्यधर्मीया — स्पर्शे त्वचि कामम् । अम्भः, रेतस्यं रेतोभवम् । पृष्ठे अधर्मं तद्देवम् । क्रमणेषु पादन्यासेषु यज्ञं साक्षात्तमेव । छायासु सृष्टासु मृत्युं, हसिते हासे मायां मोहकशक्तिम् । तनूरुहेषु लोमसु या ओषधिजातयस्ता जातीर्वा ॥ २८ ॥

छलारी — स्पर्शे श्वसनेन्द्रिये कामम् । रेतस्यंभो जलम् । पृष्ठेऽधर्मं क्रमणेषु पादन्यासेषु यज्ञं हसिते हास्ये मायां जनमोहकशक्तिविशेषम् । तनुरुहेष्वौषधिजातयो वृक्षजातीः ॥ २८ ॥

लिङ्गेरी — हे नृप । वामनस्य स्पर्शे त्वगिन्द्रिये तद्गुणे च कामं, रेतस्यंभो जलं, पृष्ठभागेऽधर्मं निर्ऋतिं च तदभिमानिनम् । क्रमणेषु पादविक्षेपेषु यज्ञं तदभिमानिनमिन्द्रं छायासु मृत्युं देवतां, हसिते हासे मायां जगन्मोहिकां, तनूरुहेषु रोमस्वौषधीनां व्रीहियवादीनां जातयो जातीश्च बलिरैक्षत् ॥ २८ ॥

नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ।
प्राणेषु गात्रे स्थिरजङ्गमानि क्षणार्धमात्रेण विवृद्धमूर्तेः ॥ २९ ॥

सत्यधर्मीया — नाडीषु सुषुम्नादिषु नदीः । नखेषु शिलाः । बुद्धावजं ब्रह्माणम् । देवगणानृषींश्च प्राणेषु । क्षणार्धमात्रेण विवृद्धमूर्तेः गात्र उर्वरित एवं देहे वा स्थिरजङ्गमानि । ऐक्षत् ॥ २९ ॥

छलारी — बुद्धावजं चतुर्मुखं प्राणेष्विंद्रियेषु देवादीन् । क्षणार्धमात्रेण विवृद्धमूर्तेरभिवृद्धदेहस्य हरेर्गात्रे सर्वदेहे स्थिरजङ्गमानि चराचरात्मकानि जगन्ति । आचष्टेति पूर्वेणान्वयः । सर्वाणि भूतानि ददर्श । वीरानिति क्वचित्पाठः । तत्र स्थिरजंगमात्मकसर्वाणि भूतानि ददर्शेत्यर्थः ॥ २९ ॥

लिङ्गेरी — तथा तस्य क्षणार्धमात्रेणात्यभिवृद्धशरीरस्य त्रिविक्रमस्य नाडीषु नदी भागीरथ्याद्याः, नखेषु शिलाः, बुद्धावजं ब्रह्माणं प्राणेषु श्वासादिषु देवगणान् प्राणादिदेवसमूहान् ऋषींश्चैवं गात्रे शरीरे स्थावरजंगमानि ददर्श ॥ २९ ॥

सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरङ्ग ।
सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥ ३० ॥

सत्यधर्मीया — असह्यं तेजो यस्य तच्चक्रम् । असुराणां, सुराणां तु सुदर्शनं मङ्गलकरं दर्शनं यस्य तत् । अतो नातिरेकोऽन्यतरशब्दस्येति ज्ञेयम् । एवमुत्तरत्रापि । स्तनयित्नवो मेघास्तद्वद्घोषष्टङ्कारणं यस्य तत् ॥ ३० ॥

छलारी — हे अङ्ग राजन् । सर्वेऽसुराः सर्वात्मनि सर्वत्र व्याप्ते हराविदं भुवनं वीक्ष्य कश्मलं क्लेशमापुः प्रापुः । असह्यतेजो वीर्यं यस्य तत्सुदर्शनं तन्नामकं चक्रं स्तनयित्नुवद्घोषो ज्याध्वनिर्यस्मिंस्तत् । शार्ङ्गनामकं धनुश्च ॥ ३० ॥

लिङ्गेरी — हे अङ्ग ! सर्वेऽसुरा बलिव्यतिरिक्ताः सर्वात्मनि सर्वजगद्व्याप्तदेहे वामने इदं भुवनं दृष्ट्वा कश्मलं मूर्च्छामापुः । असह्यतेजः सुदर्शनाख्यं चक्रं, स्तनयित्नोर्गर्जन्मेघस्य घोष इव घोषो ध्वनिर्यस्य तच्छार्ङ्गाख्यं धनुश्च ॥ ३० ॥

पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी ।
वैद्याधरोऽसिः शतचन्द्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ ३१ ॥

सत्यधर्मीया — पाञ्चजन्यः । गतम् । तरस्विनी विष्णुगदा । विष्णुना स्वद्वारेण गदा आमया वैरिणां यया सा कौमोदकी नाम्ना । वैद्याधरोऽसिः । नन्दकस्यैव नामान्तरो विद्याधराधिष्ठित इति वा । शतचन्द्रयुक्तः शतचन्द्रं च चर्म तद्युक्तः । स्वोपरि चन्द्राकारशतरेखाखचित इति वा । अक्षयाः सायका ययौस्तौ तूणोत्तमौ इषुध्यधिकौ ॥ ३१ ॥

छलारी — पर्जन्यवन्मेघवद्घोषो यस्य सः । पाञ्चजन्यनामा जलजः शङ्खश्च तरस्विनी कौमोदकीसंज्ञा विष्णुगदा च शतचन्द्रैः शतचन्द्राकारै रेखाविशेषैर्युक्तो विद्याधरसंज्ञोऽसिः खड्गश्चाक्षयाः सायका बाणा ययोस्तौ तूणोत्तमौ श्रेष्ठौ च ॥ ३१ ॥

लिङ्गेरी — पर्जन्यस्य गर्जनवन्मेघस्य घोष इव घोषो यस्य स पाञ्चजन्याख्यो जलजः शङ्खस्तरस्विनी वेगवती कौमोदकीनाम्नी विष्णुगदा शतचन्द्राख्यचर्मणा युक्तो विद्याधरेषु-संबन्ध्यसिर्नन्दकाख्योऽक्षयबाणवन्तौ स्तूणोत्तमौ चेषुधी चेत्येते । तदा दृश्यन्तेति शेषः ॥ ३१ ॥

सुनन्दनन्दा उपतस्थुरीशं पार्षादमुख्याः सहलोकपालाः ।
स्फुरत्किरीटाङ्गदमीनकुण्डलश्रीवत्सरत्नोत्तममेखलाम्बरैः ।
मधुव्रतस्रग्वनमालया वृतो रराज राजन् भगवानुरुक्रमः ॥ ३२ ॥

सत्यधर्मीया — पार्षदा एव पार्षादा अधिमाषमित्यादेस्तेषु मुख्या जयादयः सहलोक-पालास्तत्सहिताः । सुनन्दनन्दौ च प्रतीहारौ । ईशमुपतस्थुरसेवन्त । मधुव्रतानां स्रक् माला आवलिरिति यावत् । तया युता वनमाला तया आवृत उरुक्रमो भगवान् रराज ॥ ३२ ॥

छलारी — पार्षदेषु मुख्याः सुनन्दमुख्याः । मुख्यशब्देन जयविजयादयो ग्राह्याः । लोकपालैश्चन्द्रादिलोकपालैः सहेशमभिवृद्धं हरिमुपतस्थुरसेवन्त । स्फुरन्ति प्रकाशमानानि किरीटादीनि यस्य सः । मीनकुण्डले मकरकुण्डले श्रीवत्सरत्नेनोत्तममेखलया चोत्तमाकांच्या चाम्बरेण पीताम्बरेण चेत्येते मधुव्रतानां भ्रमराणां स्रजो माला यस्यां तया वनमालया च वृत उरुरुत्कृष्टः क्रमः पादविक्षेपो यस्य सः भगवान् रराज ॥ ३२ ॥

लिङ्गेरी — इन्द्रादिलोकपालसहिताः समीपवर्तिषु प्रधानाः सुनन्दादय ईशं सर्वस्वामिनं वामनमुपतस्थुः सेवितवन्तः । हे राजन् । तदा भगवान् ऊरुक्रमस्त्रिविक्रमः प्रकाशमानशिरोबाहु-भूषणमकरकुण्डल श्रीवत्सश्रेष्ठमणिखचितकाञ्चीपीताम्बरैः पुष्परसलोलुपभ्रमरवद्वैजयन्तिमालया वृतः सन् रराज । सर्वदा कान्तियुक्तोऽपि लौकिकानां तदाऽतिप्रकाशयुक्तवदद्दश्यत ॥ ३२ ॥

क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ।
पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयस्य तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्यथो दिवो महर्जनाभ्यां तपसः परं गतः ॥ ३३ ॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे एकोनविंशोऽध्यायः ।

सत्यधर्मीया — एकेन पदा बलेः क्षितिं विचक्रमे । शरीरेण नभो बाहुभिर्दिशश्च विचक्रमे । त्रिविष्टपं प्रति द्वितीयं पदं क्रमतः क्षिपतस्त्रिविक्रमस्य तृतीयस्य सङ्कल्पिततृतीयस्य पदस्य तदीयं बलिसम्बन्धि अण्वल्पमपि पदं स्थानं न नावर्तत । वै प्रसिद्धम् । तृतीयं पदं क्रमतस्त्रिविष्टपं अणु स्वल्पं जातम् । एतदधीनलोकगमनादपूर्णमभूदतस्तृतीयस्य तदीयमण्वपि किञ्चिदपि नाभूदिति वा । तर्हि स द्वितीयः कियत्पर्यन्तमङ्घ्रिर्गत इत्यत आह ॥ उरुक्रमस्येति । दिवः स्वर्गादुपरि । अथो महर्जनाभ्यां तथा तपसस्तपोलोकादपि परं सत्यलोकं गतः । महर्जनोभ्यामिति पाठोऽपि पाङ्कः ॥ ३३ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
अष्टमस्कन्धे एकोनविंशोऽध्यायः ॥ ८-१९ ॥

छलारी — उरुक्रमत्वमेवाह ॥ क्षितिमिति । एकेन पदा बलेः क्षितिं विचक्रमे आक्रान्तवान् । नभोऽन्तरिक्षं शरीरेण मध्यदेहेन बाहुभिर्दिशश्च । द्वितीयं पादं क्रमतो विक्षिपतो हरेस्त्रिविष्टपं स्वर्गं तदीयं बलिसम्बन्धि किञ्चिन्मात्रं जातम् । तृतीयाय तृतीयपादविक्षेपाय तु तदीयमण्वपि किञ्चिदपि

स्थलं नाभूत् । कुत इति चेन्न । द्वितीयपादस्य स्वर्गापेक्षयोपरिगतत्वात् । कियत्पर्यन्तमुपरि गतमित्यत आह ॥ उरुक्रमस्येति । उरुक्रमस्य हरेरङ्घ्रिर्द्वितीयपादः स्वर्गादुपरि गच्छन् महर्जनाभ्यां महर्लोकजनोलोकाभ्यां तपोलोकाच्च परं सत्यलोकं गतः ॥ ३३ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे एकोनविंशोऽध्यायः ॥ ८-१९ ॥

लिङ्गेरी — स उरुक्रमो बलेर्भूमिमेकेन पादेनाक्रान्तवान् । नभोऽन्तरिक्षं शरीरेण दिशो बाहुभिश्चाक्रान्तवान् । द्वितीयपदं निधाय त्रिविष्टपं स्वर्गमाक्रमतो वामनस्य तृतीयस्य पदस्य दातुं तदीयं बलिसंबंध्यणुमात्रमपि नैवाभूत् । एवमुरुक्रमस्याङ्घ्रिः पादो दिवः स्वर्गस्योपर्यधश्च व्याप्तः सन् महर्जनाभ्यां लोकाभ्यां तपोलोकाच्च परमुपरिदेशं गतः ॥ ३३ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे एकोनविंशोऽध्यायः ॥ ८-१९ ॥

॥ अथ विंशोऽध्यायः ॥

श्रीशुक उवाच–

स तं समीक्ष्याब्जभवो नखेन्दुभिर्हृतस्वधामद्युतिरावृतोऽभ्यगात् ।
मरीचिमिश्रा ऋषयो बृहद्व्रताः सनन्दनाद्या नरदेव योगिनः ॥ १ ॥

सत्यधर्मीया — बलेरनवलेपिनः न सर्वलोपेऽपि कोपो नापि तापोऽन्तरभूद्भूदेव स्वभावभक्तत्वादेवेति दर्शयितुमुत्तराध्यायः । तत्रादौ स्वलोकं प्रत्यागतस्यातिथेर्भगवतो विधिर्गृहस्थधर्मं सत्किमार्पिपदित्यतो दर्शयति ॥ स इति । नखेन्दुभिर्नखामृतमयूखैः हृता स्वधाम्नः सत्याख्यस्य द्युतिः कान्तिर्यस्य सोऽब्जभवः पद्मभूः । तं पादं समीक्ष्य । हे नरदेव! मरीचिमिश्राः । तत्सहिता बृहद्व्रता बृहन्महद्व्रतं येषां ते तथा । सनन्दनाद्या योगिनश्च तैरावृतोऽप्यभीष्टदत्वेन प्रार्थितोऽप्यभ्यगात् । य आवृतो नरा देवाश्च योगिनश्चेति वा । आवृतो नखेन्दुभिराच्छादित इत्यपि योजयन्ति । आवृतः परिवारैरिति शेष इत्यपि ॥ १ ॥

छलारी —— उरुक्रमस्याङ्घ्रिः सत्यलोकं गत इत्युक्तम् । ततः किं वृत्तमित्यतो ब्राह्मणोऽतिथेरागमने पादार्चनादिगार्हस्थ्यधर्मप्रदर्शनप्रकारं वक्ति ।। स इति ।। अब्जभवः स ब्रह्मा सत्यलोकं प्राप्तं पादं समीक्ष्याभ्यगात् । पादप्रदेशमिति शेषः । कथम्भूतोऽब्जभवः । हरेरङ्घ्रेर्नखा इवेन्दवश्चन्द्रास्तैर्हृता तिरस्कृता स्वधाम्नः सत्यलोकस्य द्युतिर्यस्य सः । स्वयं च तैर्नखेन्दुभिरावृतः छन्नः । परिवारैरावृत इति वा ।। १ ।।

लिङ्गेरी —— अत्रापि हरौ भक्तिजननाय तदवतारत्रिविक्रमस्य ब्रह्मादिदेवपूज्यता महिमोच्यते । तत्रादौ ब्रह्मागमनप्रकारः । हे नरदेव परीक्षिद्राज । अब्जभवो हरिनाभिकमलोत्पन्नश्चतुर्मुखस्त्रिविक्रमस्य नखलक्षणचन्द्रकान्त्याऽपहृतस्वाश्रयभूतसत्यलोककान्तिः सन् तं त्रिविक्रमं दृष्ट्वा तत्पूजार्थं स्वसेवकैर्देवैः सहितः सन् त्रिविक्रमपादसमीपमगात् । बृहद्व्रतं भगवदुपासनादि येषां ते मरीचिप्रधाना ऋषयः सनन्दनाद्या योगिनश्चागुः ।। १ ।।

वेदोपवेदा नियमा यमान्वितास्तर्केतिहासाङ्गपुराणसंहिताः ।
ये चापरे योगसमीरदीपितज्ञानाग्निना रन्धितकर्मकल्मषाः ।
ववन्दिरे यत्स्मरणानुभावतः स्वायम्भुवं धाम गता अकर्मकम् ।। २ ।।

सत्यधर्मीया —— वेदा मूलराशय उपवेदा अवान्तरवेदा उभयत्राप्यभिमानिनः । यमैरन्विता नियमाश्च । तर्को ब्रह्मतर्कः । इतिहासा भारतादयः पुरावृत्ता वा । अङ्गानि शिक्षाकल्पादीनि । पुराणसंहिताः पञ्चरात्रादयः । ये चान्ये । योगः समाध्यादिः स एव समीरो वायुस्तेन दीपित उज्वलो ज्ञानरूपोऽग्निस्तेन । रन्धितम् । योगरन्धितेत्यत्र विवृतम् । दग्धं कर्मकल्मषं कल्मषं कर्म दुष्कर्म येषां ते । कर्मप्राप्यदुष्फलं वा येषां ते तथा । न केवलं स्वसमाधिरेव कारणमपि तु इदं मुख्यमित्याह ।। यदिति । यस्य हरेर्यत्स्मरणं निरन्तरचिन्तनं तस्यानुभावः प्रभावो माहात्म्यं तस्मात् । अनुभावः प्रभावे स्यादिति विश्वयादवौ । स्वयम्भुवो विधेरिदं स्वायम्भुवं धाम गृहं गता ये मरीचिमुखास्ते । अकर्मकं कर्मप्राप्यं न ज्ञानप्राप्यो यः पादस्तम् । अकर्मप्राप्यं कं मोक्षसुखं यस्मादिति वा । ज्ञानेनैव तदुत्तरानिति वचनादकर्मकमिति धामविशेषणं वा । ववन्दिरे इत्येकान्वयः । अथवा ये मरीचिमिश्राः सनन्दनाद्या योगिनस्तैरावृत इति तन्मात्रं खण्डान्वयः । वेदोपवेदादयो ये स्वायम्भुवं धाम गतास्ते ववन्दिर इति पृथगन्वयो वेति ज्ञेयम् ।। २ ।।

छलारी — हे नरदेव राजन् । मरीचिमुख्या ऋषयो बृहद्व्रतं येषां ते सनन्दनाद्या योगिनः सनकाद्याश्च तथा वेदा मूलवेदाभिमानिन उपदेवा अवान्तरवेदाभिमानिनो यमैरन्विता नियमास्तर्का ब्रह्मशास्त्रमितिहासा भारतादयोऽङ्गानि शिक्षादीनि पुराणानि सहिताः पञ्चरात्रागमश्चैतदभिमानिनश्च । ये चापरेऽन्ये योग एव योगाभ्यास एव समीरो वायुस्तेन दीपितं ज्ञानमेवाग्निस्तेन रन्धितं दग्धं कर्मकल्मषं कर्मफलं येषां ते तथोक्ताः । यस्याङ्घ्रेः स्मरणस्यानुभावतः सामर्थ्यात्स्वयंभुवो ब्रह्मण इदं स्वायंभुवं धाम सत्यलोकं गताः प्रापुः । ते च सर्वेऽकर्मकं कर्मणाऽप्राप्यं किन्तु ज्ञानेनैव प्राप्यं तं हरेरङ्घ्रिं प्राप्य ववन्दिर इति श्लोकद्वयस्यान्वयः ॥ २ ॥

लिङ्गेरी — तथा ऋगादिवेदाभिमानिन आयुर्वेदधनुर्वेदगान्धर्वार्थशास्त्राभिधोपवेदाद्यभिमानिनो यमनियमाभिमानिसहिताः, ब्रह्मतर्कभारतपञ्चरात्रागममूलरामायणाख्येतिहासशिक्षाकल्पव्याकरण-च्छन्दोज्योतिषनिरुक्ताभिधांगाष्टादशपुराण संहिताद्यभिमानिनश्च येऽपरे ध्यानलक्षणयोगाख्यवायुना प्रज्वलितज्ञानाग्निना भस्मीकृतदुष्कर्मतज्जन्यपापाः केचनाधिकारिणोऽगुः । त इमे यस्य त्रिविक्रमस्य स्मरणसामर्थ्यात्कर्मभिन्नज्ञानप्राप्यं दुष्कर्मरहितं चतुर्मुखाश्रयं सत्यलोकं गताः तं विक्रमं ववन्दिरे नमस्कृतवन्तः स्तुतवन्तश्च । अनुभावः प्रभावे स्यान्निश्चये भावसूचक इति यादवः ॥ २ ॥

अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत् पद्मभवोऽर्हणोदकम् ।
समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसम्भवः स्वयम् ॥ ३ ॥

सत्यधर्मीया — अथ वन्दनानन्तरम् । विष्णोरङ्घ्रये प्रोन्नमितायोर्ध्वीकृततलाय पद्मभवोऽर्हणो-दकमवनेजनाद्युपयुक्तं जलमुपाहरत् । आहृत्य भक्त्या समभ्यर्च्य यः शुचिश्रवास्तमभ्य-गृणादस्तौषीत् । पद्मभव इत्युक्तं स्वयमेव ग्रन्थकृद्विवृणोति ॥ यन्नाभिपङ्केरुहसम्भवः स्वयमिति । पङ्केरुहं तामरसम् । पङ्केरुहं तत्पुरुषे कृतीत्यलुक् । शुचिश्रवा इति पद्मभवविशेषणं वा ॥ ३ ॥

छलारी — प्रोन्नमितायोर्ध्वमुख्याय विष्णोरङ्घ्रयेऽर्हणोदकं पादप्रक्षालनोदकं जलं पद्मभव उपाहरदानिनाय । शुचिः शुद्धं श्रवः कीर्तिर्यस्य सः स्वयं ब्रह्मा यस्य हरेर्नाभिपङ्केरुहान्नाभि-कमलात्संभवः संभूतस्तस्याङ्घ्रिं तेनोदकेन भक्त्या समभ्यर्च्य प्रक्षालनादिभिः पूजयित्वाऽभ्य-गृणादस्तौत् ॥ ३ ॥

लिङ्गेरी — अथ पद्मभवश्चतुर्मुखः प्रोन्नमितायोर्ध्वमभिवृद्धाय विष्णोरंघ्रये पादायार्हणस्य पूजनस्य साधनमुदकमुपाहरदानीतवान् । स्वयं चतुर्मुखो यस्य नाभिकमलादुत्पन्नो यदनुग्रहाच्छुद्ध-कीर्तिश्च स तं भगवन्तं त्रिविक्रमं भक्त्या समभ्यर्च्याभ्यगृणादस्तौत् ॥ ३ ॥

धातुः कमण्डलुजलं तदुरुक्रमस्य
पादावनेजनपवित्रतया नरेन्द्र ।
स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि
लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥

सत्यधर्मीया — धातुर्विधातुः कमण्डलुजलं यत्तदेव उरुक्रमस्य पादावनेजनजलजाता या पवित्रता तया स्वर्धुनी स्वर्गङ्गाऽभूत् । नभसि पतती पतन्ती लोकत्रयं निमार्ष्टि शोधयति । सा कथमभादित्यत आह ॥ भगवतो विशदा कीर्तिरिवेति । सा यथा पाण्डुरा तथेति । तेन देवस्य किमित्यतोऽप्याह । लोकत्रयं भगवतः कीर्तिरेवैषा सैवाविशत् । विवेशेति वा । यत्कमण्डलुजलं विशदे क्षीरमाधुर्ये या कीर्तिस्तां निमार्ष्टि मार्जयति । तदपेक्षया माधुर्यमिति भावः । यथोक्तं सुधायाम् । विशदं क्षीरमाधुर्यं यत्स्थिरमाज्यस्य तीक्ष्णकमिति । धुनोति वेतसादीनि इति धुनी, क्विप् । पृषोदरादिर्नुक् । तटिनी ह्रादिनी धुनीत्यमरः । वेः गरुडस्य शमिव शं यस्य । तत्समत्वाद्विशश्चासौ देवो महादेवश्च तस्य कीर्तिर्यया वा सेति वा स्वर्धुनीविशेषणम् । जलं तु बहिरावरणवारि । प्रपञ्चितः पञ्चमे प्रकारोऽयमनुसन्धेयः । विशदे क्षीरमाधुर्येऽवकीर्तिरप्रसादो येन जलमाधुर्येण तज्जलमिति वा । कीर्तिः प्रसादे यशसो विस्तारे कर्दमेऽपि चेति विश्व इति वा ॥ ४ ॥

छलारी — उरुक्रमस्य पादयोरवनेजनेन पादप्रक्षालनेन पवित्रतया तद्धातुः कमण्डलुजलं स्वर्धुनी स्वर्गनद्यभूत् । नभस्यन्तरिक्षे पतती सा स्वर्गनदी लोकत्रयं निर्मार्ष्टि पवित्रयति । केव । भगवतो विशदा निर्मला कीर्तिरिव ॥ ४ ॥

लिङ्गेरी — हे नरेन्द्र । धातुश्चतुर्मुखस्य कमण्डलुजलमुरुक्रमस्य त्रिविक्रमस्य पादप्रक्षालनेन पवित्रतया स्वर्गनदी बभूव । सा नभस्यन्तरिक्षे पतन्ती सती भगवतो निर्मला कीर्तिरिव पवित्रकरतया भूर्भुवःस्वर्लक्षणलोकत्रयजनं शुद्धीकरोति ॥ ४ ॥

ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः ।
सानुगा बलिमाजह्रुरसङ्क्षिप्तात्मभूतये ॥ ५ ॥

सत्यधर्मीया — ब्रह्मादयो लोकनाथाः स्वनाथाय स्वस्वामिने स्वप्रार्थ्याय वा । सानुगाः सभृत्याः । सानुं सानु वा पर्वतशृङ्गं वा वात्यां वा केवलमवनिं वा गच्छन्तीति तप आद्यर्थे ते तथा ।

सानु शृङ्गे बुधे मार्गे वात्यायां पल्लवे वनाविति विश्वः । स्तुः प्रस्तः सानु न स्त्रियामित्यमरः । पूर्वोदीरिता मरीच्यादयः समादृताः सम्यग्भक्तियुक्ताः । आदरो भजनं भक्तिरिति गीताभाष्योक्तेः । हे सम सह रमेति आहृता । असंक्षिप्तात्मभूतयेऽसंक्षिप्ताऽसकुञ्चिता आत्मभूतिः स्वरूपश्रीर्यस्य तस्मै । भूतिः श्रीजन्मभस्मस्विति यादवः । बलिं पूजासाधनं वस्त्वाजह्रुरनीतवन्तः । असंक्षिप्ता स्वस्वयोग्यतानुसारेण पूर्णा आत्मभूतिः स्वसंपत्तदर्थमिति वा । असंक्षिप्ता विद्यया जन्मनेत्यादि सर्वप्रकारेणेत्यसङ्कुचिताऽऽत्मभूतिः स्वोत्पत्तिर्येन तस्मा इति वा ।। ५ ।।

छलारी — लोकनाथा ब्रह्मादयः समादृताः सम्यगादरवन्तः सानुगाः सपरिवारा असंक्षिप्ता असंकुचिता अपरिमिताऽऽत्मभूतिः स्वरूपश्रीः यस्य तस्मै । भूतिः श्रीर्जन्मभस्मस्विति । संक्षिप्तात्मविभूतये इति पाठे संक्षिप्तोपसंहृताऽऽत्मविभूतिरात्मविस्तरो येन तस्मै । यथा पूर्वं वामनरूपेण स्थितायेत्यर्थो ज्ञेयः । स्वनाथाय स्वस्वामिने बलिं पूजामाजह्रुश्चक्रुः ।। ५ ।।

लिङ्गेरी — सानुगा भृत्यसहिता ब्रह्मादयो लोकपालास्त्रिविक्रमे सम्यगादरवन्तः सन्तोऽसंकुचितस्वरूपभूताणिमाद्यैश्वर्यवते स्वस्वामिने बलिं पूजासाधनमानीतवन्तः ।। ५ ।।

तोयैः समर्हणैः स्रग्भिर्दिव्यगन्धानुलेपनैः ।
धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः ।। ६ ।।

सत्यधर्मीया — तानि च कानि साधनानीत्यत आह ।। तोयैरित्यादिना । समर्हणैः पूजोपयुक्तैः सुरभिभिः परिमलद्रव्यैर्गोभिर्वा । सुरभिर्गन्धोपले सौरभेय्यामिति विश्वः । लाजान्युशीराणि वा भ्रष्टव्रीहयो वा लाजास्तैः । उशीरे लाजमुद्दिष्टं इति विश्वः ।। ६ ।।

छलारी — पूजासाधनान्याह ।। तोयैरित्यादिद्वाभ्याम् । समर्हणैर्योग्यैः स्रग्भिः पुष्पमालाभिः सुरभिभिः परिमलैः ।। ६ ।।

लिङ्गेरी — पूजासाधनमेव विशिनष्टि ।। तोयैरित्यादिना । ब्रह्मादयः समर्हणैः पूजासाधनैस्तोयैर्जलैः स्रग्भिः पुष्पमालाभिरलौकिकपरिमलोपेतचन्दनाद्यनुलेपनद्रव्यैः सुरभिभिः परिमलवद्भिर्धूपैर्लाजाभिर्भर्जितव्रीहायताभिरक्षतफलांकुरैस्तस्य त्रिविक्रमस्य पराक्रममाहात्म्यचिह्नितैः स्तवनैः स्तोत्रैर्जयशब्दैश्च नर्तनवाद्यगानैः शङ्खभेरीध्वनिभिश्चापूजयन् । ऋक्षाणां भल्लूकानां राजा श्रेष्ठो जांबवान् मनसो जव एव वेग एव जववान्सन् भेरी शब्दैः सर्वासु दिक्षु त्रिविक्रमस्य विजयमुत्कर्षं महोत्सवो यथा स्यात्तथाऽघोषयत्प्रसिद्धमकरोत् ।। ६,७ ।।

स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः ।
नृत्तवादित्रगीतैश्च शङ्खदुन्दुभिनिःस्वनैः ।
जाम्बवान् ऋक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ ७ ॥

सत्यधर्मीया — तस्य वीर्यस्य महिम्नांकितैस्तद्वीर्येण महिम्ना चाङ्कितैश्चिह्नितैः स्तवनैः स्तुतिभिः । एतदभिन्नं बलिमाजह्रुरित्यन्वयः । भेरिशब्दैर्नादिरवैः ॥ ७ ॥

छलारी — स्तवनैः स्तोत्रैस्तस्य वामनस्य वीर्यैर्महिम्ना चाङ्कितैर्युक्तैः । ऋक्षराजो मृगविशेषाकारो जांबवान् ब्रह्मपुत्रो यमावतारो मनोवेगवज्जयो यस्य सः वामनविजयरूपं महोत्सवं सर्वासु क्षितिष्वघोषयद्भेरीशब्देन वामनविजयं लोकत्रये विज्ञापितवानिति भावः । त्रिपदविषयव्याजयाञ्चया स्वभर्तुः स्वस्वामिनो दीक्षितस्य बलेः सर्वां महीं हृतां दृष्ट्वाऽसुरा अत्यमर्षिताः सन्तोऽत्यन्ता-सहमानाः सन्त ऊचुः ॥ ७, ८ ॥

विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ।
महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाञ्चया ।
ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥ ८ ॥

सत्यधर्मीया — महोत्सवं विजयं सर्वासु दिक्षु । अघोषयत् ख्यापयामास । त्रिपदव्याजयाञ्चया त्रिपदमिति व्याजापदेशो यस्याः सा च याञ्चा तया । दीक्षितस्य स्वभर्तुः सर्वां महीं हृतामपहृतां दृष्ट्वाऽत्यमर्षिता असुराः परस्परमूचुः ॥ ८ ॥

लिङ्गेरी — असुराः स्वेषां भर्तुः पोषकस्य दीक्षितस्य यज्ञनियमवतो बलेः सर्वां भूमिं वामनेन त्रिपादयाञ्चः व्याजेनापहृतां दृष्ट्वाऽतिकोपिताः सन्तो वक्ष्यमाणप्रकारमुचुः ॥ ८ ॥

न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः ।
द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ ९ ॥

सत्यधर्मीया — ब्रह्मबन्धुर्यौगिकः शब्दः । ब्रह्मणो ब्राह्मणस्य बन्धुर्बान्धवः पुत्र इति यावत् । अतद्धर्मेतीयमुक्तिः । बन्धुर्भ्रातरि बान्धव इति विश्वः । न वै नैव । तर्हि क इत्यतो वदति । मायाविनां विनिप्रत्ययान्तः । माया कापटयं तद्वतां वरः । विष्णुः । दृश्यते श्रूयते च कश्यपस्य पुत्र इतीत्यत

आह । ब्रह्मबन्धुर्ब्राह्मणाभास इति । तत्र हेतुमाहुः ।। द्विजरूपप्रतिच्छन्न इति । विपरीतो वा हेतुहेतुमद्भावः । चिकीर्षतीत्युक्तिश्च शुक्रोक्तभाविबहुविपदभिप्रायेण । कर्तुमिच्छति ।। ९ ।।

छलारी — किमूचुस्तदाह ।। न वा इति सार्धत्रिभिः । अयं बालको ब्रह्मबन्धुर्ब्राह्मणवंशोद्भवो न वै । किन्तु मायाविनां कपटिनां वरो विष्णुरेव द्विजरूपेण द्विजवेषेण प्रतिच्छन्नः सन् देवानां कार्यं चिकीर्षति कर्तुमिच्छति ।। ९ ।।

लिङ्गेरी — अयं त्रिपादयाचको ब्रह्मबन्धुर्ब्राह्मणकुमारो न वै नैव किन्तु मायाविनां वञ्चकानां श्रेष्ठः । मेधा माया सृजो विनिरिति मतुबर्थे मायाशब्दाद्विनिः । विष्णुरेव ब्राह्मणाकारेणाच्छादितस्वरूपः सन् देवकार्यं कर्तुमिच्छति ।। ९ ।।

अनेन याचमानेन शत्रुणा बहुरूपिणा ।
सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि ।। १० ।।

सत्यधर्मीया — बहुरूपिणा नानावेषिणाऽबहुरूपिणा तनुतनुमतानेनैव बहुरूपिणा विपुलरूपवतेति । बहु स्याद्विपुले त्र्यादिसङ्ख्यास्वप्यभिधेयवदिति विश्वः । अबहुरूपिणा निःसुवर्णेन शुद्धदरिद्रेणेति वा । यथोक्तं काठकभाष्ये । बहुरूपश्च पुरटं कार्तस्वरमितीर्यत इति । नो भर्तुः सर्वस्वं हृतं कुतो न समरममुना मुरारिनाऽकरोदित्यत ईरयन्ति ।। न्यस्तदण्डस्येति । न्यस्तो दीक्षितत्वात्त्यक्तो दण्डो यस्य स तथा तस्य । बर्हिषि अग्निसमे तत्साक्षिकं सङ्कल्पपूर्वकं त्यक्तशासनस्य । बृहि वृद्धौ । बृंहेर्न लोपश्चेति पुलिङ्गः बर्हिष्शब्दः । बर्हिरुक्तो बृहद्भानुरित्यमरमालापुंस्काण्डोक्तेः । शुक्रो वैश्वानरो बर्हिः षर्हिः शुष्मा तनूनपादिति शब्दार्णवः । बर्हिः कुशहुताशयोरिति विश्वः ।। १० ।।

छलारी — बर्हिषि विषयज्ञानार्थं न्यस्तोऽयुक्तो दण्डः शासनं येन तस्य नो भर्तुर्बलेः सर्वस्वं तेन वटुरूपिणा हृतम् ।। १० ।।

लिङ्गेरी — बहुरूपिणा ऱ्हस्वदीर्घाद्याकारवता शत्रुरूपेण त्रिपदं याचमानेनानेन वामनेन बर्हिषि यज्ञे दीक्षितस्यात एव त्यक्तनिग्रहस्य नोऽस्माकं भर्तुर्बलेः सर्वस्वमपहृतम् । बर्हिर्दर्भे च यज्ञे इति नानार्थमुक्तावली ।। १० ।।

सत्यव्रतस्य सततं दीक्षितस्य विशेषतः ।
नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ।। ११ ।।

सत्यधर्मीया — किमिति नेति नावादीत्यत आहुः ॥ सत्यव्रतस्येति ॥ ११ ॥

छलारी — सततं सत्यं यथार्थभाषणव्रतं यस्य तस्य विशेषतो यज्ञे दीक्षितस्य ब्रह्मण्यस्य ब्राह्मणभक्तस्य दयावतोऽस्य बलेरनृतं भाषितं वक्तुं न शक्यम् ॥ ११ ॥

लिङ्गेरी — ननु बलिना, मया त्रिपादं दीयत इत्युक्तेऽप्यत्यभिवर्धमानतत्पददर्शनानन्तरं नाहमेतादृक् पदत्रयं दास्यामीति किं नोक्तमित्यत आह ॥ सत्यव्रतस्येति । सततं यथार्थवचनमेव व्रतं मुख्यं यस्य । तत्रापि विशेषतो दीक्षितस्य ब्राह्मणेषु वात्सल्यवतो दयावतश्च बलेरयथार्थवचनं वक्तुमशक्यमिति ॥ ११ ॥

तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ।
इत्यायुधानि जगृहुर्बलेरनुचरासुराः ॥ १२ ॥

सत्यधर्मीया — अनुचराश्च ते असुराश्चेति विग्रहः ॥ १२ ॥

छलारी — यस्माद्बलिर्दीक्षितस्तस्मादस्य बटोर्वधोऽस्माकं धर्मः । नोऽस्माकं भर्तुः शुश्रूषणं च भवेत् । इत्युक्त्वा बलेरनुचराश्चायुधानि जगृहुः ॥ १२ ॥

लिङ्गेरी — यस्मादेवं तस्मादस्य त्रिविक्रमस्य वधो, धर्मोऽस्माकं स्वामिसेवा चेत्येवं मत्वा बलेर्भृत्याः असुराः स्वायुधानि गृहीतवन्तः ॥ १२ ॥

ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः ।
अनिच्छतो बले राजन् प्राद्रवञ्जातमन्यवः ॥ १३ ॥

सत्यधर्मीया — अनिच्छतो बलेरिति षष्ठ्याऽनादरोऽनिच्छन्तं तमनादृत्य प्राद्रवन् ॥ १३ ॥

छलारी — शूलपट्टिशा पाणौ येषां ते तथा ते सर्वे वामनं हन्तुम् । जातो मन्युः कोपो येषां ते तथा । बलेरनिच्छतः सतः प्राद्रवन् ॥ १३ ॥

लिङ्गेरी — ते सर्वेऽसुराः स्वस्वामिनो बलेरनिच्छतः सतोऽपीच्छाभावेऽपीति यावत् । स्वयमेव जातो मन्युः कोपो येषां ते तथा सन्तः शूलादिहस्ता वामनं हन्तुं प्राद्रवन् । मन्युः क्रोधो क्रतौ दैन्य इति नानार्थमुक्तावली ॥ १३ ॥

तानभिद्रवतो दृष्ट्वा दितिजानीकपान् नृप ।
प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १४ ॥

सत्यधर्मीया — अनुचरा भृत्याः ॥ १४ ॥

छलारी — तान्दितिजानां दैत्यानामनीकपान्सेनानायकान् अभिद्रवतो दृष्ट्वा प्रहस्यापहासं कृत्वा विष्णोरनुचरा उदायुधाः सन्तः प्रत्यषेधन् ॥ १४ ॥

लिङ्गेरी — हे नृप । विष्णोर्भृत्या नन्दादयः स्वाभिमुख्येनाश्वागच्छतो दैत्यसेनापालकान्दृष्ट्वा प्रहस्योद्यतायुधाः सन्तस्तान्यवारयन् ॥ १४ ॥

नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः ।
कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ॥ १५ ॥

सत्यधर्मीया — तानाह ॥ नन्द इति । विष्वक्सेनः पार्षदः । पतत्त्रिराट् गरुडः ॥ १५ ॥

छलारी — विष्णोरनुचरानाह ॥ नन्द इत्यादि सात्वत इत्यन्तेन । पतत्त्रिराट् गरुडो नागानां गजानामयुतवत्त्राणो बलं येषां ते आसुरीं चमूं सेनां जघ्नुः ॥ १५,१६ ॥

लिङ्गेरी — विष्णुभृत्यान्नामतो दर्शयति ॥ नन्द इत्यादिना सात्वत इत्यन्तेन । पतत्त्रिराट् गरुडः । ते नन्दादयः सर्वे स्वं प्रति प्राप्तामासुरीसेनां हतवन्तो यतो नागायुतत्राणा दशसहस्रगजतुल्यबलाः । गजेऽपि नागमातुंगा इत्यमरः ॥ १५,१६ ॥

जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ।
सर्वे नागायुतप्राणाः स्वां स्वां ते जघ्नुरासुरीम् ॥ १६ ॥

सत्यधर्मीया — नागायुतप्राणा दशसहस्रगजवत्प्राणो बलं येषां ते तथा । स्वां स्वां स्वस्वाभिमुखेन प्राप्ताम् । आसुरीं सेनां जघ्नुः ॥ १६ ॥

हन्यमानान् स्वकान् दृष्ट्वा पुरुषानुचरैर्बलिः ।
वारयामास संरब्धान् काव्यशापमनुस्मरन् ॥ १७ ॥

सत्यधर्मीया — काव्यशापं शुक्रस्य 'भ्रश्यसे श्रिय' इति स्वशापम् ॥ १७ ॥

छलारी — पुरुषस्य वामनस्यानुचरैर्भृत्यैः । संरब्धान् आग्रहयुक्तान् । काव्यस्य शुक्राचार्यस्य शापमचिराद्भ्रश्यसे श्रिय इत्येवं रूपं स्मरन् ।। १७ ।।

लिङ्गेरी — बलिः पुरुषस्य वामनस्यानुचरैर्भृत्यैर्नन्दादिभिर्हन्यमानान्स्वकीयान् भृत्यान्दृष्ट्वा स्वस्य, काव्यस्य शापमैश्वर्यभ्रष्टो भवेत्येवंरूपमनुस्मरन्सन् संरब्धान्पुनर्युद्धाय कोपाटोपयुक्तान्वारयामास ।। १७ ।।

हे विप्रचित्ते हे राहो हे हेते श्रूयतां वचः ।
मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ।। १८ ।।

सत्यधर्मीया — अयं कालो हरिर्नोऽर्थकृदर्थसाधको नातो मा युध्यत निवर्तध्वम् । मम वचः श्रूयतामिति वारयामासेत्यन्वयः ।। १८ ।।

छलारी — मा युध्यत युद्धं न कुरुध्वं युद्धान्निवर्तध्वम् । कालः कालनियामको हरिर्नोऽर्थकृदनुकूलो न भवति ।। १८ ।।

लिङ्गेरी — निवारणप्रकारमेव दर्शयति ।। हे विप्रचित्त इति । हे राहो मे वक्ष्यमाणं वचः युष्माभिः श्रूयताम् । यूयं मा युध्यत युद्धान्निवर्तध्वम् । अयं कालो नोऽस्माकमर्थकृत् जयादिप्रयोजनसाधनो न भवति ।। १८ ।।

यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ।
तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ।। १९ ।।

सत्यधर्मीया — पौरुषैः पुरुषाकारैरीश्वरो न न समर्थ इत्यर्थः ।। १९ ।।

छलारी — यः सर्वभूतानां सुखदुःखयोरुपपत्तये प्राप्तये यः प्रभुः समर्थः । तं पुमान् पौरुषैः स्वपराक्रमैरतिवर्तितुमत्येतुमीश्वरः समर्थो न भवेत् ।। १९ ।।

लिङ्गेरी — वयं पराक्रमेण तं कालमभिभवाम इति न मन्तव्यं शत्रुजयादेरीश्वरादित्याह ।। यः प्रभुरिति । हे विप्रचित्त्यादयः । यो हरिः सर्वप्राणिनां सुखदुःखप्रापणाय प्रभुः समर्थः । तं कालशब्दितं पुमान्पुरुषः पौरुषैः स्वपराक्रमादिभिरतिवर्तितुमतिक्रान्तुमीश्वरः समर्थो न भवति । सुखं दुःखभवो भावः कालाख्या रूपिणस्तवेत्यादेः ।। १९ ।।

यो नो भवाय प्रागासीदभवाय दिवौकसाम् ।
स एव भगवानद्य वर्तते तद्विपर्ययम् ॥ २० ॥

सत्यधर्मीया — यो भगवान्भवाय मङ्गलाय । दिवौकसां चाभवायासीत्स एव तद्विपर्ययं नोऽभवस्तेषां भव इति तद्विपर्ययं यथा स्यात्तथा वर्तते । तद्विपर्ययं वर्तते वर्तयतीति वा ॥ २० ॥

छलारी — यो भगवान्प्राक् पूर्वं भवायैश्वर्यायासीत् । दिवौकसां देवानामभवाय चासीत् । स एव तद्विपर्ययं पूर्वोक्तस्य विपर्ययं देवानां भवाय नोऽभवायेत्येवंरूपं विपरीतं यथा स्यात्तथा वर्तते ॥२०॥

लिङ्गेरी — तर्हि तदनुग्रहेणैव वयं शक्रादीन् जेष्याम इत्यत आह ॥ य इति । यो भगवान्कालशब्दितो नोऽस्माकं भवाय स्वाराज्यादिमङ्गलाय सहायः पूर्वमभूदिवौकसां देवानामभवा-यामङ्गलाय हेतुरासीत्स एवेदानीं तद्विपरीतो वर्तत इति ॥ २० ॥

बलेन सचिवैर्बुध्या दुर्गमन्त्रौषधादिभिः ।
सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥ २१ ॥

सत्यधर्मीया — कालेनेदं फलिष्यतीत्याह ॥ बलेनेति । काले विपरीते बलादिकं निष्फलमिति भावः ॥ २१ ॥

छलारी — नन्वस्माकं नानासाधनानां सात्वतैर्भगवानतिवर्तितुं शक्यः स्यादित्यत आह ॥ बलेनेति । चतुरंगबलसैन्येन सचिवैर्मन्त्रिभिः कालं कालप्रेरकं हरिं नात्येत्यतिवर्तितुं क्षमो न भवति । कालो बलीयानिति साधुवाद इत्युक्तेः । कालस्य बलवत्त्वादिति भावः ॥ २१ ॥

लिङ्गेरी — ननु पराक्रमैर्जेतुमशक्योऽपि कालो बलादिभिरनेकोपायैर्जेतुं शक्य एवेत्यत आह ॥ बलेनेति । जयाकांक्षी जनो बलेन शारीरशक्त्या सचिवैर्बुध्यादिसहायभूतैर्जनैर्दुर्गेण मन्त्रौषधादिभिः सामाद्युपायैश्च कालं नात्येतीति ॥ २१ ॥

भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ।
दैवरुद्धास्त एवाद्य युधि जित्वा नदन्ति नः ॥ २२ ॥

सत्यधर्मीया — दैवं भगवांस्तद्रुद्धा बहुवारं निर्जितास्त एवाद्य युधि नः जित्वा नदन्ति गर्जन्ति ॥ २२ ॥

छलारी — हरेरनुचरा देवा दैवेनादृष्टप्रेरकेणेश्वरेण ऋद्धैरनुकूलितैर्भवद्भिर्बहुशो निर्जिताः । दैवरुद्धा इति पाठे दैवेन प्रतिहता इति देवविशेषणम् । एते देवा एवाद्य युधि नो जित्वा नदन्ति गर्जन्ति । दैवस्यानुकूलत्वात् ॥ २२ ॥

लिङ्गेरी — अस्माकं हरिरिदानीं विपरीत इत्युक्तं दर्शयति ॥ भवद्भिरिति । हे विप्रचित्त्यादयः । एते नन्दादयो हरेरनुचरा यदा दैवेनादृष्टप्रेरकेण हरिणा रुद्धाः प्रतिरुद्धास्तदा भवद्भिरेव बहुशो निर्जितास्त एवाद्य युधि युष्मान् जित्वा नदन्तीति ॥ २२ ॥

एतान् वयं विजेष्यामो यदि दैवं प्रसीदति ।
तस्मात् कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २३ ॥

सत्यधर्मीया — अर्थत्वाय, अमृतत्वस्य मुक्तवर्गस्येतिवदर्थसाधयित्यर्थः । यः कालः कल्पते तं प्रतीक्ष्वध्वम् ॥ २३ ॥

छलारी — यः कालो नोऽर्थत्वायानुकूलाय कल्प्यते भवेत् । तं कालं प्रतीक्षध्वम् ॥ २३ ॥

लिङ्गेरी — तर्हि नो जयो दुर्लभ एवेति न मन्तव्य इत्याह ॥ एतानिति । यदि दैवमदृष्टप्रेरकेश्वरोऽस्माकं प्रसीदति प्रसन्नो भवेत्तर्हि तदैव वयमेतान्विजेष्यामः । तस्माद्यूयं, यः कालोऽस्माकं जयादिप्रयोजनाय सहायो भविष्यति तं कालं प्रतीक्षध्वमिति ॥ २३ ॥

श्रीशुक उवाच–

पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ।
रसां निर्विविशू राजन् विष्णुपार्षदताडिताः ॥ २४ ॥

सत्यधर्मीया — रसां रसातलम् ॥ २४ ॥

छलारी — पत्युः स्वामिनो बलेर्निगदितं वचनं श्रुत्वा रसां रसातलं विष्णोः पार्षदैर्नन्दादिभिस्ताडिताः ॥ २४ ॥

लिङ्गेरी — हे राजन् । दैत्यदानवसमूहरक्षकाः स्वपतेर्बलेरुक्तरूपं वचनं श्रुत्वा विष्णुपार्षदैस्ताडिता अपि रसातलमेव प्रविष्टाः ॥ २४ ॥

अथ तार्क्ष्यसुतो ज्ञात्वा विराड् विभुचिकीर्षितम् ।
बबन्ध वारुणैः पाशैर्बलिं सूत्येऽहनि क्रतोः ॥ २५ ॥

सत्यधर्मीया — विराट् पक्षिश्रेष्ठः । विराट् विश्वरूपी चासौ विभुः स्वामी च तच्चिकीर्षितं कर्तुमीप्सितं ज्ञात्वा । क्रतोर्यज्ञस्य । तत्सम्बन्धिनि सूत्येऽहनि सोमाभिषवदिने वारुणैः पाशैर्बलिं बबन्ध । ननु पाशा अनेकशः सन्ति । तान्विहाय पाशिपाशग्रहणे किं बीजमिति चेन्न । नागान्तकस्य नागपाशेन बन्धः असम्बद्धः । नाप्येतत्काले कालपाशेन संदानं दानवारेः । बन्धस्याबद्धयत्वात् । अश्वत्थामा बलिर्व्यास इत्यादेः । न चान्यः कश्चन पाशोऽस्तु बलिसंकलन इति वाच्यम् । विनिगमनानवगमनमेवं वक्तारमनुयोक्ताऽहं हन्त वारुण एव किं कारणं वार्यत इति वक्तुं शक्त इति जोषमास्व । तर्हि तत्रभवद्भिर्भवद्भिर्दया विधेयेति चेत् । सत्यम् । अच्छा तव पृच्छा नेच्छातस्तुच्छीकर्तुं क्षमेति क्षणं क्षमस्व । मा त्वरिष्टाः । यद्देयविषये तोयधारावितरणं तत्पारं नापायन् किल बलिस्ततस्तदभिमतिकपाशबन्धः सानुबन्ध इति समाधिसम्भवात् । सत्सु सुनन्दनन्दादिषु गरुडस्यैवाज्ञा सम्भाविनी चेत्किलायं सर्वः संसारः । सारांशो वक्तव्योऽत्रेति चेन्न । सर्वेऽपि सर्वत्रावतारादौ स्वयं सावतारा इति तन्वते सेवामयं निरवतारः । किञ्चेतरे समुद्रमथनश्रान्ता अयं तु मन्दरमात्रमानीय विहितस्थले प्रस्थाप्य गतो नातिश्रान्त आगत इति वेतरेषां तदानीमपि स्वस्वसेवासम्भवो न सम्भवश्चैतत्सेवाया महाकारवाहनताऽयोगादत्र योजनमिवोत्तरत्रापि निद्रासमुद्रितस्तत्कृत्याभावादेव देवो नियोक्ष्यति किरीटहारिबलिविजयाय चेति ज्ञेयम् । तदा दुग्धाब्धौ संसृतिस्थैरित्यारभ्य बलिश्चागात्तत्र सन्द्रष्टुमीशं तत्रासुरावेशममुष्य विष्णुः । सन्दर्शयत्सुप्तिहीनोऽपि नित्यं संसुप्तवदित्यादि गर्भीकृत्य तदा बलिस्तस्य विष्णोः किरीटमादायागादिति च । सुपर्णो गत्वा पातालं युधि जित्वा बलिं चेत्यन्तेन श्रीमत्तात्पर्यनिर्णये प्रकाशितोऽयमर्थोऽनुसन्धेयः । केचित्तु चोरादिदोरबन्धे कबन्धसेचनं तद्दाढर्याय तन्वते । स्वयं स एव चेददितिदृढो भवतीतीरणं वारुणेरिति नारुणेन नयनेन वीक्षस्वेति समादधते ॥ २५ ॥

छलारी — तार्क्ष्यस्य सुतः कश्यपस्य सुतो विषु पक्षिषु राजन्ते इति विराट् गरुडो विभोर्वामनस्य चिकीर्षितं कर्तुमिष्टं ज्ञात्वा क्रतोर्यज्ञस्य सप्तमेऽहनि सोमपानदिवसे वारुणैर्वरुणसंबन्धिपाशैर्बलिं बबन्ध ॥ अयमर्थः । अस्य सर्वस्वापहरणे ममेत्यभिधानं सत्यं जय इदानीं देहस्वीकारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति । तथा च न चानेन तुल्योऽन्यः कोऽपि धीरो नास्तीति तद्यशःप्रख्यापनार्थं किञ्चिद्याचितमपीच्छति । प्रभोरभिप्रायं ज्ञात्वा तं बबन्धेति ॥२५॥

लिङ्गेरी — अथ तार्क्ष्यसुतो गरुडो, विशेषेण राजत इति विराट् तस्य विभोर्व्याप्तस्य वामनस्य कर्तुमपेक्षितं ज्ञात्वा क्रतोः सौत्येऽहनि सोमपानदिने वारुणैः पाशैर्बलिं बबन्ध ॥ २५ ॥

हाहाकारो महानासीद् रोदस्योः सर्वतो दिशम् ।
गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २६ ॥

सत्यधर्मीया — रोदस्योर्द्यावापृथिव्योः । गृह्यमाणे निगृह्यमाणे ॥ २६ ॥

छलारी — रोदस्योर्द्यावापृथिव्योः सर्वतो दिशं सर्वदिक्षु । प्रभविष्णुना समर्थेन विष्णुनाऽसुरपतौ बलौ गृह्यमाणे बद्ध्यमाने सति ॥ २६ ॥

लिङ्गेरी — एवमसुरपतौ बलौ प्रभविष्णुना यथेच्छं भवितुं शक्तेन विष्णुना वामनेन निगृह्यमाणे सति रोदस्योर्द्यावापृथिव्योः सर्वदिक्षु च महान्हाहाकारध्वनिरभूत् ॥ २६ ॥

तं बद्धं वारुणैः पाशैर्भगवानाह वामनः ।
नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ २७ ॥

सत्यधर्मीया — स्थिरप्रज्ञमचञ्चलमतिम् ।आहवामन इति पदं असुरेत्यस्य विशेषणम् । आहवे न विद्यते मनाः यस्य सः । अनाहवमना इति यावदिति । तस्य सम्बुद्धेरिति वा ॥ २७ ॥

छलारी — स्थिरप्रज्ञं दृढबुद्धिम् ॥ २७ ॥

लिङ्गेरी — भगवान्वामनो वारुणैर्बद्धं नष्टसंपदमपि स्थिरप्रज्ञं विष्णूत्कर्षे स्थिरं ज्ञानमत एवोत्कृष्टकीर्तिं तं नृपं बलिचक्रवर्तिनं प्रत्याह ॥ २७ ॥

श्री भगवानुवाच—

पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर ।
द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय ॥ २८ ॥

सत्यधर्मीया — तृतीयं स्थानम् ॥ २८ ॥

छलारी — सर्वा मही सर्वस्थानम् । तृतीयं तृतीयपादस्थलम् ॥ २८ ॥

लिङ्गेरी — हे असुर । त्वया मह्यं भूमेस्त्रीणि पदानि दत्तानि दास्यामीति प्रतिज्ञातानि । तत्र द्वाभ्यां सर्वा त्वदीया भूमिर्मयाऽऽक्रान्तेति पदद्वयं मया लब्धम् । तृतीयस्य त्वदीयमण्वपि नास्तीत्यतस्तृतीयस्यँ स्थलं परिकल्पय ॥ २८ ॥

यावत् तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः ।
यावद् वर्षति पर्जन्यस्तावती भूरियं तव ॥ २९ ॥

सत्यधर्मीया — कथं कियत्पदद्वयेन मितमित्यत आह ॥ यावदिति । गोभिः किरणैः । असौ सूर्यो यावत्तपति प्रकाशयति । इन्दुः सहोडुभिर्यावत्तपति । यावत्पर्जन्यस्तावतीयं भूस्तव ॥ २९ ॥

छलारी — ननु पादत्रयपरिमिता भूमिर्दत्तेत्युक्तम् । अतः कथं तृतीयमुपकल्पयेत्युच्यत इति तत्राह ॥ यावदिति । असौ सूर्यो गोभिः किरणैर्यावत्स्थलं तपति प्रकाशयति । तथेन्दुश्च पर्जन्यो मेघाभिमानी तवेयं भूमिस्तावती सूर्यादिप्रकाशवत्त्वेन परिमितेत्यर्थः ॥ २९ ॥

लिङ्गेरी — ननु बलिना वामनपदत्रयपरिमितभूमिर्देया । सा च पञ्चाशत्कोटिविस्तीर्णाऽतः कथं तृतीयपदमुपकल्पयेति कथं त्वयोच्यत इत्यत आह ॥ यावदिति । हे बले । असौ सूर्यो गोभिः स्वकिरणैर्यावद्भूप्रदेशं तपति प्रकाशयति । उडुभिर्नक्षत्रैः सहेन्दुश्चन्द्रो यावत्प्रकाशयति, पर्जन्य इन्द्रो यावद्वर्षति तावतीयं तव भूरिति । स्वर्गेषु पशुवाग्वज्रदिङ् नेत्रघृणिभूजले लक्ष्यदृष्टचोः स्त्रियां पुंसि गोरित्यमरः । पर्जन्य गर्जन्मेघे च सुरेन्द्रे च प्रकीर्तित इति नानार्थमुक्तावली ॥ २९ ॥

पदैकेन मया क्रान्तो भूर्लोको विवरैः सह ।
स्वर्लोकस्तु द्वितीयेन पश्यतस्ते मयाऽऽत्मना ॥ ३० ॥

सत्यधर्मीया — एकेन पदा प्रदर्शितं प्राक्तदेवेदमित्यपि द्योतयति । पदेत्यनेन । युक्तिः प्रागुक्तैव । विवरैर्बिलैः । मया द्वितीयेन पदा स्वर्लोक आक्रान्तोऽतस्तृतीयमुपकल्पय । आत्मनेत्युक्त-रान्वयि । आत्मना देहेन । तुः समुच्चये । आन्तरालिको लोक आक्रान्तो मयेति वा ॥ ३० ॥

छलारी — अयं च भूर्लोक आत्मना व्यापिना मयेत्यन्वयः आक्रान्तः । खं दिशश्च तनोस्तन्वा द्वितीयेन पदाऽऽक्रान्तः । एवं ते पश्यतः सतस्ते स्वं त्वदीयं सर्वस्वं मया द्वाभ्यां पदाभ्यामाक्रान्तम् । अतस्तृतीयपदस्थलाभावात्तृतीयमुपकल्पयेत्युक्तमिति भावः ॥ ३० ॥

लिङ्गेरी — अस्त्वियत्येव मम भूमिस्तथाऽपि तव तृतीयपादस्य स्थलाभावः कुत इत्यत आह ।। पदैकेनेति । हे बले । तव पश्यतः सतो मयैकेन पादेन विवरैः पातालादिभिः सह भूर्लोक आक्रान्तस्तथाऽऽत्मना व्याप्तेन मया द्वितीयेन पादेन स्वर्लोकोऽप्याक्रान्तोऽतस्तृतीयस्य स्थलाभाव इति ।। ३० ।।

प्रतिश्रुतमदातुस्ते निरये वास इष्यते ।
विश त्वं निरयं तस्माद् गुरुणा चानुमोदितः ।। ३१ ।।

सत्यधर्मीया — आत्मना स्वेनैव । प्रतिज्ञातमदातुः । तस्मात्त्वं निरयं विश । स निरयो मयैवैतत्फलत्वेनोच्यत इति नेत्याह । गुरुणा शुक्रेणाप्यनुमोदितः संमतीकृतः शापप्रदानादिति भावः । इति अनुमोदितः सन् विशेति वा ।। ३१ ।।

छलारी — तृतीयपदस्थलादाने दोषमाह ।। प्रतिश्रुतमिति । प्रतिश्रुतं दास्यामीति प्रतिज्ञातम् । अदातुः पुरुषस्य नरके वास इष्यते प्रामाणिकैरङ्गीक्रियते । तस्मान्निरययोग्यत्वात् । नष्टप्रतिज्ञाद्वा । गुरुणा शुक्राचार्येणानुमोदितः सन् निरयं विश प्रविश ।। ३१ ।।

लिङ्गेरी — नन्वेवं तृतीयस्य स्थलाभावे किं मेऽनिष्टमित्यत आह ।। प्रतिश्रुतमिति । हे बले । प्रतिज्ञातमददतस्तव निरये दुर्गतौ वास इष्यत इति प्रामाणिकैरङ्गीक्रियते । वाचा दत्तं मनो दत्तं धारादत्तं न दीयते । षष्ठिवर्षसहस्राणि विष्ठायां जायते कृमिरित्यादेः । तस्मात्त्वं निरयं प्रविश । एवमेव गुरुणा त्वमनुमोदितश्चासि ।। ३१ ।।

यो विप्राय प्रतिश्रुत्य न तदर्पयते क्वचित् ।
वृथा मनोरथस्तस्य दूरस्वर्गः पतत्यधः ।। ३२ ।।

सत्यधर्मीया — क्वचिन्नार्पयते । तस्य मनोरथो वृथा दूरस्वर्गो दूरे स्वर्गो यस्य स सन् अधः पतति । तस्य चिज्ज्ञानं क्व । मनोरथो वृथेति वा ।। ३२ ।।

छलारी — किञ्च यः प्रतिश्रुतस्यादानेनार्थितं याचकं विप्रलंभते वञ्चयति तस्य मनोरथा ऐहिकभोगविषया वृथैव न सिद्ध्यन्तीत्यर्थः । स्वर्गश्च दूर एव भवतीत्यर्थः । न केवलमिष्टाभावः किंत्वनिष्टप्राप्तिरित्याह ।। पततीति । स च अधः पतत्येव नीचां योनिं प्राप्नोत्येव ।। ३२ ।।

लिङ्गेरी — ननु प्रतिश्रुतस्य समग्रस्यादाने मम निरयप्राप्तिर्भवेत् । न चैवम् । भागत्रये द्विभागस्य दत्तत्त्वात् । तस्मादहं स्वर्गं गमिष्यामीति चेत् । सत्यम् । स्वर्गं गतोऽपि त्वं प्रतिज्ञातसमग्रादानदोषेण स्वर्गात्प्रच्युतो दूरं त्वद्देहपातानन्तरमेव स्वर्गायोग्यं पश्वादियोनिं यास्यसीति निदर्शयति । यो गृहस्थो विप्रायैतावद्दास्यामीति प्रतिज्ञाय क्वचित्प्रतिज्ञातं नार्पयते न ददाति तर्ह्यहं स्वर्गाद्युत्तमलोकानेव यास्यामीति यस्तस्य मनोरथः स वृथा भवति । यतः स्वर्गात्पतितो दूरं यातीति ॥ ३२ ॥

विप्रलब्धो ददामीति त्वयाऽहं चाद्य मानिना ।
तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित् समाः ॥ ३३ ॥

सत्यधर्मीया — तद्व्यलीकफलं मिथ्यावादफलम् । समाः संवत्सरान् ॥ ३३ ॥

छलारी — प्रकृते किमायातमित्यत आह ॥ विप्रलब्ध इति । आढ्यमानिनाऽभिमानिना त्वया चाहं ददामीति विप्रलब्धो वञ्चितः । तत्तस्माद्व्यलीकफलमनन्तफलं निरयं कतिचित्कश्चित्समा वर्षाणि भुंक्ष्वेत्यर्थः ॥ ३३ ॥

लिङ्गेरी — किञ्च हे बले । न केवलं तव प्रतिश्रुतादानदोषः किन्तु वञ्चकत्वदोषोऽप्यस्तीत्यतो निरयवास एव तव योग्य इत्याह ॥ विप्रलब्ध इति । मानिना "अहं सार्वभौमोऽतस्तव सर्वाभिलाषदाने समर्थः किं त्वयाऽप्रबुद्धेन पदत्रयमात्रं याचितमित्याद्यहंकारवता त्वयाऽद्याहं विप्रलब्ध एतावत्सर्वथा दास्यामीति वञ्चितस्तस्मात्त्वमलीकस्यायतार्थवचनस्य फलं निरयं कतिचित्समाः कांश्चिद्वर्षान् भुंक्ष्वानुभव ॥ ३३ ॥

श्रीशुक उवाच–

एवं विप्रकृतो राजन् बलिर्भगवताऽसुरः ।
भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ ३४ ॥

सत्यधर्मीया — विप्रकृतो वञ्चितोऽविक्लवमदीनं वचस्त्रिविक्रमवचः प्रति आहेत्यन्वयः ॥ ३४ ॥

छलारी — भगवतैवमुक्तो बलिः किं कृतवानित्यतोऽनृतं परिहर्तुमाह ॥ एवमिति । भगवता विप्रकृतोऽप्रकृतोऽसुरो बलिः भिद्यमानोऽपि सत्याच्चाल्यमानोऽपि सोऽविक्लवमदीनं वचः प्रत्याह ॥ ३४ ॥

लिङ्गेरी — हे राजन् । असुरो बलिर्भगवता वामनेनैवमुक्तरीत्या विप्रकृतस्तिरस्कृतः । निरयं विशेत्यादिनिष्ठुरैर्भिद्यमानोऽप्यभिन्नो निर्विकार आत्मा मनो यस्य तथा सन् वामनं प्रत्यविक्लवं पारवश्यदैन्यादिरहितं वचः प्राह ॥ ३४ ॥

बलिरुवाच–

यद्युत्तमश्लोक भवान् ममेरितं वचो व्यलीकं सुरवर्य मन्यसे ।
करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शिर्ष्णि मे निजम् ॥ ३५ ॥

सत्यधर्मीया — भवान्मन्यस इति । मध्यमोत्तमादिनियमाभावादिति । रेतस्त्वजायां कविरादधेऽज इत्यृग्भाष्याद्युदाहरणपूर्वकं षष्ठादौ विवृतमनुसन्धेयम् । भवेन मङ्गलेनानिति चेष्टते स तथा तत्सम्बुद्धिः । तज्जलानिति छान्दोग्यभाष्यादिदिशा एतत् । त्वं मन्यसे तदृतं यथार्थं करोमि तत्तस्मात् तद्वचनमिति वा । प्रलम्भनं वञ्चनं न भवेत् । किमपि तावकं नास्ति । कथं कथय न विप्रलम्भनं बले इत्यतो लपति । निजं स्वकीयं तृतीयं पदम् । निजमित्यनेन त्वया यत्पूर्वं मम प्रदर्शितं तदेव पदं स्थापयेति वदन् बलिः वञ्चनं भवतैव कृतमिति सूचयामास मर्मेत्यवसेयम् । मे मम शीर्ष्णि शिरसि कुरु स्थापयेति । यन्निजमुर्वरितं शिरो मामकं तस्मिन् शीर्ष्णीति वा । एवं वचो ऋतं करोमीति भावः ॥ ३५ ॥

छलारी — हे उत्तमश्लोक । ममेरितं प्रतिश्रुतं वचो व्यलीकमनृतं न भवत्येव । त्वया कपटेन वामनतया भिक्षित्वा रूपान्तरस्याविष्कृतत्वात् । एवमपि यदि भवान् व्यलीकं मन्यते तथाऽपि तन्मदुक्तमृतमेव सत्यमेव करोमि । मदुक्तं विप्रलंभनमनृतं न भवेत् । कथम् । मे शीर्ष्णि शिरसि निजं तृतीयं पदं कुरु निधेहि ॥ ३५ ॥

लिङ्गेरी — हे सुरर्षभ रमाब्रह्मादिदेवोत्तम । अत एवोत्तमैर्ब्रह्मादिभिः श्लोक स्तुत्या कीर्तिर्यस्य तादृश वामन । त्वं यदि मयोक्तं वाक्यमनृतं मन्यसे तर्हि ह्यहं तद्यथाऽनृतं न स्यात् ऋतं च स्यात् । तव वञ्चनं न भवेत् तथा करोमि । तत्करणप्रकारमेवाह । निजं स्वकीयं तृतीयं पदं पादप्रक्षेपणं मे शिरसि कुर्विति ॥ ३५ ॥

बिभेमि नाहं निरयात् पदच्युतो न पाशबन्धाद् व्यसनाद् दुरत्ययात् ।
नैवार्थकृच्छ्राद् भवतो विनिग्रहादसाधुवादाद् भृशमुद्विजे यथा ॥ ३६ ॥

सत्यधर्मीया — स्वसत्यस्थैर्यमार्यं प्रति विज्ञापयति ॥ बिभेमीति । निरयान्नरकात् । पदच्युतः स्वर्गभ्रष्टः । पाशबन्धाद्गरुडकृतात् । अर्थकृच्छ्रात् संसारयात्रोपयोगिवित्ताभावकष्टात् । एतदादिदुरत्ययाद्दुष्पाराद्व्यसनात् । भवतो विनिग्रहान्न तथा बिभेमि । तर्हि कस्माद्बिभेषीत्यतो भाषते । असाधुवादादयमनृतभाषी ततोऽसाधुरिति वादो लोकप्रवादस्तस्मात् यथा भृशमत्यन्तमुद्विज उद्विग्न इति । प्रलापकालत्वान्न पूर्वापरोक्तिः पौनरुक्त्ये दोषाय । यतः पदच्युतः । एवं व्यसनावसरेऽपि । पदात् तृतीयेन न च्युतो न निर्गतिमान् । तत्सम्बद्ध इति यावत् । ततो नोद्विजे । तव चरणस्पृशे न कोऽपि शोक इति भाव इति वा ॥ ३६ ॥

छलारी — ननु च ''आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सन्ततं रक्षेद्दारैरपि धनैरपी''त्यादि वचनात् आत्मभयपरिहाराय सर्वस्वं त्यज्यते । त्वं तु कुतो भीतः सन् आत्मानमर्पयसीत्यत आह ॥ बिभेमीति । असाधुश्चासौ वादश्च तस्मादपकीर्तेः । अनृतवचनाद्वा । यथाऽहं भृशमुद्विजे बिभेमि तथा निरयादिभ्यो न बिभेमि । पदच्युतः स्थानभ्रष्टः । व्यसनाद्दुःखादर्थकृच्छ्राद्द्रव्यप्रयुक्तक्लेशाद्भवतो विनिग्रहाद्भवत्कृतनिबन्धात् ॥ ३६ ॥

लिङ्गेरी — नन्वेवमतिसंकटेन तृतीयपदस्य शिरःप्रदानमयुक्तमित्यत आह ॥ बिभेमीति । अहं यथाऽसाधुवादादनृतभाषणाद्भृशमत्यर्थमुद्विजे बिभेमि न तथा निरयात्पदभ्रंशात्पाशबन्धात्तर्तुमशक्याद्व्यसनाद्दुःखादर्थकृच्छ्राद्द्रव्यापहरणापदो भवतो निग्रहाच्चेति ॥ ३६ ॥

पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् ।
यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि ॥ ३७ ॥

सत्यधर्मीया — भिद्यमानोऽप्यभिन्नात्मेति यत्प्राक् शुकोक्तं ग्रन्थकृत्तदुक्त्यैव दर्शयति ॥ पुंसामिति । अर्हत्तमेन पूज्यप्राज्यधर्मविदुत्तमेनार्पितं दण्डं शिक्षां पुंसां श्लाघ्यतमं मन्ये । यं दण्डं मात्रादयो नादिशन्ति नोपदिशन्ति । न तन्वन्तीति यावत् । हीति स्वानुभवं प्रमाणयति । गुरुरित्यनुक्तिस्तु तद्विपरीतबोधकता तवानुभवसिद्धेव सर्वजनीनेति वा गुरुत्वं हरेरेवेति वक्ष्यमाणत्वाद्वेति ज्ञेयम् । एतत्पक्षेऽर्हत्तमेति भगवत्सम्बोधनम् ॥ ३७ ॥

छलारी — ननु विनिग्रहात्तवापकीर्तिर्जातैव नेत्याह ॥ पुंसामिति । अर्हत्तमैः पूज्यतमैरर्पितं कृतं यं दण्डं शिक्षाम् । मातापित्रोरपि न ह्यादिशन्ति । न कुर्वन्ति तं दण्डं पुंसां श्लाघ्यतमं कीर्तनीयं मन्ये । मम हितैषिणा त्वया निगृहीतोऽहं श्लोघ्य एवास्मकमिति भावः ॥ ३७ ॥

लिङ्गेरी — नन्वेवं मया क्लेशितस्य तवैतद्दानमयुक्तमित्यतः स्वस्य क्लेशाभावं दर्शयति ॥ पुंसामिति । हे अर्हत्तमातिपूज्य वामन । त्वया पुंसामर्पितं दण्डं पुंसां श्लाघ्यतमं मन्ये । यं दण्डं शिक्षां माता पिता भ्राता सुहृदश्च नादिशन्ति न कुर्वन्ति । अनेन स्वस्यायं दण्डो भूषणमेव न दूषणमित्युक्तं भवति ॥ ३७ ॥

त्वं नूनमसुराणां नः पारोक्ष्यं परमो गुरुः ।
यो नोऽनेकमदान्धानां तद्भ्रंशं चक्षुरादिशः ॥ ३८ ॥

सत्यधर्मीया — पारोक्ष्यं निन्दापूर्वकभक्त्येति शत्रुपक्षपातीति वा पारोक्ष्यं यथा भवति तथा । परमो गुरुः । गुरुविशेषणं पारोक्ष्यम् । तत्प्रकारमीरयति । अनेके ये विद्यादिप्रयुक्ता मदास्तैरन्धानां ज्ञानहीनानां नस्तद्भ्रंशम् । तेषां मन्दानां भ्रंशोऽवस्कन्दनं यस्मात्तच्चक्षुः । सज्ज्ञानम् आदिशोऽददाः । पारोक्ष्यम् । एतद्व्याजमिति यथा तथाऽऽदिश इति वाऽन्वयः । नूनं निश्चयेन । पारोक्ष्यः परमो गुरुरिति पाठे वेषान्तरछन्न इति स तथेत्यर्थः ॥ ३८ ॥

छलारी — नन्वहं देवानां हितैषी नासुराणामतः कथं मत्कृतो दण्डस्तव श्लाघ्यतम इति तत्राह ॥ त्वं नूनमिति । असुराणां नस्त्वापरोक्ष्यं शत्रुछन्नेन वर्तमानस्त्वं च परमो गुरुः । योऽनेकमदैरैश्वर्यादि-मदैरन्धानां विवेकशून्यानां नस्तस्य मदस्य भ्रंशो नाशो यस्मात्तच्चक्षुर्ज्ञानमादिश ॥ ३८ ॥

लिङ्गेरी — ननु गुर्वाद्याप्तैः कृतशिक्षोक्तरीत्या श्लाघ्या, न शत्रुभूतमादृशैः कृतेत्यत आह ॥ त्वमिति । हे वामन । त्वमप्यसुरजातीनामप्यस्माकं पारोक्ष्यं परोक्षतः परमो गुरुः । साक्षात्कारविषयतया हिताहितोपदे गुरुत्वात्कथं तदविषयस्य हिताद्यकुर्वतः शत्रोर्मम गुरुत्वमित्यतस्त-वाप्यस्मद्धितकारित्वेन परोक्षतो गुरुत्वमस्तीत्युपपादयति ॥ यो न इति । यस्त्वमनेकैरैश्वर्यादिमदैरन्धानां द्रष्टव्याद्रष्टृणां तस्य मदस्य भ्रंशकं वैराग्यलक्षणं चक्षुरादि दत्वा द्रष्टव्यदर्शनं विदधासीति ॥ ३८ ॥

यस्मिन् वैरानुबन्धेन रूढेन विबुधेतराः ।
बहवो लेभिरे सिद्धिं यामिहैकान्तयोगिनः ॥ ३९ ॥

सत्यधर्मीया — एतदादिज्ञानेन न कोऽपि संसारमतारीदिति दितिसुत कथमिदं चक्षुरक्षुण्णं मनुष इत्यत आह ॥ यस्मिन्निति । यस्मिंस्त्वयि वैरानुबन्धेन वैरोपसर्जनभक्त्या । अनुबन्धस्तु भक्तिः

स्याद्बन्धः स्नेह उदाहृत इति वचनात् । रूढेन दृढेन । विबुधाश्चेतरे च दैत्याश्च विबुधेतराः । यामेकान्तयोगिनः सनकाद्या विबुधा देवाश्च सिद्धिं केवलानुबन्धेन लेभिरे तां सिद्धिमितरे बहवः शिशुपालादिदैत्या अपि लेभिरे । इह संसारेऽधिकारिसमुदाये वा । वैरेण यन्नृपतय इत्यादि स्कन्धान्तरतात्पर्यादितो विशेषोऽनुसन्धेयः ॥ ३९ ॥

छलारी — परमगुरुत्वं दर्शयति ॥ यस्मिन्निति । बहवो विबुधेतरा देवेतरा दैत्या हिरण्यकशिप्वादयो रूढेन दृष्टनिरूढेन यस्मिंस्त्वयि वैरानुबन्धेन वैरयुतस्नेहेन । द्वेषोपसर्जनभयेनेत्यर्थः । सिद्धिं मुक्तिं लेभिरे । इहाधिकारिवर्गे एकान्तयोगिन एकान्तभक्ता यां सिद्धिमापुः ॥ ३९ ॥

लिङ्गेरी — विबुधेतराः सुरभिन्नासुरजात्युत्पन्ना मोक्षयोग्या बहवो यस्मिंस्त्वयि वैरानुबन्धेन द्वेषसमानाधिकरणस्नेहेनारूढेन भिवृद्धेन सिद्धिं मुक्तिं लेभिरे । यां सिद्धिमिहाधिकारिष्वेकान्तयोगिनो भक्ता लभन्ते ॥ ३९ ॥

तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ।
बद्धश्च वारुणैः पाशैर्नानुव्रीडे न विव्यथे ॥ ४० ॥

तात्पर्यम् – **'बलिरप्यसुरावेशात्स्तुवन्नपि जनार्दनम् ।**
आक्षिपत्यन्तरा क्वापि प्रह्लादो नित्यभक्तिमानि'ति ब्रह्माण्डे ॥ ४० ॥

सत्यधर्मीया — तेनाहं निगृहीतोऽस्मीति श्लोके नानुव्रीडे न विव्यथ इति बलिना स्वस्य प्रल्हादवच्छुद्धभक्तता प्रतिपादिता भाति । तच्छिरोभूषणाद्यपहारादिरूपासुरावेशकार्यबाधितमित्यतो मानेन तत्तत्पितामहस्वरूपं निरूपयति ॥ बलिरपीति । बलिर्जनार्दनं स्तुवन्नप्यसुरावेशात् कर्मजदेवत्वेन दैत्यावेशादन्तरा मध्ये क्वापि भीतं ब्रह्मतनुं रिपुमित्यादिप्रकारेणाक्षिपति ॥ स्तुतिमन्तरा विनेति वा । न प्रल्हाद एवमित्याह ॥ नित्यभक्तिमानिति । ब्रह्माण्डवचनेन तद्विशेषो ज्ञेयः ॥ ततश्चायं श्लोकपञ्चकार्थः । भूरिकर्मणा नानाविधकर्मवता तेन भगवता निगृहीतोऽहं वारुणैः पाशैर्बद्धो नानुव्रीडे लज्जे न विव्यथे व्यथां च प्राप्तः । असुरावेशाभावसमयभाषणमिदमिति भावः । क्वापीति तात्पर्योक्तिस्वारस्याद्यदा कदाचिद्दुरालापो बलेरिति ध्वन्यते ॥ ४० ॥

छलारी — अतो नात्र मम लज्जा । नापि दुःखमित्याह ॥ तेनेति । भूरिकर्मणा बहुचरित्रेण तेन गुरुणा भवताऽहं निगृहीतोऽस्मि । वरुणैः पाशैर्बद्धश्चास्मि । तथा नानु व्रीडे लज्जां प्राप्नोमि । न च विव्यथे न दुःखं च प्राप्नोमि ॥ ४० ॥

**पितामहो मे भवदीयसम्मतः प्रह्लाद आविष्कृतसाधुवादः ।
भवद्विपक्षेण विचित्रवैशसं सम्प्रापितस्त्वत्परमः स्वपित्रा ।। ४१ ।।**

सत्यधर्मीया — व्यथाकथितता कुतो न तव बल इत्यतो मम पितामहमाहात्म्यानुध्यानादित्याह ।। पितामह इति । भवदीयः त्वदीय इति संमतो भवदीयानां त्वद्दासानां संमत इति वा । साधुरच्छिन्नभक्त इति वादः साधुवादः । आविष्कृतः साधुवादो यस्य सः । साधूनां वाद आविष्कृतो येनोपदेशद्वारा स इति वा । भवद्विपक्षेण हिरण्यकशिपुना त्वद्वैरिणा स्वपित्रा विचित्रवैशसं भृगुपातनादितो हिंसां संप्रापितः ।। ४१ ।।

छलारी — किञ्च योऽयं दण्डरूपो ममानुग्रहस्त्वया कृतः स त्वद्भक्तपात्रत्वेन न त्वहमनुग्रहस्य पात्रमित्याशयेनाह ।। पितामह इति । भवदीयानां भवद्भक्तानां संमतो मे पितामहः प्रल्हादो यत आविष्कृतः प्रकटीकृतः साधुवादो हरिसर्वोत्तमत्वादिवादो येन सः । तथा त्वमेव परम आश्रयो यस्य सः । अतो भवतो विपक्षेण द्वेषिणा स्वपित्रा स्वस्य प्रल्हादस्य पित्रा हिरण्यकशिपुना विचित्रं नानाविधं वैशसं हिंसां प्रापितः ।। ४१ ।।

लिङ्गेरी — नन्वेवमसुरजातेः कस्यचिद्धरौ भक्त्या श्रेयोदर्शने त्वयाऽपि स्वीकर्तुमुचितेत्यतस्तत्र प्रल्हादं निदर्शयति ।। पितामह इत्यादिना । हे वामन । मे पितामहो भवद्भक्तानां संमतः प्रल्हाद आविष्कृतसाधुवादो नारायण एव सर्वप्रेरकः सर्वेश्वर इत्यादिस्फुटवादी सन् भवतो विपक्षेण शत्रुणा स्वपित्रा हिरण्यकशिपुना विचित्रवैशसं नानाविधदुःखं संप्रापितोऽपि त्वमेव परमः सर्वोत्तम इति भक्तिमानासीत् ।। ४१ ।।

**किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ।
किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ।। ४२ ।।**

सत्यधर्मीया — योऽन्ततोऽन्ते जहाति त्यजति तेनात्मना देहेन किं न किञ्चित्प्रयोजनमिति योग्यान्वयि । किं रिक्थं हरन्तीति रिक्थहारास्तैः पुत्रैः । रिक्थं च पितृपैतामहं धनम् । स्वजना इतरे तदाख्यदस्युभिश्चोरैः । रिक्थहारैः स्वजनाख्यदस्युभिरिति सामानाधिकरण्यं वा । जायया संसृतिहेतुभूतया । तज्जाया जाया भवति यदस्यां जायते पुनरिति हरिश्चन्द्रषट्कब्राह्मणोक्तेः । मर्त्यस्य गेहैः किम् । इहैतादृशे शरीरे प्राप्तेऽपि । आयुषो व्ययो नाश एव यत्ततः किमेतदादिभिरित्यर्थः । आयुर्नित्यायुर्मोक्षस्तस्य व्ययोऽपगम इति वा ।। ४२ ।।

छलारी — पित्रा नानाविधव्यसनं प्रापितः । प्रल्हादस्ततः किमकरोदित्यत आह ॥ किमात्मनेत्यादिना । यो देहोऽन्तत आयुषान्ते जहाति जीवं त्यजति । अनेनात्मना देहेन किं, रिक्थं पितृधनं हरन्ति स्वीकुर्वन्ति तथा तैः पुत्रैः किम्? स्वजनाख्यदस्युभिः स्वजनलक्षणचोरैश्च किम् । मर्त्यस्य मरणशीलस्य गेहैः किम् । तस्मादिह गेहेषु केवलमायुषो व्यय एव नाश एव न तु सुखं किञ्चित् ॥ ४२ ॥

लिङ्गेरी — स प्रल्हादो मम पितामहो जनाद्दुर्जनात्केवलविष्णुद्वेष्यसुरजनसंगाद्भीतः सन् । योऽधिकारी येन देहेन प्राप्तेन त्यक्तेनाऽपि मुदं सन्तोषं जहाति त्यजति तेन किं प्रयोजनम् । न किमपि । तथा रिक्थं पित्रार्जितं द्रव्यं हरन्तीति रिक्थहराः पुत्रादयस्तैः स्वजनाख्यचोरैश्च किम् । तया संसारहेतुभूतया जायया भार्ययाऽपि मरणशीलस्य किं प्रयोजनम् ? गेहैर्गृहादिभिरपीह साध्यं किमस्ति । प्रत्युतैतदासक्तस्य वृथाऽऽयुष्यक्षय एव । इत्थं निश्चित्य स्वपक्षाणामसुराणां क्षपणस्य संहारकस्यापि भवतः कस्मादपि भयरहितं पादपद्मं ध्रुवं प्राप्तवान् । अत एव स प्रल्हादोऽगाधबोधो महान्पूज्यः सत्तमोऽत्युत्तम इति मया ज्ञायते ॥ ४२,४३ ॥

इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ।
ध्रुवं प्रपेदे ह्यकुतोभयं जनाद् भीतः स्वपक्षक्षपणस्य सत्तमः ॥ ४३ ॥

सत्यधर्मीया — सत्तमः स अगाधबोधो महान्मम पितामहः । इत्थं निश्चित्य । भवत इत्यावर्त्यान्वेतव्यम् । जनाद्दुर्जनात् तत्सङ्गादिति यावत् । भवतः सृतेश्च भीतः । स्वपक्षक्षपणस्यापि स्वपक्षोऽसुरपक्षस्तस्य क्षपणं नाशो येन । तं क्षपयतीति वा क्षपणस्तस्य भवतः तवाकुतोभयं पादपद्मं ध्रुवं प्रपेदे । हि यतः प्रपेदे ततः, स्वपक्षः पुत्रस्तस्य स्वपक्षस्य क्षपणं तद्यत्नो वा नानाविधहिंसा वा येन । तस्य हिरण्यकशिपोर्ध्रुवं प्राप्यत्वेन निश्चितं तमः सत् । भावप्रधानो निर्देशः । सत्वं शीर्णत्वं तं प्रपेदे । सत् विशीर्णं वा । विविक्षुरत्यगात्सूनोः प्रल्हादस्यानुभावत इत्यादेः । यजन्ति यज्ञक्रतुभिरिति श्लोके बलिरप्यसुरावेशादिति तात्पर्यं योजयन्ति । पुरा तत्र प्रल्हादो भक्तिमानिति निरालम्बमत्र स्तुवन्नित्यंशेन सह श्लिष्टं भविष्यतीति विभावनीयम् ॥ ४३ ॥

छलारी — इति देहादीनामसारतां निश्चित्यागाधबोधो महाज्ञानी सः जनाद्दुर्जनसंगाद्भीतः सन् स्वपक्षं दैत्यकुलं क्षपयति नाशयतीति तथा तस्यापि भवतः पदांबुजं प्रपेदे । कथंभूतम् । न विद्यते कुतोऽपि भयं यत्र तदकुतोभयं ध्रुवं च नित्यं च ॥ ४३ ॥

अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ।
इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ४४ ॥

सत्यधर्मीया — तदनुग्रहेण ममापि तथैव निश्चय इति विज्ञापयति ॥ अथेति । आत्मरिपोस्तवान्तिकं दैवेन नीतः । प्रसभं बलात्त्याजितश्रीः । यया श्रिया स्तब्धमतिरिदं कृतान्तान्तिकवर्ति यमसमीपवर्ति जीवितं जीवनम् । ध्रुवं नित्यं तन्न भवतीत्यध्रुवं न बुद्ध्यते न मन्यते । तच्छ्रीहरणाच्छ्रीपते न मोहो ममास्तीदानीमिति भावः ॥ ४४ ॥

छलारी — यस्मान्मम पितामहस्त्वत्पादमेव प्राप्तोऽथ तस्मादहमपि दैवेन प्रल्हादस्य भाग्येनासुरजातित्वादात्मरिपोर्मम शत्रुभूतस्य तवान्तिकं समीपं नीतः प्राप्तः । प्रसभं बलात्कारात्त्याजिता श्री राज्यसंपद्यस्य स तथा । बुभूषुणा बोद्धुमिच्छुनेयं श्रीर्बलादपि त्याज्यैव । अन्यथाऽनर्थयोग एवेत्याशयेनाह ॥ इदमिति । यथा श्रिया स्तब्धाऽविवेकमतिर्यस्य सः । पुमान् इदं जीवमध्रुवमनित्यं न बुद्ध्यते न जानाति । कथं भूतम् । कृतान्तस्य यमस्यान्तिके वर्ति मृत्योः सन्निहितं बुद्धिभ्रंशकरं राज्यं तत्त्याजितेन मयि भवता भूयान् अनुग्रह एव कृत इति भावः ॥ ४४ ॥

लिङ्गेरी — हे वामन । अथ तस्मादहमपि असुरजातित्वमात्रेणात्मनो मम रिपोस्तवान्तिकं दैवेन पूर्वार्जितपुण्येन तव समीपं प्राप्तः । प्रसभं बलात्कारेण त्याजितश्रीः परिमोचितराज्यादिसंपच्च जातः । नन्विदमयुक्तं यत्पूर्वपुण्येन संपद्धानिर्ममासेति । तत्राह ॥ इदमिति । यया श्रिया स्तब्धमतिर्जन इदं स्वजीवितं कृतान्तान्तिके मृत्युसमीपे वर्ति विद्यमानं नश्वरमिति ध्रुवं न बुद्ध्यत इति । तस्मात्पुण्येनोक्तसंपद्धानिरिति युक्तमिति भावः ॥ ४४ ॥

श्रीशुक उवाच–

तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ।
आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥ ४५ ॥

सत्यधर्मीया — दैवादेवदिदृक्षया प्रल्हादोऽप्यागमदिति शुको वक्ति ॥ तस्येति । इत्थं भाषमाणस्य बलेः सतः प्रल्हाद उत्थितो राकापतिः पूर्णमासीचन्द्र इवाजगाम । तापापनोदकत्वेन सोमसाम्यम् ॥ ४५ ॥

छलारी — तस्य बलेरित्थं भाषमाणस्य सत उत्थित उदितो राकापतिरिव पूर्णचन्द्र इव ॥४५॥

लिङ्गेरी — हे कुरुश्रेष्ठ । तस्य बलेरित्थं भाषमाणस्य सतो भगवत्प्रियः प्रल्हादः, उदितो राकापतिश्चन्द्र इवाजगाम ॥ ४५ ॥

तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् ।
प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ॥ ४६ ॥

सत्यधर्मीया — इन्द्रसेनः श्रिया विराजमानं नलिनायतेक्षणं प्रांशुमुच्चम् । उच्चप्रांशून्नतोदग्रोच्छ्रिता इत्यमरः । पिशङ्गं पिङ्गलवर्णं अम्बरं वसनं यस्य तम् । अञ्जनस्य त्विडिव त्विट् यस्य तम् । सुभगं सौभाग्योपेतं समैक्षतापश्यत् ॥ ४६ ॥

छलारी — इन्द्रसेनो बलिः प्रांशुमुन्नतकरं पिशंगाम्बरं अंजनवत्कज्जलवत्त्विट् कान्तिर्यस्य । प्रलंबौ दीर्घौ बाहू यस्य तम् । सुभगं सुन्दरं सौम्यं वा ॥ ४६ ॥

लिङ्गेरी — इन्द्रसेनो बलिर्नलिनवत्कमलवदायते विस्तृते ईक्षणे नेत्रे यस्य तं प्रांशुमुन्नतं पीताम्बरमंजनकान्तिसमकान्तिं जानुपर्यन्तं लंबमानबाहुं सुभगं सुन्दरं श्रिया कान्त्यादि-संपदाऽतिप्रकाशमानं स्वपितामहं प्रल्हादं ददर्श ॥ ४६ ॥

तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत् ।
ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ ४७ ॥

सत्यधर्मीया — यन्त्रितो बद्धः । पूर्ववत् अबन्धसमय इवाश्रुविलोललोचनो मूर्ध्ना ननाम । सव्रीडं सलज्जं नीचीनमधःकृतं मुखं यस्य सः । बभूव । हेति खेदे । निपूर्वादञ्चेः ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । न्यचशब्दात्स्वार्थे विभाषाञ्चेरदिक् स्त्रियामिति खः । आयन्नित्यादि-नेनादेशः । अच इत्यकारलोपे चाविति दीर्घः । तथा अबुध्ने राजेति व्याख्या ऋग्भाष्ये । नीचीना नीचाश्च य इत्युक्तेः । न व्रीडे न च विव्यथ इत्युक्तिस्तु भगवन्तं प्रति भक्तिपूर्वकतया वा रिपुत्वेन वा । अत्र तु पितामहदर्शनं दुःखावस्थायां जातमित्यतस्तापविशेषेण ममताविशेषेण व्रीडादिकमिति न विरोधः ॥ ४७ ॥

छलारी — वारुणैः पाशैर्यन्त्रितो बद्धः समर्हणं पूजासाधनं स्वकृताहंकारादिरूपापराधस्मरणेन सव्रीडं लज्जासहितं निंचीनमर्वाचीनं मुखं यस्य सः । विलोले चञ्चले लोचने यस्य सः ॥ ४७ ॥

लिङ्गेरी — वारुणपाशैर्यन्त्रितो वशीकृतो निगृहीतो बलिस्तस्मै प्रल्हादाय समर्हणं पूजासाधनं पूर्ववद्यतो नोपजहार नानीतवान् । ततः स लज्जाधोमुखो बभूव । तदकरणप्रयुक्तदुःखजाश्रुः चञ्चलनेत्रश्च तथाऽपि मूर्ध्ना ननाम भक्त्या नमस्कृतवान् । एतच्च हाद्भुतम् । हा हा हेत्यद्भुते खेद इत्यमरः ॥ ४७ ॥

स तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम् ।
उपेत्य भूमौ तरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः ॥ ४८ ॥

सत्यधर्मीया — स प्रल्हादः सत्पतिं सच्छ्रेष्ठं नक्षत्रस्वामिनं सोममिव वा पुलकाश्रुभिर्विह्वलः ॥ ४८ ॥

छलारी — महामना महाज्ञानी सः प्रल्हादस्तत्र यज्ञशालायामासीनं सुनन्दाद्यैरुपासितं सतां पतिं वामनमुदीक्ष्य तरसा शीघ्रमुपेत्य समीपं प्राप्य बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकै रोमाञ्चैरश्रुभिरानन्दबाष्पैश्च विह्वलः परवशः सन् भूमौ मूर्ध्ना ननाम ॥ ४८ ॥

लिङ्गेरी — एवं स्वपौत्रस्य विपदि प्राप्तायामपि निर्विकारतया हरिप्रणतिस्तुत्यादिपरत्वान्महामनाः स प्रल्हादस्तत्र यज्ञशालायामासीनमुपविष्टं सुनन्दादिभृत्यसेवितं स्वभक्त्यादिना निर्दुष्टानां पालकं स्वामिनं च वामनमुद्वीक्ष्य समीपं प्राप्य च । तद्दर्शनसन्तोषाद्रोमांचैरानन्दबाष्पैर्भक्तिपरवशः सन् भूमौ मूर्ध्ना ननाम ॥ ४८ ॥

प्रह्लाद उवाच–

त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम् ।
मन्ये महानस्य कृतोऽप्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ ४९ ॥

सत्यधर्मीया — शुक्रमन्त्रादिक्रमतः सम्पदं पदं चेति प्रतिपद्यमाना अविजानाना इति वदति ॥ त्वयैवेति । शोभनं मङ्गलं मन्ये । तथैवास्योपरि महाननुग्रहः कृत इत्यपि मन्ये । किमात्माऽयमनुग्रह इत्यत आह । यत् आत्ममोहनात् । मोहिकायाः श्रियो विभ्रंशितस्ततः । श्रियः सकाशात्तद्धेतुकं यदात्ममोहनं तस्माद्विभ्रंशितस्त्याजित इति तत इति वा । यद्वा आत्मनः मोहनं येन तत् तस्मात् अन्तरङ्गत्वात् । लिङ्गसर्वनामनपुंसकतेति नपुंसकता । बहिरङ्गत्वान्न अस्मत्तात्पर्यान्तरे अमृतस्येति मुक्तेर्विशेषणं इत्युक्तेरिव महाभाष्ये शक्यं च छुदपहन्तुमित्युक्तेर्विशेषणविशेष्यभावः सम्भवतीति वा ज्ञेयम् ॥ ४९ ॥

छलारी — नमनानन्तरं किं कृतवानित्यत आह ।। प्रल्हाद उवाचेति । ऊर्जितमैन्द्रपदं त्रिलोकाधिपत्यं त्वयैव दत्तमद्य तदेव हृतं च मन्ये । ऐन्द्रपदं नैतदीयं त्वयाऽपहृतं किन्तु स्वीयमेव पुनः स्वीकृतमिति भावः । तच्च शोभनमेव कृतम् । कुत इत्यत आह ।। मन्य इति । यद्यस्मादात्मनो मोहनान्मोहहेतोः श्रियो राज्यलक्ष्म्या विभ्रंशितः । अयमस्य बलेर्महाननुग्रहः कृतो हीत्यहं मन्ये ।।४९।।

लिङ्गेरी — हे वामन । त्वयैवास्य बलेरुत्कृष्टमिन्द्रस्थानं पुरा दत्तमद्येदानीं त्वयैवापहृतम् । एतदस्य शुभकरमेव मन्ये । तथाऽऽत्मनस्तस्य बलेर्मोहनात्त्वद्विषयभ्रान्तिजनिकायाः श्रियः संपदो बलिर्विभ्रंशितः प्रच्यावित इति यदयं महानस्यानुग्रहस्त्वया कृत इति च मन्ये ।। ४९ ।।

यया हि विद्वानपि मुह्यते जनस्तत्को विचष्टे गतिमात्मनो यथा ।
तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ।। ५० ।।

सत्यधर्मीया — विद्वानपि जनो यया मुह्यते तत्तस्मात्को जनो यथा यथावत् । आत्मनो गतिं गम्यस्थानं विचष्टे पश्यति । गतिं स्वस्थितिं वा । अतस्तद्धरन् हरिर्महान्तमनुग्रहं कृतवानिति तद्भावः ।। ५० ।।

छलारी — मोहनत्वमेवाह ।। ययेति । विद्वानपि यतो यया श्रिया मुह्यते मोहं प्राप्नोति । तत्तस्यां श्रियां कोऽन्यः पुमान् आत्मनो गतिं स्वस्वरूपं परमात्मस्वातन्त्र्यलक्षणस्थितिं वा यथा तथावद्विचष्टे पश्यति । श्रीमदान्धत्वादिति भावः । तस्मै महाकारुणिकाय नमः ।। ५० ।।

लिङ्गेरी — यया श्रिया त्वद्विषये ज्ञानवानपि भ्रान्तो भवति । तस्मात्त्वज्जिज्ञासुः श्रिया मोहितः को जन आत्मनस्तव यथावद्गतिं विचष्टे ज्ञास्यति । तस्मै तादृशभक्तानुकंपित्वादिगुणवते जगदीश्वरायाखिलजनक्रियमाणकर्मसाक्षाद्द्रष्ट्रे नारायणाय तुभ्यं नमः ।। ५० ।।

श्रीशुक उवाच–

बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ।
प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप ।। ५१ ।।

सत्यधर्मीया — उपेन्द्रमित्युक्त्या स्वभर्तृभ्रातृतां कटाक्षयतीति ध्वनिः ।। ५१ ।।

छलारी — तदैव विन्ध्यावलिरपि वामनं प्रति वक्तुं प्रकृतेत्याह ।। बद्धमिति । तस्य बलेः पत्न्युपेन्द्रं वामनं स्त्रीत्वादवाङ्मुखी ।। ५१ ।।

लिङ्गेरी — हे नृप । साध्वी पतिव्रता तस्य बलेः पत्नी विंध्यावलिर्बद्धं पतिं वीक्ष्य भयविव्हला भक्तिपरवशा प्रांजलिरुपेन्द्रं वामनं प्रणता सत्यात्मनोऽनौद्धत्यप्रदर्शनायाधोमुखी सती वक्ष्यमाणं बभाषे ॥ ५१ ॥

विन्ध्यावलिरुवाच–

क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते
स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ।
कर्तुः प्रभोस्तव किमस्य त आवहन्ति
त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ ५२ ॥

सत्यधर्मीया — सर्वनाथ मन्नाथगर्वफलमियदलमिति लपति ॥ क्रीडार्थमिति । ते त्वयेदं त्रिजगदात्मनः स्वस्य क्रीडार्थम् । तत्र जगति । हे तत्र कृतजगद्रक्षक ईश । अपरे कुधियः कुत्सितबुद्धयः स्वाम्यं कुर्युः । ते स्वस्वाम्यज्ञाः कर्तुः स्वतन्त्रस्य प्रभोरस्य तव किमावहन्ति विपरीतं किं चरन्ति । तव तेन न काऽपि हानिरिति भावः । त्वदवरोपितकर्तृवादास्त्वत्तोऽवरोपितोऽवतारितः स्वेष्वारोपितश्च कर्तेति वादो येषां ते । न हि हरिः कर्ता कर्तारो वयमिति वादयुक्ताः । कथं ते कत्थन्तेऽनुभवबाधितं कुर्वन्ति कारयन्ति न पारयन्तीत्यत आह ॥ त्यक्तह्रिय इति । निर्लज्जा इति । कर्तुः प्रभोस्तन्नैरपेक्ष्येण कर्तुं समर्थस्य । ते कर्तृतया स्वात्मना मन्यमानाः किं कां साहितीं त आवहन्ति कुर्वन्ति ते चैवंविधा इत्याह ॥ त्वदवरोपितकर्तृवादा इति । अन्तरान्तराययापने गमितकर्तृत्वव्यवहाराः अत एव त्यक्तह्रिय इति वा । अर्थादहन्ताफलमिदं पर्याप्तमिति मोचयति । स्वत एवेति मतिमती मोचयेति मोचोरूर्न सूचयामासेति चातुरीमत्यातुरतायामपीति ज्ञेयम् । अस्यतः क्षिपतः किमावहन्तीति वा ॥ ५२ ॥

छलारी — हे ईश स्वामिन् । आत्मनः स्वस्य क्रीडार्थं ते त्वयेदं त्रिजगत्कृतमुत्पादितम् । तत्र त्रिजगत्यपरेऽन्ये कुधियोऽसुरप्रकृतयः स्वाम्यं स्वामित्वं कुर्युः । वयमस्य जगतः स्वामिन इति जल्पन्ति । ते तादृशाः कुबुद्धयोऽस्य जगत्कर्तुः प्रभोः पालकस्य स्वामिन इत्यर्थः । तव किं वस्त्वावहन्ति समर्पयन्ति । कं पदार्थं दद्युरित्यर्थः । कथम्भूताः । त्वयाऽवरोपिताश्चालिताः कर्तृवादा वयं कर्तार इति वादा येषां ते तथा । अत एव त्यक्ता ह्रीर्लज्जा यैस्ते तथा ॥ अयं भावः । लोकत्रयं मया समर्पितं तृतीयपादाय देहं समर्प्य प्रतिश्रुतं सत्यं करोमि त्वत्स्वकीयेषु देहादिषु स्वाम्याविष्कारेण

ब्रुवन् बलिः कुबुद्धिर्निलज्जश्च । यतस्त्वमेव सर्वस्यापि स्वाम्यतो मन्दबुद्धिमेनं केवलं कृपया विमुच्य पालय ॥ ५२ ॥

लिङ्गेरी — हे ईश सर्वस्वामिन्वामन । त्वयेदं जगत्त्रयं तव क्रीडार्थं कृतम् । तत्र त्रिजगद्विषये कल्याद्यावेशेन कुत्सितबुद्धयः स्वाम्यं वयमस्याधिपतय इत्यभिमानं कुर्युः । विचार्यमाणे परित्यक्तलज्जाः ते यतस्तत्तत्काले तत्तदद्दष्टानुसारेण विविधापदं प्रापयित्वाऽवरोपितः प्रच्यावितो ''वयमस्य कर्तारः'' इति वादो वचनं येभ्यस्ते तथा भवन्ति । अतस्ते सर्वे जगतां वस्तुतः कर्तुः प्रभोः स्वामिनस्तव किमनिष्टमावहंत्यापादयन्ति । अनेन स्वपतेर्बलेरसुरावेशेन कृतं जगत्स्वामित्वाद्य-भिमानापराधं दयासमुद्रस्त्वं क्षन्तुमर्हसीत्यभिप्रायः सूच्यते ॥ ५२ ॥

श्रीशुक उवाच–

तस्या नु शृण्वतो राजन् प्रह्लादस्य कृताञ्जलेः ।
हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥ ५३ ॥

सत्यधर्मीया — तस्याः नु इति छेदः । बद्धाञ्जलेरिति बलिललनाप्रल्हादविशेषणम् । नु नुम इति । बद्धाञ्जलेर्विन्ध्यावल्यास्तस्याः सत्याः कृताञ्जलेः प्रल्हादस्य च शृण्वतः सतः । मधुसूदनं हरिं भगवान्हिरण्यगर्भ उवाच ॥ नुम इति । नोरर्थ इति नुमो लोप इति ऋग्भाष्याद्युदाहरणपूर्वकं पूर्वस्कन्धविवृतौ व्यालेख्यमस्माभिर्विभावनीयम् । मध्ये प्रल्हादप्रस्ताव विन्ध्यावलिस्तुतिव्यवहितेस्त-स्येत्यनेन प्रल्हादपरामर्शः क्लिष्ट इति शङ्काविच्छविरेवमन्वये ज्ञेया । परस्यानुशृण्वत इत्यादि पद्यं प्राक् पठित्वा विवरणं विधाय बद्धं वीक्ष्येति पद्यं च व्याकृत्य क्रीडार्थमात्मन इति विन्ध्यावलिवचनं सङ्गमयितुं प्रपूर्वश्लोकस्थोवाचेत्यस्य किञ्चिद्वक्तुं प्रवृत्त इति तथा तदुत्तरश्लोकस्य तदैव विंध्यावलिरपि प्रवृत्ता तां संमानयितुं हिरण्यगर्भः क्षणं तूष्णीं स्थितः । अतस्तस्या एव वाक्यं प्रथममवतारयति । बद्धं वीक्ष्येति व्याख्याछ्रममपारमवाप्नोदिति मन्तव्यम् । चिरन्तनकोशेषु न तथा पाठश्चेति । सूदनं सूदयतीति स तथा दर्शयन्तम् हरिं प्रति मधु यथा भवति तथा वचनश्रवणेन दयोदयात्तथोवाचेति वा ॥ ५३ ॥

छलारी — तदेव प्रल्हादस्य विन्ध्यावलेश्च परमार्थोक्त्या प्रसन्नं हरिं प्राप्यागत्य लोकदृष्ट्यैव विज्ञापयति ॥ तस्येति । तस्य प्रल्हादस्य शृण्वतः सतो हिरण्यगर्भो ब्रह्मोवाच विज्ञापयामास ॥५३॥

लिङ्गेरी — हे राजन्! कृतांजलेस्तस्यानुशृण्वतः सतो भगवांश्चतुर्मुखो मधुसूदनमुवाच ॥ ५३ ॥

ब्रह्मोवाच–

भूतभावन भूतेश देवदेव जगन्मय ।
मुञ्चैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥ ५४ ॥

सत्यधर्मीया — हृतसर्वस्वमिति सरलः पाठः हृतसर्वस्वमिति पाठेऽपि गतसर्वस्वमित्यर्थः । अयं बलिर्निग्रहमितः परं नार्हति ॥ ५४ ॥

छलारी — विज्ञापनप्रकारमेवाह ॥ भूतभावनेति त्रिभिः । भूतानि भावयत्युत्पादयतीति तथा । भूतानामीश नियामक । देवानां देव स्तुत्य । जगन्मय जगत्प्रधान । त्वं हृतं स्वीकृतं सर्वस्वं यस्य तमेनं बलिं मुञ्च मोचय । अयं बलिर्निग्रहं बन्धनं नार्हति ॥ ५४ ॥

लिङ्गेरी — तद्वचनप्रकारमेव दर्शयति ॥ भूतभावनेत्यादिना । भूतानां प्राणिनां आकाशादीनां च भावनोत्पादक जगद्व्याप्त! देवानामपि देव सर्वदेवेश वामन! त्वमपहृतसर्वस्वमेनं बलिं वारुणपाशेभ्यो मुंच । अयं बलिस्त्वद्भक्तियुक्तस्त्वन्निग्रहं नार्हति ॥ ५४ ॥

कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ।
निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥ ५५ ॥

सत्यधर्मीया — कर्मार्जिताः पुण्यकर्मसंपादिताः । युद्धादिभिः कर्मभिरार्जिता इति वा । सर्वं निवेदितम् । अविक्लवया धिया । आत्मा च देहश्च निवेदितः । कुरु मे शीर्ष्णीत्युक्तेः ॥ ५५ ॥

छलारी — निग्रहानर्थत्वे हेतुमाह ॥ कृत्स्नेति । अनेन बलिना कृत्स्ना समस्ता भूर्भूमिस्ते तुभ्यं दत्ता । कर्मणाऽर्जिताश्च संपादिताश्च ये लोकाः स्वर्गादयस्ते च दत्ताः सर्वस्वं निवेदितम् । सर्वस्वमेवाह ॥ आत्मेति । देहाख्यं सर्वस्वमित्यर्थः। अविक्लवया सर्वस्वदानाच्चांचल्यरहितया धिया ॥५५॥

लिङ्गेरी — तद्भक्तिमेव प्रकटयति ॥ कृत्स्नेत्यादिना । अनेन बलिना ते कृत्स्ना समस्ता भूर्दत्ता । स्वकर्मार्जिता ये लोकाः स्वर्गादयस्ते च दत्ताः । आत्मनस्तव अविक्लवयाऽऽधीनया बुद्ध्या सर्वस्वं च निवेदितम् ॥ ५५ ॥

यत्पादयोरशठधीः सलिलं प्रदाय
दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अप्युत्तमां गतिमसौ भजते त्रिलोकीं
दत्वा न विक्लवमनाः कथमार्तिमृच्छेत् ॥ ५६ ॥

सत्यधर्मीया — विदितभगवच्चित्तो हिरण्यगर्भः पुत्रत्वदाक्षिण्येन सहेतेति झटिति मुञ्चेत्युक्त्वेदानीं पर्यायेण तत्सपर्यामभिधाय स्वामिन्निति पारोक्ष्येणापि वदति ॥ यत्पादयोरिति । यः कोऽप्यशठधीरशठा ऋजुर्धीर्यस्य । शठधीर्न भवतीति स तथा वा । सलिलं जलपात्रं प्रदाय । तथा दूर्वाङ्कुरैरेव सतीं सपर्यां पूजां विधायाप्युत्तमां गतिं भजति । असौ तु न विक्लवमनस्कस्त्रिलोकीं दत्वा स्थित आर्तिं पीडां कथमृच्छेत्प्राप्नुयात् । उत्तमांगतिम् । उत्तमाङ्गस्य तिरानन्दम् । आनन्दं तीति वै वदेदिति तात्पर्यान्तरात् । उत्तमाङ्गं शिरः शीर्षमित्यमरः । तत्समर्पणजनितानन्दं विक्लवमना न भेजे योऽसौ कथमार्तिमृच्छेदित्यावर्त्यान्वयो वा ॥ ५६ ॥

छलारी — तदेव कैमुत्येनाह ॥ यत्पादयोरिति । अशठा निष्कपटा धीर्यस्य सः । सर्वोऽपि जनो यस्य तव पादयोः सलिलमात्रमपि प्रदाय दुर्वाङ्कुरैरपि सतीं समीचीनां सपर्यां पूजां विधायोत्तमां गतिं भजते प्राप्नोति । तस्मै तुभ्यं त्रिलोकीं दत्वाऽपि न विक्लवमनाः स्थिरमना असौ बलिरार्त्तिं दुःखं कथं ऋच्छेत्प्राप्नुयात् ॥ ५६ ॥

लिङ्गेरी — त्वद्भक्ततया त्वदनुग्रहपात्रत्वादस्य दुःखमात्रमपि न स्यादिति कैमुत्येनाह ॥ यत्पादयोरिति । अशठा कपटरहिता धीर्यस्य सोऽधिकारी यस्य तव पादयोर्जलं दत्वा पादौ प्रक्षाल्य दूर्वाङ्कुरैरपि सतीं भक्तिं श्रद्धोपेततया निर्दुष्टां सपर्यां विधायाप्युत्तमां गतिं प्राप्नोति । असौ तु बलिर्न विक्लवमपरवशमचञ्चलं मनो यस्य तथा सन् त्रिलोकीं ते दत्वाऽप्यार्तिं दुःखं कथं गच्छेन्न कथमपि ॥ ५६ ॥

श्रीभगवानुवाच–

ब्रह्मन् यमनुगृह्णामि तद्वित्तं विधुनोम्यहम् ।
यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥ ५७ ॥

सत्यधर्मीया — विरिञ्चं स्वं प्रति वदन्तं लक्षीकृत्येतरान्प्रति स्वाभिप्रायं श्रीपतिराह ।। ब्रह्मन्निति। अहं यमनुगृण्हामि यदुपर्यनुग्रहं कर्तुं कामये तद्वित्तं विधुनोमि हरिष्यामि । कुतो हरे हरणमित्यतस्तत्कारणमाह ।। यदिति । यन्मदो यद्वित्तहेतुकमदवान् स्तब्धः सन् लोकं मां चावमन्यतेऽवजानीते अतो विधुनोमि । लोकं ज्ञानिजनं वा ।। ५७ ।।

छलारी — यद्यपि ब्रह्मा भगवदभिप्रायं वेत्ति तथाऽपीतरेषां तज्ज्ञापनाय स्वाभिप्रायं भगवान्वक्ति । ब्रह्मन् चतुर्मुख । तद्वित्तं विधुनोम्यपहरामि । नन्वर्थापहारः कोऽयमनुग्रहस्तत्राह ।। यन्मद इति । यद्वित्तनिमित्तमदोऽत एव स्तब्धोऽनम्रः सन् लोकं परलोकं मां चावमन्यते तिरस्करोति । म दस्तब्धहेतूनामर्थानामपहार एवानुग्रह इत्यर्थः ।। ५७ ।।

लिङ्गेरी — भगवान्वामनो भक्तानुकंपितया ब्रह्माणं निमित्तीकृत्य तदितरस्वभक्तजनं शिक्षयति ।। ब्रह्मन्निति । हे ब्रह्मन् । अहं यमनुगृण्हामि यस्मिन्ननुग्रहं करोमि तस्य वित्तं द्रव्यं विधुनोमि अपहारादिना नाशयामि । तन्नाशेन कथं तवानुग्रह इत्यतस्तद्द्रव्यस्य दोषापादकत्वमुपपादयति ।। यन्मदेति । पुरुषो यस्य द्रव्यस्य मदोपेतः सन् स्तब्धः स्वोच्चेष्वनम्रशिरस्कत्वादिः सन् मां मद्भक्तं लोकं जनं चावमन्यतेऽवमानयति । तस्मात्तदपहारेण तद्दोषनिराकरणेनास्मदादिषु तस्य भक्तिरेव मयोत्पाद्यते इति ।। ५७ ।।

यदा कदाचिज्जीवात्मा संसरन् निजकर्मभिः ।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ।। ५८ ।।

सत्यधर्मीया — दुर्लभं मानुषं जन्म । तत्र मदवांश्चेन्नश्येदयमिति तद्दयां कर्तुमेव हर्तुं तन्निमित्तं वित्तं प्रवृत्तिरियं इत्याह ।। यदा कदाचिदिति । निजकर्मभिर्जन्मापादकैः । अनीशोऽस्वतन्त्रः । यन्त्रारूढानि मायया भ्रामयन् सर्वभूतानि हृद्देशेऽर्जुन तिष्ठतीत्यादेः पौरुषीं गतिं योनिमाव्रजेत् ।।५८।।

छलारी — दुर्लभं पुरुषजन्म कथञ्चिल्लब्धवतो जीवस्य जन्मनिमित्तो गर्वो महाहानिकरः । तस्य च नाशो मदनुग्रहादेवेत्याह ।। यदेति द्वाभ्याम् । जीवात्माऽनीशः परतन्त्रः सन् कर्मभिर्नानायोनिषु कृमिकीटादिषु संसरन् । यदा कदाचिद्दैववशात्पौरुषीं गतिं योनिमाव्रजेत् ।। ५८ ।।

लिङ्गेरी — नानायोनिषु मानुषयोनिरेव दुर्लभा । तत्रापि यः स्तंभाद्यभावः स आराधितमदनुग्रहो मदनुग्रहादेवेति ज्ञातव्यमित्याह ।। यदा कदाचिदिति । अनीशोऽनाद्यनन्तकालेऽपीश्वराद्यत्यन्तभिन्नोऽयं

जीवात्मा स्वपूर्वार्जितकर्मभिर्नानायोनिषु संचरन् सन्पुण्यवशाद्यदा कदाचित् पौरुषीं मानुषीं गतिं स्थितिमाव्रजेद्गच्छेत् ॥ ५८ ॥

जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ।
यद्यस्य न भवेत् स्तम्भस्तत्रायं मदनुग्रहः ॥ ५९ ॥

सत्यधर्मीया — यदि अस्य मानुषं जन्मात्यवतः । सद्भिर्जन्मादिहेतुभिः । स्तम्भ इतरेषु तत्कार्यत्वेनार्यसंमतो न स्यात्तर्हि तत्रायं ममानुग्रहः । तत्र पुरुषयोनौ ॥ ५९ ॥

छलारी — तत्र पौरुष्यां गतौ यद्यस्य जीवात्मनो जन्मादिभिर्निमित्तैर्जातेन मदेन स्तम्भो मदर्चनादौ तन्द्रीलक्षणो न भवेत् । तर्ह्ययं मदनुग्रह एव । अहं सुकुलीन इति जन्ममदोऽहं कर्मकरणे निपुण इति कर्मनिमित्तमदः। वयः तारुण्यस्थाः रूपं सौन्दर्यम् । आदिशब्देन पुत्रादिसंपत्तिः ॥५९॥

लिङ्गेरी — तत्र मानुषदेहे यद्यस्य जीवस्य जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः सत्कुलप्रसूतत्व-स्ववर्णाश्रमविहितकर्मकरणतारुण्यसौन्दर्यशास्त्रादिजन्यज्ञानैश्वर्यद्रव्यादिभिः स्तम्भो न भवेत्तर्हि तस्य मदनुग्रहोऽस्तीति ज्ञातव्यम् ॥ ५९ ॥

मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः ।
सर्वश्रेयःप्रतीपानां हन्त मुह्येन्न मत्परः ॥ ६० ॥

सत्यधर्मीया — समंततः सर्वत्राप्यननुगृहीते । सर्वश्रेयःप्रतीपानाम् । तद्विरुद्धानां मानस्तम्भनिमित्तानां जन्मादीनां सकाशान्मत्परो न मुह्येदिति । मत्परता चैवं सति भवति नेतरथेति हरणं द्रविणस्येति भावः ॥ ६० ॥

छलारी — कथं तर्हि ध्रुवादिभ्यो संपदो दास्यसीति चेत्तत्राह ॥ मानेति । हन्त । हे ब्रह्मन् । मानेन गर्वेण स्तम्भोऽनम्रता तस्य निमित्तभूतानां समन्ततः सर्वत्र सर्वश्रेयसां प्रतीपानां प्रतिकूलानां जन्मादीनां सत्वेऽपि जन्मादिभिरिति वा । मत्परो मद्भक्तो न मुह्येत् । अतो भक्तस्येच्छया संपदादिकं ददामि । अभक्तस्तु मुह्येदिति तद्वित्तापहाररूपमेव तस्यानुग्रहं करोमीति भावः ॥ ६० ॥

लिङ्गेरी — स्वभक्तलक्षणवत्त्वेनायमपि स्वभक्त इति तल्लक्षणमाह ॥ मान इत्यादिना । सर्वेषां श्रेयसां प्रतीपानां विरोधिनामहंकारस्तंभहेतूनां पूर्वोक्तजन्मादीनां सकाशाद्यो न मुह्येत् भ्रान्तो न भवेत् स मत्परमो भक्त इति ॥ ६० ॥

एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ।
अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ ६१ ॥

सत्यधर्मीया — प्रस्तुतस्तुत्या निगमयति ॥ एष इति । अजयाम् । न विद्यते जयो यस्याः सा ताम् । सीदन्नपि यन्न मुह्यति तदजैषीज्जितवान् ॥ ६१ ॥

छलारी — एतादृशः क इत्यपेक्षायामयं बलिरेवेदानीं मद्भक्तोऽतोऽस्यान्यैर्दुष्प्राप्यमप्यैश्वर्यं दास्यामीति वक्तुं तस्य मोहाभावमाह ॥ एष इति त्रिभिः । एष बलिः । न विद्यते जनो यस्याः साऽजयाताम् । मायां मोहिनीं प्रकृतिमजैषीज्जितवान् अत एव सीदन्नपि क्लिश्यन्नपि न मुह्यति ॥६१॥

लिङ्गेरी — एष बलिः सीदन्नपि दुःखसाधनपाशबन्धादिप्राप्तोऽपि न मुह्यति मम स्वातन्त्र्यस्वोत्कर्षादौ भ्रान्तो न भवति यतोऽतो मदनुग्रहेण विना जेतुमशक्यां मायां मोहनशक्तिं जडप्रकृत्यादिरूपां च जितवान् । अत एवैषो दानवदैत्यानामग्रेसरः कीर्तिवर्धनश्च ॥ ६१ ॥

क्षणाद् विभ्रंशितः स्थानात् क्षिप्तो बद्धश्च शत्रुभिः ।
ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ ६२ ॥

गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ।
छलैरुक्तो मया धर्मो नायं त्यजति सत्पथम् ॥ ६३ ॥

सत्यधर्मीया — मोहाभावमेव विवृणोति ॥ क्षणादिति । शत्रुभिर्वैनतेयादिभिः ज्ञातिभिः स्वकीयैः स्वगोत्रैः परित्यक्तो यातनां तीव्रवेदनामनुयापितः प्रापितः । गुरुणा शुक्रेण च भर्त्सितो मूढ वर्तिष्यसे कथमिति । शप्तोऽचिराद्भ्रश्यसे श्रिय इति । सत्यं व्रतं न जहौ । मया तु धर्मः छलैर्न ह्येतस्मिन्कुले कश्चिदित्यादिभिरुक्तः तथाऽप्ययं सत्पथम् । सतां पन्थाः सत्पथस्तम् । सतां पथ इति पथशब्दोऽकारान्तो वाऽयम् । वाटः पथश्चेत्यमरः । न त्यजति न तत्याज । अधुनाऽपि नेतरथा भाषत इति त्यजतीति वोक्तिः ॥ ६२,६३ ॥

छलारी — क्षीणं रिक्थं वित्तं यस्य स तथा । शत्रुभिः सुनन्दाद्यैः क्षिप्तो निराकृतो बद्धश्च । यातनां तीव्रवेदनामनुयापितश्च प्रापितश्च ॥

गुरुणा शुक्राचार्येण भर्त्सितो निष्ठुरवचनेनोदितः सत्यं न जहौ । सत्यात्यागनिमित्तक्षीणत्वादिकं प्राप्तोऽपि सत्यं न त्यक्तवानिति भावः । न ह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमान् इत्यादि छलैरेव कपटवचनैरेव मया धर्म उक्तस्तथाऽपि तं धर्ममयं न त्यजति । अतः सत्यवाक् ॥ ६२,६३ ॥

लिङ्गेरी — वामनो बलौ स्वस्यानुग्रहविशेषं सूचयितुं स्तौति ॥ क्षीण इत्यादिना । एषो बलिर्मयैश्वर्येण क्षीणः स्थानाद्विभ्रंशितः क्षिप्तो निष्ठुरैस्तिरस्कृतः शत्रुभिर्मद्भृत्यैर्गरुडादिभिर्बद्धश्च स्वज्ञातिभिरसुरैः परित्यक्तश्चैवं तीव्रवेदनामनुयापितः प्रापितस्तथा गुरुणा शुक्रेण भर्त्सितः शप्तश्च । तथाऽपि यथार्थभाषणं त्रिपदं दास्याम्येवेतिरूपं न जहौ । मयाऽस्मै छलेन व्याजेन धर्म उक्तस्तथाऽप्यसौ सत्यवाक् सत्यं न त्यजति ॥ ६२,६३ ॥

एवं मे प्रापितं स्थानं दुष्प्रापममरैरपि ।
सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥ ६४ ॥

सत्यधर्मीया — अपहृत्य राज्यं, बध्वा च तं, शीर्ष्णि च कृत्वा पदं कर्तव्यं वा किं मनुषे भगवन्नित्यतो ब्रवीति ॥ एवमिति । एवं कृत्वा मे मयाऽमरैरनीन्द्रपदयोग्यैर्दुष्प्रापं स्थानम् प्रापितः । मनसा सङ्कल्पितत्वाज्जल्पनमेवमिति मेयम् । सावर्णेस्तन्नामकमनोः अन्तरस्य कालस्य सम्बन्धीन्द्रो भविता भविष्यति । तत्रापीदानीममदाश्रयो मदस्याश्रयो नेति । अतःस मदाश्रयः अहमाश्रयो यस्य स तथा ॥ ६४ ॥

छलारी — त्वद्भक्ताय तस्मै भवता किमनुग्रहो यत इत्यत आह ॥ एवमिति । मे मयाऽमरैरपि दुष्प्राप्यं प्राप्तुमशक्यं स्थानं प्रापितः । किं तत्स्थानमत्राह ॥ सावर्णेरितीति । अहमेवाश्रयः पालको यस्य स मदाश्रयोऽयं बलिः । सावर्णेरन्तरस्य सावर्णिमन्वन्तरस्य काले इन्द्रो भविता भविष्यति । स्वर्गस्थानं दत्तमिति भावः ॥ ६४ ॥

लिङ्गेरी — बलिं वामन एवं भक्त्या प्रसन्नस्तं बहुमानयित्वा तस्य फलदानप्रतिज्ञां करोति ॥ एवमिति । अयं बलिरेवं पूर्ववदेवामरैरपि प्राप्तुमशक्यं स्थानं प्रापितः । तदेव स्थानं दर्शयति । अयं मदाश्रयः सन् सावर्णेर्मनोरन्तरस्येन्द्रो भविष्यतीति ॥ ६४ ॥

तावत् सुतलमध्यास्तां विश्वकर्मविनिर्मितम् ।
यत्राधयो व्याधयश्च क्लमस्तन्द्री पराभवः ॥ ६५ ॥

सत्यधर्मीया — तावत्सावर्ण्यन्तरपर्यन्तं विश्वकर्मनिर्मितं सुतलमध्यास्ताम् । अधितिष्ठतु । तत्सुतलमाहात्म्यमाह ॥ यत्रेति । आधयो मनोव्यथाः । व्याधयो रोगाः । क्लमो दैन्यम् । तन्द्री आलस्यम् । पराभवः पराजयः ॥ ६५ ॥

छलारी — तर्हि तावत्पर्यन्तं कुत्र स्थातव्यमित्यत आह ॥ तावदिति । तावत्सावर्णि-मन्वन्तरपर्यन्तं सुतललोकमध्यास्तामध्यवसत्वित्यर्थः । तत्रान्यक्लेशानुभवो नास्ति किं पुनरस्येति भावेनाह ॥ यत्रेति । यत्र पराभवः शत्रुभिः पराजयः ॥ ६५ ॥

लिङ्गेरी — तर्हि तावत्कालमनेन कुत्र स्थातव्यमित्यत आह ॥ तावदिति । अयं बलिस्तावत्कालं विश्वकर्मविनिर्मितं सुतलं सुतललोकेऽध्यास्ताम् । यत्र सुतले आधयो मनोव्यथादयो व्याधयो भगन्दरादयः क्लमः श्रमस्तंद्र्यालस्यं पराभवोऽपजय इत्यादीन्युपसर्गाण्युपद्रवा ममेच्छया यत्र वसतां न भवन्ति तम् । अधि शीङ् स्थासां कर्मेति कर्मसंज्ञा सुतलमित्यधिकरणे द्वितीया । पुंस्याधीर्मानसी व्यथा । तन्द्री प्रमीलेति चामरः ॥ ६५ ॥

नोपसर्गा निवसतां सम्भवन्ति ममेच्छया ।
इन्द्रसेन महाराज याहि भो भद्रमस्तु ते ॥ ६६ ॥

सत्यधर्मीया — उपसर्गा इतरोपद्रवाः । निवसतां जनानां सम्भवन्ति सम्भावनार्हा अपि न । इतरेषामेवं तव तु नेति किं वक्तव्यमिति परोक्षत उक्त्वा साक्षात्तं स्वयं सम्बोध्य बोधयति ॥ ममेच्छयेन्द्रसेनेति । ममेच्छया मत्संमत्येति यावत् । महाराज इन्द्रसेन सुतलं याहि । ते भद्रमस्तु ॥ ६६ ॥

छलारी — उपसर्गा दुर्भिक्षाद्युपद्रवाः । ममेक्षया कृपादृष्ट्या न संभवन्ति । एवं ब्रह्माणं प्रत्युक्त्वा करुणायापरवशः साक्षाद्बलिं प्रत्याह ॥ इन्द्रसेनेति चतुर्भिः । भो इन्द्रसेन बले । ज्ञातिभिः परिवारितः सन् सुतलं याहि । ते भद्रं मङ्गलमस्तु ॥ ६६ ॥

लिङ्गेरी — हे महाराज इन्द्रसेन बले । ते मङ्गलमस्तु । त्वत्ज्ञातिभिरसुरैः परिवारितः सन् स्वर्गस्थैरप्यपेक्षितं सुतलं पाहि रक्षस्व ॥ ६६ ॥

सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ।
न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे ॥ ६७ ॥

सत्यधर्मीया — स्वर्गिभिर्दैवैरपि । तर्हीद्रादयस्तत्राप्युपद्रवं कुर्युस्तल्लोकाधिकतायामित्यत आह ॥ लोकेशा इति । लोकेशा महान्तोऽपरे क्षुद्राः । परि परितो वारितो वार्भिरितः । एतेन वारिपरिवारितपरिखातः इतराशक्यतामप्याहेति ज्ञेयम् ॥ ६७ ॥

छलारी — स्वर्गिभिः स्वर्गस्थैः प्रार्थ्यम् । स्वर्गिभिरपेक्षणीयं चेत् । स्पर्धयेन्द्रादयो लोकेशा मामभिभविष्यन्ति इति तत्राह ॥ न त्वामिति । राज्यं त्यक्त्वाऽऽगतस्य तव शासने वयं न तिष्ठाम इति वदतां दण्डार्हत्वादिति ॥ ६७ ॥

लिङ्गेरी — तत्र तस्यापि भयं नास्तीत्याह ॥ न त्वामिति । लोकेशा इन्द्रादयोऽपि स्वर्गिभिः प्रार्थ्ये सुतले स्थितं त्वां न तिरस्कुर्वन्ति । अपरे न तिरस्कुर्वन्तीति किमु वक्तव्यम् ॥ ६७ ॥

त्वच्छासनातिगान् दैत्यान् चक्रं मे सूदयिष्यति ।
रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ॥ ६८ ॥

सत्यधर्मीया — तत्र त्वदाज्ञाऽवज्ञातृणामज्ञानामसुराणां दशेदृशीति शंसति ॥ त्वच्छासनेति । चक्रं सूदयिष्यति । अनेन चक्रमात्रं स्थापयामीत्युक्तं स्यादित्यत आह ॥ रक्षिष्य इति । तत्र मां सदा संनिहितं भवान् द्रक्ष्यते । स्वस्य स्ववाटं प्रति गमनसमये दौवारिकवारिणं ततोऽन्तरेव गतवता मयैतदनुभावितमितरत्रापि विनाऽऽज्ञां राज्ञः कश्चिदन्तर्न निवेशेतेति मयैव जाग्रता भवितव्यमिति द्वारपं सन्तं बलेर्द्वारिस्थोऽहमित्याचार्योक्तेः । किञ्च रावणस्य स्वदौवारिकजयतया तत्पराजयस्तद्रूप-धारिणैव कार्य इति वा तथा । इदमप्यूचे सचेताः । तेन मया रक्षोऽस्तं योजनमयुतं पदाङ्गुल्येति मारणं रावणस्य तदानीं नाभूदिति शङ्कांकुरार्पणं देवेन तदैव कृतमतो मयैवेत्युक्त्या पराकृतम् । नृसिंहस्तु द्वार्येवापत्येत्युक्ते द्वार्येवारिं ददार । श्रीदामोदरो दूत्यकृत्ये नियुक्त इति युक्तं हननमवतारत्रिकेण तदसुरत्रिकहननमेवमिति भावमाविर्भावयन्ति ॥ ६८ ॥

लिङ्गेरी — गतैश्वर्यादिकस्य ममाज्ञातिक्रमे दैत्यैः क्रियमाणैरेकाकिनैव मया तत्र कथमवस्थेयमित्यत आह ॥ त्वच्छासनातिगानिति । त्वच्छासनातिगान्दैत्यान्मे चक्रं हनिष्यतीति । लोकेशादिभ्योऽप्यधिकदेवासुरपीडायां किं कार्यमत आह ॥ रक्षिष्य इति । किं बहुना सर्वतः सर्वापद्भ्योऽहं भृत्यसामग्रीसहितं त्वां रक्षिष्य इति ॥ ६८ ॥

सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ।

तत्र दानवदैत्यानां सङ्गात् ते भाव आसुरः ।
दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनङ्क्ष्यति ॥ ६९ ॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे विंशोऽध्यायः ॥ ८-२० ॥

सत्यधर्मीया — आसुरो भावो मदनुभावं दृष्ट्वा स्थितस्य । सद्यः कुण्ठो यस्य स सन् विनंक्ष्यति नश्यति । मयि सति । सर्वे सुपर्वाणोऽप्यविरोधेन स्थितप्राया इत्यभिप्रायेणाप्याह ॥ सदासमिति । दासैः सहितं सदासम् । निहितं सन्निहितम् । अनिष्टनिवृत्तिरेव हरे उपपादिता मुक्तिर्न युक्ता किमित्यतोऽप्याह । वै सद्यः कुण्ठो वैकारः सद्यः सदनीयो योजनीयः सङ्गमनीयः । कुण्ठपदात्पूर्वं ततश्च वैकुण्ठ इति पदसंपत्तिः । तव सङ्गात् सङ्गमयति गच्छतीति स तथा । प्राप्तो भवति भवतापवर्ग इति भाव आन्तरङ्गिकः ॥ ६९ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
अष्टमस्कन्धे विंशोऽध्यायः ॥ ८-२० ॥

छलारी — त्वच्छासनं त्वदाज्ञामधिगच्छन्त्यतिवर्तन्त इति । तथा तान्सूदयिष्यति हरिष्यति । किं बहुनोक्तेन सर्वतो मद्रक्षावज्रं संनिहितं, त्वत्समीपे विद्यमानं मां भवान्सदा द्रक्ष्यते पश्यति । तत्राप्ययमनर्थस्तदवस्थ एव दानवादीनां संसर्गादिति शङ्का मा भूदित्याह ॥ तत्रेति । संगाद्य आसुरो भावः स मदनुभावं मम महिमानं दृष्ट्वा । सद्यःकुण्ठ इत्येकं पदम् । सद्यः कुण्ठश्छेदो यस्य स यः कुण्ठः सन् विनक्ष्यति निर्मूलो भविष्यतीत्यर्थः ॥ ६८, ६९ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे विंशोऽध्यायः ॥ ८-२० ॥

लिङ्गेरी — तव दर्शनाभावे सर्वमिदं व्यर्थमित्यत आह ॥ सदेति । हे वीर । सर्वस्मिन्काले तत्र त्वत्समीपवर्तिनं मां त्वं द्रक्ष्यसे द्रष्टाऽसि । ननु त्वदाज्ञया तत्र दानवादिभिः सह मया वासे क्रियमाणे दुष्टतत्संगत्या ममासुरभावप्राप्त्या पुनस्त्वय्यभक्त्याद्यनर्थप्रसक्तिः स्यादित्यत आह ॥ तत्रेति । मदनुभावं माहात्म्यं दृष्ट्वा स्थितवतस्तव दानवदैत्यप्रसङ्गात्प्रसक्तासुरो भावः सद्यस्तत्क्षणादवकुण्ठः स्वकार्यजनने निरुद्धः सन् विशेषतः समूलघातं नष्टो भविष्यति । अतस्ते न काऽपि शङ्का तत्र कार्येति भावः ॥ ६९ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे विंशोऽध्यायः ॥ ८-२० ॥

॥ अथ एकविंशोऽध्यायः ॥

श्रीशुक उवाच–

इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसम्मतः ।
बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥

सत्यधर्मीया — भगवद्भक्तेर्न किमपि दुःसाधमिति बोधयितुमयमध्यायः । तत्रादौ बलिराज्ञान्ते किं चकारेत्यत आह ॥ इत्युक्तवन्तमिति । भक्त्युद्गलो भक्त्योद्गतो भाषणप्रतिबन्धकतया तत्प्रायो गलो यस्य सः सद्भक्तिरसस्योद्गल उद्गलनं यस्येति वा ॥ १ ॥

छलारी — ततो बलिः किं कृतवानित्यत आह ॥ इत्युक्तवन्तमिति । महान् अनुभावो महिमा यस्य सः । बाष्पस्यानन्दबाष्पस्य कलाभिर्बिन्दुभिराकुले ईक्षणे यस्य सः । भक्तेरुत्कल उद्रेको यस्य स तथा ॥ १ ॥

लिङ्गेरी — स्वादृष्टेन महाऽऽपदि प्राप्तायामपि हरौ भक्तिः कर्तव्येति निदर्शनाय बलिभक्तिकरणप्रकाराद्याहास्मिन्नध्याये इत्युक्तवन्तमित्यादिना । पूर्वोक्तरीत्या महान् अनुभावः प्राप्तानिष्टसहनादिसामर्थ्यं यस्य स तथा । अत एव साधूनां संमतो भक्तिवशेन बद्धांजलिर्बाष्पकलाभिर्नेत्रोदकबिन्दुभिः चञ्चललोचनो भक्त्युद्गृहीतकण्ठस्वरो बलिरित्युक्तवन्तं पुरातनं पुरुषं नारायणं प्रति गद्गदयाऽस्पष्टमधुराक्षरया गिराऽब्रवीत् ॥ १ ॥

बलिरुवाच–

अहो प्रसादोऽस्य कृतः समुद्यतः प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्तदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥

सत्यधर्मीया — स्वमनस्येवादौ । अस्यानेन कृतः प्रसादोऽहो अत्याश्चर्यकरः । इति विस्मये । चित्रतामेव बहिः प्रकटयति ॥ समुद्यत इति । यः प्रपन्नभक्तार्थविधौ प्रपन्नाः शुद्धसात्त्विकास्ते च भक्ताश्च तेषामर्थः प्रयोजनं च तस्य विधौ विधाने । समाहितः सन्समुद्यत उद्युक्तः । यत् यास्तदनुग्रहो लोकपालैरमरैरलब्धपूर्वः पूर्वमलब्धोऽलब्धपूर्वः । कदापि तदनुग्रह एवंरूपः सुपर्वभिरप्राप्तः । स मय्यर्पितः कृत इत्यहो । त्वमपि तदन्यतम इति किं चित्रणं चित्तस्य बल इत्यतो लपति ॥ असुर इति । तेऽपि साधवः सन्ति । तथा त्वमित्यतो हताशान्त्याऽऽह ॥ अपसदे नीच

इति। योऽहं अस्य कृतोऽस्यत्वेन निरस्यत्वेन कृतोऽस्य इति कृत इति वा । प्रसादः प्रकृष्टः सादः कार्श्यं यस्य सः । तस्मिन्नपसदेऽसुरे । यः प्रपन्नभक्तार्थविधौ विधाने । समाहितः समा भक्तसमा अहिता वैरिणोऽपि यस्य स तेन यत् योऽमरैर्लोकपालैरलब्धपूर्वोऽनुग्रहोऽर्पितः यतस्ततोऽहं समुदहो इति वाऽन्वयार्थौ ॥ समुद्यत इति षष्ठयन्तमस्येति विशेषणम् । वो युष्माभिर्लोकपालैरमरैरलब्धपूः अलब्धा युद्धसन्नद्धैर्भवद्भिरप्राप्ता पूः सुतलनगरी यस्य स इति । तदनुग्रहो अहो न त्वामभिभविष्यन्ति। लोकेशा इत्यनुपदमभिधानात् । अनित्यत्वात्समासप्राप्तविधेर्नाप्रत्ययोऽसुर इति दितिसुतताविवक्षया पूः सूतलनगरी मामलब्धेति वा ॥ २ ॥

छलारी — किमब्रवीदित्यत आह ॥ अहो इति । प्रपन्नानां शरणागतानां भक्तानामर्थस्य पुरुषार्थस्य विधौ संपादने एवं समाहितः सावधानतया स्थितोऽस्य तव प्रसादो मयि समुद्यतः कृतः । कालोन्मुखत्वेन कृत इति यावत् । तदहो आश्चर्यम् । भक्ताभीष्टप्रदान एव दीक्षितः प्रसादो मयि कृतः । अत आश्चर्यमिति भावः । भक्तेषु मध्ये त्वमप्येकोऽतः किमाश्चर्यमित्यत आत्मानं धिक्करोति ॥ यल्लोकेति । यद्यो लोकपालैरमरैरपि सत्त्वप्रधानैरलब्धपूर्वः पूर्वमलब्धोऽपूर्व इत्यर्थः । तादृशस्त्वदनुग्रहोऽसुरजातावपि अपसदे राजसे मय्यर्पितः । मम नीचत्वान्मयि प्रसादकरणमाश्चर्यमिति भावः ॥ २ ॥

लिङ्गेरी — समुद्यत ऊर्ध्वमभिवर्धमानस्यास्य तत्प्रसादो मयि यः कृतः, प्रपन्ना ये शरणागता भक्तास्तेषामर्थविधौ पुरुषार्थप्रदाने समाहितः सम्यक्कर्तुं योग्यो मयि कृतस्त्वहो आश्चर्यकरः । ननु तवापि मद्भक्तत्वात्कुत आश्चर्यकर इत्यतः स्वस्य भक्तत्वेऽप्येतादृशपरमानुग्रहपात्रतासंभावना नाभूदित्यात्मानं निन्दयति ॥ यल्लोकपालैरिति । यद्यस्माल्लोकपालैर्मादृशानुग्रहो पूर्वमलब्धः तादृशोऽसुरेष्वपि अपसदे नीचेऽसुरे मयि समर्पितः कृत इत्याश्चर्यकर इत्यर्थः । अत्र बलियोग्यतानुसारेण बलौ क्रियमाणोऽनुग्रहो न लोकपालेषु क्रियत इति ज्ञातव्यम् । अतो लोकपालाधिक्यशङ्काविरोधाद्यनवकाशः ॥ २ ॥

श्रीशुक उवाच–

इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ।
विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥

सत्यधर्मीया — असुरैः स्वभृत्यैः सह । मुक्तो वारुणैः पाशैर्मोचितः । सभवं सहमहादेवं अनुवादेन वादेऽप्येतदा गतिरनुक्ताऽनुसन्धेया । भवेन हरिकर्तृकेण जन्मना सहितस्तत्पुत्र इति यावत् । तं वा सभवं सहमङ्गलं वा ।। ३ ।।

छलारी — सभवं रुद्रेण सहितम् । मुक्तो वरुणपाशैः ।। ३ ।।

लिङ्गेरी — बलिर्वारुणपाशैर्मुक्तः सन् हरिं वामनं प्रतीत्युक्त्वा नमस्कृत्य च तदनन्तरं रुद्रसहितं चतुर्मुखं च नत्वा स्वैर्भृत्यासुरैः सहितः सुतलं प्रविष्टः ।। ३ ।।

एवमिन्द्राय भगवान् प्रीत्याऽऽनीय त्रिविष्टपम् ।
पूरयित्वाऽदितेः काममशासत् सकलं जगत् ।। ४ ।।

सत्यधर्मीया — अदितेः स्वमातुरदितेः रणकरणखण्डनाद्यभावेनैव त्रिविष्टपमानीयेति वा । दितिः स्यात्खण्डने दनाविति तद्विश्वः ।। ४ ।।

छलारी — त्रिविष्टपं स्वर्गं प्रत्यानीय दत्वाऽदितेः स्वमातुः कामं मनोरथं पूरयित्वोपेन्द्रः सन् सकलं जगदशासयत्पालयामास ।। ४ ।।

लिङ्गेरी — भगवान्वामन एवमुक्तप्रकारेण प्रीत्या कृपयेन्द्राय त्रिविष्टपं स्वर्गं प्रापयित्वाऽदितेः कामं मनोरथं पूरयित्वा सकलं जगच्छिक्षयामास ।। ४ ।।

लब्धप्रसादनिर्मुक्तं पौत्रं वंशधरं बलिम् ।
निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ।। ५ ।।

सत्यधर्मीया — लब्धप्रसादनिर्मुक्तं लब्धः प्रसादो हरेर्येन स चासौ निर्मुक्तश्च तम् । लब्धः प्रसादो हीच्छाविशेषो येन स हरिस्तेन निर्मुक्तस्तमिति वा । मोचयितरि भक्तिप्रवणो भक्तिनम्रः ।।५।।

छलारी — वंशधरं वंशाभिवृद्धिहेतुं लब्धः भगवत्प्रसादो येन तं पाशनिर्मुक्तं बलिं निशाम्य दृष्ट्वा प्रवणो नम्रीभूतः सन् प्रल्हादो भगवन्तं वामनं प्रतीदमब्रवीत् ।। ५ ।।

लिङ्गेरी — भक्त्या प्रवणो नम्रः प्रल्हादो भगवत्प्रसादं लब्ध्वा वरुणपाशान्मोचितं स्वस्य वंशधरं पौत्रं बलिं दृष्ट्वा वामनं प्रतीदमुवाच ।। ५ ।।

प्रह्लाद उवाच–

नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ।
यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरभिवन्दिताङ्घ्रिः ॥ ६ ॥

सत्यधर्मीया — विश्वाभिवन्द्यैर्जगद्वन्द्यैर्ब्रह्मादिभिः अभिवन्दिताङ्घ्रिरभिवन्दितावङ्घ्री यस्य सोऽपि । असुराणां रजस्तमःस्वभावानां नो दुर्गपालो द्वाररक्षकोऽसीति यत् । इमं एतद्रूपं प्रसादं विरिञ्चो लभते न । श्रीरपि न लभते । न शर्वोऽपि लभते अपरे तदितरे न लभन्त इति किमुत । एतत्तात्पर्यं सप्तम एतद्विषये नवमादौ विषयान्तरे स्पष्टमनुसंधेयम् ॥ ६ ॥

छलारी — हे भगवन् । विश्वैः समस्तैरभिवन्द्यैरभिवन्दिताङ्घ्रिस्त्वमसुराणां नो दुर्गपालो द्वारपालोऽसि । रक्षिष्ये सर्वतोऽहं त्वामित्युक्तत्वादिति यदिमं प्रसादं विरिञ्चादयो नालभन्ते । अपरे ब्रह्मादिभिन्ना ये ते नालभन्त इति किमु । श्रीब्रह्माद्यलभ्यप्रसादमस्मासु त्वं कृतवानिति भावः ॥६॥

लिङ्गेरी — हे वामन । इमं, बलौ तद्योग्यं त्वया कृतं प्रसादं श्रीर्न लभते । विरिञ्चः शर्वो रुद्रश्च न लभेते । अन्ये न लभन्त इति किमु वक्तव्यम् । यद्यस्मात्सर्वजगन्नतिस्तुतियोग्यैर्ब्रह्मादिभिरपि भक्तिस्तुतिनतियोग्यपादपद्मस्त्वमसुरजातीनामस्माकं दुर्गपालो द्वाररक्षकोऽसि ॥ ६ ॥

यत्पादपद्ममकरन्दनिषेवणेन
ब्रह्मादयः शरणदाश्नुवते विभूतीः ।
कस्माद् वयं कुसृतयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥

सत्यधर्मीया — हे शरणद ! यस्य पादपद्ममकरन्दस्य निषेवणेन ब्रह्मादयो विभूतीरैश्वर्याणि । अश्नुवते प्राप्नुवन्ति । ते वयं, ते भवत इति वाऽन्वयः । स्वरूपं स्वेषां निरूपयति ॥ कुसृतय इति । कुत्सिता सृतिर्मार्गो येषां ते तथा । कुतः कुसृतयो यूयमित्यत आह । खला योनिर्जातिरासुरी येषां त इति । दक्षिणैवौदार्यैव दाक्षिण्यं सा च सा दृष्टिश्च । दाक्षिण्यस्य दृष्टिरौदार्ययुता दृष्टिस्तस्याः पदवीम् । मार्गविषयतामिति यावत् । कस्मात्प्रणीताः प्रापिताः । नान्तरा करुणामितरन्निमित्त-मीक्षामह इति भावः । एवं छलेन बलिं निगृहीतवतो मम किं स्तुत्येत्यतो वाऽऽह । भवतो विभूतीर्विभूतयः कुसृतयः छलमार्गा न । तर्हि कथं तथा दृश्यन्त इत्यत आह । खला वयमेव योनयः

कारणानि यासां ताः । अस्मद्दुरितेन तथा चरसीति वा । निषेवणे सतीति सप्तम्यन्तम् । नञश्च न कुसृतय इत्यन्वय एतत्पक्ष इति ज्ञेयम् । कस्माद्ब्रह्मणः सकाशादेव वयं कुसृतय इति हेतोर्नोऽनयोऽन्यायस्ततश्च खलयः सुखनाशश्च भवत एतादृशा अपि वयं शिष्टं यथापूर्वम् । कस्मादिति कथं ब्रह्मवाचीति । कुशब्दः कस्मै इत्यृग्भाष्याद्युदाहरणेन प्राचि षष्ठे विवृतमस्माभिरनुसंधेयम् । तेन वा नयः कस्मादिति वा ॥७॥

छलारी — हे शरणद आश्रयप्रद । ब्रह्मादयो विरिञ्चादयो यस्य तव पादपद्मयोर्मकरन्दनिषेवणेन विभूतीरैश्वर्याण्यश्नुवतेऽनुभवन्ति । ये कुसृतयः कुत्सितमार्गा दुर्वृत्तय इत्यर्थः । तत्र हेतुमाह ॥ खलयोनय इति । उग्रजातयश्च ते तादृशा वयं तस्य भवतो दाक्षिण्यदृष्टेर्बहुमानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिर्दर्शनम् । तस्याः पदवीं विषयताम् । कस्माद्धेतोः प्रणीताः प्रापिताः । दुर्जना वयं केन कारणेन त्वद्बहुमानविषया अभूमेत्यर्थः । भक्तानुकम्पितत्वमन्तरेणान्यत्कारणं न पश्याम इति भावः ॥ ७ ॥

लिङ्गेरी — हे शरणद शरणागताभयप्रद वामन । ब्रह्मादयो यस्य तव पादपद्मरससेवनया विभूतीः सत्यलोकाधिपत्यादिसंपदोऽनुभवन्ति । खलयोनयोऽसुरजातयोऽत एव त्वद्द्वेषकारणादिकुत्सितमार्गा वयं ते दाक्षिण्यं दृष्टिमार्गं कस्मात्प्राप्तास्ते परमानुग्रहमन्तरेण नान्यदत्र कारणम् । यमेवैष वृणुते तेन लभ्य इति श्रुतेः ॥ ७ ॥

चित्रं तवेहितमहोऽमितयोगमाया-
लीलाविसृष्टभुवनस्य विशारदस्य ।
सर्वात्मनः समदृशो विषमस्वभावो
भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥

सत्यधर्मीया — तव चित्रमनेकप्रकारम् । ईहितं चेष्टा । अहो आश्चर्यम् । कर्त्री । न सर्वसामर्थ्यविनियोगः तव योगमायाया अपि त्वल्पीयस्या एवेत्याह । मितयोगमाया अल्पयोगशक्तिः। तस्याः या लीला तया विसृष्टानि भुवनानि येन स तस्य । मितेति पदलीलेत्यपि विलासीति भगवतोऽवगमितं च महामाहात्म्यं भवतीति वा । सन्धिरार्ष इति समाधिक्लिष्टता नेति सन्तोष्टव्यम् । स्वरूपनिरूपकम् । समदृशः सर्वत्र साम्यदृष्टेर्विशारदस्य सर्वात्मनः सर्वान्तर्यामिणस्तवेहितं लक्ष्मीकामादि हितं यस्तात्तत्सम्बुद्धिः । महस्तेजो विचित्रम् ईहितस्य मह इति पदं वात्रैकम् ।

अमितेति । विषमस्वभावो मूढानां तथा भासमानः स्वभाव इति चित्रं यत् यतो भक्तप्रियोऽसि कल्पतरुस्वभावोऽसि । आश्रिताशापूरण इति भावः । यतो भक्तप्रियोऽसि ततः समदृशोऽत्यन्ताज्ञस्य तामसवृत्तेरस्मदादेर्विषमस्वभावोऽसि । कल्पतरुस्वभावः कल्पतरोरपि स्वस्य नानाद्रवणस्य भावः सत्ता येन सोऽसि । अतः स्वतस्त्वमविषमस्वभावोऽसीत्यर्थ इति वा । यस्तरुस्वभावो जडप्रायस्तस्य समदृशो ज्ञानहीनस्य विषयेऽसिकल्पः । यथा तरुमुन्मूलयितुमसिस्त्वं तथाऽसीति वा । अत्र बलिरप्यसुरावेशादिति तात्पर्यं संयोजयन्ति ॥ ८ ॥

छलारी — तव चरितं लोकविलक्षणमिति भावेनाह ॥ चित्रमिति । सर्वात्मनः सर्वस्वामिनः समदृशः सर्वं समं पश्यंश्च तवेहितं चेष्टितमहो विचित्रमाश्चर्यम् । तत्कथमित्यत आह ॥ अविषम इति । यतो दुर्योनिष्वप्यस्मासु तव स्वभावोऽविषमो विषमो नाभवत् । त्वयाऽस्मासु बहुमानस्य कृतत्वात् । अतश्चित्रमित्यन्वयः । इदं चावैषम्यं तव युक्तमेवेत्याह ॥ यदिति । यतः कल्पतरुस्वभावो भक्तप्रियोऽसि । न हि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि विषमो भवतीत्यर्थः । सर्वात्मत्वे हेतुः ॥ अमितेति । अमिताऽचिन्त्या योगमाया योगसमर्थता । या लीला तया विसृष्टानि विरचितानि भुवनानि येन तस्य । अहो इत्यत्र सन्धिश्छान्दसः ॥ ८ ॥

लिङ्गेरी — हे वामन । अपरिज्ञातासंख्यातयोगमायया लीलार्थं विसृष्टजगतस्तत्प्रेरणादावतिकुशलस्य तवेहितं चरित्रं चित्रमाश्चर्यकरम् । तदेव वर्णयति । सर्वस्वामिनः समदृष्टेस्तव स्वभावो विषमो यतोऽतस्तदपि कथमित्यतो यद्यस्मात्त्वं सर्वस्वामित्वादिमानपि यथा कल्पतरुः स्वाराधकानामेव फलं ददाति तथा त्वमपि भक्तप्रियोऽसि यतोऽतस्तेषामेव फलं ददासीति । ननु बलिप्रल्हादयोरेवं भगवद्भक्तत्वेऽपि बलेर्बन्धनादिदुःखं प्रल्हादस्य तदभावः किं निमित्तमिति चेन्न । बलिना बन्धनादिदशायामसुरावेशेन कदाचिन्निन्दनस्यापि कृतत्वात्प्रल्हादस्य तदभावेन वैषम्यात् ॥ तदुक्तम् ॥ बलिरप्यसुरावेशात्स्तुवन्नपि जनार्दनम् । आक्षिपत्त्वन्तरा क्वापि प्रल्हादो नित्यभक्तिमानिति ॥ ८ ॥

श्रीभगवानुवाच—

वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम् ।
मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥

सत्यधर्मीया — सुतलालयं तद्रूपं गेहम् ॥ ९ ॥

छलारी — सुतलातलं सुतललोकम् । ज्ञातीनां बन्धूनाम् ॥ ९ ॥

लिङ्गेरी — एवं प्रल्हादस्तुत्या प्रसन्नो वामनस्तत्र वात्सल्यादाह । हे वत्स प्रल्हाद । ते भद्रमस्तु । त्वं स्वपौत्रेण बलिना सह सुतलातलं प्रयाहि । तत्र स्वयं च मोदमानः स्वसगोत्राणामसुराणां सुखं प्रापयेति ॥ ९ ॥

नित्यं द्रष्टाऽसि मां तत्र गदापाणिमवस्थितम् ।
मद्दर्शनमहाह्लादन्यस्तकर्मनिबन्धनः ॥ १० ॥

सत्यधर्मीया — मद्दर्शनमहाल्हादेन ध्वस्तं कर्मनिबन्धनं यस्य स तथा । चक्रस्य कार्यान्तरविनियोजनाद्गदापाणिरिति तत्पुरुषस्तुतिः । यथोक्तं प्राक् । त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यतीति ॥ १० ॥

छलारी — तत्र सुतललोके मम दर्शनेन जातो यो महाल्हादः ॥ १० ॥

लिङ्गेरी — तत्रापि त्वं नित्यं गदापाणिमवस्थितं मां द्रष्टाऽसि मद्दर्शनजन्यमहाहर्षवान्निरस्तसर्वदुष्कर्मबन्धनश्च स्याः ॥ १० ॥

श्रीशुक उवाच–

आज्ञां भगवतो राजन् प्रह्लादो बलिना सह ।
बाढमित्यमलप्रज्ञो मूर्ध्न्याय कृताञ्जलिः ॥ ११ ॥

सत्यधर्मीया — आज्ञां मूर्ध्नि । आधाय धृत्वा मानयित्वेति यावत् । मूर्ध्नेति पाठे शिरसा धृत्वेत्यर्थः ॥ ११ ॥

छलारी — बलिना सह भगवत आज्ञां बाढमिति तथाऽस्त्विति मूर्ध्ना शिरसाऽऽधायोढ्वा कृताञ्जलिः सन् ॥ ११ ॥

लिङ्गेरी — हे राजन् । निर्दुष्टभगवत्ज्ञानः प्रल्हादो बलिना सह भगवतो वामनस्याज्ञामोमित्यङ्गीकृत्य शिरसा वहित्वा कृतांजलिः सन् आदिपुरुषं वामनं प्रदक्षिणीकृत्य नमस्कारं च कृत्वा वामनेनानुज्ञातः सर्वासुरसेनाधिपतिर्भूत्वा बिलं सुतलं प्रविवेश ॥ ११,१२ ॥

परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ।
प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥

सत्यधर्मीया — प्रणतः । कर्तरि क्तः ॥ १२ ॥

छलारी — आदिपुरुषं परिक्रम्य प्रदक्षणीकृत्य प्रणतस्तेनानुज्ञातः सन् महाबिलं सुतललोकं प्रविवेशेत्यन्वयः ॥ १२ ॥

अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके ।
आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥

सत्यधर्मीया — ब्रह्मवादिनां सदसि ऋत्विजां मध्य आसीनं उशनसं शुक्रम् । अथ बलिबिलगमनानन्तरम् । आह ॥ १३ ॥

छलारी — अथ बिलगमनानन्तरं हरतीति हरिर्बलिराज्यहर्ता नारायणो वामनोऽन्तिके स्वसमीपे आसीनमुशनसं शुक्राचार्यमाह ॥ १३ ॥

लिङ्गेरी — हे राजन् । अथ प्रल्हादादिगमनानन्तरं हरिर्भक्तानिष्टपरिहर्तेष्टाहर्ता च नारायणावतारो वामनः परंब्रह्म, वेदादिप्रतिपादकानां ऋत्विजां मध्य उपविष्टमुशनसं शुक्रं प्रत्याह ॥ १३ ॥

श्री भगवानुवाच–

ब्रह्मन् सन्तनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ।
यत्तत्कर्मसुवैषम्यं ब्रह्मदृष्टं समं भवेत् ॥ १४ ॥

सत्यधर्मीया — हे ब्रह्मन् । कर्म यज्ञं तन्वतः शिष्यस्य यच्छिद्रं रन्ध्रम् । अन्तरायमिति यावत् । सं समं तनु प्रायश्चित्तादिना समीकुरु । प्रोपाभ्यां समर्थाभ्यां सम्भोगप्राप्तिरित्यादिवत्सं समार्थकम् । इममेवार्थं ग्रन्थकृदपि वक्ष्यति सममिति । यत्कर्मसु वैषम्यं तद्ब्रह्मदृष्टं ब्राह्मणैः प्रवर्तकैर्दृष्टं चेत्समं भवेत् । अतस्त्वं संतनु ॥ १४ ॥

छलारी — हे ब्रह्मन् शुक्राचार्य । कर्म यज्ञं वितन्वतः कुर्वतः शिष्यस्य बलेर्यच्छिद्रमन्तरं न्यूनं जातं तत्सन्तनु संपूर्णं कुरु । अवशिष्टं कर्म कृत्वा यज्ञं समापयेत्यर्थः । यजमानं विना कथं समापनीयमिति न वाच्यमित्याह ॥ यत्तदिति । कर्मसु यद्वैषम्यमन्तरेणोपसरणं तद्ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं विहितं फलप्रदं भवेत् । किं पुनरनुष्ठितमित्यर्थः ॥ १४ ॥

लिङ्गेरी — हे ब्रह्मन् शुक्र । त्वं तव शिष्यस्य यज्ञं वितन्वतः कुर्वतः सतः कर्मच्छिद्रं कर्मदोषं लोपलक्षणं तत्प्रायश्चित्तकरणेन सन्तनु सम्यक् फलयोग्यं कुरु । यस्मात्कर्मसु वैषम्यं लोपादिरूपं ब्राह्मणैर्दृष्टं पुनस्तत्प्रायश्चित्तकरणेन समं स्वहितफलयोग्यं भवेत् । तस्मादिति । दोषारछिद्रशब्दानां पर्यायत्वाच्छिद्रशब्दस्य दोषार्थत्वमुक्तम् ।। १४ ।।

श्रीशुक्र उवाच–

कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ।
यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ।। १५ ।।

सत्यधर्मीया — सति भगवंश्छिद्रे तत्समीकरणयत्नः । तदेव नास्तीति सहेतुकमाह ।। कुत इति । यज्ञेशस्तत्स्वामी । यज्ञनामा चासौ पुरुषः पूर्णषड्गुणश्च कर्मेश्वरः सकलकर्मस्वामी फलदातेति यावत् । भवान्यस्य येन सर्वभावेन स्वार्पणादिना पूजितस्तत्कर्म वैषम्यं कुतो भवेन्न भवेदेव । पारोक्ष्येण यत्प्रीत्यर्थं कर्म कुर्वन्ति तस्मिन् परोक्षीकृते किं छिद्रं भवेदिति भावः ।। १५ ।।

छलारी — सति छिद्रे तत्परिहारः कर्तव्यस्तदेव नास्तीति सनिमित्तमुपपादयति शुक्राचार्य इत्याह । शुक्र इति । भगवान् यस्य पुरुषस्य सर्वेणापि भावेन वस्तुमात्रेण पूजितस्तस्य कर्मसु कुतो-वैषम्यं वैगुण्यम् । कथम्भूतः । कर्मणामीश्वरः प्रवर्तको यस्य यज्ञफलस्येशो दाता । यज्ञपुरुषः ।।१५।।

लिङ्गेरी — एवं भगवतोक्तः शुक्रस्तं प्रत्याह ।। कुत इति । हे वामन सर्वयज्ञानामीश! यज्ञपुरुषादिसाधनगतश्च भवान् यस्य बलेः कर्मेश्वरः सर्वप्रकारेण स्वयोग्यभक्त्या पूजितस्तत्कर्मवैषम्यं कुतो, न कुतोऽपीति ।। १५ ।।

मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ।
सर्वं करोति निश्छिद्रमनुसंकीर्तनं तव ।। १६ ।।

सत्यधर्मीया — कीर्तनस्येयती शक्तिर्यदा तदा कीर्तनीया किं तव शक्तिरिति वक्ति ।। मन्त्रत इति । मन्त्रत उच्चारणादौ । तन्त्रतो हस्तादिक्रियादौ । देशतः स्थानव्यत्यस्तेः कालव्यत्यासरूपम् । अर्हवस्तुतो होम्यवस्तुव्यत्यासाच्च यत् छिद्रं दोषस्तत्सर्वम् । तवानुसङ्कीर्तनम् । अच्युताय नमोऽनन्ताय गोविन्दायाच्युतानन्तगोविन्दायेति प्रभृतिकीर्तनम् । निश्छिद्रमदोषं करोति । अत इत इतरत् किमनुष्ठेयं मयेति ।। १६ ।।

छलारी — अत्र कैमुत्यन्यायमाह ।। मन्त्रत इति । पदा मन्त्रतः स्वरादिभ्रंशेन मन्त्रतो व्युत्क्रमादिना । देशतः कालतश्चार्हतः पात्रतः । वस्तुतो दक्षिणादिना यन्यूनं भवेत् । तत्सर्वं तवानुकीर्तनं नामकीर्तनमेव निश्छिद्रं संपूर्णं करोति । यतस्तव पूजा निश्छिद्रं करिष्यतीति किं वक्तव्यमित्यर्थः । तथा च बलिना सर्वदानेन भवतः पूजितत्वादेव तत्कर्मणो वैषम्यं नास्त्येवेति भावः ।। १६ ।।

लिङ्गेरी — हे वामन । तवानुसंकीर्तनमच्युतानन्दगोविन्देत्यादि भक्तिश्रद्धाभ्यां नामोच्चारणं मन्त्रतो मन्त्रस्य तन्त्रतस्तथा देशकालयोग्यवस्तूनां छिद्रं दोषं सर्वं निश्छिद्रं प्रायश्चित्तविनष्टं करोति । मन्त्र इत्यादौ सार्वविभक्तिकतसिरिति षष्ठ्यर्थे तसि प्रत्ययः ।। १६ ।।

तथापि वदतो भूमन् करिष्याम्यनुशासनम् ।
एतच्छ्रेयः परं पुंसां यत् तवाज्ञानुपालनम् ।। १७ ।।

सत्यधर्मीया — यद्यपि निश्छिद्रता तथाऽपि वदतस्तवानुशासनमाज्ञां शिक्षारूपिणीं करिष्यामि । सामान्येनास्य मान्यतामाह ।। एतदिति ।। १७ ।।

छलारी — यद्यप्येवं तथाऽपि । हे भूमन् । वदतस्तवानुशासनमाज्ञां करिष्यामि । कुतः । यत्तवाज्ञानुपालनमेतत्पुंसां परं श्रेयः ।। १७ ।।

लिङ्गेरी — हे भूमन् देशकालगुणैः पूर्ण वामन । इति यद्यपि तथाऽपि कर्मपूर्तिं कुर्विति वदतस्तवानुशासनमाज्ञां करिष्यामि । तवाज्ञानुपालनं यत्तदेतत्पुंसां परमुत्तमं श्रेयःसाधनम् ।। १७ ।।

श्रीशुक्र उवाच–

अभिनन्द्य हरेराज्ञामुशना भगवानिति ।
यज्ञच्छिद्रं समतनोद् बलेर्विप्रर्षिभिः सह ।। १८ ।।

सत्यधर्मीया — यज्ञच्छिद्रं तत्र लुप्तं कर्म ।। १८ ।।

छलारी — भगवान् उशनाः शुक्र इति हरेराज्ञामभिनन्द्यानुमोद्य बलेर्यज्ञच्छिद्रं समाधत्त सन्दधे ।। १८ ।।

लिङ्गेरी — भगवान् उशनाः शुक्रो हरेर्वामनस्याज्ञामभिनन्द्य सन्तोषादङ्गीकृत्य ब्रह्मर्षिभिः सह बलेर्यज्ञच्छिद्रं समतनोत् प्रायश्चित्तानुष्ठानेनानाशयत् ।। १८ ।।

एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ।
ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत् परैर्हृतम् ॥ १९ ॥

सत्यधर्मीया — परैरतद्भागिभिः बल्यादिभिः । बलेस्त्रिदिवं भिक्षित्वेत्यन्वयः ॥ १९ ॥

छलारी — भिक्षित्वा याचित्वा । भ्रात्रे ज्येष्ठभ्रात्रे । परैः शत्रुभिः ॥ १९ ॥

लिङ्गेरी — हे राजन् । हरिर्वामन एवमुक्तरीत्या बलेः सकाशात्पृथिवीं भिक्षित्वा क्षितिदान-व्याजेनापहृत्य स्वभ्रात्रे इन्द्राय ददौ । यत्परैः शत्रुभिरसुरैरपहृतं त्रिदिवं स्वर्गं च ददौ ॥ १९ ॥

प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ।
दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च ॥ २० ॥

सत्यधर्मीया — भूमिपा मनवश्च । भवेनेति गतम् ॥ २० ॥

लिङ्गेरी — प्रजापतीनां दक्षादीनां पतिर्ब्रह्मा चतुर्मुखो देवर्षिपितृभूमिपैर्दक्षभृग्वंगिरप्रभृतिभिः कुमारेण षण्मुखेन सनत्कुमारेण च भवेन रुद्रेण च सह ॥ २० ॥

कश्यपस्यादितेः प्रीत्यै सर्वभूताभयाय च ।
लोकानां लोकपालानामकरोद् वामनं पतिम् ॥ २१ ॥

सत्यधर्मीया — पतिमकरोत् अकरोदिव ॥ २१ ॥

छलारी — प्रजापतीनां मरीच्यादिप्रजेश्वराणां पतिः । देवाश्च ऋषयश्च पितरश्च भूमिपा राजानो मनवश्च सर्वभूतानां भावनाय क्षेमाय च वामनं पतिं पालकमकरोत् ॥ २१ ॥

लिङ्गेरी — कश्यपादित्योः प्रीत्यै सर्वप्राणिनामभयाय च वामनं लोकानां लोकपालानां च पतिमकरोत् ॥ २१ ॥

देवानां सर्वदेवानां धर्मस्य यशसः श्रियः ।
मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ २२ ॥

सत्यधर्मीया — सतीन्द्रेः कथममुं पतिं प्रजापतिपतिरकरोदित्यत आह ॥ देवानामिति । कल्पं दक्षम् । सहस्राक्षस्य रक्षणार्थमिति न तदनिष्टमिति भावः ॥ २२ ॥

छलारी — ननु लोकानां पतिरिन्द्रोऽस्त्येव । सत्यम् । तथाऽपि देवादीनां पालने कल्यं दक्षं वामनमुपेन्द्रं कल्पयाञ्चक्रे । सर्वेषां विभूतये ऐश्वर्याय । सर्वाणि भूतानि सर्वे जनाः ॥ २२,२३ ॥

लिङ्गेरी — देवादीनां पालने कल्पं समर्थमुपेन्द्रं वामनं सर्वेषां तत्तद्योग्यसर्वैश्वर्यप्राप्तये पतिं कल्पयाञ्चक्रे यदा तदा सर्वप्राणिनोऽत्यन्तं तुतुषुः ॥ २२,२३ ॥

उपेन्द्रं कल्पयाञ्चक्रे पतिं सर्वविभूतये ।
तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥ २३ ॥

सत्यधर्मीया — सर्वविभूतये पूर्वोक्तसर्वेषां विभूतये मङ्गलाय ॥ २३ ॥

ततस्त्विन्द्रः (पुरःकृत्वा) पुरस्कृत्य देवयानेन वामनम् ।
लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥ २४ ॥

सत्यधर्मीया — पुरःकृत्वेति पदद्वयम् । पुरस्कृत्येति पाठो ललितः । देवयानेन देवतावाहनेन ॥ २४ ॥

छलारी — देवयानेन मार्गेण विमानेनेति वा । लोकपालैः सह । ततो बलेर्यज्ञशालायाः सकाशात् । वामनं दिवं निन्ये ॥ २४ ॥

लिङ्गेरी — तदनन्तरमिन्द्रस्तु लोकपालैर्ब्रह्मणा चानुमोदितः प्रीत्याऽभ्यनुज्ञातो वामनं पुरस्कृत्य देवयानेन स्वर्गं प्रापयामास ॥ २४ ॥

आप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितम् ।
श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥ २५ ॥

सत्यधर्मीया — उपेन्द्रभुजपालितं त्रिभुवनम् ॥ २५ ॥

छलारी — उपेन्द्रभुजाभ्यां पालितो गतसाध्वसो गतभयः ॥ २५ ॥

लिङ्गेरी — इन्द्रो वामनेन बल्यादीनां पातालवासनाद्गततद्भयः सन् उपेन्द्रभुजरक्षितत्रिभुवनं प्राप्यात्युत्कृष्टया संपदा सेवितः सन् सुखमाप ॥ २५ ॥

ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ।
पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥ २६ ॥

सत्यधर्मीया — वैमानिकाः सिद्धाः विना वाहकं स्वयमेव गच्छद्विमानरूढाः ॥ २६ ॥

छलारी — वैमानिकाश्च विमानारूढा ये सिद्धास्ते विष्णोः परमाद्भुतं सुमहत्तद्बलिबन्धनादिकर्म गायन्तः सन्तः स्वानि धिष्ण्यानि गृहाणि जग्मुः । अदितिं शंसिरे श्लाघयामासुः । इति द्वयोरन्वयः ॥ २६,२७ ॥

लिङ्गेरी — ब्रह्मादयो वैमानिकान्ताः सर्वे प्राणिनः सुमहदत्याश्चर्यकरं तद्विष्णोः कर्म चरित्रं गायन्तः स्वकीयस्थानानि ययुः । वामनमातरमदितिं चेयं वीरसूरिति शशंसिरे स्तुवन्तश्च । वैमानिकाः आहवनीयगार्हपत्यदाक्षिणाग्निषु देवपूजकाः ॥ २६,२७ ॥

सुमहत् कर्म तद् विष्णोर्गायन्तः परमाद्भुतम् ।
धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥

सत्यधर्मीया — अदितिं चाहो तव तपोमाहात्म्यमिति तुष्टुवुः । अनन्तरं स्वानि धिष्ण्यानि जग्मुश्च ॥ २७ ॥

सर्वमेतन्मयाख्यातं भवतः कुरुनन्दन ।
उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥ २८ ॥

सत्यधर्मीया — कुरुनन्दन । कुलनन्दनेति पाठोऽप्यनुकूलः । उरुक्रमस्य चरितम् । आख्यातमेतत् । सर्वं काकुः किं त्वल्पमित्यर्थः । सर्वमाख्यातमित्यावर्त्यैकदा पदं वा । सर्वं त्वद्योग्यतां मद्योग्यतामनुसृत्याख्यातं तदप्याख्यातमीषदेव ख्यातमिति वा ॥ २८ ॥

छलारी — बलेः पदत्रयभूमेः कस्माद्धरिरयाचतेत्यादिनोक्तमुपसंहरति ॥ सर्वमिति । श्रोतॄणामघस्य संसाराख्यपापस्य मोचनमुरुक्रमस्य त्रिविक्रमस्य यस्यैतच्चरितं सर्वं भवत आख्यातम् ॥ २८ ॥

लिङ्गेरी — हे कुलनन्दन स्वकुरुकुलसन्तोषक । श्रोतॄणाम् अघात्पापान्मोचनं मुक्तिर्भवतीत्यघमोचनं भगवत उरुक्रमस्यैतन्मया वक्तुं योग्यं सर्वं चरितं तवाख्यातम् ॥ २८ ॥

पारं महिम्न उरुविक्रमतो मुरारे-
र्यः पार्थिवान्यपि कविर्विममे रजांसि ।
किं जायमान उत जात उपैति मर्त्य
इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥

सत्यधर्मीया — कुतः कवे तदवशेषः सर्वं वदेत्यत आह ॥ पारमिति । यस्य पुरुषस्योरुविक्रमत उरु यथा तथा पादविक्षेपं कुर्वतः । पूर्वदेशविभागविशिष्टोत्तरदेशसंयोगस्यैव विहरणशब्दार्थत्वात्तस्य अभावान् वेश्चेत्यनेन नात्मनेपदता । विक्रमं पराक्रमं कुर्वत इत्यपि अनेन सूचितः । तर्ह्य-यमस्मद्यदुनायकादन्यः किमिति चित्तविक्षेपं मा दीधरो धरापत इत्याह ॥ मुरारेरिति । महिम्नः पारं जायमानो जातो जनिष्यमाणश्च कविरतिक्रन्ददर्शी सोऽप्यन्तमुपैति किं नोपैति । यः कोऽपि पार्थिवानि पृथिवीसम्बन्धीनि रजांसि धूलीर्विममे गणयति सोऽपि मर्त्यः पारमुपैति किमिति मन्त्रदृक् । ''विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । विचक्रमाणस्त्रेधोरुगायः'' । ''न ते विष्णो जायमानो न जातो देवमहिम्नः परमन्तमापेति'' मन्त्रद्रष्टा ऋषिः इत्याह अतो यत्किञ्चिद्वर्णितं मयेति । सोऽपि साकल्येन वक्तुं न शक्य इत्यप्याह ॥ मन्त्रदृगिति ॥ मन्तारं परमात्मानं साकल्येन न पश्यतीति मन्त्रदृक् । श्रोता मन्तेत्यादिश्रुतेः । विष्णोर्नुकमिति सूक्तं षडर्चं दीर्घतमोदृष्टम् । ''सूक्तं दीर्घतमो दृष्टं विष्णोर्नु कमिति प्रभोः । वासिष्ठं च परोमात्रयेति ज्ञानमि''ति तन्त्रसारोक्तेः ऋषी ज्ञेयौ । विष्णोर्नु कमित्यृग्विवरणमाकाशाधिकरणतत्त्वप्रकाशिकायां विष्णोर्वीर्याणि को नु प्रवक्ति । योऽपि पार्थिवपरमाणून् गणयतीति तस्यानन्तत्वमुच्यत इति । तट्टिपणे कमित्यस्यार्थः । क इति प्रवोचमित्यस्यार्थः प्रवक्तीति । श्रुतौ प्रवोचमिति लुङ् प्रयोगेऽपि प्रवक्तीति लट् प्रयोगोऽत्र लुङो न भूतकालार्थत्वम् । किन्तु सर्वकालार्थत्वमिति द्योतनाय । तिपो मिपादेशः । तदुक्तं महाभाष्ये । तिङां च तिङो भवन्तीति वक्तव्यम् । चषालं य अश्वरूपाय तक्षति तक्षन्तीति प्राप्त इति ॥ ततश्चैवं योजना । कं को विष्णोर्वीर्याणि प्रवोचं वक्तुमर्हति । ज्ञानाभावान्न कोऽपीत्यर्थः । ननु यः सर्वज्ञः स एव ज्ञातुं प्रवक्तुं चार्हति । अन्यथा सर्वज्ञत्वभङ्ग इत्यत आह ॥ यः पार्थिवानीति । योऽपि सर्वज्ञः सोऽपि पार्थिवानि रजांसि विममे काक्वा नेति गम्यते । विद्यमानस्याज्ञातृत्वमेव सर्वज्ञत्वविरोधि न त्वविद्यमानाज्ञत्वम् । एवं च पार्थिवपरमाणूनामानन्त्येन सङ्ख्यापरिच्छेदा-भावात्तदज्ञत्वं न दोषाय । एवमीश्वरगुणानां ततोऽप्यनन्तत्वात्तदज्ञानं न दोषाय । किन्तु गुणायैवेतीति कृतमवसेयम् । लभेत सिकतासु तैलमितिवत् महानन्त्यं वीर्येषु समर्पयितुं गणयतीत्याद्युक्तिर्वा शिष्टवद्दृष्टश्रुत्यर्थस्तु न ते विष्णाविति श्रुतेरित्यनुव्याख्यासुधादौ वर्णितः स्फुटश्च ॥ २९ ॥

छलारी — अत्रैतच्चरितं सर्वमाख्यातमिति विशेषोक्त्याऽन्यान्यपि चरितानि सन्तीत्युक्तम् । तर्हि तानि निःशेषाणि वर्ण्यानीत्यपेक्षायामनन्तत्वान्निःशेषं वर्णयितुं न शक्यानीत्यत्र प्रमाणमाह ॥ पारमिति । यस्य पुरुषस्य पूर्णस्य हरेर्निःशेषं चरितं वर्णनविषये । मन्त्रदृक् । ''विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । न ते विष्णो जायमानो न जातो देवमहिम्नः परमं तमापे''ति । मन्त्रद्रष्टा ऋषिस्त्रिकालदर्शी च वसिष्ठ इत्याह । तस्योरुक्रमस्यैतच्चरितमिति पूर्वेणान्वयः । मन्त्रद्रष्टा किमाहेत्यत आह ॥ यः पार्थिवानीति । यो मर्त्यः पार्थिवानि पृथ्वीसम्बन्धीनि रजांसि परमाणूनपि यो विममे गणितवान् । स तादृशोऽपि कं को मर्त्यो जायमानो वा जातो वा जनिष्यमाणो वा गृणानो विष्णुचरितानि स्तुवन् । उरु बहुधा विक्रमतः पादन्यासं कुर्वतस्त्रिविक्रमनाम्नो विष्णोर्महिम्नः पारं समाप्तिमुपैति । न कोऽपीत्याहेत्युक्त्या चरितानामनन्तत्त्वमुक्तं भवति ॥ २९ ॥

लिङ्गेरी — नन्वेवं सङ्कोचेन तच्चरितमुक्त्वा सर्वं मयाऽऽख्यातमिति कथमुच्यते । तथात्वे निःशेषतया तत्त्वया वर्णनीयमिति परीक्षिच्छंकां परिहरति शुकः ॥ पारमिति । हे राजन् । मन्त्रदृक् विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । न ते विष्णो जायमानो न जातो देवमहिम्नः परमं तमापेत्यादि ऋग्वेदमन्त्रद्रष्टा ऋषिर्यस्य पुरुषस्य त्रिविक्रमस्य यो मर्त्योऽधिकारी पार्थिवानि रजांसि पृथिवीपरमाणून् विममे संख्यायुक्तान्करोति । तादृशोऽपि को विष्णोः पराक्रमान्प्रावोचत् । न कोऽपि । उभावपि दुर्लभौ तत्र द्वितीयोऽतितराम् । हे विष्णो । तव महिम्नः परमन्तं परां काष्ठाम् । पारमिति यावत् । जातो नाप जायमानो नाप्नोति जनिष्यमाणो नाप्स्यतीत्यादिनोरुक्रमस्य मुरारेर्नारायणस्य यो मर्त्यः कविर्ज्ञान्यपि पार्थिवानि रजांसि विममे किं तादृशोऽपि जातो मर्त्य उरुविक्रमतो मुरारेर्महिम्नः पारमुपयातो जायमान उपैति किम् । जनिष्यमाण उपैष्यति किमित्याह यदा तदा कथं मया निःशेषतया वक्तुं शक्यत इति । बहुलं छन्दसीति विमम इति लडर्थे लिट् ॥ २९ ॥

य इदं देवदेवस्य हरेरद्भुतकर्मणः ।
अवतारानुचरितं शृण्वन् याति परां गतिम् ॥ ३० ॥

सत्यधर्मीया — अद्भुतकर्मणश्चित्रचर्यस्य देवदेवस्य हरेरिदमवतारानुचरितं शृण्वन् यः । यात्यवगच्छतीति यः । यातेर्डः । परां गतिम् । वैकुण्ठं याति । यद्वा शृण्वन् परां गतिं याति । लक्षणहेत्वोः क्रियायाः । क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्त इति कौमुद्युक्तेः हेतोर्लटः शता ततश्च श्रवणकारणिकां परां गतिं यातीति विना वर्तत इति

शेषेणाभिमतसिद्धिर्ज्ञेया । यथोक्तम् । सदावन्भागमीमह इत्यादि ऋग्भाष्यटीकयोर्वित्तं रक्षन्नवन्नित्यात्मानं भागमीमहे । यद्यप्यवन्नित्येतत्सम्बुध्यन्तं व्याख्यातुं शक्यते । तथाऽपि साक्षात्प्रयोजनोक्तिलाभाय वचनव्यत्यासेन व्याख्यातम् । लक्षणाहेत्वोः क्रियाया इति स्मरणादिति । हेतुस्तत्र फलमत्र कारणमित्येव विशेषः । हेतुः फलं कारणं चेति कौमुद्युक्तेः । शृण्वन् परां गतिं यो याति । परां गतिं गुरुम् । गुरुरेव परागतिरित्यादेः । श्रवणं यानफलं स याति जानाति स परां गतिं याति । गुरूपदेशेन ज्ञानं प्राप्य तेन मुक्तिं यातीति आवृत्याऽन्वयेन शुकसुमुखता भवतीति वर्णयन्ति ।।३०।।

छलारी — श्रोतॄणां श्रद्धातिशयजननार्थं वामनावतारचरितं शृण्वतः फलमाह ।। य इति । योऽद्भुतकर्मणो देवदेवस्य हरेरवतारस्य वामनस्यानुचरितं शृण्वन्वर्तते सः परमां गतिं वैकुण्ठाख्यां याति ।। ३० ।।

लिङ्गेरी — हरौ भक्त्यभिवृद्धये तच्चरितामृतश्रवणफलमाह ।। य इति । योऽधिकार्याश्चर्यकरचरित्रस्य ब्रह्मादिदेवदेवस्य हरेर्नारायणस्येदं त्रिविक्रमावतारचरितं शृण्वन्नास्ते स परां गतिं वैकुण्ठादिरूपां प्राप्नोति ।। ३० ।।

क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ।
यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ।। ३१ ।।

इति श्रीमद्भागवते अष्टमस्कन्धे एकविंशोऽध्यायः ।। ८-२१ ।।

सत्यधर्मीया — क्रियमाणे दैवे देवतासम्बन्धिनि । पित्र्ये पितृसम्बन्धिश्राद्धादौ । पितुर्यच्चेति यत् । मानुषे ब्राह्मणादिसत्काररूपे कर्मणि क्रियमाणे चेदमवतारानुचरितम् । अनुकीर्त्येत कीर्तितं भवेद्यैस्तत्र तत्र तेषां कीर्तयतां तत्सुकृतं पुण्यप्रापकं विदुर्विद्वांसः ।। ३३ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
अष्टमस्कन्धे एकविंशोऽध्यायः ।। ८-२१ ।।

छलारी — कर्ममात्रेऽपि कीर्त्यमानमिदं कर्मणि साफल्यं करोतीत्याशयेनाह ।। क्रियमाण इति । दैवादिकर्माणि क्रियमाणे सतीदं वामनावतारचरितं यत्र यत्र कर्मणि कीर्त्येत तत्कर्म सुकृतं यथावत्कृतं संपूर्णफलदानं समर्थं विंदुः । ज्ञानिन इति शेषः ।। ३१ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे एकविंशोऽध्यायः ।। २१ ।।

लिङ्गेरी — इदं चरितं देवर्षिपित्रुद्देशेन क्रियमाणे यत्र यत्र कर्मण्युच्येत तेषां तत्कर्म अतिपुण्यसाधनमाहुर्ज्ञानिनः ।। ३१ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे एकविंशोऽध्यायः।। ८-२१ ।।

।। अथ द्वाविंशोऽध्यायः ।।

राजोवाच–

भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः ।
अवतारकथामाद्यां मायामत्स्यविडम्बनाम् ।। १ ।।

सत्यधर्मीया — जहौ सत्यं न तु व्रतमिति सत्यव्रतमिति वैशाकलित्येन श्रुतवतः परीक्षितः सत्यव्रतेत्यखण्डानुपूर्वीं पूर्वश्रुतां स्मृतवतश्च सत्यव्रतक्षितिपतिरक्षणार्थं झषवपुषा हरिरवततारेति तच्चरितशुश्रूषा जाता या तया स पृच्छतीति वा भवतु हरिर्वामानादिममहितदेहः । कथं दुर्भगाङ्गसङ्गोऽसङ्गस्य तस्येति सन्दिहानजनसन्दोहसन्देहं स्वयमुदूह्य गुणाद्यविशेषान्न दोष इति शुकमुखतो वादयितुमादिमत्त्वादनिमिषवपुषः स्वसजातीयनृपपातृत्वेन च तच्चरितं श्रोतुमुक्तमनाः परीक्षित्पृच्छति शुकमित्याह ।। राजेति । गङ्गोत्पत्तिश्रवणसमनन्तरं जीवनैकजीवनानां मीनानां कर्मविशेषतो जातानां तदादिजलालङ्करणकारणता भवतु । भगवतस्तु कुतस्तदवतारो निष्कारणमिति सकौतुको राजा शुकं पृच्छतीत्यवतारयन्ति । केचित्तु उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः । उपाविशत्प्राय ममर्त्यनद्यामिति प्रथमे तत्तात्पर्ये च । गङ्गायामुदक एव किञ्चिद्दक्षिणभागे प्रासादे ।

तथाहि भारते चादिपर्वण्यास्तीकीये प्रासादं कारयामास एकस्तम्भं सुरक्षितमित्याद्युक्तेः । परीक्षिज्जलविलोकनसमये कश्चन मीनं विलोक्य स्मृततद्रूपभगवत्कस्तच्चरितं वदेति पृच्छतीति पद्यमाद्यमवतारयन्ति । मायामत्स्यस्य विडम्बनं यस्यां सा ताम् । मायया मत्स्यस्य तज्जातेर्विडम्बनमनुकरणं यस्यां सा तामिति वा । आद्यामिति पाठ एवाद्यः । दशावतारेषु प्रथमामिति तदर्थः । अन्यामिति पाठे श्रुतवामनावतारादितरामित्यर्थः ॥ १ ॥

छलारी — वामनावतारचरितश्रवणेन मत्स्यावतारचरितं श्रोतुं राजा पृच्छति ॥ राजेति ॥ आद्यां मत्स्यादिदशावतारेष्वाद्यभूतां ययेच्छया मत्स्यस्य विडम्बनं मत्स्यरूपानुकरणं यस्यां निरूप्यते ॥१॥

लिङ्गेरी — परीक्षित् वामनावतारकथाश्रवणानुस्मृतमत्स्यावतारमाहात्म्यं तद्विस्तरेण श्रोतुं शुकं प्रार्थयते ॥ भगवन्निति । हे शुक । अहमद्भुतकर्मणो हरेरन्यामवतारकथां श्रोतुमिच्छामि । मायया स्वेच्छया मत्स्याकारस्य विडम्बनं मत्स्यानुकरणं यस्यां तामिति । आद्यामिति पाठे दशावतार-कथास्वाद्यामित्यर्थः ॥ १ ॥

यदर्थमदधाद् रूपं मात्स्यं लोकजुगुप्सितम् ।
तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥ २ ॥

सत्यधर्मीया — तमःप्रकृति तमसः प्रकृतिः स्वभावो यस्य तत् । दुर्मर्षं गन्धादिना सोढुमशक्यमितरैः । अत एव लोकजुगुप्सितं यदर्थं किमर्थम् । यदर्थमदधादेतदित्युत्तरेणान्वयो वा । सोऽपि जीवेष्वन्यतम इति किं तमःप्रकृत्या कृतिप्राप्तौ चेतश्चित्रणमित्यतः सहेतुकं स्वां शङ्कां दृढयति । कर्मग्रस्त इव इति ईश्वर इति च ॥ २ ॥

छलारी — ननु कस्मादकस्मादेव मत्स्यावतारश्रवणेच्छा वामनावतारासादृश्यादित्यत आह ॥ यदर्थमिति द्वाभ्याम् । बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति युक्तमुक्तम् । ईश्वरो यदर्थं यत्प्रयोजनार्थं जुगुप्सितं निन्दितं मत्स्यरूपमधाद्धृतवान् । एतन्नो यथावद्वक्तुमर्हसीति द्वयोरन्वयः । जुगुप्सितत्वे निमित्तं, तमः प्रकृतीति । तामसस्वभावमित्यर्थः । दुर्मर्षं सोढुमशक्यं कर्मणा ग्रस्तो बद्धः । जीव इवैकं जुगुप्सितं चेत्किमर्थं वक्तव्यमित्यत आह ॥ उत्तमेति ॥ २,३ ॥

लिङ्गेरी — इदानीं परीक्षित्स्वेतरज्ञोऽत्राज्ञानमात्मन्यारोप्य तदनुजिघृक्षया तदभिप्रायानुसारेण प्रश्नं करोति ॥ यदर्थमित्यादि । ईश्वरः स्वतन्त्रो नारायणस्तमोगुणप्रचुरस्वभावं सहितुमशक्यमत एव लोकजुगुप्सितं मत्स्यसम्बन्धिरूपं कर्मग्रस्तो जीव इव यदर्थमधाद्धृतवान् ॥ २ ॥

एतन्नो भगवन् सर्वं यथावद् वक्तुमर्हसि ।
उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥

सत्यधर्मीया — सर्वलोकसुखावहं बीजादिसंरक्षणद्वारा । अनेन परीक्षित एतदादिप्रेक्षा वर्तत एव । किन्तु लोकोद्धृत्त्यै पृच्छतीति ध्वन्यते । सर्वावतारसाधारणे सरणं वा ॥ ३ ॥

लिङ्गेरी — हे भगवन् । एतत्सर्वं नोऽस्माकं यथावद्वक्तुमर्हसि । ननु तस्योक्तरीत्या जुगुप्सितत्वे तच्छ्रवणं व्यर्थमित्यत आह । उत्तमश्लोकचरितं सुखावहमिति ॥ ३ ॥

सूत उवाच–

इत्युक्तो विष्णुरातेन भगवान् बादरायणिः ।
उवाच चरितं विष्णोर्मत्स्यरूपेण यत् कृतम् ॥ ४ ॥

सत्यधर्मीया — विष्णुरातेन परीक्षिता । बादरायणिर्व्याससूनुः । मत्स्यरूपेण तदाकारेण ॥४॥

छलारी — विष्णुरातेन परीक्षिता बादरायणिर्वेदव्यासस्य पुत्रः शुकः ॥ ४ ॥

~~**लिङ्गेरी** — विष्णुरातेन परीक्षिता इत्युक्तो भगवान् बादरायणिः शुको विष्णोर्मत्स्यरूपेण~~ यच्चरितं कृतं तत्परीक्षितमुवाच ॥ ४ ॥

श्रीशुक उवाच–

गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ।
रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥

सत्यधर्मीया — सामान्यतोऽवतारप्रयोजनमाह ॥ गविति । छन्दसामपार्थवर्णनेन हृतप्रायाणां वेदानां प्रस्तुतं हयग्रीवापहृतानां रक्षार्थमिति सर्वान्वयि । गौश्च धरा सुरभिश्चेति ॥ ५ ॥

छलारी — सामान्येनावताराणां प्रयोजनमाह ॥ गोविप्रेति ॥ छन्दसां वेदानां रक्षां संरक्षणम् । तनूरवतारान् धत्ते । अर्थस्य चेति ॥ चशब्देन कामस्य चेति ग्राह्यम् ॥ ५ ॥

लिङ्गेरी — मत्स्यादिरूपधारणप्रयोजनमाह ॥ गोविप्रेति । ईश्वरो नारायणो गोब्राह्मणदेवादिसाधूनां छन्दसां वेदानां धर्मार्थयोश्च संरक्षणमिच्छन् तनूर्मत्स्यशरीरादिसदृशशरीराणि ज्ञानानन्दात्मकानि धत्ते । सद्देहः सुखगन्धश्च ज्ञानभागित्यादेः ॥ ५ ॥

उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः ।
नोच्चावचत्वं भजते निर्गुणत्वाद् धियो गुणैः ॥ ६ ॥

सत्यधर्मीया — उच्चावचेषु नैकभेदेषु । नीचोच्चेष्विति यावत् । धियो मनआदीन्द्रियाणां गुणैस्तत्तद्विषयसम्पर्कप्रयुक्तमुच्चावचत्वं नीचोच्चतां न भजते न सेवते । न प्राप्नोतीति यावत् । अत एव प्राणनिदर्शनं सम्भवि । अनेनोत्तरितं कर्मग्रस्त इवेति मन्तव्यम् । तत्सम्भावकमाह । निर्गुणत्वात् सत्त्वादिगुणहीनत्वादिति । तत्प्रयोजकगुणहीनत्वान्नोच्चावचतनुग्रहण इव तत्प्रवेशेऽपि तस्येशस्याति-स्तम्भनवतो गेहदाहेऽप्यदाहवत्तत्कृतानुच्चत्वोच्चत्वं भवतो भगवत इति तात्पर्यम् ॥ ६ ॥

छलारी — हरेर्जुगुप्सितत्वं परिहरति । उच्चावचेष्विति । धीशब्देनेंद्रियाण्युपलक्ष्यन्ते । नीचोच्चानि भूतानि प्राणिनः सन्ति तेषु नियंतृत्वेन चरन्नपीश्वरो धियो गुणैरुच्चावचत्वं न भजते न प्राप्नोति । निर्गुणत्वाद्गुणकार्यशून्यत्वात् । कुतः पुनर्ज्ञानादिगुणात्मकैर्मत्स्यादिभिराकारैरुच्चाववचत्वं शङ्क्यमिति भावः ॥ ६ ॥

लिङ्गेरी — मत्स्यस्य हरेस्तमःप्रकृतित्वादिमन्दाशङ्कां परिहरति ॥ उच्चावचेष्विति । उत्तमेषु सुरादिषु नीचेषु तिर्यक्षु मत्स्यादिषु प्रादुर्भावाय तत्तदुदरेषु चरन्नपीश्वरो वायुरिव तत्तद्भूतकृतनीचोच्चत्वं न भजते । ज्ञानानन्दाद्यनन्तगुणत्वेऽपि भगवतो, धीयते जगदस्यामिति धीः प्रकृतिस्तस्या गुणैर्वर्जितैर्निर्गुणत्वात् । अत्र वायुदृष्टान्तेन मत्स्यादिरूपस्य हरेरुच्चावचभूतचरणोक्त्या न प्राकृतं मत्स्यादिकं रूपं येन तत्प्रकृतित्वादि प्रसज्येत इति परिहार उक्तो भवति ॥ ६ ॥

आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ।
समुद्रोपप्लुतास्तत्र लोका भूरादयोऽनघ ॥ ७ ॥

सत्यधर्मीया — राजप्रश्नस्यादित उत्तरमीरयति ॥ आसीदिति । अत्र लेखनीयं प्रमेयमनाद्यविद्योपहतात्मसंविद इति श्लोकव्याकृत्यवसरे अलीलिखच्छ्रीधरः तल्लग्नताऽलग्नताभ्यां न नः कृत्यम् । तदनूद्य गुणदोषौ प्रदर्श्य वयं सप्रमाणकं व्यातन्महे । तथा हि । अत्रेदं चिन्त्यं किमयं महाप्रलयः किं वा दैनन्दिनम् । तत्र तावद्ब्राह्मो लय इति । योऽसौ चासौ महाकल्प इति चोक्तेर्महाप्रलय इति प्राप्तम् । नेति ब्रूमः । महाप्रलये पृथिव्यादीनामवशेषासम्भवात् । यावद्ब्राह्मी निशेत्याद्युक्तिविरोधाच्च । अतो दैनन्दिन इति युक्तम् । न चैतदपि सङ्गच्छते । सांवर्तकैरनावृष्ट्यादि-भिर्विना कस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः । यच्चोक्तं प्रथमस्कन्धे

''रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लवे । नाव्यामारोप्य महीमय्यामपाद्वैवस्वतं मनुमि''ति । तदपि तदा दुर्घटम् । न हि प्रलयद्वयेऽपि महीमय्यां नाव्यारोहः सम्भवति । न चाक्षुषमन्वन्तरे प्रलयोऽस्ति । तथा सति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् । त्वं तावदोषधीः सर्वा इत्यादि निर्देशोऽपि न सङ्गच्छते । न हि तदौषध्यादीनां सत्त्वानां चावशेषः सम्भवति । तस्मादन्यथा वर्ण्यते । नैवायं वास्तवः कोऽपि प्रलयः । किन्तु सत्यव्रतज्ञानोपदेशायाविर्भूतो भगवान् वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास । यथाऽस्मिन्नेव मन्वन्तरे मार्कण्डेयाय दर्शितवान् । तदपेक्षयैव च महाकल्पेऽस्मिन्निति विशेषणं सङ्गच्छते । तथा च ततः समुद्र उद्वेलः सर्वत्र समदृश्यतेति तस्यैव यथादर्शनमुक्तेरित्येषा दिगिति व्याख्यानमुखेन प्रत्याख्यानं भवतीति तत्तन्महे । अत्र संप्रदायद्वयम् । द्वौ मत्स्यावतारावित्येकः । एक इत्येकः । तत्र धातुः शिशयिषोः, सुप्तशक्तेर्मुखेभ्यो, यावद्ब्राह्मी निशेत्यादिना दैनन्दिनकल्पभवस्याद्यस्य, सत्यव्रतस्येत्यादिना चाक्षुषान्तरसम्भवस्य द्वितीयस्य चेत्युभयोश्चरितं सङ्कलय्यात्रोच्यते । द्वितीये चरितमात्रं सङ्गृह्यात्रोच्यत इति । एवं कल्पने बलं च वाक्यशाबल्यमिव चरितशाबल्यं च । महाकल्प इति तु न महान्कल्पः । चाक्षुषान्तरसंप्लव इत्युक्तेरत्रैव सर्वदैनन्दिनकल्पभवं वस्तु प्रायो दर्शयामास । किमाश्चर्यं भगवत्याः शक्तेः । अनेन पृथिव्याद्यवशेषः कथमिति परिचोदना पर्यहारि । सप्तमेऽहनीत्यपि सङ्गच्छते । सत्यव्रतार्थनं वरवितरणं चाकालिकत्वात्सम्भवतः । प्रस्तुतसत्यव्रतोपदेशकथया सहाद्यस्य हयग्रीवहननं विधाय विधये वेददातुः कथा कथितेत्यासीदित्यादि चासीत्सम्भवि । एकस्यैतावत्पर्यन्तमवस्थिति सम्भवाच्चरितद्वैराश्योक्तिरपि च सम्भविनी । किं च सांवर्तकैरनावृष्ट्यादिभिर्विना कस्मादिति कस्मादूचिवान् स इति न जानीमः । साधनं तत्कल्प इवात्राप्युक्तं मात्स्ये तथाहि ॥

बभूव वरदश्चास्या वर्षायुतशते गते ।
वरं वृणीष्व प्रोवाच प्रीतः स कमलासनः ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ।
भूतग्रामस्य सर्वस्य चरस्य स्थावरस्य च ।
भवेयं रक्षणायाहं प्रलये समुपस्थिते ।
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत ।
अचिरेणैव कालेन मेदिनी मेदिनीयते ।
भविष्यति जले मग्ना सशैलवनकानना ।
भगवन्कियद्भिर्वर्षैर्भविता त्वन्तरक्षयः ।

अद्य प्रभृत्यनावृष्टिर्भविष्यति महीतले ।
यावद्वर्षशतं साग्रं सुदुर्भिक्षाकरी तथा ।
ततोऽल्पसत्त्वक्षयदाश्मयः सप्त दारुणाः ।
सप्तसप्तेर्भविष्यन्ति प्रतत्याङ्गारवर्षिणः ।
और्वानलोऽपि विकृतिं गमिष्यति युगक्षये ।
विषाग्निश्चापि पातालात्सङ्कर्षणमुखाच्च्युतः ।
भवस्यापि ललाटोत्थस्तृतीयनयनोऽनलः ।
त्रिजगं निर्दहक्षोभं समेष्यति महामते ।
आकाशमूष्मणा तप्तम्...... ।
संवर्तो भीमनादश्च द्रोणश्चन्द्रो बलाहकः ।
विद्युत्पताकः शोणश्च सप्तैते लयवारिदाः ।
अग्निप्रस्वेदसम्भूताः प्लावयिष्यन्ति मेदिनीम् ।
वेदनावमिमां गृह्य सत्वबीजानि सर्वशः ।
त्वया सार्धमिदं सर्वं स्थास्यत्यन्तरसंक्षये ।
एवमेकार्णवे जाते चाक्षुषान्तरसंक्षये ।
वेदान्प्रवर्तयिष्यामि...... ॥

आभूतसंप्लवे तस्मिन्नित्यादि । अत्र स्पष्टं चाक्षुषान्तर एवेति ज्ञायते । आकूतमिदमत्र । अवतारद्वैविध्ये सङ्गृह्य तदुभयचरितोदीरणं तदैक्येऽपि यथा ब्राह्मी निशा यावच्चरिष्यति । तथाऽनया निशानिमित्तेन चरिष्यामि भक्षयिष्यामि । अवगमिष्यामीति वाऽर्थः । चरतेर्गत्याद्यर्थत्वात् । मात्स्ये सुदुर्भिक्षाकरी तथेत्युक्तेः । प्रथमेऽन्यामित्युक्तिः द्वितीये कथामन्यामित्युक्तिश्च मूलम् । कथामाद्यामिति पाठे मा न भवत्याद्येति माद्या । अवतारकथा च सा माद्या चेति विग्रहे द्वितीयलाभः । कामचारित्वाद्वा कडारादित्वाद्वा विशेषणपरनिपातः । पदभेदेनाद्यलाभोऽपि सुलभः । एवं द्विकैकसंपत्तिरिति विवेकः । विकर्षणमुपलक्षणम् । एकत्रापरत्र विशेषणम् । सप्तमे तु मन्वन्तर इव मनोरप्यक्षुण्णमिति सर्वं चतुरस्रम् ।

प्रतिनन्दन्तु निन्दन्तु नाना नानाविधा जनाः ।
प्रमेयस्य दुरूहत्वाद्धर्षामर्षौ जनस्ततः ।

अतीतकल्प उक्तविधः । तस्यान्तेऽवसाने ब्राह्मस्तन्निद्राकालभवः स इव च । निमित्तादुक्ताज्जातो नैमित्तिको लयः प्रलय आसीत्तत्र भूरादयो लोका आसत्यान्त एव वा । समुद्रोपप्लुतास्तल्लीनाः ॥७॥

छलारी — सामान्यतोऽवतारप्रयोजनमुक्त्वा विशेषतो मत्स्यावतारप्रयोजनमाह ॥ आसीदिति ॥ अतीतस्य कल्पस्य दिनकल्पस्यावसाने ब्राह्मो ब्रह्मणश्चतुर्मुखस्य निद्रायां भावस्तेनैव निमित्तेन जातो नैमित्तिको लयः प्रलय आसीत् । तत्र लये भूरादयः सत्यलोकपर्यंता लोकाः समुद्रप्रलयजले उपप्लुता निमग्नाः ॥ ७ ॥

लिङ्गेरी — मत्स्यावतारप्रयोजनं सामान्यतोऽभिधाय विशेषतो वक्तुमादित एव कथामुपक्रमते ॥ आसीदित्यादिना । ब्रह्मणोऽतीतदैनन्दिनकल्पान्ते ब्राह्मो निमित्तकप्रलयोऽभूत् । तत्र भूरादयो लोकाः समुद्रेणोपप्लुता आच्छादिताः ॥ ७ ॥

कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ।
मुखतो निःसृतान् वेदान् हयग्रीवोऽन्तिकेऽहरत् ॥ ८ ॥

सत्यधर्मीया — शिशयिषोः सुप्तशक्तेः । अनन्तरं कालेन भगवता प्रसिद्धेन चागता निद्रा यस्य तस्य । धातुर्मुखेभ्यो निःसृतान्वेदांस्तदभिमानिनः । अन्तिके सत्समीप एव विद्यमानान् । बली हयग्रीवः समर्थः परिवर्तनवान्वाऽहरत् ॥ ८ ॥

छलारी — कालेन निद्राकालेन निमित्तेनागता प्राप्ता निद्रा यस्य तस्य शिशयिषोः शयनं कर्तुमिच्छतो धातुर्ब्रह्मणो मुखतो निःसृतान् बहिरागतान्वेदान्देहधारिणो वेदाभिमानिदेवान् बली हयग्रीवात्मको दैत्योऽहरदपहरत् ॥ ८ ॥

लिङ्गेरी — हे अनघ । निद्राकालेनागतनिद्रावतः शयनं कर्तुमिच्छोर्ब्रह्मणो मुखतो बहिर्गतान्वेदान् बलिसमीपे तिष्ठन् हयग्रीवाख्योऽसुरोऽपाजहार ॥ ८ ॥

ज्ञात्वा तद् दानवेन्द्रस्य हयग्रीवस्य चेष्टितम् ।
दधार शफरीरूपं भगवान् हरिरीश्वरः ॥ ९ ॥

सत्यधर्मीया — शफरीरूपं मीनतनुम् । नडवीरश्चलचिमः प्रोष्ठी तु शफरी द्वयोरित्यमरः ॥ ९ ॥

छलारी — शफरीरूपं मत्स्यरूपम् । अतीतो यो दिनप्रलयस्तस्यापायेऽवसाने उत्थिताय वेधसे ब्रह्मणे हयग्रीवमसुरं हत्वा स हरिर्मत्स्यरूपी वेदान्प्रत्याहरद्दत्तवान् ॥ ९ ॥

लिङ्गेरी — सर्वजगदीश्वरो हरिर्दानवश्रेष्ठस्य हयग्रीवस्य तच्चेष्टितं वेदचौर्यलक्षणं व्यापारं ज्ञात्वा तच्छिक्षणाय मत्स्यरूपं दधार ।। ९ ।।

तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ।
नारायणपरोऽतप्यत् तपस्तत्सलिलाशये ।। १० ।।

सत्यधर्मीया — तल्लीलामालपति ।। तत्रेति । राजर्षिः सत्यव्रतः । तत्रातीतकल्पे । सलिलाशये तपोऽतप्यच्चकार । सलिलाशन इति पाठेऽसाधारण्येन नीत्या तन्मात्रमशनं यस्य स उदकमात्रप्राशक इत्यर्थः ।। १० ।।

छलारी — दिनकल्पे मत्स्यावतारस्य वेदापहारिहयग्रीवासुरहननपूर्वकं ब्रह्मणो वेदादानमेकं प्रयोजनमुक्त्वा मनुकल्पे क्रियामाणं प्रयोजनान्तरमाह ।। तत्र राजर्षिरित्यादि यावत्समाप्तिः । तत्रातीते मनुकल्पे सलिलाशनोऽब्भक्षः सन् उदकं भक्षयन् ।। १० ।।

लिङ्गेरी — तत्र समुद्रजले नाम्ना सत्यव्रतः कश्चिद्राजर्षिर्नारायणे भक्तिमान्सन् तपश्चचार ।।१०।।

योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः ।
श्राद्धदेव इति ख्यातो मनुत्वे हरिणाऽर्पितः ।। ११ ।।

सत्यधर्मीया — पौरस्त्यं तज्जन्म नाम चाह । य इति । योऽसौ सत्यव्रतः स एव विवस्वतोऽस्मिन् महाकल्पे विवस्वत एव तनयः श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः । कृत इत्यर्थः ।। ११ ।।

छलारी — सत्यव्रतः क इत्यत आह ।। य इति । अस्मिन्महाकल्पे वैवस्वतमनुकल्पे विवस्वतः सूर्यस्य तनयः श्राद्धदेव इति ख्यातो हरिणा मनुत्वे मनुपदेऽर्पितः स्थापितः ।। ११ ।।

लिङ्गेरी — सत्यव्रतस्याप्रसिद्धत्त्वात्प्रसिद्धरूपेण ज्ञापयति ।। योऽसाविति । अस्मिन्महाकल्पे विवस्वततनयः श्राद्धदेव इति ख्यातो मनुत्वे वैवस्वतमनुत्वे हरिणा स्थापितो योऽसौ स एव सत्यव्रत इति ।। ११ ।।

एकदा कृतमालायां कुर्वतो जलतर्पणम् ।
तस्याञ्जल्युदके काचित् शफर्येकाऽभ्यपद्यत ।। १२ ।।

सत्यधर्मीया — कृतमालायां तन्नाम्न्यां नद्याम् । अका न विद्यते कमुदकं यस्याः सा । तद्वत् । स्वौको भगवदुदकरहिता । एका चिच्छफरी ज्ञानात्मकशफरी । अतो नैका काचिदित्येकतरातिरेकः । अञ्जल्युदके चित्तस्मिन्नपीति वा । तत्रापीत्यर्थः। अभ्यपद्यत प्रापत् । काचिच्छफर्यैकाऽभ्यपद्यतेति वचने जात्यपेक्षमेकवचनमिति मत्वा बह्वः शफर्यः किं प्रत्यपद्यन्तेत्यपि प्रपद्येरन्न तथेति वक्तुमेकेत्युक्तम् । तथैवोक्तौ प्रधाना भवत्वेकाऽप्रधाना मीना बह्वः किं न भवेयुरिति शङ्का स्यात् तदपनुत्यै काचिदिति चेति ज्ञेयम् ॥ १२ ॥

छलारी — कृतमालायां द्राविडदेशे विद्यमानायां नद्यां स्नात्वा जलतर्पणं कृतवतस्तस्य सत्यव्रतस्यांजल्युदके काचिदेका शफरी मत्स्यो अभ्यपद्यत प्राप्तः ॥ १२ ॥

लिङ्गेरी — एकस्मिन्काले कृतमालाख्यनद्यां जलतर्पणं कुर्वतस्तस्यांजलिजले एका काचिच्छफरी मीनस्त्री प्राप्ता ॥ १२ ॥

सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत ।
उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥ १३ ॥

सत्यधर्मीया — अञ्जलिगतां तोयेन तर्पणार्थमञ्जलिकलितसलिलेन सह । येन मीनेन हतः ताडितोऽञ्जलौ तां शफरीम् । तामञ्जलिगतामिति वा । नदीतोये कृतमालोदके । उत्ससर्ज । शफरी महामीनोऽन्ववर्धतेति शबलितनिर्देशेन स्त्रीलिङ्गपुल्लिङ्गशब्दवाच्यता पुंसोऽपीति ज्ञेयम् । ततो येन तामञ्जलिगतामिति सम्भवति । द्रविडेश्वरः आन्ध्रदेशेशः ॥ १३ ॥

छलारी — द्राविडदेशस्येश्वरो राजा सत्यव्रतोंऽजलिगतां शफरीं तोयेन सह कृतमालानदीतोये उत्ससर्जोत्सृष्टत्वान् ॥ १३ ॥

लिङ्गेरी — द्रविडदेशाधिपतिः सत्यव्रतोंऽजलिगतां तां शफरीं नदीतोयेंऽजल्युदकेन सह त्यक्तवान् ॥ १३ ॥

तमाह साऽतिकरुणं महाकारुणिकं नृपम् ।
यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ।
कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ १४ ॥

सत्यधर्मीया — अतिकरुणं यथा भवति तथा । स्वभावतो महाकारुणिकमिदानीमतिकरुणं तामतिक्रम्य विद्यमानमिव । विद्यमानमिति वा । ज्ञातीन् अणीयसो घातयन्तीति तानि । यथा यादोभ्यो जलजन्तुभ्यो भीताम् । कथं विसृजसे विसृजसि ॥ १४ ॥

छलारी — सा शफरी महाकारुणिकं तं नृपं सत्यव्रतमतिकरुणं यथा भवति तथाऽऽह । हे दीनवत्सल । ज्ञातीनां घातिभ्यो हिंसकेभ्यो यादोभ्यो जलजन्तुभ्यो भीतां दीनां मामस्मिन् जले कथं विसृजसे त्यजसि ॥ १४ ॥

लिङ्गेरी — हे राजन् । सा शफर्यतिकृपायुक्तं तं सत्यव्रतं नृपं प्रति । हे राजन्! सगोत्रजातिभ्यो मीनेभ्यो यादेभ्यो जलचरेभ्यो भीतामत एव दीनामस्मिन् उदके दीनवत्सलस्त्वं कथं त्यजसीति कृपा यथा स्यात्तथाऽऽह ॥ १४ ॥

श्रीशुक उवाच–

तमात्मनोऽनुग्रहार्थं प्राप्तं मत्स्यवपुर्धरम् ।
अजानन् रक्षणार्थाय शफर्याः स मनो दधे ॥ १५ ॥

सत्यधर्मीया — हरिमजानन् शफर्या रक्षणार्थाय । स राजा मनो दधे । रक्षणायेत्येतावता पूर्तौ यदर्थेत्याह तेनापहास्यतामेतद्रक्षणस्याभिप्रैति । परिहासप्रलापादिष्वनर्था वागपीष्यत इत्यादेरिति केचिदाहुः ॥ १५ ॥

छलारी — सत्यव्रतः परमात्मानमात्मनः स्वस्यानुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं मत्स्यस्वरूपधारिणमजानन् शफर्या रक्षणार्थं मनो दधे ॥ १५ ॥

लिङ्गेरी — सः सत्यव्रत आत्मनः स्वस्यानुग्रहार्थं प्राप्तं मत्स्यशरीरधारिणं हरिमजानन् तद्रक्षणार्थं मनो दधे ॥ १५ ॥

तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ।
कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥ १६ ॥

सत्यधर्मीया — आश्रुत्य श्रुत्वा । कलशाप्सु गतं स्वकलशस्थोदके निन्येऽनयत् ॥ १६ ॥

छलारी — तस्याः शफर्याः कलशाप्सु स्वकमण्डलोदकेषु निधाय ॥ १६ ॥

लिङ्गेरी — दयालुः स महीपतिस्तस्य मत्स्याकारस्यातिदैन्यवाक्यं श्रुत्वा कलशोदकेष्वेनां शफरीं स्थापयित्वा स्वाश्रमं प्रापयामास ॥ १६ ॥

सा तु तत्रैकरात्रेण वर्धमाना कमण्डलौ ।
अलब्धात्मावकाशं वा इदमाह महीपतिम् ॥ १७ ॥

सत्यधर्मीया — एकरात्रेण गतं एकया रात्र्या । अलब्धात्मावकाशमलब्ध आत्मनोऽवकाशोऽस्मिन्कर्मणि यथा भवति तथा वर्धमाना महीपतिमाह ॥ १७ ॥

छलारी — एकरात्रेणालब्ध आत्मनोऽवकाशो यथा स्यात्तथा वर्धमाना सा ॥ १७ ॥

लिङ्गेरी — सा शफरी तत्र कमण्डलावेकरात्रेणाभिवृद्धदेहाऽवकाशरहितं वा जलं दृष्ट्वा महीपतिं सत्यव्रतं प्रतीदमाह ॥ १७ ॥

नाहं कमण्डलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे ।
कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥ १८ ॥

सत्यधर्मीया — आकुञ्चनादिना कृच्छ्रं कष्टं यथा भवति तथा । वस्तुं वासं कर्तुं नोत्सहे । यत्राहं सुखं निवसे वसामि तद्विपुलमोको निलयं कल्पय ॥ १८ ॥

छलारी — कृच्छ्रं कष्टं यथा स्यात्तथा क्लेशेनेत्यर्थः । वस्तुं वासं कर्तुं नोत्सहे न शक्नोमि । यत्राहं सुखं निवसे निवसामि तादृशं सुविपुलं अतिविशालमोकः स्थानं कल्पय कुरु । ततः कमण्डलूदकादादायौदंचनोदके मणिकस्थे जले । मणिक इति रञ्जणगीत्यपभ्रष्टभाषा । आक्षिप्ता स्थापिता मुहुर्तेन घटिकाद्वयेन हस्तत्रयपरिमितम् ॥ १८, १९ ॥

लिङ्गेरी — हे सत्यव्रत । अहमस्मिन्कमण्डलौ कष्टं यथा स्यात्तथा वासं कर्तुं नेच्छामि । अतोऽहं यत्र सुखं निवसे तत्सुविपुलमतिविस्तृतमोकः स्थानं मम कल्पयेति ॥ १८ ॥

स एनां तत आदाय न्यधादौदञ्चनोदके ।
तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥

सत्यधर्मीया — उदञ्चनं मणिकं तत्स्थं तत्सम्बन्धि उदकम् । तत्र । हस्तत्रयम् । व्यामो हस्तावधिरित्युपयुक्तामरः । व्यामत्रयम् ॥ १९ ॥

लिङ्गेरी — तदुक्त्यनन्तरं स सत्यव्रत एनां शफरीमादायोदंचनस्थितोदके स्थापयामास । तत्राक्षिप्ता सा शफरी मुहूर्तेन हस्तत्रयपरिमिता वृद्धाऽभूत् ॥ १९ ॥

मीन उवाच–

न म एतदलं राजन् सुखं वस्तुमुदञ्चनम् ।
पृथु देहि पदं मह्यं यत् त्वाऽहं शरणं गता ॥ २० ॥

तात्पर्यम् – **अनन्तशक्तिर्भगवान् मत्स्यरूपीजनार्दनः ।**
क्रीडार्थं याचयामास स्वयं सत्यव्रतं नृपम् ॥ इति मात्स्ये ।

सत्यधर्मीया — पृथु देहि पदं मह्यमिति श्रीहरिणा यं कञ्चन नृपं प्रति या च याचना सा सर्वथाऽसम्भाव्या । कथं कथिता चेत्यतो मानेन समाधत्ते ॥ अनन्तशक्तिरिति । सत्यव्रतं नृपं क्रीडार्थं याचयामास । यथा च लीलैव हेतुर्याचन इति नानुचितता तस्येति मन्तव्यम् । अथ मूलार्थो यद्यतः ॥ २० ॥

छलारी — एतदुदञ्चनं मे सुखं वस्तुं नालं न पर्याप्तम् । पृथु विशालं पदं स्थानम् । यद्यस्मात्त्वा त्वाम् । शरणागता तत्सरोवरमात्मना स्वशरीरेणावृत्य व्याप्य सायंकालमध्ये एव ॥ २०, २१ ॥

लिङ्गेरी — हे राजन् । ममेदमुदंचनं न सुखेन वस्तुं शक्यम् । तस्माद्यस्मात्त्वामहं रक्षकं प्राप्ता तस्माच्चेतोऽपि विस्तृतं स्थानं देहीत्युवाच शफरी ॥ २० ॥

श्रीशुक उवाच–

तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ।
तदावृत्यात्मना सर्वं महामीनोऽन्ववर्धत ॥ २१ ॥

सत्यधर्मीया — आत्मना कायेन ॥ २१ ॥

लिङ्गेरी — हे राजन् । सा शफरी राज्ञा सत्यव्रतेन तदनन्तरं तस्मादुदंचनादादाय सरोवरे क्षिप्ता । तदा सा शफरी तत्सरोवरमात्मना स्वदेहेन व्याप्य महामीनोऽवर्धत ॥ २१ ॥

मीन उवाच–

नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ।
निधेहि रक्षायोगेन ह्रदे मामविदासिनि ।। २२ ।।

सत्यधर्मीया — योगेनोपायेन । अविदासिनि । दसू उपक्षये । ततो घञि विदास उपक्षयोऽस्यास्तीति स विदासी स नेत्यविदासी तस्मिन् । अशुष्यदुदके ह्रदे निधेहि मामिति केचित् । दस भेदने । अभेद्येतरासाध्यगमन इति यावत् । क्वचित्तालव्यपाठः । तत्र विविधा दाशाः सन्त्यस्मिन्समीप इति । (विदासी स न भवतीत्यविदासी तस्मिन् दाशानामप्यस्मद्भक्षकत्वादिति भावः । विदासी उन्नतो भिन्नो वा । त्रिविधाः पुरुषा लोके नीचमध्यविदासिनः । चतुर्धा वर्णरूपेण जगदेतद्विदासितमिति प्रथमतात्पर्योक्तेः । स न भवतीत्यविदासी । निम्नोऽभिन्नो वा तस्मिन्) ।।२२।।

छलारी — सलिलौकसो जलाश्रयस्य मे एतदुदकं स्वस्तये सुखेन वासार्थं नालम् । रक्षायोगेनोपायेन यथा महाह्रदे पूर्वं जलं विना नानुशुष्येयं तेनोपायेन निधेहि । अविदासिन्यगाधे जलक्षयरहिते च ।। २२ ।।

लिङ्गेरी — हे राजन् । एतदुदकं मे स्वस्तये क्षेमाय नालं जलाश्रयस्य । तस्मादुपायेन मां रक्षन् अविदासिनि तलस्पर्शशून्येऽतिविस्तृते ह्रदे निधेहि स्थापय ।। २२ ।।

इत्युक्तः सोऽनयन्मत्स्यं तत्र तत्राविदासिनि ।
जलाशये सम्मितं तं समुद्रे प्राक्षिपज्झषम् ।। २३ ।।

सत्यधर्मीया — स सत्यव्रतस्तं मत्स्यम् । अनयन्नीतवान् । संमितमथासंमितमिति पदे । संमितं तत्तज्जलाशयसमानम् । असंमितं तत्तज्जलाशयतः किञ्चिदतिशायिनम् ।। २३ ।।

छलारी — तत्र तत्र जलाशयेऽनयत् । संमितं तत्तज्जलाशयपरिमितम् । असंमितं असमानमिति वा ।। २३ ।।

लिङ्गेरी — स सत्यव्रतो मत्स्यरूपेण हरिणैवमुक्तो तं मत्स्यमविदासिनि तत्र तत्र जलाशये क्रमेणोत्तरोत्तरमतिविस्तरे ह्रदादौ नयन्सन् तं जलाशयादिकं तस्य मत्स्यस्यासंमितं सावकाशं वस्तुमशक्यं दृष्ट्वा तं झषं मत्स्यं समुद्रे प्राक्षिपत् ।। २३ ।।

क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ।
अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥

सत्यधर्मीया — अतिबला इत्यदने वीरेति नयने च हेतूक्तिः ॥ २४ ॥

छलारी — क्षिप्यमाणो मत्स्य इह समुद्रे मकरादयो जलजन्तवोऽतिबला मामदन्ति भक्षयन्ति । अत इहोपस्रष्टुं नार्हसि ॥ २४ ॥

लिङ्गेरी — तेन क्षिप्यमाणो मत्स्यस्तदा तं प्रतीदमाह । हे वीर! आरब्धान्तगामिन्सत्यव्रत । इह क्षिप्तं मामतिबला मकरादयोऽदन्ति भक्षयिष्यन्ति । तस्मात्त्वं मामिह त्यक्तुं योग्यो नार्हसीति ॥२४ ॥

एवं विमोहितस्तेन वदता वल्गुभारतीम् ।
तमाह को भवानस्मान् मत्स्यरूपेण मोहयन् ॥ २५ ॥

सत्यधर्मीया — मत्स्यरूपेणास्मान् मोहयन् भवान् क इति तमाह सत्यव्रतः ॥ २५ ॥

छलारी — वल्गुभारतीं कृपाजनकवचनं वदता तेनैवं विमोहितो वंचितो राजा तं मत्स्यमाह ॥ मत्स्यरूपेणास्मान्मोहयन् भवान् क इति ॥ २५ ॥

लिङ्गेरी — एवमुक्तरूपेण वल्गु मनोहरं यथा भवति तथा भारतीं वाचं वदता तेन मत्स्यरूपेण हरिणा मोहितः सत्यव्रतः । हे मत्स्यरूपेणास्मान्मोहयन् भवान् क इति तमाह ॥ २५ ॥

नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि वा ।
यो भवान् योजनशतमह्नाय व्यानशे सरः ॥ २६ ॥

सत्यधर्मीया — एवं वीर्यं यस्य स एवंवीर्यः । अह्नाय झटिति । व्यानशे, अशू व्याप्तौ । सरो व्याप्तवानिति । भवान्क इत्यन्वयः । नकेवलं व्यानशेऽसरश्च पुरतो गन्तासीति वा ॥ २६ ॥

छलारी — एवंविधं वीर्यं सामर्थ्यं यस्य स जलचरो मीनो दृष्टो वा श्रुतो वा न । तद्वीर्यमाह ॥ य इति । यो भवान् अह्नैकदिनेन योजनशतं सरोऽभिव्यानशेऽभितो व्याप्तवान् । अह्नायेति पाठे झडितीत्यर्थः ॥ २६ ॥

लिङ्गेरी — हे मत्स्य । एवंविधसामर्थ्योपेतो जलचरो मत्स्योऽस्माभिर्न दृष्टो नापि श्रुतो यो भवान् शतयोजनपरिमितसरोवरमप्यह्नाय शीघ्रं व्यानशे व्याप्तवान् ॥ २६ ॥

नूनं त्वं (भगवन्) भगवान् साक्षाद् हरिर्नारायणोऽव्ययः ।
अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ २७ ॥

सत्यधर्मीया — एवं मोहितोऽप्यूहयामास कृततपःप्रभावो यल्लवमीनावनसुकृतादथ चाह ॥ नूनमिति । भगवन् भगवानिति पाठौ द्वावप्यद्वन्द्वौ । नारायणश्चेदत्र कुत एवं रूपश्चेत्यत आह । भूतानामनुग्रहाय तदर्थं जलौकसां रूपं धत्से न कर्मवशात इति ॥ २७ ॥

छलारी — हे मत्स्य । त्वं न रीयते क्षीयत इति नरो विष्णुस्तदुत्पन्नत्वान्नारा आपस्ता अयनं स्थितिराश्रयो यस्य सः । जलचर इत्यर्थः । त्वं नूनं साक्षाद्धरिरसि । भूतानां मादृशां प्राणिनामनुग्रहाय जलौकसां मत्स्यानां रूपं धत्से ॥ २७ ॥

लिङ्गेरी — एवमलौकिकसामर्थ्यदर्शनेन तदनुग्रहेण च ज्ञातमत्स्यस्वरूपः सत्यव्रतस्तमाह । हे मत्स्य । त्वं साक्षान्मुख्यतो भगवच्छब्दवाच्यो भक्तेष्टाद्याहर्ता चतुर्विधनाशरहितो नारायण एव स्वभक्तानामनुग्रहाय जलाश्रयाणां मत्स्यानामाकारं बिभर्षि नूनं निश्चय इति ॥ २७ ॥

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ।
भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मा गतिर्विभो ॥ २८ ॥

सत्यधर्मीया — नूनमिति सूचितनिश्चयस्याभ्रान्तितां सन्तन्वन्नमति ॥ नम इति । उत्पत्तिस्थित्यप्ययेश्वरेति क्रामिक्युक्तिर्युक्ता । तथाऽप्येतर्हि झषवपुषा तामेव कर्तुमायत इति ध्वनयितुं स्थितेरादाववस्थितिरिति वस्तुस्थितिः । मुख्य आत्मा परमचेतनो गतिः प्राप्यश्च ॥ २८ ॥

छलारी — उत्पत्तिश्चाप्ययश्च तेषामिश्वरः कर्ता मुख्य आत्मोत्तमचेतनः परमात्मा त्वत्प्रपन्नानां भक्तानां गतिराश्रयः ॥ २८ ॥

लिङ्गेरी — तज्ज्ञानेनोद्रिक्तभक्तिस्तं स्तौति ॥ नम इत्यादिना । हे पुरुषश्रेष्ठ क्षराक्षरोत्तम जगतः स्थित्युत्पतिनाशाधिपते विभो देशकालगुणैर्व्याप्त स्वामिन्नारायण ते नमोऽस्तु । त्वं त्वां शरणागतानां भक्तानामस्माकं मुख्य आत्मा स्वामी गतिप्रदश्च ॥ २८ ॥

सर्वे लीलावतारास्ते भूतानां भूतिहेतवे ।
ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९ ॥

सत्यधर्मीया — भूतिहेतवे तदर्थम् । सा भूतिरिदानीमेतद्रूपिणीति विशेषं विवित्सुः पृच्छति । अदस्तत्प्राङ्नदञ्जलिजलगतम् । तदर्थं भवता धृतं तत्प्रयोजनं ज्ञातुमिच्छामीत्यन्वयः ।। २९ ।।

छलारी — ते सर्वे तव लीलया कृतावतारा भूतानां भूतैरैश्वर्यस्य हेतव इति सामान्यतो ज्ञानमस्ति । तत्रादो रूपं मत्स्यरूपं यदर्थं यत्प्रयोजनाय धृतं तत्ज्ञातुमिच्छामि ।। २९ ।।

लिङ्गेरी — हे मत्स्य । सर्वे तव लीलावताराः प्राणिनां संपत्करणाय भवन्ति । भवताऽदस्तन्मत्स्यरूपं यत्प्रयोजनाय धृतं तत्प्रयोजनमहं ज्ञातुमिच्छामि ।। २९ ।।

न तेऽरविन्दाक्ष पदोपसर्पणं मुधा भवेत् सर्वसुहृत्प्रियात्मनः ।
यथेतरेषां पृथगात्मनां सतामदीदृशो यद् वपुरद्भुतं हि नः ।। ३० ।।

सत्यधर्मीया — यन्मया त्वया कारितं तपआदिकं तत्फलमिति तदितरनिदर्शनपूर्वकमन्वयव्यतिरेकत आह ।। न त इति । हे अरविंदाक्ष । सर्वसुहृत्प्रियात्मनः । तत्तदधिकारिविवक्षयैव-मुक्तिर्वाऽवस्थाभेदोक्तिर्वा । सतां ते पदोपसर्पणं पादसेवा । मुधा त्वत्साक्षात्कारमजनयद्व्यर्थं भवेत् किं न भवेत् । पृथगात्मनां मूर्खाणां विषयेष्वेव रतानां बहिर्हरिभक्तवदात्मनो दर्शयतां यथा तव ~~पदोपसर्पणं मुधा वृथा भवेत् । स्वसाक्षिणमेव प्रमाणयति । नोऽस्माकं यद्यतोऽद्भुतं~~ इतरादर्शनीयतयाऽश्चर्यकरं वपुरिदमदीदृशोऽदर्शयः अत इति । अहमपि तदन्यतम इति वपुरुपदर्शितवान् अन्यथेदं दुर्घटमिति भावः । यद्वा पृथगात्मनां नानाविधप्रयत्नवतां सतां सज्जनानां यथा तव मत्त इतरेषां पदोपसर्पणं वृथा न भवति तथा । सर्वसुहृत्प्रियात्मनः सर्वेभ्यः सुहृद्भ्यः । पुत्रात्प्रेयो मित्रात्प्रेय इति श्रुतेः । प्रिय आत्मा भवान् येषां तान् नो यदद्भुतं तव वपुरदीदृशोऽदर्शय इति वृथा भवेत् किमिति योजना । सर्वसुहृत्प्रियेति सम्बोधनम् । आत्मनस्ते वपुरित्यन्वयो वा । इतरेषां कर्मतन्त्राणां पृथगात्मनां मूर्खजनानां यथा तथा नः प्रति वपुर्दुर्भगशरीरमदर्शयोऽद्भुतमित्यपि योजयन्ति । स्वाहंताशान्तिं वा तनोति । न त इति । सर्वसुहृत्प्रियात्मनस्ते पदोपसर्पणं सतां यथा न मुधा भवेत् । पृथगात्मनामितरेषां तद्भिन्नानाम् । असतामिति यावत् । न इदं वपुरदीदृश इति यत्तच्छाठ्येन कृतं पदोपसर्पणं मुधा नाभूदित्यद्भुतमिति । ते पदोपसर्पणं सतां तव दासानां च पदोपसर्पणमित्यन्वयो वा । हिश्चशब्दार्थे ।। ३० ।।

छलारी — मम त्वत्स्वरूपज्ञानयोग्यत्वात्त्वदवतारप्रयोजनमुपदिशेत्याशयेनाह ।। न त इति । अरविंदाक्ष । पृथगात्मनां विषयबुद्धीनामितरेषां जनानां तव पदोपसर्पणं मुधा न भवेत् । यद्वा

पृथगात्मनां सतामितरेषां त्वदितरेषां पदोपसर्पणं यथा मुधा भवेत् । तथा सर्वसुहृत्प्रियात्मनः सर्वेषां सुहृदोऽनिमित्तोपकारिणः प्रियात्मनः प्रीतिविषयस्य तव पदोपसर्पणं तव पादाश्रयेण यथा मुधा वृथा भवेत्तथा सतां ज्ञानिनां तव पादोपसर्पणं मुधा न भवेत् । कुतः । यद्यस्मान्नो भक्तानामितरमत्स्य-विलक्षणत्वादद्भुतमाश्चर्यं वपुर्मत्स्यरूपमदीदृशो दर्शितवान् ॥ ३० ॥

लिङ्गेरी — सत्यव्रतोऽयोग्यादृश्यभगवद्दर्शनेन स्वस्य सत्वमवधार्य तेनापि महत्प्रयोजनं स्यादिति विज्ञापयते । हे अरविन्दाक्ष । सर्वेषां प्राणिनां स्वपुत्रकलत्रादिभ्योऽप्यनिमित्तोपकारित्वादति-प्रियस्वरूपस्य ते पदोपसर्पणं पादपद्मसमीपगमनं भक्तेतरेषां पृथगात्मनां पामराणां मुधा वृथा भवेत् । न तथा सतां तव स्वरूपं स्वस्वयोग्यतानुसारेण यथावत्ज्ञानवताम् । यद्यप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयते, यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यादिश्रुतेः । तत्र वयमपि सन्त एवेति संभावयामः । यस्मात्त्वमद्भुतमात्स्यं वपुर्नोऽस्मा-कमदीदृशो दर्शितवान् । भगवतः स्वपुत्रादिभ्योऽतिप्रियत्वं च, तदेतत्प्रेयः पुत्रात्प्रेयो मित्रात्प्रेयः सर्वस्मात्प्रेय इत्यादिश्रुतिसिद्धम् । व्यर्थकं तु वृथा मुधेत्यमरः ॥३०॥

इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ।
विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियं प्रभुः ॥ ३१ ॥

सत्यधर्मीया — युगक्षये चाक्षुषमनुप्रलये । प्रलयार्णवे विहर्तुकाम एकान्तजनप्रियं चिकीर्षुः । इति ब्रुवाणं सत्यव्रतं नृपतिं प्रति । इच्छामात्रं प्रभोः सृष्टिरित्यादेर्मत्स्यवपुः प्रभुः । अब्रवीदित्यन्वयः । एकान्तजनप्रियः प्रियमिति च पठन्ति ॥ ३१ ॥

छलारी — मत्स्यवपुर्जगत्पतिः सत्यव्रतमब्रवीत् । कथं भूतः सन् । युगक्षये चाक्षुषमनुप्रलये प्रलयार्णवे विहर्तुकाम एकान्तजना भक्ताः प्रिया यस्य सः प्रियं हितं चिकीर्षुः ॥ ३१ ॥

लिङ्गेरी — जगत्पतिर्मत्स्यरूपो हरिर्यतः स्वयमेकान्तभक्तजनप्रियस्तदभिलषितपूर्णः समर्थश्चातः प्रलयार्णवे स्वयं विहर्तुकामः सन् इत्युक्तप्रकारेण ब्रुवाणं सत्यव्रतं नृपतिं प्रति मत्स्य-वपुर्हरिर्युगक्षये प्रलयार्णवे स्वेनाग्रे चिकीर्षितं कर्तुमिष्टमब्रवीत् ॥ ३१ ॥

श्रीभगवानुवाच–

सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिन्दम ।
निमङ्क्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ॥ ३२ ॥

सत्यधर्मीया — अद्यतनादह्न ऊर्ध्वमुपरि । तदवधिमभिधत्ते ॥ सप्तमेऽहनीति । एतत् भूर्भुवादिकमिति त्रैलोक्यम् । अप्ययाम्भोधौ लयजलधौ । निमङ्क्ष्यति मग्नं भविष्यति ॥ ३२ ॥

छलारी — अद्यतनादिदानींतनादह्न ऊर्ध्वं सप्तमेऽहन्येतद्भूर्भुवादिकं त्रैलोक्यं लोकत्रयमप्ययाम्बोधौ प्रलयार्णवे निमंक्ष्यति निमग्नं भविष्यति ॥ ३२ ॥

लिङ्गेरी — हे अरिंदम शत्रुशिक्षक सत्यव्रत । अद्यतनाद्वर्तमानादह्न ऊर्ध्वमुपरि सप्तमेऽहन्यप्ययांभोधौ प्रलयसमुद्रे भूर्भुवादिकमेतत्त्रैलोक्यं निमंक्ष्यति मग्नं भविष्यति ॥ ३२ ॥

त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा ।
उपस्थास्यति नौः काचिद् विशाला त्वां मयेरिता ॥ ३३ ॥

सत्यधर्मीया — संवर्तांभसि त्रिलोक्यां लीयमानायां सत्याम् । संवर्तः प्रलयः कल्प इति चाभिधानम् । तदा विशाला ईरिता प्रेरिता काचिन्नौस्त्वां प्रत्युपस्थास्यति समीपमाप्ता भवति । वेश्च शङ्कटशालचाविति शालच्प्रत्ययः । शब्दश्च विशेष्यनिघ्नः ॥ ३३ ॥

छलारी — संवर्तांभसि प्रलयजले । ''संवर्तः प्रलयः कल्प'' इत्यभिधानात् । मयेरिता प्रेरिता विशाला महीनौस्त्वामुपस्थास्यति । त्वत्समीपे आगमिष्यति ॥ ३३ ॥

लिङ्गेरी — संवर्तांभसि प्रलयोदके त्रैलोक्यां लीयमानायां सत्यां मयेरिता प्रेरिता विस्तृता काचिन्नौः प्लवस्त्वामुपस्थास्यति त्वत्समीपे स्थिता भविष्यति । संवर्तः प्रलयः कल्पः, अम्भोर्णस्तोय पानीयः, उडुपं तु प्लवः कोलः स्त्रियां नौरिति चामरः ॥ ३३ ॥

त्वं तावदौषधीः सर्वा बीजान्युच्चावचानि च ।
सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः ॥ ३४ ॥

सत्यधर्मीया — किं दन्तकथया कथयोदन्तं भाविनमुपयोगिनं भगवन्नित्यतस्तमवगमयति ॥ त्वमिति । सर्वा ओषधीरुच्चावचानि बीजानि च सङ्गृह्येति शेषः । सर्वसत्त्वैः प्राणिभिरुपबृंहितः परिवृतः ॥ ३४ ॥

छलारी — ओषधीरुच्चावचानि बीजानि च । आदायेति शेषः । सर्वसत्त्वैः सर्वप्राणिभिरुपबृंहितः परिवृतः ॥ ३४ ॥

आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ।
एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥

सत्यधर्मीया — बृहतीं महतीमारुह्य अविक्लवोऽविह्वलो विचरिष्यसि । निरालोके सूर्यादिप्रकाशरहिते एकार्णवे । तर्ह्यन्धकारे कथं विचरणमित्यत आह ॥ ऋषीणां वर्चसा प्रकाशेनैवेति ॥ ३५ ॥

छलारी — अविक्लव उद्वेगरहितो निरालोके प्रकाशरहिते ऋषीणां वर्चसैव प्रकाशेनैव विचरिष्यसि ॥ ३५ ॥

लिङ्गेरी — तावत्तदा त्वं सर्वा ओषधीः व्रीहियवादीन् उच्चावचान्युत्कृष्टान्यन्यानि बीजानि चादाय सप्तर्षिभिः परिवृतः सन् सर्वैः प्राणिभिः पूर्णः सन् बृहतीं विस्तृतां नावमारुह्यापरवशः स्वस्थान्तःकरणः सन् एकार्णवीभूते जले सूर्यचन्द्रादिप्रकाशाभावेन निरालोकेऽन्धकारे सप्तर्षीणां वर्चसा प्रकाशेनैव सञ्चारं करिष्यसि ॥ ३५ ॥

दोधूयमानां तां नावं समीरेण बलीयसा ।
उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ॥ ३६ ॥

सत्यधर्मीया — बलीयसा समीरेण मारुतेन दोधूयमानामितस्ततोऽतिकम्पमानां तां नावं मे ममोपस्थितस्य तदागत्य स्थितस्य शृङ्गे । मत्स्यानां न शृङ्गम् । तदपि त्वत्कार्यानुगुणं सृष्ट्वा दर्शयिष्यामीति च बध्नीहि । बन्धनं केनेत्यतो महाहिना महासर्पेणेति । अनेन वायुरप्यायास्यति सर्पश्चायास्यतीति सूचयामासेति ज्ञेयम् ॥ ३६ ॥

छलारी — बलीयसा प्रबलेन समीरणेन दोधूयमानामितस्ततोऽतिशयेन कम्पमानां तां नावमुपस्थितस्य मे मत्स्यरूपिणः शृङ्गे महाऽहिना वासुकिना निबध्नीहि बन्धय ॥ ३६ ॥

लिङ्गेरी — बलीयसा बलिष्ठेन समीरेण वातेन दोधूयमानां पुनःपुनरतिकंपमानां तां नावं समीपास्थितस्य मे शृङ्गे महाऽहिना पाशस्थानीयमहासर्पेण निबध्नीहि ॥ ३६ ॥

अहं त्वामृषिभिः साकं सह नावमुदन्वति ।
विकर्षन् विचरिष्यामि यावद् ब्राह्मी निशा प्रभो ॥ ३७ ॥

सत्यधर्मीया — सह नावं ऋषिभिः साकं त्वां यावद्ब्राह्मी निशा शर्वरी तावत्पर्यन्तम् । उदन्वति विकर्षन् विचरिष्यामि । नौकाकर्षणेन चरण ओषध्यादिसाहितीलाभात्तदनुक्तिरुक्तिश्चर्षिभिरिति तेषां प्रकाशनकार्यगुरुतयेति विवेकः ।। ३७ ।।

छलारी — सहनावं नौःसहितं त्वामुदन्वति प्रलयार्णवे विकर्षन् यावद्ब्राह्मी निशा चाक्षुषमनुप्रलयपर्यन्तमित्यर्थः । विचरिष्यामि । अत्र ब्राह्मी निशाशब्देन चाक्षुषमनुप्रलयो लक्ष्यते । तस्यापि ब्रह्मदिन एव जायमानत्वेन ब्रह्मसम्बन्धित्वात् । ननु तथाऽपि कुतो लक्ष्यत इति चेन्न । महाप्रलयदिनप्रलययोस्त्वं तावदौषधीः सर्वा इत्युक्तौषध्यादीनामशेषासम्भवेन तद्ग्रहणस्य बाधितत्वात् । ''रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमि''ति प्रथमस्कन्धोक्तपृथिव्याद्यशेषासम्भवाच्च । न हि सर्वाभाववति प्रलयद्वये सत्यव्रतादीनां पृथिव्यात्मकनावारोहः सम्भवति । तथाऽपि चाक्षुषमनुप्रलयग्रहणे किं प्रमाणमिति चेन्न । ''रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लव'' इति चाक्षुषमनुप्रलये मात्स्यं रूपं जगृहे इति प्रथमस्कन्धोक्तेरेव प्रमाणत्वात् ।। ३७ ।।

लिङ्गेरी — हे प्रभो राजन् । अहं सह त्वां सनावमुदन्वति समुद्रे विचिकर्षन् चतुर्मुखसंबन्धिनी निशा रात्री यावद्वर्तेत तावदेवं विचरिष्यामि ।। ३७ ।।

मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ।
वेत्स्यस्यनुग्रहीतं मे सम्प्रश्नैर्विवृतं हृदि ।। ३८ ।।

सत्यधर्मीया — परं ब्रह्मेति शब्दितम् । मदीयं महिमानम् । धर्माणां तद्रूपत्वेन सामानाधिकरण्यम् । तव संप्रश्नैः समीचीनैः प्रश्नैर्मे मया विवृतं वेत्स्यसि । अनन्तरं हृदि अनुगृहीतं त्वां वेत्स्यसि । महिमानं माहात्म्यं च । मदीयं च ब्रह्मेति शब्दितं तच्छब्दवाच्यं वेत्स्यसि । हृदि प्रश्नैरनुगृहीतं पृच्छाविषयत्वेन स्वीकृतं प्रमेयम् । विवृतमुत्तरितं वेत्स्यसीति वा । मदीयमहं वा वाच्यमन्यो वेति तं वेत्स्यसीति वा ।। ३८ ।।

छलारी — मे मयाऽनुगृहीतम् । विभक्तिविपरिणामेनानुगृहीतत्वम् । परं ब्रह्मेति शब्दितं परब्रह्म शब्दवाच्यम् । परं ब्रह्म तन्महिम्नोरभेदादिति भावः । मदीयं महिमानं सर्वगुणपूर्णत्वरूपं हृदि वेत्स्यसि ज्ञास्यसि । यद्वा परं ब्रह्मेति शब्दितम् । मामिति शेषः । मदीयं महिमानं वेत्स्यसि । कथं भूतम् । त्वया कृतैः समीचीनप्रश्नैर्निमित्तैर्मया विवृतं स्पष्टं प्रतिपादितम् ।। ३८ ।।

लिङ्गेरी — तदा त्वं हृदि स्थितैः सम्यक् प्रश्नकृतैर्निमित्तैर्मया विवृतमनुगृहीतं परब्रह्मशब्दितस्य मे महिमानं सम्यग्ज्ञास्यसि ॥ ३८ ॥

श्रीशुक उवाच—

इत्थमादिश्य राजानं हरिरन्तरधीयत ।
सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३९ ॥

सत्यधर्मीया — अन्ववैक्षत परीक्षमाणः आस्थितः ॥ ३९ ॥

छलारी — सः सत्यव्रतस्तं कालमन्ववैक्षत प्रतीक्ष्य स्थितः ॥ ३९ ॥

लिङ्गेरी — मत्स्यरूपी हरिरित्थमुक्तरीत्या राजानं सत्यव्रतं प्रत्युक्त्वाऽदृश्योऽभूत् । अथ स सत्यव्रतो हृषीकाणामिन्द्रियाणामीशः स्वामी हृष्यानन्दरूपः केशो यस्य स मत्स्यरूपी हरिर्यं कालमादिशत्तं कालमन्ववैक्षत प्रतीक्षन् स्थितः ॥ ३९ ॥

आस्तीर्य दर्भान् प्राक्कूलान् राजर्षिः प्रागुदङ्मुखः ।
निषसाद हरेः पादौ चिन्तयन् मत्स्यरूपिणः ॥ ४० ॥

सत्यधर्मीया — प्राक् पूर्वभागे कूलान्यग्राणि येषांस्तान् दर्भान् कुशान् । प्रागुदङिति ईशान्यावान्तरदिगुच्यते । तन्मुखं यस्य सः ॥ ४० ॥

छलारी — राजर्षी राजश्रेष्ठः सत्यव्रतः प्राक्कूलान् प्रागग्रान् प्रागुदङ्मुख ईशानदिगभिमुखो मत्स्यरूपस्य हरेः पादावङ्घ्री चिन्तयन् ध्यानं कुर्वन् सन्निषसाद ॥ ४० ॥

लिङ्गेरी — राजर्षिः सत्यव्रतः प्रागग्रान्दर्भानास्तीर्य प्रागुदङ्मुख ईशानीमुखः सन् मत्स्यरूपिणो हरेः पादौ चिन्तयन्निषसादोपविवेश ॥ ४० ॥

ततः समुद्र उद्वेलः सर्वतः प्लावयन् महीम् ।
वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥

सत्यधर्मीया — वर्षद्भिर्महामेघैर्वर्धमानः सर्वतः सर्वां महीं प्लावयन् उद्वेलो वेलायामुद्गत इति सः सन् । सर्वतः समदृश्यतेत्यन्वयः । ततस्तदुक्तदिनानन्तरम् ॥ ४१ ॥

छलारी — उद्वेलः सेतुमतिक्रान्तः समुद्रो महीं प्लावयामास । वर्षद्भिर्महामेघैर्वर्धमानः समदृश्यत ॥ ४१ ॥

लिङ्गेरी — तदनन्तरं वर्षद्भिर्वर्षमाणमहामेघैः पूर्यमाणोऽत एवोद्वेलोऽतिक्रान्तमर्यादा भूमिः सांवर्तप्रलयकालीनः समुद्रः सर्वतो दिक्षु महीं प्लावयन्नाच्छादयन्समदृश्यत ॥ ४१ ॥

ध्यायन् भगवदादेशं ददृशे नावमागताम् ।
तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४२ ॥

सत्यधर्मीया — आदेशमाज्ञाम् । ओषधीर्बीजादीनि । वीरुधः पुरतः प्ररोहल्लताः ॥ ४२ ॥

छलारी — भगवदादेशं मत्स्यरूपिणो हरेराज्ञां ध्यायन् सन् आगतां प्राप्तां नावं ददृशे दृष्टवान् । ओषधीर्बीजानि वीरुधो लताविशेषांश्चादाय विप्रेंद्रैः सप्तर्षिभिः सह तां नावमारुरोह ॥ ४२ ॥

तमूचुर्मुनयः प्रीतं राजन् ध्यायस्व केशवम् ।
स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥

सत्यधर्मीया — यद्यपि पादौ चिन्तयन्नित्यादावुदीरणात्प्रागेव प्रभुर्भगवच्चिन्तनरतः तथाऽपि सदुपदिष्टमिष्टं कलयितुमलमिति ते मुनयोऽप्यूचुरित्याहुः ॥ तमिति । अविता रक्षिता । नेयदेव देवकार्यमित्याह । शं सुखं च विधास्यति करिष्यतीति । अविनाशमिति पाठे विनाशस्याक्षेमस्याभावो हि क्षेमो विनाशस्तं विना शं सुखं तद्रहितं यथा न भवतीत्यविनाशं तथा करिष्यतीति वाऽर्थः । सः संकटं परिहृत्येति सम्भवद्विवरणे ल्यब्लोपपञ्चमी । नोऽस्माकम् । वै तव ध्यानानुनयेन । वै अनुनयेऽपि चेति विश्वः । सः वा एनःसङ्कटादिति पदानि वा चेति न केवलमविता च शं च विधास्यतीति समुच्चये वा । वा स्यादिवार्थे च समुच्चय इति विश्वः । अवितेवेतीवार्थे वा । एनः सङ्कटात् । पापोपात्तात्सङ्कटादिति वा । सवैनःसङ्कटादिति पदमेकं वा । सवेति सर्वसत्कर्मोपलक्षणम् । यज्ञादिप्रतिबंधकादेनःप्रयोजकात्सङ्कटादिति वा ॥ ४३ ॥

छलारी — मुनयः सप्तर्षयस्तं सत्यव्रतमूचुः ॥ केशवं ध्यायस्वेति । स हरिरस्मात्संकटान्नोऽस्मान् अविता रक्षिष्यति शं सुखं विधास्यति ॥ ४३ ॥

सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ।
एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥

सत्यधर्मीया — धरतीति धरः । एकं च तच्छृङ्गं तस्य विषाणस्य धरो हैमः गतम् । सुवर्णवर्णो नियुतयोजनो लक्षयोजनप्रमाणः ॥ ४४ ॥

छलारी — राज्ञा सत्यव्रतेनानुध्यातः स हरिर्महार्णवे प्रादुरासीत् । कथं भूतः । एकं शृङ्गं धत्त इत्येकशृङ्गधरो हेमः सुवर्णकान्तिर्यस्य सः । नियुतयोजनो लक्षयोजनपरिमाणः ॥ ४४ ॥

निबध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा ।
वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥ ४५ ॥

सत्यधर्मीया — यथा येन प्रकारेणोक्तेः । अहिना शृङ्गवद्भगवत्सृष्टसर्पेण । वासुकिनेति केचित् । तत्र मूलं न निभालयामः । वरत्रेण वरत्रया चर्मनिर्मितपाशनामाप्यत्र पाशमात्रशंसकं वणिक् सार्थ इत्यादिवज्ज्ञेयम् । दूष्या कक्ष्या वरत्रा स्यादित्यमरव्याख्यायां गजमध्यबन्धकचर्मपाशविशेष इति व्याख्यातत्वात् । कक्ष्यप्रेतिवद्वरत्रेणेति । मधुसूदनं सर्वावतारमूलाभेदादेवमुक्तिः । मधु नदीजलमाधुर्यं सूदयति नाशयतीति स मधुसूदो लवणार्णवस्तत्र नेतेति नः । ने नेता समुदीरित इत्येकाक्षररत्नमाला ॥ ४५ ॥

छलारी — तस्य मत्स्यस्य शृङ्गे हरिणा पूर्वं यथोक्तस्तथा वरत्रेण दोरकरूपेण पाशरूपेणेत्यर्थः । अहिना वासुकिना सर्पेण नावं निबध्य बद्ध्वा तुष्टः सन्तोषयुक्तस्तुष्टावास्तौत् ॥ ४५ ॥

राजोवाच–

अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिभ्रमातुराः ।
यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥

सत्यधर्मीया — अनादिरविद्या भावरूपमज्ञानं तयोपहता आवृता आत्मनः स्वस्य परमात्मनश्च संवित्ज्ञानं येषां ते तथा । तन्मूलोऽविद्यानिमित्तको यः संसारः तस्मिन् यः परिभ्रमणो भ्रमणं पुनस्तेनातुराः । यः परिश्रमस्तेनातुरा वा । श्रमभ्रमपाठौ ससम्भ्रमौ । यदृच्छया स्वपूर्वकर्मार्जितया त्वदिच्छया । इह संसारे । उपसृताः उपं अधिकं गुरुमिति यावत् । सृताः प्राप्ताः । उपः

सृतोधेरितिवा । ईहोपसृता इति । ईहो विषयेच्छा । उपसृता गता येषां त इति । यं भवन्तम् । आप्नुयुः सः परमो गुरुर्मुख्यगुरुर्भवान् । नो विमुक्तिदो भवत्विति शेषः । भव अन्निति पदं वा । अ इव विष्णुरिवाचरन्नन् तद्वदाचरणं च तस्यैवेति न भेदप्रतीतिविरोधः । स्वदृष्टान्तो हरेर्भवेदिति ऋग्भाष्योक्तेः । नः मुक्तिदो भवेत्यन्वयः । गुरुर्हि जगतो ब्रह्मेत्युक्तेः । सोऽपि गुरुरित्यतः पर इति । तर्हि वायुरपि क्वचिन्मुक्तिदाता श्रूयत इत्यतोऽप्याह । गुरुर्वायुर्मुक्तिदात्त्वत्त ऊनो न्यूनो हीनगुण इति गुरुरेव । त्वं तु परमो गुरुरिति वा । विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञयेत्यादेः । मुक्तिविरुद्ध इति विमुक्तिः संसारस्तं द्यति खण्डयतीति स तथेति वा । अनाद्यविद्या उपहता यया सा च । सा संविदपरोक्षज्ञानं च तस्याः सकाशाद्यदृच्छयाऽऽयातां प्रदायेति वा विमुक्तिद इत्यन्वयो वा ।। ४६ ।।

छलारी — सागरं तारयिष्यन्तं तरिष्यन् भवसागरं सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः । तत्र नानायोनिषु संसरतः स्वस्य भगवत्कृपयैव तत्प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते ।। अनादीति ।। अनादिर्याऽविद्या भावरूपमज्ञानं तयोपहता आवृता आत्मनः परमात्मनः संवित्ज्ञानं येषां ते तथा । अत एवाविद्यैव मूलं कारणं यस्य सस्तन्मूलः । तादृशे संसारे नानायोनिरूपे परिभ्रमः सर्वत्र संचरणं तेनातुराः क्लिष्टाः पुरुषाः यदृच्छया हरेरनुग्रहेणैवेह संसारे विशिष्टं जन्मोपसृताः प्राप्ताः सन्तो यं त्वामाप्नुयुः स परमो मुख्यो गुरुर्ज्ञानोपदेष्टा भवान्नो विमुक्तिदोऽस्त्वित्यन्वयः ।। ४६ ।।

जनोऽबुधोऽयं निजकर्मबन्धनः
सुखेच्छया कर्म समीहतेऽसुखम् ।
यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं
विभिन्द्याद् हृदये स नो गुरुः ।। ४७ ।।

सत्यधर्मीया — पूर्वोक्तं सपरिकरमीरियति ।। जन इति । अयमबुधोऽज्ञानी जनो निजकर्मबन्धनो निजं स्वकृतं कर्मैव बन्धनं वा यस्य स तथा । सुखेच्छया तत्प्राप्त्यपेक्षया पुनः कर्म समीहते करोति । तदप्यसुखं न विद्यते सुखं यस्मात्तदसुखम् । सुखयतीति वा सुखम् । तन्न भवतीति वाऽसुखम् । तां अबुध इति बोधितामसन्मतिम् । यत्सेवया यस्य तव सेवया विधुनोति स भवान् । गुरुर्हृदये विद्यमानं ग्रन्थिम् । असन्मतिहेतुभूतां विभिन्द्यात् । लोके गुरुरेकोऽपरः फलदाता । त्वं न तथाऽत्रेत्यप्याह ।। स न इति । फलं योग्यतानुकूलं विभज्य दाता भवानेवेति सनो गुरुर्मुख्यो गुरुर्भवतीत्यर्थः । वनषणसम्भक्तौ सनि दातेति ऋग्भाष्योक्तेः ।। ४७ ।।

छलारी — ननु वैराग्यं विना कुतो मुक्तिरिति चेत्तर्हि तस्यापि त्वत्सेवयैव लभ्यत्वात्त्वत्सेवामेवादिशेत्याशयवान् संसारकारणाविद्यानाशं च प्रार्थयते ।। जन इति । निजकर्मणाऽऽत्मकर्मणा बन्धनं यस्य सः । अयमबुधोऽज्ञानी जनः सुखं प्राप्नुयामीतीच्छयाऽसुखं दुःखं यथा भवति तथा कर्म समीहिते । सुखापेक्षया दुःखसाधनं कर्म करोतीत्यर्थः । ज्ञानी तु यस्य हरेः सेवया तामसन्मतिं विषयसुखेच्छाम् । दुष्कर्मविषयां मतिं वा । विधुनोति । स गुरुर्नो हृदयं हृदयाख्यं ग्रन्थिमविद्याकर्मपाशलक्षणं वा विभिंध्यात् ।। ४७ ।।

यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमान् विजह्यान्मलमात्मनस्तमः ।
भजेत वर्णं निजमेष सोऽव्ययो भूयात् स ईशः परमो गुरोर्गुरुः ।। ४८ ।।

सत्यधर्मीया — विवित्सापरवशो नानानिदर्शनमुखेन ज्ञानमेवार्थयते ।। यत्सेवयेति । यत्सेवया एष पुमान् अधिकारी जन आत्मनः स्वस्य तमोऽज्ञानं विजह्यात् । अथ चाव्ययो नाशशून्यः । मुक्त इति यावत् । भूयात् स ईशो लक्ष्मीसुखकृत् । ईकारः कज्जले लक्ष्म्यां वाण्यां कमलकेसर इति चैकाक्षरकौमुदी । गुरोर्ब्रह्मणश्च गुरुः परमो महाज्ञानी महासम्पद्वा । अग्नेस्तत्तापतो रुद्ररोदनं सुवर्णम् । आत्मनो मलमौपाधिकं विजह्यान्निजं वर्णं भजेत च तथेति । भूयाद्भवानीशो गुरुरिति वा ग्रन्थिं भिन्द्यादिति वाऽन्वयः । जातरूपं श्रीमुकुटं हिरण्यं रुद्ररोदनमित्यभिधानम् । वर्णं वरानन्दात्मकं रूपं भजत इत्यप्यन्वयः । सोऽरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वम् । यदवशीर्यत तद्रजतं हिरण्यमभवदिति श्रुते रजतमिति वा ।। ४८ ।।

छलारी — ननु यज्ञदानादिभिरन्तःकरणशुद्धिं विना कथं हृदयग्रन्थिर्भेद्यः स्यात्तत्राह ।। यत्सेवयेति । यस्य हरेः सेवयैव पुमान् अधिकारी । आत्मनः स्वमनसस्तमस्तमोगुणकार्यं मलं रागद्वेषादिरूपं दोषं विजह्यात्त्यजेत् । एषः क्षीणमलः पुमान् निजं स्वरूपभूतं स्ववर्णमानन्दं च भजेत्प्राप्नुयात् । ईशो मुक्तिदानसमर्थो गुरुः परः सर्वोत्तमो हरिर्नोऽव्यय आवरणरहितः प्रत्यक्षीभूयात् । व्यञ् संवरण इति धातोः । मलहानौ दृष्टान्तः । रुद्ररोदनम् । हिरण्यं, जातरूपं श्रीमुकुटं हिरण्यं रुद्ररोदनमिति वचनात् । यथाऽग्नेः सम्बन्धान्मलं जहाति । स्वं वर्णं विभजते । न तु क्षालनादिभिः । तथा न यज्ञादिभिर्मलत्यागः । किन्तु त्वत्सेवयैव । इतरेषां तु सेवांगं त्वमेवेति भावः ।। ४८ ।।

न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥

सत्यधर्मीया — यद्यपि सन्ति पुरवो गुरवः तथाऽपि ते लघव इति श्लाघापदं त्वमेवेति शरणकरणीय इत्याह ॥ नेति । अन्ये देवा गुरव उपदेशकाः कर्तुं समेता मिलिताः । अनेनैक एकोऽसमर्थश्चेदपि यथा जातीफलादेरेकैकस्या मदजनकत्वेऽपि मदिराद्रव्यस्य च सम्भूय मदजनकता । तथा सम्भूय भूयासुः समर्था इति नैवेशा इति सूचयति । यत्प्रसादायुतभागलेशं यस्य तव प्रसादस्य दशसहस्रभागस्ततोऽपि लेशं पुंस उपरि कर्तुं न प्रभवन्ति न समर्था भवन्ति । तमीश्वरं त्वां शरणं प्रपद्ये । स्वयमित्यनेनैतेऽपि सम्पादितत्वत्कृपाश्चेत् प्रभवन्ति किञ्चित्त्वद्वारेति सूचयति । एतेन ऋषयो नौकौकसो बहवः सन्ति सन्तः । किं मां पृच्छसीति भगवत्संभवच्छंकोत्तरितेति ज्ञेयम् ॥४९॥

छलारी — सर्वोत्तमत्वं प्रपञ्चयन्नाह ॥ नेति ॥ अन्ये च देवा गुरवो जनाश्च सर्वे समेता मिलिता अपि पुंसः पुरुषस्य स्वयं हरेर्निरपेक्षाः सन्तो यस्य हरेः प्रसादादस्य प्रसादजन्यफलस्यायुतभागस्तस्य लेशमात्रमपि कर्तुं न प्रभवन्ति न समर्थाः । तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥

अचक्षुरन्धस्य यथाऽग्रणीः कृतस्तथा जनस्याविदुषो बुधो गुरुः ।
त्वमर्थदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः सुगतिं विवित्सताम् ॥ ५० ॥

सत्यधर्मीया — व्यतिरेकमुखेन तवैव गुरुत्वमित्याह ॥ अचक्षुरिति । यथाऽन्धस्य चक्षूरहितस्य । अचक्षुर्न विद्यते चक्षुर्यस्य । सोऽग्रणीः पुरतो नेता । कृतश्चेन्नाभिमतगतिसिद्धिः । यथा वा अविदुषो जनस्याबुधोऽज्ञान्येव कृतो गुरुर्नार्थस्तेन । न तथा । त्वं त्वर्थं नित्यपुमर्थं दर्शयतीत्यर्थदृक् । सर्वदृशां तत्तद्विषयज्ञानामिन्द्रियाणामित्यर्थः । सम्यगप्रतिहतमीक्षणं यस्य समीक्षयतीति वा स तथा । साक्षीति यावत् । सुगतिं प्राप्य उत्तमं विवित्सतां ज्ञातुमिच्छतां नो गुरुर्वृतः । अन्धेनैव नीयमाना यथा इत्यादिश्रुतेः । अन्वयेनापि तदाह ॥ सचक्षुरिति । अन्धस्य सचक्षुश्चक्षुष्मान् यथाऽग्रणीः कृतो मार्गं दर्शयति । यथाऽविदुषो जनस्य । बुधो गुरुः सन् तत्वमवगमयति । तथा त्वमिति सचक्षुरिति पाठेऽर्थः ॥ ५० ॥

छलारी — त्वामन्तरेणेतरेषां गुरुत्वं नपुरुषार्थोपयोगि सम्यग्ज्ञानहीनत्वादित्यनेन दृष्टान्तेन स्पष्टयन्नाह ॥ अचक्षुरिति ॥ यथांऽधस्य चक्षूरहितस्य पुरुषस्याचक्षुश्चक्षूरहितः पुरुषोऽग्रणीरग्रतो

गन्ता कृतो भवति । यथाऽविदुषोऽज्ञानिनोजनस्याबुध एवाविद्वानेव गुरूपदेष्टा भवति । अन्धेनैव नीयमाना यथांऽधा इति श्रुतेः । उभावप्यश्रुतग्रन्थावुभावपि जडात्मकाविति स्मृतेः । त्वं तु तादृशो न भवसीत्याह ॥ त्वमिति । त्वं त्वर्थदृक् शिष्यस्यापेक्षितपुरुषार्थदर्शी । सर्वदृशाम् । अत्र दृग्शब्देन ज्ञानसाधनानीन्द्रियाणि गृह्यन्ते । सर्वेन्द्रियाणां समीक्षणः प्रकाशः साक्षी वा । अतः स्वगतिं स्वप्राप्यं बुभुत्सतां बोद्धुमिच्छतां नोऽस्माकं त्वं गुरुर्वृतोऽसि । सचक्षुरिति पाठे यथांऽधस्य सचक्षुरग्रणीः कृतः । यथाऽविदुषो जनस्य बुधो गुरुः कृतः शास्त्रविशारदैः । तथा त्वमस्माभिर्गुरुर्वृतोऽसीत्यर्थो बोध्यः ॥ ५० ॥

लिङ्गेरी — ननु यं कञ्चन गुरुमकृत्वा गुरुतमत्वेन मत्स्तुतिः किं क्रियत इत्यत आह ॥ सचक्षुरिति । यथाऽन्धस्य पुरुषस्य सचक्षुः पटुतरचक्षुष्मान्नग्रणीरग्रे गच्छन्नायकः कृतो, यथा वाऽबुधस्य परापरज्ञानशून्यस्य बुधस्तत्त्वज्ञानी गुरुः कृतः । शास्त्रज्ञानादिविवेकिभिरिति शेषः । तथा सर्वदृशां ज्ञानानामर्थान्विषयान्साक्षात्पश्यतीति दृक् । समीक्षणोऽबाधिततया समीचीनज्ञानिनस्तत्त्वं सुगतिं बोद्धुमिच्छतां नो गुरुः कृतः ॥ ५० ॥

जनो जनस्यादिशतेऽसतीं गतिं यया प्रपद्येत दुरत्ययं तमः ।
त्वमव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ॥ ५१ ॥

सत्यधर्मीया — जनः पामरः पामरस्यासतीममङ्गलां गतिं कुगतिम् । आदिशते आदिशति । उपदिशति यथा । अन्यथामत्या दुरत्ययं केनापि प्रकारेणातिक्रमणीयं तमः प्रपद्येत । प्राप्नुयात् । तदसदुपदेशेन दुर्गतिरेव तस्य भवतीति भावः । जनः सन् येन निजंस्वस्वरूपभूतज्ञानादिमद्यत्पदं वैकुण्ठादि प्रपद्यते तादृशमव्ययमनावृतममोघं ज्ञानं तत्साधनम् । अञ्जसा दिशसीति नो गुरुर्वृत इति पूर्वेणान्वयः । तुश्च तस्माद्विशेषक इति ज्ञेयम् ॥ ५१ ॥

छलारी — किञ्च प्राकृतो गुरुश्चानर्थहेतुरित्याह ॥ जन इति। जनोऽज्ञो गुरुरसतीं मतिमर्थकामादिविषयिणीं मतिमादिशते उपदिशति । यया मत्या दुरत्ययं तमः संसारं प्रपद्येत तादृशीमित्यर्थः । यद्वा । असतीं विपरीतां मतिं यया विपरीतबुध्या दुरत्ययं पुनरावृत्तिवर्जितं तमो नित्यदुःखात्मकमन्धन्तमः प्रपद्येतेति । अन्धन्तमः प्रविशन्ति येऽविद्यामुपासत इति श्रुतेः । त्वं तु येन ज्ञानेन जनो निजं पदं चिदानन्दरूपं प्रपद्यते तादृशमव्ययं नाशरहितममोघं फलाव्यभिचारि । अंजसा समीचीनज्ञानमुपदिशसीत्यर्थः ॥ ५१ ॥

लिङ्गेरी —– इतोऽपि त्वमेव गुरुत्वेन मुख्यतो वरणीयो नान्यो जन इत्याह ॥ जन इति । सोऽज्ञत्वेन प्रसिद्धो जनो जिज्ञासुजनो यया गत्या ज्ञानेन दुरत्ययं तर्तुमशक्यमन्धन्तमो यथा प्रपद्येत । तस्य जनस्य तथा त्वमसर्वोत्तमोऽस्वतन्त्रो जीवाभिन्न इत्याद्ययथार्थमेव गतिमादिशत्युपदिशति । त्वं तु त्वमेव मयः प्रधानो यस्मिंस्तत्ज्ञानमुत्तमः पुरुषस्त्वन्य इत्यादिरूपेणादिशसि । उपदिष्टेन येन ज्ञानेन मोक्षयोग्यो जनो निजं स्वस्वयोग्यं पदं वैकुण्ठादिस्थानमंजसा प्रपद्यते । अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते इत्यादिश्रुतेः । सुखज्ञानादिरूपिणो यथार्थस्य परिज्ञानात् सुखज्ञानादिरूपतां यातीत्यादि स्मृतेश्च ॥ ५१ ॥

त्वं सर्वलोकस्य सुहृत् प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ।
तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ॥ ५२ ॥

सत्यधर्मीया —– नैकेन गुरुत्वेन किन्तु सर्वप्रकारेण त्वं वृतो न वृतश्चेतरैरित्याह ॥ त्वमिति । सर्वलोको ज्ञानिजनो तस्य सुहृत् अनिमित्तबन्धुः प्रियस्तत्कर्मादि कारयित्वा प्रीतिकर्ता चासावीश्वरः समर्थश्च । आत्मा स्वामी गुरुः । ज्ञानम् । सर्वज्ञो ज्ञानरूपी वा । अभीष्टसिद्धिरभीष्टस्य मोक्षादेः सिद्धिर्यस्मात्स तथा । न दूरे वर्तस इत्याह । तथाऽपि हृदि सन्तं भवन्तं बद्धकाम इतरविषयसम्बद्धः । काम इच्छा यस्य स तथोक्तः । अन्धधीर्मन्दबुद्धिः । न जानाति । अन्धेन बोधकेन धीर्यस्य स इति वा । उभावप्यश्रुतग्रन्थावित्यादेरिति । लोका ऊना यस्मात्स लोकोनो लोकविलक्षणः । स चासौ भवांश्च तं न जानाति । एवं न जानातीति वा ॥ ५२ ॥

छलारी —– त्वमुपदिष्टज्ञानमेवापेक्षितपुरुषार्थसाधनं न चान्यत् । अनिमित्तबन्धुत्वादि गुणपूर्णत्वादित्याशयेनाह ॥ त्वमिति । सुहृदनिमित्तोपकारी प्रियश्चासावीश्वरश्चात्मा पूर्णानन्दो गुरुर्ज्ञानोपदेष्टा जानातीति ज्ञानं सर्वज्ञोऽभीष्टस्य सिद्धिः साधकः । ननु लोकसुहृत्वादिगुणवन्तं मां कुतो न जानाति सर्वोऽपि जन इत्यत आह ॥ तथाऽपीति । यद्यप्यनिमित्तबन्धुस्तथाऽपि लोको हृदि सन्तं विद्यमानं भवन्तं न जानाति । कुतः अन्धा नष्टा धीर्ज्ञानं यस्य सः । नष्टज्ञानत्वात् । ज्ञाननाशः कस्मात् । हृदि बद्धाः कामा येन सः । विषयासक्तत्वादित्यर्थः ॥ ५२ ॥

लिङ्गेरी —– कामक्रोधादिदोषपरित्यागमन्तरेण स्वहृदि संनिहितपरमात्मज्ञानं दुःशकमित्याशयेनाह ॥ त्वमिति । हे भगवन् । त्वं सर्वस्य जनस्य सुहृत् तत्कर्मानुसारेणोपकार्यत एव प्रियः ईश्वरः स्वामी, आत्माऽन्तर्नियामको बहिरपि व्यासादिरूपेण गुरुर्ज्ञानप्रदो ज्ञानमेवोपदिशसि ।

तेनाभीष्टसिद्धिप्रदश्च यद्यपि तथाऽपि मन्दधीर्लोको जनः स्वस्य हृदि नियामकत्वेन बद्धं स्थिरं सन्तं विद्यमानं भवन्तं न जानाति ।। ५२ ।।

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ।
छिन्ध्यर्थदीपैर्भगवन् वचोभिर्ग्रन्थिं हृदय्यां विवृणु स्वमोकः ।। ५३ ।।

सत्यधर्मीया — इदानीं महिमानं मदीयं च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदीति यत्त्वयोक्तं तन्न विस्मर स्मरतातेति तदेवार्थयते ।। तं त्वेति । देववरं वरेण्यं गतं वरणीयम् । ईशमेतन्ममेच्छेशनशीलं त्वामहं प्रपद्ये । प्रयोजनमाह । प्रतिबोधनाय त्वज्ज्ञानाय । हृदय्यं तत्र स्थितं ग्रन्थिम् । अर्थदीपैरर्थं दीपयन्ति प्रकाशयन्तीति तानि तैर्वचोभिः प्राक् छिन्धि भिन्दि । अनन्तरं स्वमोकः स्वस्वरूपं वैकुण्ठादिकं वा । मम स्वरूपं वा । विवृणु विवृतं कुरु । विदिताभिप्रायं प्रत्यपि स्वाभिप्रायं भृत्यकृत्यमिति विज्ञापयति ।। तमिति । त्वद्वचोभिर्मदीयं महिमानं चेति । त्वद्वचनांजल्या गमनादिभिः प्रतिबोधनाय प्रपद्य इति वाऽन्वयार्थौ ।। ५३ ।।

छलारी — इदानीं स्वाभिप्रायं प्रकाशयति ।। तं त्वामिति । अहं तं त्वां प्रतिबोधनाय त्वद्विषयकज्ञानाय शरणं प्रपद्ये । देवोत्तमत्वात्त्वमेव शरण्य इति भावेनोक्तम् । देववरमिति । सौंदर्यादिगुणाभावे त्वद्भक्तिर्नोदेतीति भावेन ।। वरेण्यमिति । ईशं पुरुषार्थदाने समर्थम् । हे भगवन् । अर्थदीपैः परमार्थप्रकाशकैर्वचोभिर्मन्मना भव मद्भक्त इत्यादिरूपैर्हृदिस्थान् हृदि विद्यमानान् ग्रन्थीन् अहंकारादीन् छिन्धि । तथा स्वमोकः स्वस्वरूपमाश्रयं वैकुण्ठं वा विवृणु प्रकाशय ।। ५३ ।।

लिङ्गेरी — हे मत्स्य । त्वां ज्ञानोपदेष्टृत्वादिगुणगणशालिनं ब्रह्मादिदेवोत्तममत एवान्यपरित्यागेन वरेण्यं भजनीयमीशमघटितघटनासमर्थं त्वां मां प्रतिबोधनाय प्रपद्ये । हे भगवन् । अर्थदीपैः परापरार्थप्रकाशकैर्वचोभिर्वाक्यैर्मम हृदय्यां ग्रन्थिं छिन्धि । अनन्तरं स्वं स्वकीयमोकः स्वरूपं विवृणु प्रकाशय । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामित्यादिश्रुतौ तवैवंविधमहिम्नोऽवगतत्वादित्याशयः ।। ५३ ।।

श्रीशुक उवाच—

इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः ।
मत्स्यरूपी महाम्भोधौ विहरंस्तत्वमब्रवीत् ।। ५४ ।।

सत्यधर्मीया — विहरन् क्रीडन् । तत्त्वं रहस्यप्रमेयम् ।। ५४ ।।

छलारी — नृपतिं प्रति महांबोधौ प्रलयसमुद्रे तत्त्वं स्वरूपमब्रवीत् ।। ५४ ।।

लिङ्गेरी — आदिपुरुषो मत्स्यरूपी भगवान् प्रलयसमुद्रे क्रीडन् इत्युक्तवन्तं नृपतिं सत्यव्रतं प्रति तत्त्वमब्रवीत् ।। ५४ ।।

पुराणसंहितां दिव्यां साङ्ख्ययोगक्रियावतीम् ।
सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ।। ५५ ।।

सत्यधर्मीया — किमात्मकं तदित्यत आह ।। पुराणेति । साङ्ख्ययोगक्रियावतीं शुद्धात्मतत्त्व-विज्ञानोपायकर्मयोगवतीं पुराणसंहितां मत्स्यपुराणम् । राजर्षेरिति श्रोत्रानुकूल्यहेतुः । आत्मगुह्य-मित्यनेन वक्तृविप्रलिप्सोक्ताम् । अशेषत इत्येतद्योग्यं समग्रमित्यर्थः ।। ५५ ।।

छलारी — तदेव विवृणोति ।। पुराणेति ।। सांख्ययोगो ज्ञानयोगः क्रिया भक्तियोगस्त-त्प्रतिपादिकां दिव्यां पुराणसंहितां मत्स्यपुराणमब्रवीदित्यन्वयः । यथाऽशेषत आत्मगुह्यमात्मरहस्यं च ।। ५५ ।।

लिङ्गेरी — मत्स्यः सांख्ययोगक्रियावतीं ज्ञानभक्तिकर्मयोगयुक्तां पुराणसंहितामब्रवीत् । तथा सत्यव्रतराजर्षेरात्मगुह्यं गोप्यं स्वस्वरूपमपि सत्यव्रतयोग्यतामपेक्ष्याशेषतो निःशेषं यथा तथाऽब्रवीत् ।। ५५ ।।

अश्रौषीद् ऋषिभिः साकमात्मतत्वमसंशयम् ।
नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ।। ५६ ।।

सत्यधर्मीया — असंशयं यथा तथा भगवता प्रोक्तं सनातनं ब्रह्मोद्दिश्य तदात्मतत्त्वम् । प्राक् स्वाज्ञातमिति रहस्यम् । ऋषिभिः साकम् । नावि नौकायाम् । आसीनोऽश्रौषीच्छुश्राव ।। ५६ ।।

छलारी — ऋषिभिः साकं नावि पृथिवीस्थायाम् । अश्रौषीत् श्रुतवान् । ५६ ।।

लिङ्गेरी — नाव्यासीनः प्लव उपविष्टः सत्यव्रतो ऋषिभिः सह भगवता मत्स्येन प्रोक्तं ब्रह्माश्रौषीच्छ्रुतवान् ।। ५६ ।।

अतीते प्रलयापाय उत्थिताय च वेधसे ।
हत्वाऽसुरं हयग्रीवं वेदान् प्रत्याहरद् हरिः ॥ ५७ ॥

सत्यधर्मीया — प्रलयापाये प्रलयाद्योऽपायः स्वोपलक्षणस्तस्मिन्नतीते गते सति । अतीतप्रलयापाये इति पाठेऽतीतः पूर्वः यः प्रलयः तस्यापाये समाप्तौ । उत्थिताय वेधसे विधये । वेदान् प्रत्याहरत् । तदभिमानिनस्तद्व्यावृतान्कृत्वा तदधीनांश्चकारेति भावः । अयमन्यो मात्स्योऽवतार इत्युत्थितायेत्यादि संभवि ॥ ५७ ॥

लिङ्गेरी — प्रलयलक्षणापत्कालेऽतीते सति उत्थिताय निद्रामुक्ताय वेधसे चतुर्मुखाय हयग्रीवमसुरं हरिर्मत्स्यरूपी हत्वा वेदान्प्रत्याहृत्य दत्तवान् ॥ ५७ ॥

स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ।
विष्णोः प्रसादात् कल्पेऽस्मिन्नासीद् वैवस्वतो मनुः ॥ ५८ ॥

सत्यधर्मीया — ज्ञानविज्ञानसंयुतः ज्ञानं सामान्यं विज्ञानं स्वयोग्यविशेषज्ञानं ताभ्यां युतः विष्णोर्मत्स्यात्मकस्यास्मिन्वर्तमाने कल्पे वैवस्वतो मुनरासीदित्यन्वयः ॥ ५८ ॥

छलारी — स तु सत्यव्रतो ज्ञानं साधारणं विज्ञानं स्वयोग्यं ज्ञानं ताभ्यां संयुतो विष्णोर्मत्स्यरूपिणः । अस्मिन्वर्तमाने कल्पे मनुकल्पे । वैवस्वतो मनुः ॥ ५८ ॥

लिङ्गेरी — स सत्यव्रतो राजा मत्स्यस्य विष्णोः प्रसादात् ज्ञानविज्ञानसंयुतः सन् अस्मिन्वैवस्वतो मनुरासीत् ॥ ५८ ॥

सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ।
संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५९ ॥

सत्यधर्मीया — महतो भगवत्स्वरूपस्थानं यस्मिन्स तम् । संवादं श्रुत्वा स्थितः किल्बिषात् पापात् मुच्यते ॥ ५९ ॥

छलारी — मायामत्स्यस्य माययेच्छया मत्स्यरूपस्य संवादं प्रश्नोत्तररूपं महदाख्यानमितिहासम् । किल्बिषात्पापसमुदायात् ॥ ५९ ॥

लिङ्गेरी — एतदाख्यानश्रवणफलमाह । सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणो नारायणस्य संवादरूपं महदाख्यानं श्रुत्वा किल्बिषान्सुमहान्मुच्येतेति ॥ ५९ ॥

अवतारं हरेर्योऽमुं कीर्तयेदन्वहं नरः ।
सङ्कल्पास्तस्य सिध्यन्ति प्रयाति परमां गतिम् ॥ ६० ॥

सत्यधर्मीया — संवादस्त्वस्तु पापहर इत्यादरणीयः कुतोऽवतारचरितकीर्तनमित्यत आह ॥ अवतारमिति । यः कीर्तयेत् । तस्य सङ्कल्पाः सिद्ध्यन्ति । अनन्तरं परां गतिं याति ॥ ६० ॥

छलारी — मत्स्यावतारकीर्तनफलमाह ॥ अवतारमिति । हरेर्मत्स्यरूपिणोऽन्वहं नित्यं तस्य कीर्तयतः संकल्पा मनोरथाः । न केवलमैहिकमेव फलं किन्तु पारत्रिकमपि सिध्यतीत्याशयेनाह ॥ प्रयातीति । परमां गतिं वैकुण्ठम् ॥ ६० ॥

लिङ्गेरी — योऽमुं मत्स्यमवतारमन्वहं प्रतिदिनं कीर्तयेत्तस्य संकल्पा मनोरथाः सिद्ध्यन्ति । सः परमां गतिं याति ॥ ६० ॥

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः
श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ।
दितिजमकथयच्च ब्रह्म सत्यव्रताय
तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥ ६१ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे द्वाविंशोऽध्यायः ।

सत्यधर्मीया — प्रलये वैलक्षण्येन कृतमवतारचरितं संगृह्य शुकः सकललोकाननुजिघृक्षुर्वदन्ना-नन्दनिर्भरस्तं नमति ॥ प्रलयेति । प्रलयपयसि लयतोये सुप्तशक्तेरन्तर्भावितशक्तेरुपरतेन्द्रियशक्तेर्वा धातुर्मुखेभ्यश्चतुर्भ्यः । येनापनीतं श्रुतिगणं तं दितिजं हत्वा । प्रत्युपादत्त दत्तवान् । सत्यव्रताय ब्रह्मस्वरूपं चाकथयत् । अखिलहेतुं सर्वकारणं जिम्हमीनं मायामत्स्यम् । ब्रह्मेत्यत्राप्यन्वेति । अहं नतोऽस्मि । अकथयत् । चात् प्रस्तुतेन सहान्यस्यापि नमनं समुच्चिनोति । सत्यव्रताय तमहम् । सत्यं सत्यलोकं व्रत इति स्वावासत्वेन स्वीकरोतीति सत्यव्रतो धाता तस्मै चेत्यान्तरंगिकोऽर्थः ।

सत्यव्रतायतमहं सत्यव्रत आयतो विस्तृतो मह उत्सवो येन स तं नतोऽस्मीत्यशेष-मतिमङ्गलम् ॥ ६० ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां श्रीमद्भागवतविवृतौ
अष्टमस्कन्धे द्वाविंशोऽध्यायः ॥ ८-२२ ॥

छलारी — बुध्द्यारोहार्थं प्रलयभेदेन कृतप्रयोजनद्वयस्य मत्स्यावतारस्य कथां सङ्कलय्याह ॥ प्रलय इति ॥ प्रलयपयसि दिनप्रलये सुप्तशक्तेर्विषयोपरतेन्द्रियशक्तेर्धातुर्ब्रह्मणश्चतुर्मुखस्य मुखेभ्यो निःसृतमपनीतं हयग्रीवासुरेणापहृतं श्रुतिगणं तं दितिजं हयग्रीवासुरं हत्वा ब्रह्मणे उपादत्त । पुनः प्रत्याहृत्य दत्तवान् । यो यश्च प्रलयपयसि चाक्षुषमनुप्रलये सत्यव्रताय राज्ञे ब्रह्म परं ब्रह्माकथयच्चोपदिष्टवान् । तमखिलहेतुमखिलस्य जगतो जन्मादिकारणम् । अखिलस्य पुरुषार्थस्य हेतुं वा । जिह्ममीनं मायामत्स्यम् । नतोऽस्मीत्यशेषमतिमङ्गलम् ॥ ६१ ॥

छलारीनरसिंहार्यशिष्यशेषविनिर्मिता ।
अष्टमस्कन्धटीका स्यात्प्रीत्यै माधवमध्वयोः ॥ १ ॥

इति श्रीमच्छलारीनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां
अष्टमस्कन्धटिप्पण्यां द्वाविंशोऽध्यायः समाप्तः ॥ ८ ॥

लिङ्गेरी — एवमवतारमाहात्म्यं संकलय्य कथयति ॥ प्रलयेति । यः प्रलयजले सुप्तशक्तेर्विषयोपरतेन्द्रियादिशक्तेर्धातुश्चतुर्मुखस्य मुखेभ्यः श्रुतिगणं दितिजं हत्वा प्रत्यानीय दत्तवान् । यश्च सत्यव्रताय स्वं ब्रह्मरूपमकथयच्च तमखिलजगज्जन्मादिकारणं जिह्ममीनं तिर्यङ्मत्स्यरूपं प्रदर्शयन्तमहं नतोऽस्मीति सर्वमतिमङ्गलम् ॥ ६१ ॥

पदमुक्तावली भूयात्प्रीत्यै मत्स्यात्मनो हरेः ।
लिङ्गेरीश्रीनिवासेन कृता मन्दोपकारिणी ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां
अष्टमस्कन्धे द्वाविंशोऽध्यायः ॥ ८-२२ ॥

इति श्रीमद्भागवते अष्टमस्कन्धः समाप्तः ॥

श्री सत्याभिनवतीर्थविरचिता

दुर्घटभावदीपिका

अथ प्रथमोऽध्यायः

हे ब्रह्मन् शुकाचार्य! विश्वभावनो विश्वोत्पादको भगवान्नारायणोऽस्मिन्नन्तरे मन्वन्तरे यत्कुरुते। अतीतेऽथातीते च यत्कृतवान्। अनागते वाऽनागते च यत्कर्ता यत्करिष्यति तद्वदेति। एतेनातीतेऽनागते चेति वक्तव्यमथ वेति कथनमनुपपन्नमिति चोद्यस्यानवकाशः। अथ वेति शब्दौ च शब्दार्थे वर्तेते इत्यभ्युपगम्यातीते चानागते चेत्यर्थस्योक्तत्वात्॥ ३॥

भगवान् धर्मज्ञानोपदेशार्थं तस्य मनोर्दुहित्रोर्दुहितुराकूत्यामाकूत्या देवहूत्यां देवहूत्याश्च पुत्रतां गत इत्येतद्वै प्रमाणप्रसिद्धमिति। एतेनाकूत्यां देवहूत्यामिति सप्तम्येकवचनान्तशब्दयोर्दुहित्रोरिति षष्ठीद्विवचनान्तशब्दस्यानन्वय इति चोद्यं निरस्तम्। दुहितुरिति षष्ठ्यैकवचनस्य दुहित्रोरिति षष्ठी-द्विवचनादेश आकूत्या देवहूत्या इति षष्ठ्येकवचनयोः आकूत्यां देवहूत्यामिति सप्तम्येकवचनादेशाविति चाभ्युपगम्यान्वयस्योक्तत्वात्॥ ५॥

हे नृप। यज्ञहोत्राद्यास्तत्सुता उत्तमसुताः पवनस्तत्सुतः सृंजयस्तत्सुत इत्यर्थः। एतेन पवनः सञ्जय इत्येकवचनान्तशब्दयोस्तत्सुता इति बहुवचनान्तशब्देनानन्वय इति शङ्कानवकाशः। अर्थवशाद्वचनविपरिणाम इत्यङ्गीकृत्यान्वयस्योक्तत्वात्॥ २३॥

हे नृप। गजेन्द्रो ग्रहान्मोचितो येन स हरिरित्याहुतस्तापसनामा भगवदंशः प्रियव्रतसुतो मनुस्तत्र स भगवान् अंशेन हरिण्यां हरिमेधसोऽपि जज्ञ इति। एतेन हरिर्हरिण्यां हरिमेधसः प्रादुर्भूतः सन् गजेन्द्रं मोचयामासेत्ययुक्तम्। हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः। गजेन्द्रं मोचयामास ससर्ज स जगद्विभुरिति मात्स्ये। प्रियव्रतसुततापसमनोर्हरिस्त्वस्य गजेन्द्रमोचकत्वस्योक्तत्वादिति दूषणं निरस्तम्। तापसनामा भगवदंश इत्यादि विशेषणम्। तापसनामकभगवदंशस्य गजेन्द्रमोचकत्वस्य प्रियव्रतसुतत्वस्य मनुत्वस्य चानुवादं कृत्वा तापसनामभगवदंशोंऽशेन हरिण्यां हरिमेधसः प्रादुर्भूत इति विधीयत इत्यूरीकरणात्। तापसमन्वन्तरे विद्यमानस्य हरिण्यामुत्पन्नत्वं विष्णुपुराणे तृतीयांशे प्रथमाध्याये "तापसस्यान्तरे चैव संप्राप्ते पुनरेव हि। हरिण्यां हरिभिः सार्धं हरिरेव बभूव ह" इति वाक्ये चोक्तम्॥ ३०॥

इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः॥ ८-१॥

अथ द्वितीयोऽध्यायः

नाचष्ट कृच्छ्रं कृपणोऽजमाययेत्यस्य अजमायया परमेश्वरमायया कृपणो मोहितः कृच्छ्रं नाचष्ट न दृष्टवानित्यर्थः । एतेनाजमायया मोहित इति वक्तव्यं कृपण इति कथनमनुपपन्नमिति चोद्यं परास्तम् । कार्पण्यवाचककृपणशब्देन तत्कारणमोहो लक्षणयोच्यत इत्यभ्युपेत्य कृपण इत्यस्य मोहित इत्यर्थस्योक्तत्वात् ॥ २६ ॥

अपारयन्नित्यस्य समाप्त्यभावं जानन्नित्यर्थः । एतेन पारशब्दः करोतीत्यर्थे णिच् प्रत्यये शतृप्रत्यये च पारयन्निति रूपं भवति । ततश्च पारशब्दस्य समाप्त्यर्थकत्वं योग्यतया सङ्कटस्येत्यनेन सम्बन्धं नञोऽभावार्थकत्वं चाङ्गीकृत्यापारयन्नित्यस्य सङ्कटसमाप्त्यभावं कुर्वन्नित्यर्थो वक्तव्यः । स च बाधित इति दूषणं परिहृतम् । गत्यर्थकत्वेन ज्ञानार्थत्वात् इणः शतृप्रत्यये यन्निति भवतीत्यङ्गीकृत्या-पारयन्नित्यनेन सङ्कटसमाप्त्यभावं जानन्नित्यर्थ उच्यत इत्यभ्युपगमात् ॥ ३० ॥

इति श्रीभागवतट्टिप्पण्यां द्वितीयोऽध्यायः ॥ ८-२ ॥

अथ तृतीयोऽध्यायः

अविद्धदृक् अलुप्तज्ञातः । साक्षी पुण्यपापसाक्षी । आत्ममूल आत्मा विरिञ्चो मूलं रुद्रादेः सर्वस्य कारणं येन स तथा । परात् श्रीब्रह्मादेः पर उत्तमो यो भगवान्स्वात्मनि निजमायया निजेच्छयाऽर्पितं तत्प्रमाणप्रसिद्धम् । यत् क्वचित्सृष्ट्यादिकाले प्रभातं विविधकार्यात्मना भातम् । कार्यात्मकमिति यावत् । स्वात्मनि निजमाययाऽर्पितं तत्प्रमाणप्रसिद्धम् । यत् क्वचित्प्रलयकाले तिरोहितं कार्यात्मना तिरोहितम् । कारणात्मकृतमिति यावत् । तदिदुमभयं कार्यकारणोभयात्मकं जगदीक्षते स नारायणो मामवत्विति ॥४॥

यद्यपि यस्य जन्म जन्मनाऽवतारेण गुणदोषः कार्यलाभाख्यो गुणोऽवताराभावेन हान्याख्यो दोषो वा नैव विद्यते । यस्य कर्म च कर्मणा च गुणः कार्यलाभाख्यो गुणः कर्माभावेन कार्यहान्याख्यो दोषो वा नैव विद्यते । तथाऽपि यो लोकत्रयसम्भवाय लोकत्रयकार्यस्य सम्भवाय स्वमायया स्वेच्छया तानि जन्मादीन्यनुकालं प्रतिकालमृच्छतीति प्राप्नोतीति स्वप्रयोजनाभावेऽपि परप्रयोजनार्थमवतारादिकं स्वीकरोतीति भावः । एतेन यद्यपि भगवतो जन्मादिकं नास्ति तथाऽपि जन्मादिकं प्राप्नोतीत्ये-तद्व्याहतम् । भगवतो निर्दोषत्वस्य बहुप्रमाणसिद्धत्वात् जन्मादिप्राप्तिवद्दोषप्राप्तिकथनं चानुपपन्नमिति दूषणं परास्तम् ॥ ८ ॥

किञ्चाशिषो रातीत्यस्य किञ्चान्यच्च धर्मादिकामनां विना ये भजन्ति तेभ्य आशिषो राति ददातीत्यर्थः । एतेन धर्मकामार्थविमुक्तिकामा यं भजन्तो इष्टां गतिमाप्नुवन्ति इत्यनेनार्थादाशिषो

रातीत्यर्थस्य प्राप्तत्वादाशिषो रातीत्येतत्पुनरुक्तमिति चोद्यस्यानवकाशः । यं धर्मकामार्थविमुक्तकामा इत्यनेन सकामेभ्य आशिषो रातीत्युच्यते । किञ्चाशिषो रातीत्यनेना कामेभ्य इति शेषपूरणे-नाकामेभ्योऽप्याशिषो रातीत्युच्यत इत्यभ्युपगमात् ॥ १७ ॥

जल्प्या च कलया कृता इत्यस्य कलया स्वरूपांशेन जल्प्या च जल्प्यैव वाङ्मात्रेण कृता इत्यर्थः । अनायासेन कृता इति भावः । एतेन जगतो वाङ्मात्रेण कृतत्वाभावाज्जल्प्यैव कृता इत्यनुपपन्नमिति दूषणं परिहृतम् । इच्छामात्रं प्रभोः सृष्टिरित्यादेरिव जल्प्यैव कृता इत्यस्यानायासेन कृता इत्यर्थे तात्पर्यमङ्गीकृत्यान्यनिषेधे तात्पर्यस्यानङ्गीकारात् ॥ २० ॥

अत्र यद्यपीत्यादीनां शेषः । यद्यपि ब्रह्मादयो विविधलिङ्गभिदाः स्वस्वावरजीवान्तररक्षकत्वादि-विशेषणयुक्ता इत्यभिमाना बहुप्रमाणप्रसिद्धाः । अत एव गजेन्द्रमोक्षणे समर्थाश्च । तथाऽपि हरेराज्ञा-भावेन यदा यस्मादेवमुपवर्णितनिर्विशेषं गजेन्द्रं प्रति नोपससृपुस्तदा तस्मान्निखिलात्मकत्वात्सर्व-स्वामित्वाद्ब्रह्माद्याज्ञायाऽनपेक्षितत्वेन तत्र गजेन्द्रसमीपप्रदेशेऽखिलामरवरो हरिराविरासीदिति । एतेन ब्रह्मादीनां लिङ्गभेदनिमित्तकाभिमानकथनमसङ्गतमप्रसक्तागमने निषेधश्चानुपपन्न इति दूषणं निरस्तम् ॥ २८ ॥

तं तद्वदार्तमुपलभ्येत्यस्य तद्वद्भगवद्दातृशून्यजीववदार्तं गजेन्द्रमुपलभ्येत्यर्थः ॥ २९ ॥

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ८-३ ॥

अथ चतुर्थोऽध्यायः

यथा गजः स्तब्धमतिः सदोष इत्यस्य यस्माद्गजो यथा स्तब्धमतिस्तथाऽयमपि स्तब्धमतिस्त-स्मादस्मिन्स दोषो गजत्वाख्यो दोषो भवत्वित्यर्थः । एतेन स्तब्धमतिर्गजो यथा सदोषस्तथाऽयमपि सदोषो भवत्विति कथनमनुपपन्नं गजत्वप्राप्तेरेव वक्तव्यत्वादिति दूषणं परास्तम् ॥ १० ॥

हे महाराज कुरुवर्य! मयैवं पूर्वोक्तरीत्या गजराजमोक्षणं गजराजमोक्षणः । गजराजस्य मोक्षणं येन स तथा । शृण्वतां स्वर्ग्यं स्वर्ग्यो यशस्यः कलिकल्मषापहं कलिकल्मषापहः । दुःस्वप्ननाशं दुःस्वप्न-नाशः । दुःस्वप्नानां नाशो येन स तथा । कृष्णानुभावस्तव ईरित इति । एतेन कृष्णानुभावशब्दस्य पुल्लिङ्गत्वात्तदनुसारेण गजराजमोक्षण इत्यादि पुल्लिङ्गपदप्रयोगः कर्तव्यः । गजराजमोक्षणमित्यादि नपुंसकलिङ्गपदप्रयोगोऽनुपपन्न इति दूषणस्यानवकाशः । लिङ्गव्यत्ययेन गजराजमोक्षणमित्याद्युक्त-मित्यभ्युपगमात् ॥ १४ ॥

इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ८-४ ॥

अथ पञ्चमोऽध्यायः

तस्य नारायणस्यानुभावः कथितः । तस्य नारायणस्य, परमोदयाः परमस्य नारायणस्योदयो येभ्यस्ते परमोदया गुणाश्च यथामति वर्णिताः । ननु साकल्येन भगवद्गुणवर्णनस्य केनाप्यकृतत्वात् साकल्येन भगवद्गुणानुवर्णनं केनापि कृतमित्ययुक्तम् । सर्वज्ञेन साकल्येन गुणवर्णनस्य कृतत्वात् । अन्यथा सार्वज्ञ्यं न स्यादित्यत आह ॥ भौमानिति । यः सर्वज्ञो विष्णोर्गुणान्साकल्येन वर्णयेत्सोऽपि भौमान् रेणून्विममे गणितवान् । काकेनेति गम्यत इति । अयं भावः । विद्यमानावर्णनमेव सर्वज्ञत्व-विरोधि न त्वविद्यमानवर्णनम् । तथा च भौमरेणूनामानन्त्येन सङ्ख्यापरिच्छेदाभावात् साकल्येन तद्वर्णनाभावो यथा न सार्वज्ञ्यविरोधी तथा ततोऽप्यनन्तानां भगवद्गुणानां साकल्येन वर्णनाभावो न सार्वज्ञ्यविरोधीति । एतेन भगवतो गुणाश्च कथिता इति भगवद्गुणवर्णनस्य कर्तुं शक्यत्वमुक्त्वा भौमानित्यनेन भगवद्गुणा न वर्णयितुं शक्यन्त इति कथनं व्याहतमिति दूषणं परिहृतम् ॥ ६ ॥

पुत्राः पुत्रनामकाः । पुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाश्चाक्षुषपुत्रा इत्यर्थः । एतेन चाक्षुषा इत्येतत्पुत्रा इत्यनेन पुनरुक्तमिति चोद्यं परिहृतम् । पुरुषादीनां पुत्रा इत्यनेन पुत्रत्वमुच्यत इत्यङ्गीकृत्य पुत्रेति सामान्यनामोच्यत इत्यभ्युपगमात् ॥ ७ ॥

हे ब्रह्मन् । भगवता नारायणेनामृतार्थं क्षीरसागरो यथा कथं मथितः । अमृतोत्पादनं वा । अमृतोत्पादनं च । यदर्थं किमर्थं कृतम् । अम्बुचरात्मनाऽद्रिं पर्वतं यतः कुतो दधारेति । एतेन पयोब्धिं येन निर्मथ्य सुराणां साधिता सुधेत्यनेनामृतार्थं क्षीरसागरो मथित इत्यर्थस्य सिद्धत्वात् यदर्थं क्षीरसागरो मथित इति प्रश्नोऽनुपपन्न इति दूषणं निरस्तम् । यदर्थमित्यस्य क्षीरसागरो मथित इत्यनेनान्वय-मनङ्गीकृत्याध्याहृतेनामृतोत्पादनमित्यनेनान्वयमङ्गीकृत्य किमर्थममृतोत्पादनं कृतमित्यर्थस्योक्तत्वात् ॥ ११ ॥

यस्यावतारांशकलाविसर्जिता इत्यस्य केचन यस्यावतारेण विसर्जिताः सृष्टाः । केचन यस्या-वतारांशेन शिष्टा अवशिष्टाः सर्वभिन्नकलाभिः सृष्टा इत्यर्थः । एतेन ब्रह्मादीनामवतारांशकला-विसृष्टत्वाभावात् सर्वेऽवतारांशकलाविसर्जिता इत्यनुपपन्नमिति चोद्यं निरस्तम् ॥ २१ ॥

अयं तु तस्य स्थितिपालनक्षण इत्यस्य तस्य भगवतोऽयं कालः स्थितिपालनक्षणः स्थितिपालन-साधनपालनकाल इत्यर्थः । एतेनायमित्युक्तस्थूलकालस्य स्थितिपालनक्षण इति क्षणरूपत्वाभिधान-मयुक्तमिति दूषणमपास्तम् । क्षणशब्दस्य कालपरत्वाङ्गीकारात् ॥ २३ ॥

सत् निर्दुष्टमलोकं लोकविलक्षणमव्यक्तं स्वप्रसादेन विनाऽदृश्यमनन्तपारं कालतोऽन्तरहितं देशतः पाररहितं यदुपसुपर्णपत्रं गरुडपक्षयोः समीपे । गरुडपक्षयोर्मध्य इति यावत् । आसाश्चकारोपविवेश ।

तद्ब्रह्म धीरा योगरथेन ध्यानादियोगाख्यरथेनोपासते प्राप्नुवन्तीति। एतेनानन्तमपारमित्येतत्पुनरुक्तमिति दूषणस्यानवकाशः। अनन्तशब्देन कालत आनन्त्यमुच्यते। अपारमित्यनेन देशत आनन्त्यमुच्यते इत्यूरीकरणात्॥ २९॥

यस्य मायां कश्चन नातिपिपर्ति। यया मायया जनो मुह्यति स्त्रीपुत्रादिविषयं मोहं प्राप्नोति। यया मोहितः सन्, अर्थं परमार्थं भगवन्तं न वेद। निर्जितात्मात्मगुणं निर्जिता आत्मा जीव आत्मगुणा जीवगुणाश्च येन तम्। परेशं परेषां ब्रह्मादीनामीशम्। भूतेषु समं चरन्तं नमामीति॥ ३०॥

हे प्रभो! यत्कृपयैवेमे वयं ऋषयश्च सत्त्वेन सत्त्वगुणेन बहिर्ब्रह्माण्डस्यान्तश्च सृष्टा येनासुराद्यास्तमोगुणरजोगुणाभ्यां सृष्टास्तस्य परमेश्वरस्य सूक्ष्मां गतिं सात्त्विका अपि ऋषयो वयं च न विद्महे। इतरप्रधानास्तमोगुणरजोगुण- प्रधाना असुराद्याः सूक्ष्मां गतिं कुतो न विदुर्न कुतोऽपीति। एतेन ऋषयो वयं च यत्कृपया सत्त्वेन बहिरन्तश्च सृष्टा इत्यनेनैव पूर्णत्वात् पुनः सृष्टा इति पदं व्यर्थमिति दूषणं निरस्तम्। येन तमोगुणरजोगुणाभ्यामिति पदयोः शेषेण तमोगुणरजोगुणाभ्यामसुराद्याः सृष्टा इत्यर्थं वक्तुं पुनः सृष्टा इत्युक्तमित्यूरीकरणात्॥ ३१॥

पादौ महीयं स्वकृतैवेत्यस्येयं योजना। इयं मही यस्य नारायणस्य पादौ। अत्र मह्या भगवत्पादैक्यमुच्यत इति भ्रान्तिं वारयितुं स्वाभिप्रायं स्वयमेवाह॥ स्वकृतैवेति। उपलक्षणमेतत्। स्वाश्रिता चेत्यपि द्रष्टव्यम्। स्वशब्देन स्वपादौ गृह्येते। अनेन पादौ महीयमित्यस्येयं मही पादजन्या स्वपादाश्रिता चेत्येवार्थो न त्वैक्यमिति स्वाभिप्राय उक्तो भवतीति। एतेन पादौ महीयं स्वकृतैवेत्येतद्व्याहतमिति दूषणस्यानवकाशः॥ ३२॥

द्वारं च मुक्तेरमृतस्येत्यस्येयं योजना। अमृतस्येति जातावेकवचनम्। अमतस्यामृतानाम्। मृतशब्दः स्वरूपदुःखपरः। न विद्यते मृतं स्वरूपदुःखं येषां, मुक्तेर्द्वारमिति। अनेन तमोयोग्यानां मध्यमोत्तमानां मुक्तिर्व्यावृत्ता भवति। तेषां स्वरूपदुःखस्य विद्यमानत्वात्। एतेन सर्वेषां मरणस्य विद्यमानत्वाद्बाध इति चोद्यस्यानवकाशः। अमृतस्येत्यस्य मरणरहितानामित्यर्थ इत्यनङ्गीकारात्। एतदेवाभिप्रेत्याचार्यैरमृतस्येति मुक्तेरित्यस्य विशेषणमित्युक्तम्॥ ३६॥

इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः॥ ८-५॥

अथ षष्ठोऽध्यायः

कालेन कालनामकेनात्मन आत्मना मयाऽनुगृहीतैस्तैः प्रसिद्धैः यातुधानैर्दैतेयैश्च वो युष्माकं यावद्भवः पराभवः। तावत्संधिर्विधीयतामिति। एतेन व इत्यनेन पूर्णत्वादात्मन इत्येतद्व्यर्थमिति दूषणं परिहृतम्। आत्मन इति षष्ठी तृतीयादेश इत्यङ्गीकृत्य आत्मन इत्येतत्कालेनेत्यस्य विशेष्यमित्यङ्गीकारात्॥ १९॥

अपारयन्तस्तं वोढुमित्यस्य तं भारं वोढुमपारयन्तोऽशक्ता इत्यर्थः । एतेन भारं वोढुमशक्ता इति वक्तव्येऽपारयन्त इति कथनमनुपपन्नमिति चोद्यं निरस्तम् । अपारयन्त इत्यत्र विद्यमानो यच्छब्दो इण गतावित्यस्मात् शतृप्रत्यये निष्पन्नः । अतः पारयच्छब्दः पारगन्तृत्ववाचकस्तेन च पारगन्तृत्वशक्तिकारणशक्तिर्लक्ष्यते । ततश्च पारयच्छब्दस्य नञ् समासेऽपारयन्त इत्यस्याशक्ता इत्यर्थो लभ्यत इत्यभ्युपेत्यापारयन्त इत्यस्याशक्ता इत्यर्थस्योक्तत्वात् ॥ ३४ ॥

भगवान् गिरिपातविनिष्पिष्टान् अमरदानवान्विलोक्येक्षया निर्व्रणान्कृत्त्वोज्जीवयामास । अत्र दृष्टान्तमाह ॥ निर्जरानिति । यथा पूर्वं भगवान् दैत्यप्रहारविनिष्पिष्टान् निर्जरान्देवान्विलोक्येक्षया निर्व्रणान्कृत्वोज्जीवयामास तथेति । एतेनामरा इत्यनेन देवानां प्राप्तत्वात् निर्जरानित्येतत्पुनरुक्तं यथेत्येतदनन्वितमिति च दूषणं परास्तम् । पूर्वमित्यस्य शेषं कृत्वा विलोक्येत्यादीनामावृत्तिं चाङ्गीकृत्य यथा निर्जरानित्यादिना दृष्टान्त उच्यत इत्यङ्गीकारात् । एतेनैव निर्व्रणानित्येतदनन्वितमिति दूषणं परास्तम् । कृत्वेति शेषपूरणेनान्वयस्योक्तत्वात् ॥ ३६ ॥

इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ८-६ ॥

अथ सप्तमोऽध्यायः

अहीन्द्रस्य वासुकेः सहस्रसङ्ख्याकाः कराला दिगभिमुखा ये उच्छ्वासास्तेषामग्निधूमाभ्यामाहतानि वर्चांसि येषां तेऽसुरा इत्यर्थः ॥ १४ ॥

विरिञ्च वैकुण्ठेति सम्बुध्यन्त पदद्वयं रुद्रान्तर्गतनारायणमात्रसम्बोधनं न तु रुद्रस्य । विरिञ्च नियामकत्वेन विरिञ्चस्य वैकुण्ठस्य च नारायणे सम्भवाद्रुद्रेऽसम्भवात् ॥ ता. अर्थः ॥ तत्र तत्र न ते गिरित्रेत्यादिमाहाम्त्यप्रतिपादकग्रन्थे स्तुतिपदैस्तु गुणाधिक्यप्रतिपादकविरिञ्चवैकुण्ठेत्यादि-गुणाधिक्यवचो युक्तमेवेति ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ८-७ ॥

अथ अष्टमोऽध्यायः

विश्वकर्मा विश्वोत्पादकसृष्टिकर्मा प्रजापतिः । हारं सरस्वती पद्ममजो नागाश्च कुण्डल इत्यस्यार्थः । विश्वकर्मा विश्वोत्पादकसृष्टिकर्मा प्रजापतिः रुद्रादिसर्वप्रजास्वाम्यतो विरिञ्चो विचित्राणि भूषणानि पद्मं चाहरत् । सरस्वती देवी हारमाहरन्नागाः कुण्डले आहरन्निति ॥ १५ ॥

नूनं तपो यस्य न मन्युनिर्जय इत्यत्र पुरुषविशेषतप आदीनां बहुगुणानां, कोपादीनां बहुदोषाणां सत्वेऽपि तपःकोपयोर्ग्रहणं प्रकटितत्वाभिप्रायेण । एवमुत्तरत्रापि द्रष्टव्यम् । अस्मिन्नेव श्लोके स ईश्वरः

किं परतो व्यपाश्रय इत्यस्येश्वरः यस्यैश्वर्यलक्षणगुणोऽस्तीति यावत्। स, परतोव्यपाश्रय इत्येकं पदम्। परतः परस्परविशेषेणापगत आश्रय आश्रयणं यस्य स परतोव्यपाश्रयः परनिरपेक्षः किं किन्तु परसापेक्ष एवेत्यर्थः। एतेन नूनं तपो यस्येत्यादाविव पुरुषविशेषस्य कश्चन प्रकटितो गुणः कश्चन प्रकटितो दोषो वक्तव्यः। स ईश्वरः किं परतो व्यपाश्रय इतीश्वरस्य पराश्रयत्वं नास्तीति कथनमसङ्गतमिति दूषणं परास्तम्। ऐश्वर्यलक्षणः प्रकटितो गुणः, सापेक्षत्वलक्षणः प्रकटितो दोष उच्यत इत्यभ्युपगमात्॥ १९॥

क्वचित्कस्मिंचित्पुरुषे चिरायुर्दीर्घायुस्तस्य शीलमङ्गलं मङ्गलं च तत् शीलं च। मङ्गलशब्दस्य कडाराः कर्मधारय इति परनिपातः। कडारादाकृतिगणत्वात्। सुशीलं न हि। क्वचित्कस्मिंश्चित्पुरुषे तदपि चिरायुः सुशीलं चास्ति। तस्यायुष आयुर्वेद्यं वेदनयोग्यं ज्ञानानुकूलं न हि। यत्र यस्मिन्कुत्र च कस्मिंश्चित्पुरुषे उभयं शीलं ज्ञानानुकूलं दीर्घायुरित्युभयं सोऽप्यमङ्गलः। कश्चन सुमङ्गलः पुरुषः सो हि मां मदभिमन्यमानं भाग्यं कांक्ष्यते हीति। एतेन वेद्यमायुष इत्येतदनन्वितमिति दूषणं परास्तम्। आयुष इति षष्ठी प्रथमादेश इत्यङ्गीकारात्। एतेनैव शीलमङ्गलं वेद्यमायुरिति त्रयाणां पूर्वमुक्तत्वादुभयमित्यनुपपन्नम्। उभयमित्यनेन मङ्गलमस्तीत्युक्त्वा सोऽप्यमङ्गल इति कथनं व्याहतं चेति दूषणं परिहृतम्। शीलमङ्गलमित्यत्र मङ्गलमित्यस्य शीलविशेषणत्वमित्यङ्गीकारात्॥ २१॥

सर्वगुणैरपेक्षितमित्यस्य सर्वगुणैः सर्वयोग्यतानुसारेण पूर्णा गुणा येषां तैर्ब्रह्मादिभिरपेक्षितमित्यर्थः। एतेनेप्सितमित्येतत्पुनरुक्तमिति दूषणं निरस्तम्। सर्वगुणैरपेक्षितमित्यनेन ब्रह्मादिभिरपेक्षितमित्युच्यते। ईप्सितमित्यनेन स्वस्या ईप्सितमित्युच्यत इत्यूरीकरणात्॥ २२॥

यत्र वक्षसि स्थिता श्रीर्यस्मात्साधिपतयस्त्रिलोकाः स्वाः प्रजास्तस्मात्साधिपतींस्त्रिलोकान्सकरुणेन निरीक्षणेनैवैधयत इत्यर्थः। एतेनाधिपतींस्त्रिलोकानित्यनेन प्रजानां प्राप्तत्वात्स्वाः प्रजा इत्येतद्व्यर्थमिति चोद्यं परिहृतम्। साधिपतीनां त्रिलोकानामभिवृद्धिकरणे स्वाः प्रजा इत्यनेन स्वपुत्रत्वरूपो हेतुरुच्यत इति स्वीकरणात्॥ २४॥

मिथोऽर्थं वः साधयिष्य इत्यस्यासुरेषु मिथः परस्परं कलहमुत्पाद्य वोऽर्थं साधयिष्य इत्यर्थः। एतेन मिथ इत्येतदनन्वितमिति दूषणस्यानवकाशः। असुरेष्वित्यादिशेषपूरणेनान्वयस्योक्तत्वात्॥३६॥

हे प्रभो! तदर्थेऽमृतार्थे तर्षचेतसां तृषयुक्तचेतसामहं पूर्वं गृह्णाम्यहं पूर्वं गृह्णामि त्वं पूर्वं न गृहाण त्वं पूर्वं न गृहाणेति विवादं कुर्वतां तेषां दैत्यानां मिथः कलिः कलहोऽभूदिति॥ ३७॥

हे सुभ्रु! त्वं शरीरिणां सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन सदयेन विधिना प्रेषिताऽसि किं, नेति गम्यते। किंशब्दस्याक्षेपार्थत्वात्। तेनापि नेति गम्यते। प्रेषिताऽसि नेति किंतु प्रेषितैवेति नूनमिति। एतेन प्रेषिताऽसि नूनं निश्चितमित्युक्तत्वात् प्रेषिताऽसि किमिति प्रश्नोऽनुपपन्न इति दूषणं परिहृतम्।

पूर्वोक्तरीत्या प्रेषिताऽसि किमित्यस्य प्रेषिताऽसि नेत्यर्थकत्वाङ्गीकारेणातिशयेन प्रकृतार्थसिद्धौ महातिशयेन प्रकृतार्थसिद्ध्यर्थं नूनमित्युक्तमिति तात्पर्यात् ॥ ५० ॥

भावगम्भीरमित्यस्य भावगम्भीरैरित्यर्थः । एतेन भावगाम्भीर्यस्य वाक्यधर्मत्वात् विनोदवाक्य-वाचक क्ष्वेलितशब्दस्य तृतीयाबहुवचनान्तत्वात्तदनुसारेण भावगम्भीरैरिति वक्तव्यम् । भावगम्भीरमिति कथनमनुपपन्नमिति दूषणं निरस्तम् । भावगम्भीरमिति प्रथमैकवचनं तृतीयाबहुवचनादेश इत्यङ्गीकारात् ॥ ५६ ॥

धूपामोदितायां सुगन्धिधूपामोदितायां माल्यधूपकैर्माल्यैर्धूपकैः सुगन्धिधूमजनकद्रव्यैर्जुष्टायां शालायामित्यर्थः । एतेन शालायामिति विशेष्यपदस्य धूपामोदितेत्यनेनान्वितत्वात् माल्यधूपकैर्जुष्टाया-मित्येतदनन्वितमिति दूषणं परिहृतम् । धूपामोदितेत्येतत् शालापदेन समस्तं न भवति किन्तु छान्दसे सुपां सुलुगिति ङिलोपे सुत्वे च धूपामोदितेति भिन्नं पदं निष्पन्नमित्यभ्युपगमात् । एतेनैव मालाधूपकै-र्जुष्टायामित्यत्र धूपकैर्जुष्टायामित्येतद्धूपामोदितेत्यनेन पुनरुक्तमिति चोद्यमपास्तम् । धूपामोदितेत्यत्र धूप-शब्दस्य सुगन्धिधूपपरत्वं माल्यधूपकैरित्यत्र धूपकशब्दस्य सुगन्धिधूमजनकद्रव्यपरत्वमित्यूरीकरणात् ॥ ६१ ॥

अर्थयोगशब्देन भगवद्योग उच्यते । एतेन हेतुशब्देन हेतूनामुक्तत्वादर्थयोग इत्येतत्पुनरुक्तमिति दूषणमपास्तम् । अर्थयोगशब्देनार्थस्यामृतरूपार्थस्य यो उपाय इत्यर्थ इत्यनङ्गीकृत्वाऽर्थशब्देन मुख्या-मुख्यन्यायेन परमार्थभगवन्तं गृहीत्वाऽर्थयोगशब्देन भगवत्सम्बन्धरूपामृतहेतुः प्राधान्यात्पृथगुच्यत इत्यङ्गीकारात् ॥ ७३ ॥ इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ ८-८ ॥

अथ नवमोऽध्यायः

हे राजन्! ते सुरासुरा अग्रतोऽग्रतो गच्छन्त उभयोः सेनयोर्विविशुरित्यर्थः । एतेन देवासुराणां परमशूरत्वात् सेनाग्रभाग इव सेनामध्यादिभागेऽपि प्रवेशस्य वक्तव्यत्वादग्रतोऽग्रतो विविशुरिति सेनाग्रभागमात्रप्रवेशकथनमनुपपन्नमिति दूषणं प्रत्युक्तम् । अग्रतोऽग्रत इत्यस्य विविशुरित्यनेनान्वय इत्यनङ्गीकृत्याध्याहृतेन गच्छन्त इत्यनेनान्वय इत्यङ्गीकारात् ॥ १२ ॥

वातोद्धूततमोष्णीषैरित्यस्य वातेनोऽद्धूतान्युद्गतानि तमांसि रजांसि तद्युक्तोष्णीषकवचादि-भिरित्यर्थः । एतेन वातोद्धूततमोष्णीषैरित्यस्य वातेनोत्कृष्टतयाऽतिशयेन कंपिता ये उष्णीषास्तैरित्यर्थो वक्तव्यः । स चानुपपन्नः । शिरःस्थितानामुष्णीषाणां कंपनस्यैवायोगेनोत्कृष्टतयाऽतिशयेन कंपनस्य सुतरामयोगादिति दूषणं निरस्तम् । उद्धूतशब्दस्योद्गतार्थकत्वमङ्गीकृत्य वातोद्धूततमोष्णीषैरित्यस्य वातोद्गतधूलिसम्बन्धोष्णीषकवचादिभिरित्यर्थ इत्युक्तत्वात् ॥ १४ ॥

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ ८-९ ॥

अथ दशमोऽध्यायः

हे मूढ! त्वं नटवन्मायेशान्नोऽस्मान्मायाभिर्जिगीषसि जेतुमिच्छसि । नटवदित्युक्तं विवृणोति ॥ जित्वेति । नटो यथा निबद्धाक्षान् बालान् जित्वा तद्धनं बालानां धनं यथा हरति तथेति । एतेन नटवदित्यनेन नटदृष्टान्तस्योक्तत्वात् जित्वा बालानित्येतत्पुनरुक्तमिति दूषणं निरस्तम् ॥ ४ ॥

ततस्तदनन्तरं मातलिना दशशतैरश्वैर्वृतो रथ आनीतस्तदा विभुर्हरिरिन्द्रोऽपि द्विपं गजमुत्सृज्य रथमारुरोहेति । तेन दशशतैरित्यस्य विशेष्यं नोक्तमिति शङ्कानवकाशः । अश्वैरिति शेषपूरणेन विशेष्यस्योक्तत्वात् ॥ १६ ॥

नमुच्यादयः परुषैर्वचोभिरिन्द्रमर्दयन्तो मेघाः धाराभिः पर्वतमिवास्येन्द्रस्य मर्माणि शरैरवाकिरन्निति । तेनावाकिरन्नित्यस्य कर्म नोक्तमिति शङ्काऽनवकाशः । मर्मस्विति सप्तमीबहुवचनं मर्माणीति द्वितीयाबहुवचनादेश इत्यङ्गीकृत्य मर्मस्वित्यनेन मर्माणां कर्मत्वमित्यभ्युपगमात् ॥ २० ॥

येन वज्रेण मे मया पूर्वं पतत्त्रैः पततामुत्पततां भुवि निविशतामद्रीणां भारैर्गुरुत्वैः प्रजात्यये प्रजाक्षये प्राप्ते सति पक्षच्छेदः कृत इति । एतेन भारैर्निविशतामित्यनुपपन्नम् । पर्वतानां गुरुत्वप्रयुक्तोपवेशस्याभावादिति दूषणं परिहृतम् । भारैरित्यस्य निविशतामित्यनेनान्वय इत्यनङ्गीकारात् ॥ ३५ ॥

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ ८-१० ॥

अथ एकादशोऽध्यायः

तदुपेक्षतयाऽनपेक्ष इत्यस्येयं योजना । जगत्सृष्ट्याद्यर्थं प्रकृत्याद्यनपेक्षः । कथं तर्हि प्रकृत्यादिस्वीकार इत्यत आह ॥ तदुपेक्षतयेति । तत् प्रकृत्यादिस्वीकरणमुपेक्षतयोदासीनतया । अयं भावः । यथा पद्भ्यां गन्तुं समर्थोऽपि पुरुषो लीलया दण्डमवष्टभ्य गच्छति । तथा भगवान् प्रकृत्यादिकं विना जगत्कर्तुं समर्थोऽपि लीलया प्रकृत्यादिकं स्वीकृत्य जगत्करोतीति ॥ ६ ॥

त्वमेको ज्ञानानन्दगुणैरभिन्न एव । स्वर्णं कृताकृतमिव कुण्डलाद्यात्मना कृतं कार्यमकृतं प्रकृत्यात्मनाऽकार्यं यथा भवति । एवं त्वम् । सत्कार्यमसदकार्यं चेति यावत् । द्वयं तत्त्वमेव । पुरुषादिरूपेण व्यक्तत्वात्कार्यं मूलरूपेणाव्यक्तत्वादकार्यम् । अद्वयमसदृशम् । वस्तु सर्वदा वसतीति वस्तु नित्यं त्वमेव । इह तव रूपेषु भेदो न । तर्हि जनैः रूपाणां भेदः कथमुच्यत इत्यत आह ॥ अज्ञानत इति । जनैरज्ञानतस्त्वयि त्वद्रूपेषु विकल्पो भेदो विहित उक्तः । ननु देहान्विहाय तव रूपाणां कर्तृत्वस्यायोगात् देहा अङ्गीकर्तव्याः । ते च देहाः सत्त्वादिगुणात्मकाः । ततश्च देहभेदाद्रूपाणां भेदोऽवर्जनीय इत्यत आह ॥ यस्मादिति । यस्मात्कारणात्त्वं निरुपाधिकश्च । चशब्द एवार्थे । सत्त्वादिगुणात्मकदेहरहित एव । स्वरूपदेहैरिति शेषः । स्वरूपदेहैर्गुणव्यतिकरो गुणानां सत्त्वादि

गुणानां व्यत्यासो येषु कार्येषु तानि कार्याणि व्यतिकराणि । तानि नास्य सन्तीति गुणव्यतिकरः । गुणव्यतिकरशब्दात् मत्वर्थेऽचूप्रत्ययः । कार्याणां कर्तेति यावत् । तस्माद्भगवद्रूपाणां देहतोऽप्य-भेदस्याङ्गीकारे न काऽप्यनुपपत्तिरिति ॥ ७ ॥

अध्याहृत इतिशब्दः, एवार्थक उतशब्दश्च सर्वत्र सम्बन्ध्यते । केचित्ज्ञानिनो त्वां ब्रह्म गुणपूर्णमित्येवावयन्ति उपासते । एके ज्ञानिनस्त्वां धर्मं धारकत्वाद्धर्ममित्येवोपासते । एके ज्ञानिनस्त्वां सदसतोः कार्यकारणयोः सकाशात्परं परो विलक्षणः, पुरुषं पुरुषः पूर्णषाड्गुणः, परेशं परेशः परेषां ब्रह्मादीनां स्वामीत्येवोपासते । अन्ये ज्ञानिनस्त्वां नवशक्तियुतं नवशक्तियुतो विमलादिनवशक्तियुतः परं पर उत्तम इत्येव वदन्त्यवयन्त्युपासते । केचित्ज्ञानिनस्त्वां महापुरुषं महापुरुषोऽव्ययमव्ययो नाशरहित आत्मतन्त्रः स्वतन्त्र इत्येवोपासत इति । एतेन सर्वैर्ज्ञानिभिर्ब्रह्मत्वधारकत्वगुणानां ज्ञातत्वात् । केचिद्ब्रह्मेत्येवावयन्ति जानन्ति केचिद्धारक इत्येवावयन्तीत्यादि कथनमनुपपन्नमिति दूषणमपास्तम् । अवयन्तीत्यस्य जानन्तीत्यर्थमनगङ्गीकृत्योपासत इत्यर्थस्योक्तत्वात् । एतेनैव केचिद्धर्म इत्युपासत इत्यन्वयलाभार्थं धर्मशब्दः प्रथमान्तो वक्तव्यः । धर्ममिति द्वितीयान्तप्रयोगोऽनुपपन्न इति चोद्यं निरस्तम् । धर्ममस्त्रियामित्युक्तत्वात् धर्ममिति नपुंसकप्रथमान्तपदमित्यङ्गीकारात् । एतेनैव वेत्युपासत इत्यनेनान्वयलाभार्थं परादिशब्दाः प्रथमान्ता वक्तव्याः । परमित्यादिद्वितीयान्तप्रयोगोऽनुपपन्न इति दूषणमपास्तम् । परमित्यादि द्वितीया प्रथमादेश इत्यङ्गीकारात् । एतेनैवान्ये वदन्तीत्यत्रोपासत इत्यर्थ लाभार्थमवयन्तीति वक्तव्ये वदन्तीति कथनमयुक्तमिति दूषणं परास्तम् । अवयन्तीत्यत्र वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यनेनानेत्युपसर्गाकारलोपे यकारस्य छान्दसे दकारे वदन्तीति रूपं निष्पन्नमित्यङ्गीकारात् ॥ ८ ॥

त्वां ब्रह्मेत्यादिश्लोके जीवानामुपासकत्वादिकमीश्वरस्योपास्यत्वादिकमुक्तम् । ततोऽर्थाज्जीवेश्वर-योर्भेदः प्राप्तः । सोऽनुपपन्नः । सर्वात्मकत्वेन भगवान्ज्ञातव्यः । तथैव स्तुतिश्च कर्तव्येति बहुग्रन्थ उक्तत्वात् । इत्याशङ्काऽत्र परिह्रियते । यतः कारणात्स पूर्वोक्तजीवभिन्नत्वादिगुणसंपन्नस्त्वं जगतः स्थितिजन्मनाशान्, भूतेहितं भूतानां ब्रह्मादिभूतानामीहितं चेष्टां च, बन्धमोक्षावपि लिङ्गशरीरबन्धमोक्षौ च समीहसि करोषि । वायुर्यथा खं विशति तथा चराचराख्यं सर्वं विशसि च । ततः कारणात्ते सर्वात्मकतयाऽवगमः संपादनीयः । सर्वात्मकतयाऽनुगतिः स्तुतिः कर्तव्येति च बहुग्रन्थेषूक्तमित्येतद्धि प्रमाणप्रसिद्धिमिति । सर्वस्थितिजन्मनाशकर्तृत्वं भूतचेष्टाकर्तृत्वं बन्धमोक्षकर्तृत्वं चराचरस्य सर्वप्रविष्टत्वं सर्वात्मकशब्दप्रवृत्तिनिमित्तम् । अतः सर्वात्मकत्वस्योक्तत्वेऽपि जीवेश्वरभेदो नानुपपन्न इति भावः ॥ १० ॥

न मेने तदुदाहृतमित्यस्य उत् उत्कृष्टायाः परदेवतायास्तस्या नारायण्या आहृतमाहरणं कर्तव्यं नेति मेन इत्यर्थः । एतेन न मेने तदुदाहृतमित्येतदसङ्गतमिति दूषणं परास्तम् । तदुदाहृतमित्यत्र तत् उत्

आहृतमिति पदत्रयमङ्गीकृत्य तदित्यत्र षष्ठ्या लुक् अङ्गीकृत्य कर्तव्यमितीतिपदयोः शेषं चाङ्गीकृत्य सङ्गतार्थस्योक्तत्वात् ॥ ३५ ॥

अतोऽहमवशोऽस्वतन्त्रोऽन्ये इन्द्रादयोऽस्वतन्त्रा इति किमुतेत्यर्थः । एतेनेन्द्रादीनामिव रुद्रस्याप्यस्वान्तत्र्यादवशः स्वतन्त्रोऽहं मुह्ये । अस्वन्तत्रा इन्द्रादयो मुह्यन्तीति किमुतेति कथनमनुपपन्नमिति दूषणं निराकृतम् । अत इत्यस्य शेषमङ्गीकृत्य स्ववशो न भवतीत्यवश इति व्युत्पत्त्याऽवश इत्यस्यास्वतन्त्र इत्यर्थ कत्वमङ्गीकृत्य भगवन्मायामोहितत्वादहमस्वतन्त्रः । अन्येऽस्वतन्त्रा इति किमुतेत्यर्थ उच्यत इत्यभ्युपगमात् ॥ ४२ ॥

इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ ८-११ ॥

अथ द्वादशोऽध्यायः

तृतीयां वडवामेक इत्यत्र संज्ञा यथाऽद्या तथा वडवाऽप्याद्यैवैत्यपरे आहुरित्यपि द्रष्टव्यम् । सैव भूत्वा तु वडवानासत्याविति षष्ठस्कन्धे संज्ञयैव वडवारूपं गृहीतमित्युक्तत्वात् । भेदाभावात् । उभयोरप्याद्यत्वमिति केषाञ्चित्पक्षः । रूपान्तराद्वडवायास्तृतीयात्वमन्येषां पक्षो विवक्षाभेदेन पक्षद्वयमपि संमतम् । शिष्यप्रसिद्ध्यर्थमेकोऽपर इत्युक्तमिति ॥ ९ ॥

अत्रेयं योजना । यो बलिः सप्तममन्वन्तरे याचमानाय विष्णवे वामनायेमामस्याः पृथिव्याः पदत्रयं दत्वा राद्धं समृद्धमिन्द्रपदं हित्वा ततो वामनानुग्रहात्सिद्धिमवाप्स्यति । अवाप्तवान्स बलिराष्टममन्वन्तरे इन्द्रो भविष्यतीति पूर्वेणान्वय इति । एतेन सप्तममन्वन्तर एव पदत्रयभूमिदानादिना वामनानुग्रहेण सिद्धेः प्राप्तत्वात् यः पादत्रयभूदानादिनाऽष्टममन्वन्तरे सिद्धिमवाप्स्यति स बलिरिन्द्रो भविष्यतीति कथनमनुपपन्नमिति दूषणं परास्तम् । दत्वेमां याचमानयेत्यत्र सप्तममन्वन्तर इति शेषमङ्गीकृत्यावाप्स्यतीति लृटः छन्दस्त्वेन भूतार्थकत्वमङ्गीकृत्य यः सप्तममन्वन्तरे पदत्रयभूदानादिना सिद्धिमवाप्तवान्स बलिरष्टममन्वन्तरे इन्द्रो भविष्यतीत्यर्थस्योक्तत्वात् ॥ १३ ॥

इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ ८-१२ ॥

अथ त्रयोदशोऽध्यायः

हे भगवन् मन्वन्तरेषु मन्वादयो मन्वादीनां मध्ये ये नियुक्तास्तत्तान्मे वदस्व येन नियुक्तास्तान्वदस्व । यथा येन प्रकारेण नियुक्तास्तं प्रकारं वदस्व । यस्मिन्कर्मणि नियुक्तास्तत्कर्म वदस्वेति । एतेन पृष्टव्यांशाभावात् य इमे मन्वादयो नियुक्तास्तान्वदस्वेति कथनमनुपपन्नमिति दूषणं परिहृतम् ।

इमे मन्वादय इति प्रथमा षष्ठ्यादेश इत्यङ्गीकृत्यैषां मन्वादीनां मध्ये ये नियुक्तास्तान्वदस्वेत्यर्थस्योक्तत्वात् । अत एव मन्वादीनां मध्ये के नियुक्ता इति प्रश्नस्य मनवो मनुपुत्राश्चेत्यादिना सर्वे मन्वादयो नियुक्ता इति परिहारं वक्ष्यति ।। १ ।।

इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ।। ८-१३ ।।

अथ चतुर्दशोऽध्यायः

हे ईश्वर हरे! बलेः सकाशाद्भूमेः पदत्रयं कृपणवत्कस्मादयाचत । हरिर्लब्धार्थो लब्धोऽर्थो भूपदत्रयरूपार्थो येन स लब्धार्थः । लब्धार्थो भूत्वाऽपि तं बलिं कस्माद्बन्धेति । एतेनेश्वरत्वस्य सर्वदा विद्यमानत्वात् ईश्वरो भूत्वेत्यनुपपन्नमिति दूषणं प्रत्युक्तम् । भूत्वेत्यस्येश्वर इत्यनेनान्वयमनङ्गीकृत्य लब्धार्थ इत्यनेनान्वयस्योक्तत्वात् ।। १ ।।

परिधीनित्यस्य दिश इत्यर्थः । दहन्निव दृशो दिग्भिरिति श्लोके दृशां दाहकर्मत्वस्य वक्ष्यमाणत्वात् ।। १० ।।

यतो दुर्धर्षत्वान्मद्रिपोरेष समुद्यमस्तस्यैतस्य दुर्धर्षत्वस्य कारणं मदोजः स हो बलं तेजस्तस्यौज आदेः कारणं ब्रूहीति । एतेन दुर्धषत्वस्य कारणमोज आदिकमिति सिद्धत्वात् दुर्धर्षत्वस्य कारणं ब्रूहीत्यनुपपन्नम् । यत ओज आदेः समुद्यमस्तदोज आदिकं ब्रूहीति चानुपपन्नम् । ओज आदिकं कारणं समुद्यमः कार्यमिति वक्तव्यार्थस्य स्वेनैवोक्तत्वादिति दूषणं परास्तम् । कारणमित्यस्यावृत्तिमङ्गीकृत्य तस्येत्यस्य द्विवारं शेषमङ्गीकृत्य यदित्यस्य शेषमङ्गीकृत्य समुद्यमे दुर्धर्षत्वं कारणं दुर्धर्षत्वे ओज आदिकं कारणं मया न ज्ञायते । अत ओज आदि कारणं ब्रूहीत्यर्थ इत्यभ्युपगमात् ।। २७ ।।

शिष्यायेति । ब्रह्मवादिभिर्गुरुभिरुपभृतं पूर्वतेज ओजःसहो बलं शिष्याय दत्तमिति । एतेन ओज आदेःकारणस्य पृष्टत्वात् । तेज आदेः कारणं जानामिति वक्तव्यम् । उन्नतेः कारणं जानामीति वचनमयुक्तमिति चोद्यं निरस्तम् । तेज आदिनेत्यस्य शेषमङ्गीकृत्योन्नतस्य तेज आदेः कारणं जानामीत्यर्थस्योक्तत्वात् । एतेनैव पूर्वतेजोवदोज आदेरप्युक्तत्वात् तेज ओजः सहो बलमिति वक्तव्यमिति दूषणं परिहृतम् । तेजःशब्द ओज ओदरुपलक्षक इत्यभ्युपगमात् । एतेनैव शिष्यायेत्येतदनन्वितमिति चोद्यमपास्तम् । दत्तमिति शेषपूरणेनान्वयस्योक्तत्वात् । पूर्वमोजस आदौ ग्रहणेऽपि तेजसःकण्ठतो ग्रहणं प्राधान्यात् । तेज आदिमात्रस्य दुर्धर्षत्वकारणत्वाभावात् । उन्नतेरित्युपभृतमिति चोक्तम् । ओजः सहो बलं तेज इत्यत्रापि ओज आदि शब्दान्मुख्यामुख्यन्यानेनोन्नतौज आदिकं गृहीत्वोन्नतौजादेः कारणं ब्रह्मेत्यर्थो वक्तव्यः ।। २८ ।।

भवान्वेश्वरं हरिं वर्जयित्वा भवद्विधो भवतां विशेषेण धारकोऽपि वा । अस्य बलेः पुरः स्थातुं शक्तो न । अत्र दृष्टान्तमाह ।। कृतान्तस्येति । एतेन भवत्सदृश इत्यर्थकेन भवद्विध इत्यनेन

हरिप्राप्तेरभावात् । ईश्वरं हरिं वर्जयित्वेति कथनमनुपपन्नमिति दूषणं परिहृतम् । भवद्विध इत्यत्र विपूर्वकाद्धारणार्थकधातुः कप्रत्यये विध इति रूपं निष्पन्नमित्यभ्युपेत्य भवद्विध इत्यस्य भवतां विशेषेण धारक इत्यर्थस्योक्तत्वेन हरिप्राप्तेर्विद्यमानत्वात् । यद्यपि ब्रह्मादयो बल्यपेक्षया बलाढ्याः । तथाऽपि हर्याज्ञाभावेन बलेः पुरःस्थित्वा बलिनिग्रहस्य कर्तुमशक्याद्भवतां विशेषेण धारका ब्रह्मादयोऽपि बलेः पुरःस्थातुं शक्ता नेत्युक्तम् ।। २९ ।।

इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ।। ८-१४ ।।

अथ पञ्चदशोऽध्यायः

हे भद्रे लोके पूर्वं विप्राणामभद्रं नाभूत् । अधुना विप्राणामभद्रमागतमप्यागतं किम् । धर्मस्य पूर्वमभद्रं नाभूदधुनाऽभद्रमागतं किं शब्दानुवर्तित इच्छानुवर्तिनो मृत्योः सकाशाल्लोकस्य पूर्वमभद्रं नाभूत् । अधुना मृत्योः सकाशादभद्रमागतं किमिति । एतेन विप्रादीनामभद्रमागतं किमिति वक्तव्ये विप्रादीनामभद्रं नेति कथनमनुपपन्नमपि शब्दश्च व्यर्थ इति दूषणं परिहृतम् । पूर्वमित्यस्य शेषमङ्गीकृत्य नेत्यस्य पूर्वं विप्रादीनामभद्रं नेत्यन्वयमुक्त्वाऽपि शब्दस्य किं शब्दार्थकत्वमङ्गीकृत्याधुना विप्रादीनाम-भद्रमागतं किमित्यन्वयस्योक्तत्वात् ।। ४ ।।

अंशं भजन्त्या इत्यस्य वामांशत्वं भजंत्या प्राप्ताया इत्यर्थः । एतेनादितेः संपूर्णस्य भजनस्य विद्यमानत्वादंशं भजन्त्या इत्यनुपपन्नमिति चोद्यं निरस्तम् । अंशशब्दो भावप्रधानः । वामेति योग्यतया सम्बध्यते । भजन्तीशब्दप्राप्तवाचक इति चाङ्गीकृत्य वामार्थरूपाया इत्यभ्युपगमात् ।। १५ ।।

भौतिकोऽत एवानात्मा देहः क्व प्रकृतेः प्रकृतिकार्यभूतेभ्यः परो विलक्षणः । अभौतिक इति यावत् । आत्मा जीवश्च क्व । देहानां जीवानां च सर्वदा सम्बन्धो नास्तीति यावत् । यदा पतिपुत्रादिदेहाः कस्य सम्बन्धिनो भार्यापित्रादिदेहाः केषां सम्बन्धिनः पतिपुत्रादिदेहानां भार्यापित्रादिदेहानां च सम्बन्धः । शाश्वतो न भवतीति यावत् । कथं तर्हि शाश्वतत्वबुद्धिर्भवतीत्यत आह ।। मोह एवेति । शाश्वतत्वबुद्धौ मोहो भावरूपाज्ञानं कारणमित्येतद्धि प्रमाणसिद्धमिति । एतेन स्त्र्यादीनां पत्यादीनां सम्बन्धस्य विद्यमानत्वात् । सम्बन्धो नास्तीति कथनमयुक्तमिति दूषणं निरस्तम् । सम्बन्धमात्रमङ्गीकृत्य शाश्वतसम्बन्धस्यैव निषेध इत्यूरीकरणात् । एतेन पतिपुत्राद्याः क्व इत्यस्य पतिपुत्रादिदेहाः कस्य सम्बन्धिन इत्यर्थो वक्तव्यः । तथा च कस्येत्यनेन पुनरुक्तमिति चोद्यं निरस्तम् । क्व इत्यस्य पतिपुत्राद्या इत्यनेनान्वयमङ्गीकृत्याऽध्याहृतेन भार्यापित्रादिदेहा इत्यनेनान्वयस्योक्तत्वात् ।। १८ ।।

इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ।। ८-१५ ।।

अथ षोडशोऽध्यायः

प्राय इत्यस्य सर्वथेत्यर्थः । एतेनानुकूलेश्वरविप्रगुप्तत्वेन हेतुनाऽसुराणां सर्वथाऽवारणीयत्वस्य सिद्धत्वात्प्रायोऽवारणीया इत्यनुपपन्नमिति दूषणं पराकृतम् ॥ १६ ॥

मारीचतपस्यवस्थित इति कथनमयुक्तमिति चोद्यं निरस्तम् । तपः शब्देन तपसा चिरसञ्चितं वीर्यं लक्षणया गृह्यत इत्यभ्युपगमात् । लाक्षणिकपदप्रयोगस्य प्रयोजनं वीर्यस्य वैशिष्ट्यज्ञापनम् ॥ १८ ॥

दारुण्यग्निं यथाऽनिल इत्यस्यानिलो वायुर्ज्येष्ठादिमासि दूरे विद्यमानमग्निमानीय दारुणि काष्टराशौ यथा निदधातीत्यर्थः । एतेन दारुण्यग्नेः पूर्वमेव विद्यमानत्वेन विहितत्वाभावात् । गर्भस्य निहितत्वे दारुण्यमग्निमिवेति दृष्टान्तकथनमयुक्तमिति दूषणं परिहृतम् । दार्वान्तर्गताग्नेरग्रहणात् ॥ २४ ॥

त्रिगुणायेत्यस्य त्रिगुणाभिमानिश्रीभूदुर्गाप्रवर्तकायेत्यर्थः । एतेन त्रिगुणाय नमोऽस्तु त इत्यत्र त्रिगुणायेत्यनेन पुनरुक्तिरिति दूषणस्यानवकाशः । त्रिगुणाय नमोऽस्तु त इत्यत्र त्रिगुणायेत्यनेन त्रिगुणप्रवर्तकत्वमुच्यते । त्रिगुणाय त्रिपृष्ठायेत्यत्र त्रिगुणायेत्यनेन त्रिगुणाभिमानिप्रवर्तकत्वमुच्यत इत्यूरीकरणात् ॥ २६ ॥

हे ईश कालो भवान्विश्वमाक्षिपति तिरस्करोति । दृष्टान्तमाह ॥ स्रोत इति । उच्चस्थलात्पतितं स्रोतोऽधोभागे विद्यमाने गभीरमम्भो यथा तिरस्करोतीत्यर्थः । एतेन त्वमन्त इत्यनेन संहारकारणत्वस्योक्तत्वात् । आक्षिपतीत्येतत्पुनरुक्तमिति चोद्यं परास्तम् । आक्षिपतीत्यस्य संहरतीत्यर्थ इत्यनङ्गीकारात् । एतेनैवोच्चस्थलात्पतिता गभीरा नदीत्युक्त्यैव नद्युदकस्य लाभात् । अंभ इत्येतद्व्यर्थकर्मोक्तिश्चेति दूषणं निरस्तम् । अम्भ इत्येतत्स्रोत इत्यस्य विशेष्यमित्यङ्गीकृत्य कर्मेत्यभ्युपगमात् ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः ॥ ८-१६ ॥

अथ सप्तदशोऽध्यायः

श्रोणायां श्रवणद्वादश्यामित्यस्य श्रोणायां श्रवणयुक्तायां श्रवणद्वादश्यां भाद्रपदशुद्धद्वादश्यामित्यर्थः । एतेन श्रवणद्वादश्यामित्यनेनैव द्वादश्याः श्रवणयुक्तत्वस्य प्राप्तत्वात् । श्रोणायामिति श्रवणयुक्तत्वकथनं व्यर्थमिति दूषणं परिहृतम् । भाद्रपदशुद्धद्वादश्याः प्रायः श्रवणनक्षत्रयुक्तत्वस्य विद्यमानत्वात् । श्रवणद्वादशीशब्देन भाद्रपदशुद्धद्वादशीं गृहीत्वा तस्या द्वादश्याः श्रवणयुक्तत्वज्ञापनार्थं श्रोणायामित्युक्तमित्यङ्गीकारात् ॥ ५ ॥

इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः । ८-१७ ॥

अथ अष्टादशोऽध्यायः

अत्रेयं याजेना । मे भ्रातृहा विष्णुर्यतो यामवस्थायां गतः पुमान्नावर्तते न जीवति तामवस्थां गतः । मृत इति यावत् । इत्येतन्नूनं निश्चित ॥ १२ ॥

वैरानुबन्ध एतावानेवैतादृशः । एतावानित्युक्तं विवृणोति ॥ आमृत्योरिति । देहिनां वैरानुबन्ध इहलोके आमृत्योः समीचीनमृत्योः कारणं भवति । परलोके नरकलोककारणं भवति । वैरानुबन्धकारणं तत्कारणं चाह ॥ अज्ञानेति । अहं मन्यूपबृंहितो मन्युः कोपो वैरानुबन्धे कारणम् । मन्युरज्ञानप्रभवो अज्ञानात्प्रभावो यस्य सोऽज्ञानप्रभव इत्युवाचेति पूर्वेणान्वय इति । एतेन यतो नावर्तते पुमानित्याद्यसङ्गतमिति दूषणं पराकृतम् । अवस्थामित्यादि शेषपूरणेन यत इत्यस्य यामित्यर्थ-कत्वाङ्गीकारेण गृहीतत्वात् । विष्णोरप्यज्ञाननिमित्तककोपादस्माद्वैरानुबन्धो जातस्तेन मरणं जातं तेन नरकोऽपि भविष्यतीति तात्पर्यार्थ इत्यङ्गीकारात् । एतेनैव वैरानुबन्धो मृत्योः कारणमित्यनेनैव पूर्णत्वादाङ्वैयर्थमिति चोद्यमपास्तम् । अपमानादिरूपौपचारिकमरणव्यावृत्त्यर्थं मरणस्य मुख्यत्वरूप-समीचीनत्वलाभार्थमाङो ग्रहणमित्यभ्युपगमात् । एतेनैवेह लोके नरककारणमित्यर्थस्योक्तत्वात् ॥१३॥

प्रतिश्रुतमप्रदातुर्निष्ठान्तं लोकावस्थितिपर्यन्तम् । कल्पपर्यन्तमिति यावत् । नरकं मन्ये । प्रतिश्रुतमप्रदातुर्नरकश्चेन्मम किमित्यत आह ॥ प्रतिश्रुतस्येति । हि यस्माद्यो भवान् प्रतिश्रुतस्य वाञ्छितं प्रतिगृह्यन्तामिति प्रतिश्रुतं प्रतिपादयितुं दातुमनीशोऽसमर्थोऽतस्तस्य तवापि नरकं मन्य इति ॥ ३८ ॥

एवं नष्टानृत इत्युक्तं विवृणोति ॥ परागिति । सर्वधनादिकमुद्दिश्य सत् ॐमित्यक्षरं तत् पराग्वा प्रतिकूलमेव । कथं प्रतिकूलमित्यत आह ॥ रिक्तमिति । रिक्तकारणम् । अत एवापूर्णपुष्टिकारणम् । शुष्कताकारणमिति यावत् । तत्तस्माद्योऽयं किञ्च यत्किञ्चिदुद्देश्यमिति ब्रूयात् । स पुमान्न सरिष्यते-त्येतद्वै प्रसिद्धम् । सर्वमुद्दिश्योमित्युक्तौ बाधकान्तरमाह ॥ भिक्षव इति । भिक्षवे याचमानाय सर्वमोङ्कुर्वन्सर्वं दास्यामीत्युक्त्वा सर्वं ददन् । आत्मने । आत्मनः सम्बन्धिभ्य इति शेषः । सम्बन्धिभ्यः स्त्रीपुत्रादिभ्यः कामान् कामितभोजनादीन् । दातुमिति शेषः । दातुमलं समर्थो न स्यात् । अथ तस्मात्काद्यत्किञ्चिदुद्दिश्य यन्नेत्यनृतं वचस्तदेतत्पूर्णमभ्यात्मम् । विभक्त्यर्थेऽव्ययीभावः । आत्मनः । चशब्दः स्वकीयसमुच्चये । स्वकीयानां च पूरणं पुष्टिकारणम् । सर्वमुद्दिश्य नेत्युक्ते बाधकमाह ॥ सर्वमिति । योऽर्थिनं प्रति सर्वमुद्दिश्य नेति ब्रूयात् । स पुरुषो दुष्कीर्तिः पापकीर्तिर्भवति । अत एव श्वसन् जीवन्मृतो भवतीति । स्वस्य स्वकीयानां च जीवनार्थं किञ्चिद्द्रव्यादिकं स्थापयित्वाऽवशिष्टं ब्राह्मणेभ्यो देयं न तु सर्वस्वमिति भावः ॥ ४१-४२ ॥

इति श्रीभागवतटिप्पण्यामष्टादशोऽध्यायः॥ १८ ॥

अथ एकोनविंशोऽध्यायः

यो दानादिः कर्हिचित्कदाऽप्यर्थं कामं यशो वृत्तिं च न बाधेत सोऽयं दानादिधर्म इति भगवता यत्प्रोक्तं तत्सत्यम् । परंत्वर्थादिकामनाविशिष्टानां गृहमेधिनामेवायं धर्मो न तु भगवत्प्रीतिकामनाविशिष्टानाम् । सोऽहं भगवत्प्रीतिमात्रकामनाविशिष्टोऽहं वित्तलोभेन द्विजं कथं प्रत्याचक्ष इति कथनमनुपपन्नमिति दूषणस्यानवकाशः । सत्यमित्यर्थाङ्गीकारस्योक्तत्वात् ।। २-३ ।।

लोकानित्यस्य देहानित्यर्थः ।। ८ ।।

समस्तरेफानित्यस्य समस्तवर्णानित्यर्थः । रेफशब्दो वर्णोपलक्षकत्वात् । अनेन भगवत्कलस्य व्याप्तसर्ववर्णाश्रयत्वरूपं माहात्म्यमुक्तं भवति । समस्तवर्णानित्युक्ते समस्तवर्णानां कण्ठे एकदेशतोऽवस्थानं प्रतीयेत । साकल्येन कण्ठे वर्णा वर्तन्त इति ज्ञापनार्थं रेफानिति लाक्षणिकशब्दप्रयोगः ।। २५ ।।

द्वितीयं पदं क्रमता त्रिविक्रमस्य त्रिविष्टपमण्वल्पं जातम् । तृतीयस्य पदस्य तदीयं बलिसम्बन्धि एवात्यल्पमपि स्थलं नास्तीति जातमित्यर्थः।। ३४ ।।

इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः।। १९ ।।

अथ विंशोऽध्यायः

न वाऽयं बन्धुरित्यस्य ब्रह्मबन्धुर्वै ब्राह्मणाभासोऽपि नेत्यर्थः । एतेन न वाऽयं ब्रह्मेत्यनेन पूर्णत्वाद्बन्धुशब्दो व्यर्थ इति दूषणमलग्नकं वेदितव्यम् । न वाऽयं ब्रह्मेत्युक्ते ब्रह्मणाभासत्वनिषेधो न स्यात् । अतो वै शब्दस्याप्यर्थत्वाङ्गीकारेण ब्राह्मणाभासत्वस्यापि निषेधार्थं बन्धुशब्दप्रयोग इत्यभ्युपगमात् ।। ११ ।।

एतेनार्थवत्त्वायेति वक्तव्येऽर्थत्वायेत्यनुपपन्नमिति दूषणं परिहृतम् । अर्थशब्दस्य मत्वर्थीयार्शाद्यजन्तत्वमङ्गीकृत्यार्थत्वायेयत्यस्यार्थवत्त्वायेत्यर्थ इत्युक्तत्वात् ।। २५ ।।

इति श्रीभागवतटिप्पण्यां विंशोऽध्यायः ।। ८-२० ।।

अथ कविंशोऽध्यायः

हे उत्तमश्लोक सुरर्षभ भवान् यद्यपि ममेरितं वचो वाञ्छितं दास्यामीति वचनम् । वाञ्चितपदत्रयभुवो दानात् । व्यलीकं मन्यते । तथाऽपि तवोदितं दास्यामीति मदीयं वचनं विप्रलम्भनं विप्रलम्भकं न भवेत् भवति । कथं तर्हि प्रतिज्ञा कृतेत्यत आह ।। करोमीति । यथा ऋतमवगतं तथा प्रतिज्ञां करोमि । अनेन वञ्चनार्थं वाञ्छितं दास्यामीत्यसत्यं नोक्तं किन्तु वाञ्छितपदत्रयपरिमिता भूमिर्दातुम् । न शक्यत इति भ्रान्त्या वाच्छितं दास्यामीत्यसत्यमित्युक्तं भवति । तर्हि तृतीयस्य पदस्य सर्वथाऽवकाशो नास्तीत्याशङ्कां परिहरति ।। पदमिति । निजं तृतीयं पदं मे शीर्ष्णि कुरु स्थापयेति । एतेन शिरोदानेऽत्र

वाञ्छितपदेन यां भूमिं दास्यामीति वाक्यं सत्यं भवति । अतो मम वचनमृतं सत्यं करोमीति वचनमनुपपन्नमिति चोद्यं परिहृतम् । ऋतं करोमीत्यस्य सत्यं करोमीत्यर्थस्यानङ्गीकारात् ॥ २ ॥

पुंसामर्हत्तमार्पितं महत्तमकृतं दण्डं श्लाघ्यतममतिशयेन श्लाघ्यं मन्ये । ननु मात्रा कृतस्यापि दण्डस्य श्लाघ्यतमत्वादर्हत्तमार्पितदण्डं श्लाघ्यतमं मन्य इति विशिष्योक्तिः कथमित्यत आह ॥ यदिति । यद्यस्मान्माता पिता भ्राता सुहृदश्च दण्डं नादिशन्ति न कुर्वन्तीत्येताद्धि प्रसिद्धम् । तस्मादर्हत्तमार्पितं दण्डं श्लाघ्यतमं मन्य इति । विशिष्योक्तिरूपपन्नेति शेषः इति । एतेन यन्न मातेत्येतदसङ्गतमिति दूषणं निरस्तम् ॥ ४ ॥

असुराणां नोऽस्माकं त्वं पारोक्ष्यं यया भवति तथा परमो गुरुः परमहितकेत्येतन्नूनं निश्चितमित्यर्थः । एतेन पारोक्ष्यमित्येतदनन्वितमिति दूषणं परिहृतम् । पारोक्ष्यमित्येतद्बुध्या विवेकेन गुरुशब्दार्थांतर्गतक्रियाविशेषणमित्यभ्युपगमात् । यथा श्रिया स्तब्धमतिर्जन इदं जीवितं कृतान्तिकवर्ति यमसमीपवर्तीति न बुध्यते तया श्रिया स्तब्दमतिरप्यहं दैवेन त्वया प्रसभं त्याजितश्रीः सन् अथ प्रह्लादानन्तरमात्मरिपोस्तवान्तिकं नीत इत्येतद्ध्रुवं निश्चितमिति । एतेन यथेत्येतदनन्वितमिति दूषणं परास्तम् । तयेति शेषपूरणेन स्तब्धमतिरित्यस्यावृत्तिमभ्युपगमेन चान्वयस्योक्तत्वात् ॥ ११ ॥

हे ईश ते त्वया कृतम् । उपलक्षणमेतत् । पालितं संहृतं च । इदं त्रिजगदात्मनः स्वस्य क्रीडार्थं क्रीडाविषयः । जगत्सर्जनादिकमनायासेन कृतमिति यावत् । अपरे प्राणिनामन्ये केचन तत्र जगत्प्रविष्टभूम्यादिविषये स्वाम्यं केचन तत्र जगत्प्रविष्ट भूम्यादिविषये स्वाम्यं स्वामित्वं कुर्युर्जानीयुः । तत्र हेतुः ॥ कुधिय इति । नन्वस्त्वीश्वरस्य महास्वामीत्वं ममास्तीत्यादिवत्तेषामपि भूम्यादिस्वामित्वं किं न स्यादित्यत आह ॥ कर्तुरिति । अस्य जगतः कर्तुः पालनकर्तुः प्रभोः स्वतः समस्तस्य ते प्राणिनः किमावहन्ति किं कुर्वन्ति । न किमपि तेषां भूम्यादिपालनव्यापारः सर्वथा नास्ति चेत् । कथं ते वयं भूम्यादिपालनकर्तार इति वदन्तीत्यत आह ॥ त्वदिति । त्वदवरोपितस्त्वदुत्पादितः । वयं भूम्यादिपालनकर्तार इति वदन्तीत्यत आह ॥ त्यक्तेतीति ॥ १९ ॥

अत्राशठधीः पुरुषो दुर्वाङ्कुरैः सहितं सलिलमपि प्रदाय यत्पादयोः सतीं सपर्यां विधायोत्तमामपि गतिं भजते तस्मा असौ बलिर्न विक्लवमनाः सन् त्रिलोकीं दत्वाऽऽर्त्तिं कथमृच्छेत्प्राप्नुयादिति । एतेन यत्पादयोरिति षष्ठ्यनुपपन्ना । संप्रदाने चतुर्थ्याविहितत्वादिति दूषणं निरस्तम् । यत्पादयोरित्यस्य प्रदायेत्यनेनान्वयस्यानभ्युपगमात् । एतेनैव सलिलस्येव दुर्वाङ्कुराणामपि देयत्वात्सलिलं प्रदायेति सलिलमात्रस्य देयत्वाभिधानमनुपपन्नमिति चोद्यं निरस्तम् । दुर्वाङ्कुरैः सहितं सलिलं प्रदायेत्यन्वयमभ्युपेत्य दुर्वाङ्कुराणामपि देयत्वस्योक्तत्वात् । एतेनैवाविक्लवमना इति वक्तव्यम् । न विक्लवमना इत्यनुपपन्नमिति दूषणं परिहृतम् । न समास इत्यभ्युपगमात् ॥ २३ ॥

मदनुभावं दृष्ट्वा स्थितस्य ते दानवदैत्यानां संगात्पूर्वं प्राप्ते आसुरभावः सद्यः कुण्ठः छेदो यस्य सद्यः छिन्नो जात इत्येतद्धै प्रसिद्धम् । तत्र सुतले विनङ्क्ष्यति विशेषेण नङ्क्ष्यति निर्मूलो भविष्यताति । एतेन भगवदनुभावदर्शनानन्तरमेवासुरभावो नष्ट इति मदनुभावं दृष्ट्वा सद्यः कुण्ठ इत्यनेन वक्ष्यमाणत्वात् । तत्र सुतले दानवदैत्यानां सङ्गात्तेऽसुरभावो भविष्यतीति वचनमयुक्तमिति चोद्यं परिहृतम् । पूर्वमित्यस्य शेषेण मदनुभावदर्शनात्पूर्वं प्राप्त आसुरभावः सद्यः छिन्नो जात इत्यर्थस्योक्तत्वात् । एतेनैव विनङ्क्ष्यतीति क्रियां प्रत्यासुरभावस्य कर्तृत्वात् । बलेः कर्तृत्वाभावेन समानकर्तृत्वाभावात् । मदनुभावं दृष्ट्वेति क्त्वाप्रत्ययोऽनुपपन्न इति चोद्यं परिहृतम् । मदनुभावं दृष्ट्वेत्यतः परं स्थितस्येति शेषपूरणेन समानकर्तृत्वस्योक्तत्वात् । एतेनैव सद्यः कुण्ठो विनङ्क्ष्यतीत्येतद्व्याहतमिति दूषणं निराकृतम् । सद्यः कुण्ठ इत्यनेन नाशमात्रमुच्यते । विनङ्क्ष्यतीत्यनेन निर्मूलनाश उच्यते । इत्यभ्युपगमात् ।। ३६ ।।

इति श्रीभागवतटिप्पण्यामेकविंशोऽध्यायः ।। ८-२१ ।।

(श्री सत्यधमीयपाठे विंशोऽध्यायः समाप्तः)

अथ द्वाविंशोऽध्यायः

समुद्यतः समुत्कृष्टः प्रपन्नभक्तार्थविधौ समाहितः सनद्धो यत्तु यः प्रसादो लोकपालैकपाले-

ष्वमरैरमरेष्वस्यानेन भगवता कृतः सदनुग्रहः स चासावनुग्रहश्च तदनुग्रहः । अलब्धश्च पूर्वोपसदे लब्धपूर्वो न 'भवत्यलब्धपूर्वोपसदो यस्य तस्मिन्नलब्धपूर्वोपसदेऽसुरे मयि भगवताऽर्पितः कृत इत्येतदहो आश्चर्यमिति ।। २२ ।।

यस्य यः कविः सर्वज्ञः सोऽपि पुरुषस्य पूर्णषाड्गुण्यस्योरुविक्रमवत उत्कृष्टपादविक्षेपवतो मुरारेर्महिम्नः पारमुपैति विनैव जानाति जातो मर्त्यो मुरारेर्महिम्नः पारं नैवोपागात् । जायमानो मर्त्यो मुरारेर्महिम्नः पारं नैवोपैति । उतशब्दोऽनुक्तसमुच्चयार्थः । जनिष्यमाणश्च मर्त्यो मुरारेर्महिम्नः पारं नैवोपैष्यतीति किमुवक्तव्यम् । ननु सर्वज्ञोऽपि मुरारेर्महिम्नः पारं न जानाति चेत् सार्वज्ञ्यभङ्ग इत्यत आह ।। यः पार्थिवानीति । कविः सर्वज्ञः सोऽपि पार्थिवानि रजांसि किं विममे नैव गणितवान् । अनेन विद्यमानज्ञानाभावः सार्वज्ञ्यविरोधी न त्वविद्यमानज्ञानाभावः । तथा च यथा पार्थिवरजसां परिच्छेदा-भावेन तत्परिच्छेदज्ञानाभावो न सार्वज्ञ्यविरोधी तथा ततोऽप्यपरिच्छिन्नस्य मुरारेर्महिम्नः परिच्छेदस्य ज्ञानाभावो न सार्वज्ञ्यविरोधीत्युक्तं भवति । उक्तार्थे प्रमाणमाह ।। इत्याहेति ।। मन्त्रदृक् । ''विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । न ते विष्णो जायमानो न जातो देवमहिम्नः परमं तमापे''ति मन्त्रद्वयदृक् ऋषिरिति पूर्वोक्तमर्थमाहेति । एतेन कविः सर्वज्ञोऽपि मुरारेर्महिम्नः पारं न

जानातीत्युक्त्यैव मर्त्यो मुरारेर्महिम्नः पारं न जानातीत्यर्थस्य लाभात् । मर्त्यो मुरारेर्महिम्नः पारं न जानातीत्युक्तमित्यभ्युपगमात् । एतेनैव यस्येत्येतदनन्वितमिति दूषणं निरस्तम् । यस्येति षष्ठी प्रथमादेश इत्यङ्गीकृत्यान्वयस्योक्तत्वात् ॥ २९ ॥

इति श्रीभागवतटिप्पण्यां द्वाविंशोऽध्यायः ॥ ८-२२ ॥ (श्री सत्यधमीयपाठे एकविंशोध्यायः समाप्तः)

अथ त्रयोविंशोऽध्यायः

ईश्वरो यो विष्णुः । अकयप्रविसम्भूमसखाहाविष्णुवाचका इति वचनात् । उच्चावचेषु भूतेषु चरन्वायुरिवोच्चावचत्वं न भजते । कुत इत्यत आह ॥ गुणैरिति । नित्याभिव्यक्तज्ञानादिगुणैर्निमित्तैः । अन्यत्राविद्यमानं नित्याभिव्यक्तज्ञानादिगुणत्वं विष्णोः कुत इत्यत आह ॥ निर्गुणत्वादिति । निर्गुणत्वात्सत्त्वादिगुणरहितत्वादित्येतद्धि प्रमाणप्रसिद्धमिति । एतेन धियो गुणैरित्येतद्व्यर्थमिति दूषणं निरस्तम् निर्गुणत्वाद्धियो गुणैरित्यत्र निर्गुणत्वाद्धियः गुणैरिति पदचतुष्टयमङ्गीकृत्वाऽर्थस्योक्तत्वात् ॥ ६ ॥

इति श्रीभागवतटिप्पण्यां त्रयोविंशोऽध्यायः ॥ ८-२३ ॥
(श्री सत्यधमीयपाठे द्वाविंशोऽध्यायः समाप्तः)

॥ इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाऽभिनव ताण्डवाभिनव-गदाऽभिनवामृतादिबहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीपादानां शिष्येण सत्याभिनव-यतिना त्वया भागवतटिप्पणीं कारयिष्यामीति तदीयामोघसङ्कल्पमात्रमवलम्ब्य कृतायां श्रीमद्भागवत-टिप्पण्यां दुर्घटभावदीपिकायामष्टमः स्कन्धः समाप्तः ॥ ८ ॥

श्रीपांघरी श्रीनिवासाचार्यकृत

विरोधोद्धारः

अथ प्रथमोऽध्यायः

कृतवानिति । अत्र कृतवानित्यादित्रयाणां पदानां सङ्गत्यर्थकवर्तमानकालपदवाचकपदाभावादूनता स्यादित्यतोऽर्थ उच्यते । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोऽथेत्यभिधानात् । लक्षणयाऽतीतानन्तरिकाद्यतनकालोऽथशब्देन ग्राह्यः । न चेतनमध्ये भाव्यमिति शङ्क्यम् । लाक्षणिकार्थस्य वाचनिकार्थापेक्षयाऽमुख्यतयाऽन्ते निवेशनस्यैव युक्तत्वात् । केचित् । अनागतेऽद्य वेति पाठं कल्पयन्ति । तथात्वे लक्षणाभावेनास्य शङ्कितदोषस्यानपगमो हि । अपरे । अद्यातीत इति पठन्ति । तत्राप्युक्तदोषानिस्तारः । तस्मादुक्तरीत्या बाधाभावः । अतो ॥ अतीते । पूर्वकाले कृतवान् ॥ अथ अद्य ॥ कुरुते । स्वेच्छया करोति ॥ अनागते । भविष्यत्काले ॥ कर्ता । करिष्यतीत्यन्वेतव्यम् ॥ ३ ॥

अथाग्र इति । अत्र कर्माणीत्यत्र यतिभङ्गो न शङ्क्यः । तस्य काव्ये दोषावहत्वेऽपि शास्त्रे तदभावात् । भागवतस्य च । शुद्धं भागवतं शास्त्रं पुराणं भागवतं चेति । सम्भिन्नः शास्त्रपुङ्गव इति चोक्तेः । शास्त्रत्वात् । इत्थमेव प्रमेयदीपिकायां टीकाकृत्पादैः साधितत्वाच्च । तस्मान्न बाधः ॥ १४ ॥

चतुर्थ इति । अत्र केचित् । तापस इत्यत्र तामस इति पठन्ति । तदसाधु । हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः गजेन्द्रं मोचयामास ससर्ज च जगत्प्रभुरिति । द्वितीयस्कन्धतात्पर्यस्थवाक्ये तापसशब्दस्य निरुक्त्या तद्विरोधेन प्रक्षिप्तत्वनिश्चयात् । न च प्रियव्रतसुतत्वोक्तिविरोधः । तस्मादेव तपसि माघमासे आलोचनकाले वा जात इत्यङ्गीकारे तदभावात् । प्रमाणवाक्येऽपि मकारस्य सुग्रहत्वेन भवदभिमतसिद्धिरिति चेन्न । आलोचनस्यैव भगवद्व्यक्तिहेतुत्वात् । न तु तिमिरस्याज्ञानस्य वा तृतीयगुणस्य वा । प्रत्युत तदभावाजनकत्वात् । ग्रन्थान्तरे पकारस्यैव दृश्यमानत्वाच्च । तथा पूर्वार्धान्ते स्थितमुत्तरार्धं परित्यज्य वृषाख्यातिरित्यादिसार्धश्लोकद्वयान्ते तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधस इत्यर्थं प्रक्षिप्य तदन्तेऽत्रत्यं हरिरित्याहुत इत्यादिमुत्तरार्धं योजयन्ति । तदयुक्तम् । तत्रापीत्यस्याभावात् । कुत्रापि संवादाभावाच्च । ननु प्रतिमन्वन्तरं षट्कमुच्यते । तत्र मनोरवतारस्य चैकत्वेन तदनुपपत्तिरिति चेन्न । आद्यमन्वन्तरे इन्द्रावतारयोरेकत्ववदत्राप्युपपत्तेः । किं च तत्रापीत्यर्धान्ते हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहादित्यर्धाङ्गीकारे मन्वन्तरेऽपि हरिमेधसो ऋषेः सकाशाद्धरिणीनाम्न्यां भगवान्हरिरिति नाम्ना जज्ञे इति योजनायामपि आहुत इत्यसङ्गतं स्यात् । न च यच्छब्दान्वये तदन्वेति । येनेत्यनेन सामानाधिकरण्याभावात् । मोचित इत्यनेनापि विषयभेदात् । नापि येन गजेन्द्रेणाहुतः स गजेन्द्रो ग्रहान्मोचित इति युक्तम् । गजेन्द्रस्य यत्तच्छब्दोक्तौ विशेषकारणाभावेन निरर्थकत्वात् ।

यच्छब्दबललब्धतच्छब्दान्वयेऽपि स भगवान्हरिरित्याहुतः सन् जज्ञेत्यन्वयाङ्गीकारे आहुत मोचित शब्दस्थक्तप्रत्ययस्य भूतार्थकत्वेनाह्वानं मोचनानन्तरं प्रादुर्भावरूपजन्मायोगात् । आहुत इत्यस्य तृतीयासापेक्षत्वेऽपि तदभावाच्च । न च येनेत्यत्र योज्यम् । उक्तोत्तरत्वात् । मोचित इत्यत्रापि भगवद्वाचकतृतीयाध्याहारेण गौरवापाताच्च । किञ्च हरिरित्याहुत इत्यपि न युज्यते । आव्हानं हि सम्बोधनापेक्षम् । न तु प्रथमापेक्षम् । अपि चाहुत इत्यस्यावाहनार्थकताऽपि न घटते । तदर्थकस्य व्हयतेःक्त प्रत्यये आदौ दीर्घतानियमात् । आव्हत इव मे शीघ्रमिति प्रयोगदर्शनात् । तस्मादस्यायमर्थः। उत्तमस्य तृतीयमनोः भ्राता चतुर्थो मनुः तापस इति नाम्ना च आहुतः अह्वानविषयीकृतः प्रख्यात इति यावत् । आसीदिति शेषः । नन्वस्यैव द्वितीयनामप्रवृत्तौ किं निमित्तमित्याशङ्क्य तन्नामप्रवृत्तिहेतुभूतं कृत्यमाह ॥ येनेति । येन हरिनामवता मनुना । ग्राहात् नक्ररूपात्सङ्कटात् । गजेन्द्रो मोचितः । अनेन हरति गजेन्द्रसङ्कटमिति विग्रहश्च सूचितो ज्ञेयः । न च हुकारे दैर्घ्याभावदोषः । ह्वयतेरनङ्गीकारात् । किंतु जुहोतेरभ्युपगमात् । न च वाच्यं सोऽत्रानुपयुक्त इति । आङुपसर्गेणाकारणार्थकत्वात् उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इत्युक्तेः । तर्ह्यतिप्रसङ्गः स्यादिति चेन्न । प्रसिद्धिबलादन्यत्रानुक्तधात्वर्थ इत्यर्थाङ्गीकारात् । अत्राप्येतस्य कुत्र प्रसिद्धिरिति चेत् । दक्षिणाग्नौ जुहावहीति अनुपसर्गस्य होमार्थकत्वेऽपि द्वैपायनो विरहकातर आजुहावेति आङुपसृष्टस्य तस्यैवाव्हानार्थे प्रसिद्धिदर्शनात् । तस्माद्युक्तमुक्तमिति सद्भिः सन्तोष्टव्यम् ॥ २७ ॥

तत्कथेति । यत्र यत्र गजेन्द्रमोक्षाद्युपाख्यानेषु तत्कथासु तदाद्युपाख्यानेषु कथाशब्देन ग्रन्थग्रहणे कथनप्रशंसाभावेन ग्रन्थप्रशंसयाऽत्रानुपयोगो ज्ञेयः ॥ ३२ ॥

इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ ८-१ ॥

अथ द्वितीयोऽध्यायः

सरित्सरोभिरिति । अत्र मोदसौरभयोरैक्यार्थात्पुनरुक्तिरित्यतोऽर्थ उच्यते । पुलिनैः वालुकाश्रितप्रदेशैः । मणिमयाः रत्नप्रचुराः । वालुका येषु तैः देवस्त्रीणाम् । मज्जनेन स्नानेन । आमोदः सुगन्धः । येषां ते । सुराणां पुरुषदेवानामयं सौरः सुरमज्जनामोदस्तेन । भाक्ताः भागयुक्ताः । मिश्रिता इति यावत् । ते च ते । अनिलाः वायवः । तैर्युतः । यद्वा । देवानां स्त्रीणां च मज्जनेन क्रमात् । आमोदसौरभौ । आ अत्यन्तं मोद आनन्दो यस्मात्स आमोदः । सौरवत् देवमज्जनामोदवद्भातीति सौरभः । इति भिन्नाख्यसुगन्धौ । ताभ्यां भाक्तानिलैः । अथवा । देवस्त्रिभिर्मज्यते यस्मिंस्तद्देवस्त्रीमज्जनं तन्नामकं यदुदकं तत्सम्बन्धी यः सौरभः सुगन्धः तेन भाक्ता इति । किंवा । देवस्त्रीमज्जनेनामोदो गन्धो यस्य स चासौ सौरः । सुराशब्दस्योदकनामसु पाठात् । अम्बुकणगणः तं भजतीति देवस्त्रीमज्जनामोदसौरभाक् तद्भावस्तत्ता तया युक्ता येऽनिलास्तैरिति ॥ ८ ॥

इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ २-२ ॥

अथ तृतीयोऽध्यायः

एवमिति । अत्र मनोहृदीत्यनयोरेकार्थत्वात्सङ्गत्यनुपपत्तिरित्यतोऽर्थान्तरम् । हृत्स्नेहे च मनःस्निग्धे सुहृद्बन्धौ हरावपीति कोशात् । हृदि हरौ । बुध्या मनः समाधाय । यद्वा । अहृदीति पदम् । अस्य विष्णोः । हृदि स्नेहविषये । भक्त्यर्थमिति यावत् । माहात्म्यज्ञानपूर्वस्तु स्नेहो भक्तिरितीर्यत इत्युक्तेः । अथवा । मनः । सप्तसु प्रथमेति सूत्रात् । मनसि रुद्रे । इत्यर्थः । सर्वात्मनोऽन्तःकरणा गिरित्र इत्युक्तेः। अभिमान्यभिमन्यमानयोरैक्यव्यपदेशाच्च । तत्र बुध्या सम्बुध्या बुध्यभिमानिन्या वाण्या सहास्त इति बुध्यासो ब्रह्म तम् । आधाय हृदि चित्ताधिष्ठातरि ब्रह्मणि परमं विष्णुं आधाय जाप्यं जजापेत्यन्वयः । अत एव ब्रह्मादयो विविधलिङ्गाभिदाभिमाना नैतोयदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामखरो हरिराविरासीदिति वक्ष्यति । तस्मान्नार्थैक्यनिमित्तजाऽसङ्गतिः ॥ १ ॥

नम इति । अत्र चतुर्थीनां नमः शब्देनान्वये दीमहीत्यस्यानन्वयः । अत उच्यते । यतः भगवतः सकाशात् । एतच्चिदात्मकां एतद्दृश्यं जडं चित् चेतनम् । तदुभयात्मकं विश्वम् । जायत इति शेषः । तस्मै भगवते नमः । धीमहि कुर्महे । धातूनामनेकार्थत्वादिति वैलक्षण्यद्योतनायैव छान्दसः प्रयोगः । यद्वा । ननु नमसः करयोजनं दण्डवत्पात उर आद्यष्टाङ्गैर्भूस्पर्शनं एवमादिसाधनत्वे प्रकृते एकस्यैवाप्यसिद्धौ कथं नमो युज्यत इत्यत आह ॥ यत इति । यतः तसेः सार्वविभक्तिकत्वात् । यस्य भगवतः । चिदात्मकं सर्वचेतनस्वामिकम् । स्वरूपम् । यद्धीमहि ध्यायामः । एतदेव ध्यानमेव । तस्मै भगवते नमो ज्ञेयम् । अतो नानन्वयः । अत्र केचित् । पुरुषायाभिधीमहीति पठन्ति । तच्चिन्त्यम् । टीकाकल्पैर्विजयंध्वजतीर्थैर्हि शब्दस्य व्याख्यातत्वात् । अथवा । हे आय अतिशयित ज्ञान । येति ज्ञानं समुद्दिष्टमिति भागवततात्पर्योक्तेः । हे पुरुष पुरुषत्वधर्मवान् । परेशा ब्रह्मादिस्वामिनी रमा । यतो यतः कारणात् । आदिबीजाय । इदं शब्दस्य इमित्यादेश इति ऋग्भाष्ये इन्द्रशब्दनिरुक्तौ टीकाकृत्पादैर्व्याख्यत्वात् । विश्वव्यक्त्या इत्यर्थः । स्वकामव्यञ्जकाय वा । इ विचित्रे स्मरे पुमानिति हि यादवः । तस्मै तुभ्यं भगवते नमो विधायेति शेषः । आयात् उपागमत् । अत एतच्चिदात्मकं उदरस्थस्थावरजङ्गमं त्वां वयं धीमहि । बहुवचनेन करेण्वादयोऽपि ध्याने सहाया आसन्निति गम्यते ॥ २ ॥

एवमिति । अत्राविरासीदित्युक्तम् । उत्तरश्लोकेत्वागमदित्युक्तम् । आविर्भावो नाम हि एकत्र स्थितस्य तिरोहितस्य दर्शनयोग्यत्वम् । गमनं नाम स्थलान्तरप्राप्तिः । अत उक्तिद्वयेन विरोधोऽतोऽर्थ उच्यते । अविविधलिङ्गाभिदाभिमानाः । अस्य विष्णोः । विविधलिङ्गानि नानारूपाणि । तेषाम् । भिदाः विशेषाः । तेषु । अभितः सर्वतः । मानः आदरो । येषां ते ब्रह्मादयः । एवं उक्तप्रकारेण वर्णितः । निर्विशेषः न विशेषः आधिक्यं यस्मात्कुत्रापि स निर्विशेषो विष्णुः । येन तं गजेन्द्रं प्रति एता आगता ना मन्वन्तरनियन्ता तापसाख्यः परमः पुरुषः । इयदित्यव्ययम् । एतावत्ज्ञानेनेत्यर्थः । अ

उपससृपुः नाजग्मुः । ''अमानोनाः प्रतिषेध'' इत्युक्त्या अन्त्यानामिवाद्यस्याप्यर्थे पदपार्थक्ये च साम्यात् । तत्र तस्मिन्मन्वन्तरे । यो हरिः तापसाख्यो भगवान् । उभयनाम्नोरेकार्थत्वात् । हरति दुःकमिति हि हरिः । तापं दुःखं स्यति नाशयतीति तापसश्च । षोन्तकर्मणीति धातोः । आविरासीत् प्रादुर्भूतः स एव तत्रागमदित्युत्तरेणान्वयः । यद्वा । हरिरिति हरिशब्दवाच्य आविरासीत् । अथवा । यदा यस्मिन्मन्वन्तरे । निखिलात्मकत्वात् सर्वमन्वन्तर स्वामित्वात् । नानरि मन्वन्तरप्रणेतरि । भगवति तापसाख्ये । सर्वार्थाप्रथमायस्मात्सप्तम्यर्थाततोमतेति भाष्योक्त्या सप्तम्यर्थकत्वात्प्रथमायाः । अखिलामरेभ्यः सर्वदेवेभ्यो वरः श्रेष्ठो हरिरिति शब्द आविरासीत् । तत्र तस्मिन्मन्वन्तरेऽपि उक्तगुणा ब्रह्मादयो गजेन्द्रं प्रति गजेन्द्रमुद्दिश्येत्यर्थः । एते आगमने विषये । इण् गताविति धातोः । एवमुक्तरीत्या निर्विशेषं सर्वोत्तमं भगवन्तम् । यदा यस्मिन्काले । उपससृपुः उपसर्प्य प्रार्थयामासुः । अत एव दिविजैः सह संस्तुवद्भिरिति वक्ष्यति । तदा गजेन्द्रसमीपमगमदिति । अत आविर्भावागमनयोर्न विरोधः ॥ २८ ॥

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ८-३ ॥

इति श्रीभागवते पाङ्करीश्रीनिवासाचार्यकृते विरोधोद्धारेऽष्टमः स्कन्धः समाप्तः ॥ ८ ॥

महर्षि श्री वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित भागवततात्पर्यनिर्णयेन
श्री सत्यधर्मतीर्थविरचित भागवतविवृत्या
श्री छलारी शेषाचार्यविरचित मन्दबोधिन्या
श्री लिङ्गेरी श्रीनिवासाचार्य विरचित पदमुक्तावल्या सहितम्

षष्ठं सम्पुटम्

अष्टमस्कन्धः

Edited by
Mahāmahopādhyāya
Prof. K.T. Pandurangi
Formerly Prof. of Sanskrit, Bangalore University
Hon. Director of Dvaita Vedanta Studies and Research Foundation, B'lore.

Associate Editor
Vidwan Krishnacharya Upadhyaya, M.A.
Research Scholar at Dvaita Vedanta Studies and Research Foundation, Bangalore

This volume is published with the grant from the Govt. of Karnataka for the Research Project undertaken by Dvaita Vedanta Studies and Research Foundation.

2003

Published by
Dvaita Vedanta Studies and Research Foundation
No.11, Uttaradi Matha Compound, Sankarapuram, Bangalore-4.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha, Bhāgavata vivṛti of Śrī Satyadharmatīrtha, the commentaries of Chalāri Śeṣāchārya and Lingeri Srīnivāsāchārya. Edited by Prof. K.T. Pandurangi, Hon. Director of Dvaita Vedānta Studies and Research Foundation, Upakulapati, Poornaprajna Vidyapeetha, Bangalore. and Vidwan Krishnachārya Upādhyāya, Research Scholar at Dvaita Vedanta Foundation. Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Sankarapuram, Bangalore-560 004.

No. of Pages : xxxvi+ 420

No. of Copies : 1000

Price : Rs. 200/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation,
No.11, Uttaradi Matha Compound,
Sankarapuram, Bangalore-560 004.
Phone : 080-662 7272

Printed at :
Raghavendra Enterprises
Bangalore-560 085.

Preface

This is the sixth volume of Śrīmad Bhāgavatam. It contains Eighth Skandha. First five cantos of Eighth skandha that described the Gajendra Mokṣa episode were included in the fifth volume. Hence, the portion starting from sixth canto upto the close of the skandha is included here. In this portion the episode of Samudramathana, Balichakravaty and the incarnation of Vāmana are described.

The commentary of Śrī Satyadharmatīrtha is continued for the eigth skandha. Chalari and Lingeri commentaries are added. Durghata bhāvadīpika and virodhodhāra are continued.

Prof. Pandurangi has edited this volume with the assistance of Vidwan Krishnacharya Upadhyaya. We record our appreciation of the hard work of these two scholars.

We thank Raghavendra Enterprises for neat printing and good getup. We also thank K.M. Sheshagiri for artwork of the cover jacket.

N. Narasimha Rau
Chairman

Śrīmad Bhāgavatam
Introduction
Eigth Skandha

The Eigth skandha begins with the narration of the incarnation of the Supreme God as Yajna. Svāyambhuva Manu undertakes a severe penance. He prays the God with Īśāvāsya hymns. The demons attack him. The Supreme God who was born as his son Yajna saves him.

Continuing the narration of the geneology of Svayambhuva Manu, the Bhāgavata explains that in a Kalpa of Brahmā there will be fourteen Manus. So far the rule of six Manus is over. Svayambhuva is the first among these. Svarochiṣa, Uttama, Tāpasa are the Manus from second to fourth manvantaras respectively. During these manvantaras, the Supreme God took the incarnations of Vibhu, Satyasena, Hari. It is in this incarnation that the God released the great elephant from the clutches of a Shark. When this event was mentioned. Parikṣit desired to know the full details of this event.

Gajendra Mokṣa

As a prelimenary to narrate the event of the release of Gajendra, Śuka describes the great mountain Trikūta and the rich forest arround it.

आसीत् गिरिवरो राजन् त्रिकूट इति विश्रुतः ।
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥ (२-१)
नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः ।
चित्रद्रुमसरोद्यानकलकण्ठविहङ्गमः ॥ (२-७)
तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ।
उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ (२-९)

Once a larga elephant accompanied by a group of young elephants arrived at the lake. As it was very thirsty, rushed into the lake and rolled into the water.

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिः वारणयूथपश्चरन् ।
सरोनिलं पङ्कजरेणुरुषितं जिघ्रन्नदूरान्मदविह्वलेक्षणः
वृतश्च यूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतम् ।

विगाह्य तस्मिन्नमृताम्बुनिर्मल हेमारविन्दोत्पलरेणुवासितम् ।
पपौ निकामं निजपुष्करोद्धतमात्मानमद्भिः स्नपयन् गतक्लमः ॥
(२-२०,२४,२५)

Bhāgavata gives a very impressive picture of the forest and the proud movement of the elephant. When elephant rushed into the lake and played with the water, it was not aware of impending trouble. A shark that was disturbed by the movement of the elephant caught hold of its leg. The elephant used all its force to get freed from it. However, it was not able to push the shark away. The fight between them went on for thousand years.

तं तत्र कश्चिन् नृप दैव चोदितो ग्रहो बलीयान् चरणे रुषा ग्रहीत् ।
यदृच्छैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥
नियुध्यतोरेवमिभेन्द्रनक्रयो र्विकर्षतोरन्तरतो बर्हिर्मिथः ।
समाः सहस्रं व्यगमन् महीपते सप्राणयोश्चित्रममंसतामराः ॥ (२-२७,२९)

The Gajendra lost all hope of getting freed by its own effort or the efforts of any other persons. It appealed to the Supreme God. The Supreme God was profusely prayed bringing out his glory. The elephant recollected the knowledge of its previous birth. Chaturmukha Brahmā and other deities also prayed the God.

एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि
जजाप परमं जप्यं प्राग्जन्मन्यनुशिक्षितम् ।
नमो भगवते तस्मै यत एतच्चिदात्मकम्
पुरुषायादिबीजाय परेशाय हि धीमहि ॥
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयं भुवम् ॥ (३.१.३)

The Supreme God arrived at the lake and cut the shark with his Sudarśana Chakra. The deities and sages showered flowers on the God.

Bhāgavata gives the background of the previous birth of the shark and the elephant. The shark is a gandharva of the name of Hūhū. He was playing in lake assuming the form of a shark. When the sage Devala arrived at the lake for a bath, he dragged him. The sage was upset and cursed him to be permanently a shark. Hūhū gandharva appeald to the sage to pardon him. Then, the sage said

you will be free from the shark's form when a Gajendra arrives at the lake. Accordingly his original form is now restored.

The Gajendra was king Indradyumna of Pandya Country. He was intensly worshipping God Viṣṇu. When he was engaged in worshipping the God the sage Agastya arrived. Indradyumna did not take notice of him. The sage cursed him to be born as elephant as he is arrogant like elephant. Now he is freed because of his devotion to God Viṣṇu in the previous birth.

योऽसौ ग्राहः स वै सद्यः परमैश्वर्यरूपदृक् ।
मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ॥
गजेन्द्रो भगवत्स्पर्शात् विमुक्तोऽज्ञानबन्धनात् ।
स वै पूर्वमभूद्राजा पाण्डयो द्रविडसत्तमः ।
इन्द्रद्युम्न इति ख्यातो विष्णु व्रतपरायणः ॥ (४.३.७)

After narrating the Gajendramokṣa episode Suka continues to inform about fifth manvantara. रैवत is the Manu for this manvantara. The Supreme God takes the incarnation of Vaikuntha in this manvantara. The next manvantara is Chākṣuṣa. The Supreme God takes the incarnation of Ajita during this manvantara. The Samudramathana takes place at this time. Suka narrates the event of Samudra mathana in detail.

Indra insults Dūrvāsa

There was a fierce battle between the deities and the demons. The deities were defeated. There was a reason for it. Indra who ruled at svarga became arrogant as he enjoyed all luxalaries. Once he was riding on his elephant. Sage Dūrvāsa who was returning from Kailaśa after offering his obesience to Śiva gave to Indra a garland of flowers that was given to him by Śiva. Indra carelessly threw it on the ground with disrespect. It was crushed by the foot of his elephant. Dūrvāsa was upset by it. He cursed Indra to loose his kingdom and all luxaries along with his associates. This was responsible for his defeat and the defeat of all other deities at the hands of the demons.

The deities suffered for a long time, then they approached Brahmā to help them.

Brahmā and other deities pray the Supreme God

Brahma took them to Vaikuntha and offered prayers to the Supreme God.

अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ।
मनोग्रयाणं वचसानिरुक्तं नमामहे देववरं वरेण्यम् ।। (५.२६)
नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे ।
निर्गुणाय गुणेशाय सत्त्वस्थाय च साम्प्रतम् ।। (५.५०)

The Supreme God appeared before Brahmā. Brahmā praised him again.

अजाय जन्मस्थितिसंयमाय गुणाय निर्वाणसुखार्णवाय ।
अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ।। (६-८)

The Supreme God instructs to undertake Samudramathana

The Supreme God instructed them to make peace with the demons and undertake samudramathana to obtain the nector to become strong. When some great thing is to be achieved one has to make alliance even with the enemies.

हन्त ब्रह्मन् अहो शम्भो हे देवा मम भाषितम् ।
श्रुणुतावहिताः सर्वे श्रेयो वः स्याद् यथा पुरा ।
यातुधानैश्च दैतेयैः तावत् सन्धिर्विधीयताम् ।
अरयोपि हि सन्धेयाः सति कार्यार्थ गौरवे
अहिमूषकवद् देवाहि अर्थस्य पदवीं गतैः ।
अमृतोत्पादने यत्नः क्रियता मविलम्बितम् । (६.१८-२१)

He instructed them to put all kinds of herbs, creepers and plants in Kṣīrasāgara, make the Mandara mountain the churning rod, Vāsuki the churning rope and to churna the kṣīrasāgara. He assured his support. He also instructed that whatever minor demands the demons make, conceed them. The demons will work hard but you will get the results.

क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणजलौषधीः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा च वासुकिम् ।।
सहायेन मया देवाः निर्मन्थध्वमतन्द्रिताः
क्लेशभाजो भविष्यन्ति दैत्याः यूयं फलग्रहाः ।
यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः ।। (६-२२,२३)

Samudra Mathana

The deities led by Indra approached Balichakravarti. The demons agreed to participate in Samudramathana. The deities and the demons proceeded to bring the Mandara mountain. With great effort they lifted it and started carrying it towards the sea. However, they were not able to hold it. It fell on the ground and crushed many demons and deities. At this stage the Supreme God arrived seated on Garuda, placed Mandar mountain on the shoulders of Garuda who carried it upto the sea.

Then, the deities invited Vāsuki and made him the rope. The God and the deities stood near the mouth of Vāsuki and asked the demons to hold at the tail side. But the demons considered it as an inferior position and insisted that they will hold it on the mouth side. They did not realise that Vāsuki's poisonous breathing will adversely affect them. The deities agreed and changed the side.

They started churning the ocean with all the force. The poison hālāhala arose. It was impossible to bear with it. Therefore, the deities and demons appealed to Mahādeva to save them from this difficulty.

देवदेव महादेव भूतात्मन् भूतभावन ।
त्राहि नः शरणापन्नान् त्रैलोक्यदहनाद् विषाद् ।। (६.२१)

Lord Śiva took pity on them and took the poison on his palm with the consent of Parvati. He sipped it. A dark mark remained on his neck to demonstrate to the people the need of helping the people in difficulties, even if it amounts to taking poison.

एवमामन्त्र्य भगवान् भवानीं विश्वभावनः ।
तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत
ततः करतलीकृत्य व्यापिहालाहलं विषम्
अभयन्महादेवः कृपया भूतभावनः
तस्यापि दर्शयामास स्ववीर्यं गलकल्पषः ।
यच्चकार गले नीलं तच्च साधोः विभूषणम् ।
तप्यन्ते लोकतापेन साधवः प्रायशो जनाः
परमाराधनं तद्धि पुरुषस्याखिलात्मनः ।। (७.४१-४४)

The deities and demons continued to churn the ocean. Kāmadhenu cow arose. She was taken by the sages. Then, Ucchaiśrava horse came out. It was taken by Balichakravarti. Next Airāvata elephant arose. Indra took it. Then eight quarter elephants and Kaustubha gem came out. Kaustubha was taken by Viṣṇu himself. Next Kalpavṛkṣa arose this was kept by the deities for themselves. Then Apsara women came out.

Mahālakṣmi arises

After all these smaller items were churned out Goddess Mahālakshmi emerged. The deities, sages and all others were wonder struck. Indra offered her beautiful seat. The great rivers appeared in the physical form and showered water on her. The Earth offered all kinds of plants and creepers. The sages offered abhisheka. The Gandharvas danced. Saraswati offered garland and Brahmā gave a lotus.

ततश्चाविरभूत् साक्षात् श्रीरमा भगवत् प्रिया ।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामिनी यथा ॥
तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ।
तस्याश्चासनमानिन्ये महेन्द्रो महदद्भुतम् ।
मूर्तिमत्यः सरित् श्रेष्ठाः हेमकुम्भैः जलं शुचि ॥
अभिषेचनिका भूमिराहरत् सकलौषधीः ।
ऋषयः कल्पयाश्चक्रुरभिषेकं यथाविधि ।
भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ।
हारं सरस्वती पद्मजो नागश्च कुण्डले ॥

Honoured by all in this grand way, Goddess Lakṣmi took a garland in her hand and looked around for suitable bridegroom for her. Though she knew very well Viṣṇu alone is suitable for her she pretended to make a search for a spouse. She went round and found that every other has same or other drawback.

i) Some practice great austirities but are not able to conquer their anger. ii) Some have great knowledge but no detachment. iii) Someone is a great person but he is not able to controle his passion. iv) Some one is dependent upon the others. v) Some one practices his dharma but has no compassion. vi) Some one gives plenty of wealth to others but it does not lead to liberation. vii) Some one has the capacity to comfort others but he is not present on all days. Someone has long life but his conduct is very ignoable. From this it is clear that no one is free from the effects of the three guṇas and consequently not free from some or the other draw back.

The commentators identify these persons as i) Dūrvāsa etc sages ii) Brihaspati iii) Brahmā iv) Rudra v) Yama vi) Kubera vii) Moon viii) Asvatthāmā.

All these have the drawbacks pointed out above.

Viṣṇu is above three Guṇas. These are under his control. He alone is absolutely free from all drawbacks. Hence, Goddess Lakshmi chose him as her spouse.

नूनं तपो यस्य न मन्यु निर्जयः ज्ञानं कचित् तच्च न सङ्गवर्जितम् ।
कश्चित् महान् तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥
धर्मः कचित् तस्य नभूतसौहृदम् त्यागः कचित् तच्च न मुक्तिकारणम् ।
वीर्यं नपुंसोस्त्यजवेगनिष्कृतम् नहि द्वितीयो गुणसङ्गवर्जितः ॥
कचिच्चिरायुर्नहि शीलमङ्गलम् कचित्तदप्यस्ति न वेद्यमायुषः ।
यत्रोभयं कुत्र च सोप्यमङ्गलः सुमङ्गलः कश्चन काङ्क्षते हिमाम् ॥
एवं विमृश्याव्यभिचारिसद्गुणं पदं निजैकाश्रयि सद्गुणाश्रयम् ।
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् । (८-१९-२२)

The deities and sages were very happy and recited the hymns. The women sang and danced.

The churning continued. Moon came out. Vāruni liquer came out. Finally Dhanvantari emerged holding the vessel filled with nector.

When Dhanvantari brought the vessel filled with nector the demons forcibly snached it. However, They started fighting among themselves to drink it. The deities became depressed and appealed to God to help them.

तमालोक्यासुराः सर्वे कलशं चामृताहृतम् ।
लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ॥
मिथः कलिरभूत् तेषां तदर्थे तर्ष चेतसाम् ।
अहं पूर्वमहंपूर्वं न त्वं न त्वमितिप्रभो ॥
विषण्णमनसाः देवाः हरिं शरणमाययुः ॥ (८.३४-३७)

God appears as Mohini

To help the deities Viṣṇu took the form of a beautiful woman Mohini. The demons were captivated by her. They asked her to distribute the nector among the deities and the demons. They said after all we are brothers.

एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः ।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥
अहो रूपमहोधाम अहो अस्याः नवं वयः ।
इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः
नूनं त्वं नः स्पर्धमानानामेकवस्तुनि भामिनि ।
ज्ञातीनां बद्धवैराणां शं विधत्स्वसुमध्यमे
वयं काश्यपदायादाः भ्रातरः कृतपौरुषाः
विभजस्व यथान्यायं नैव भेदो यथा भवेत् ।

Mohini asked the deities and the demons to observe fast for a day and made them to sit in two different lines. She started serving the nector to the deities. A demon Svarbhānu somehow managed to join the line of deities. The Sun and Moon pointed it out. The God cut his head. The head servived as there was nector in it. The rest of the body fell. The serviving head became the planet Rāhu.

कल्पयित्वा पृथक् पङ्क्तीरुभयेषां जगत्पतिः ।
तांश्चोपवेशयामास स्वासु स्वासु च पङ्क्तिषु
दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः
दूरस्थान् पाययामास जरामृत्युहरं सुरान् ।
देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि
प्रविश्य सोममपिबत् चन्द्रार्काभ्यां च सूचितः ॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोपतत् ।
शिरस्त्वमरतां नीतमजो गृहमचीक्लृपत् । (८.६५-७१)

The battle between the deities and demons

As the demons did not get the nector they started a fierce battle with the deities. This battle was led by Balichakravarty on behalf of the demons and Indra on behalf of the deities. Leading demons and deities participated in it. Namuchi was killed applying the foam to Vajrāyudha as he had obtained a boon that he should not be killed either by dry weapon or a wet weapon. Bali and other leading demons were also killed. However on the advice of Brahmā their life was revived.

i) तत्र देवासुरो नाम रणः परमदारुणः
रोधस्युदन्वतो राजन् तुमुलो रोमहर्षणः । (९-५)

ii) नायं शुष्कै रथो नार्द्रैः वधमर्हति दानवः ।
मयास्मै यद् वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः
तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः ।
ध्यायन् फेनमथापश्यदुपायमुभयात्मकम् ॥ (१०.३८,४०)

iii) भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः
श्रिया समेधिताः सर्वे उपारमतविग्रहात् ।

iv) तत्रापि नष्टावयवान् विद्यमानशिरोधरान्
उशना जीवयामास सञ्जीविन्या स्वविद्यया ।
बलिश्चोसनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः ॥ (१०.४८,४९)

Śiva was captivated by Mohinī

Śiva came to know that Viṣṇu assumed the form of a damsel. He desired to see Viṣṇu in that form. He went to Viṣṇu along with his spouse Parvati and requested Vishnu to assume that form. Viṣṇu became invisible and appeared in the form a beautiful damsel who played with a ball. Śiva ran after her forgetting that Parvati is by his side.

Śiva caught hold of her. She managed to get out of his embrace and started running. Śiva chased her. The semen started pouring. The places where it dropped became the places of the deposits of gold and silver. Śiva realised his mistake and came out of the delusion. Śrī Suka informs Parīkṣit that he narrated this event only to highlight the greatness of Viṣṇu.

Indra vacates svarga. Diti laments

Śrī Suka continues to give the details of the manvantaras from seventh to elevanth. He narrates the episode of Balichakravarty.

After Balichakravarti's life was revived as stated above, the brāhmaṇas of Bhṛgu clan asked him to perform Viśvajit sacrifice. The sacred fire offered him a throne and other royal luxaries. He was coronated. His grand father Pralhāda offered him a garland. He proceeded to Indra's capital city accompanied by a large army of demons. Indra was worried. He asked his preceptor. He told him that Bali has become very strong. He cannot be countered without the help of the

Supreme God. The time is not ripe for it now. You better leave the svarga for the time being and wait for the appropriate time. Accordingly Indra vacated svarga along with other deities.

When Indra and other deities left the svarga and their respective places, their mother Diti was very unhappy. She asked her husband for a solution for her children's difficulties. Kashyapa advised her to perform payovrita. He gave the details of payovrita and the verse for meditation.

फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ (२५-२५,२८)

The incarnation of Vāmana

Diti performed it with great devotion and offered prayers to Vāsudeva. The Supreme God appeared before her and promised that he would take the form of her son and free the deities from their miserable position. In due course Diti became pregnant. The Supreme God appeared on the day of Svarana star, the twelth day of the first half of the month of bhādrapada. He took the form of a child. Soon he grew into the boy of five years. The sages performed his upanayana. He proceeded to the place wherein Balichakravarty was performing a sacrifice.

i) द्वादश्यां सविता तिष्ठन् मध्यंदिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म हरेः विदुः । (१७-६)

ii) तं वटुं वामनं दृष्ट्वा मोदमानाः महर्षयः ।
कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ।
तस्योपनायमानस्य सावित्रीं सविताब्रवीत् ।
बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपो ददौ
ददौ कृष्णाजिनं भूमिः दण्डं सोमो वनस्पतिः । (२७.१३,१५)

After upanayana he went to the bank of Narmadā river wherein Balichakravarti was performing Aśvamedha sacrifice. He was received with warm welcome by the sacred fires, Balichakravarti and the bhrigus. Impressed by his personality Balichakravarti requested him to ask for any gift.

i) सदण्डच्छत्रं स जलं कमण्डलु विवेश बिभ्रत् हयमेधवारम्। (१७-२३)

ii) प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः।
प्रत्यगृण्हन् समुत्थाय संक्षिप्ताः तस्य तेजसा। (१७-२५)
स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः
अवनिज्यार्चयामास मुक्तसङ्ग मनोरमम्। (१७-२७)

iii) यद्यद् वटो वाञ्छसि तत् प्रतीच्छ
त्वामर्थिनं विप्र सुतानुतर्कये।
ग्रामान् समृद्धान् तुरगान् गजान् वा
रथांस्तथार्हत्तम सम्प्रतीच्छ॥ (१७-३२)

Vāmana appreciated the offer of Balichakravarti and flattered him saying that he is continuing the worthy tradition of his grand father Pralhāda. Then he asked the gift of only three steps of the place. Bali said it is not wise to ask for such a small gift. No one should seek any gift from any other person after he approaches me. Hence, ask for such an extent of the earth which will be quite sufficient for your whole life. However, Vāmana said. One should have restraint. He who has no restraint will not be satisfied with any amount of gift. Hence, I asked for three steps only.

i) इति वैरोचनेर्वाक्यं धर्मयुक्तं ससूनृतम्।
निशम्य भगवान् प्रीतः प्रतिनन्द्येदमब्रवीत्। (१८-१)

ii) पिता प्रल्हादपुत्रस्ते तद्विद्वान् द्विजवत्सलः।
स्वमायुः द्विजलिङ्गेभ्यः देवेभ्योऽदात् स याचितः।
तस्मात् त्वत्तो महीमीषद् वृणेहं वरदर्षभ (१८-२४,२६)

iii) त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा। (१८-१८)
न पुमान् मामनुवृज्य भूयो यचितुमर्हति।
तस्मात् वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे। (१८-२०)

iv) त्रिभिः पादैरसन्तुष्टो द्वीपेनापि न पूर्यते।
नववर्षसमेतेन सप्तद्वीपधरेच्छया। (२८-२२)
तस्मात् त्रीणि पदान्येव वृणे तद्वरदर्षभात्। (१८-२७)

Balichakravarti got ready to give the gift. But Śukrāchārya started cautioning him. He said, this boy seems to be Viṣṇu himself. He has come to help the deities. He will take away all your wealth, your position, your fame and everything that has made you a great person.

i) एष ते वैरोचने साक्षात् भगवान् विष्णुरव्ययः ।

ii) एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ।
दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः । (१८-३०,३२)

Balichakravarti did not agree with Śukrāchārya's advice. He said he cannot go back on his words. Śukrāchārya cursed him to loose all his wealth and glory. But Balichakravarti remained firm.

i) स चाहं वित्तलोभेन प्रत्याचक्षे कथंद्विजम् ।
प्रतिश्रुत्य ददामीति प्रल्हादः कितवो यथा ॥ (१९-३)

ii) एवमश्रद्धितं शिष्यमनादेशकरं गुरुः
शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् (१९-१४)

एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ।
वामनाय ददावेतामर्चित्वोदकपूर्वकम् । (१९-१६)

While Balichakravarti was washing the feet of Vāmana he started growing. He grew to such an extent that the entire world was absorbed in it. It was Visvarūpa of the Supreme God. The deities, sages, different worlds, rivers, forests all could be seen in it. Vāmana occupied the entire earth by one step and stretched the other step to antarikṣa. The nail of his foot that was raised created a crack in brahmānda and the holy river Ganga entered into brahmānda.

तद्वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधयः तिर्यङ् नृदेवा ऋषयो यदासन् ॥ (१९-२०)
मधुव्रतस्रग्वनमालया वृतो रराज राजन् भगवानुरुक्रमः ।
क्षितिं पदैकेन बलेर्विचक्रमे नमः शरीरेण दिशश्च बाहुभिः ।
पदं द्वितीयं क्रमतस्त्रि विष्टपं न वै तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्यधो दिवो महर्जनाभ्यां तपसः परंगतः । (१९-३२,३३)

As Balichakravarti was not able to provide the place for the third step he was tied by Varuṇapāśa.

Balichakravarti offered his head for the third step.

i) पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर ।
द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय । (२०-३०)

ii) पदं तृतीयं कुरु शीर्ष्णि मे निजम् । (२१-३)

Balichakravarti's wife Vindhyavali, his ground father Pralhāda and Chaturmukha brahmā himself appealed to Vāmana to remove Varuṇapāśa. The Supreme God asked Balichakravarti to go to Sutala world until he is put on Indra's throne again. He asked Pralhāda also to remain with him. He said himself also will be at the gate of Balichakravarti holding his Gadā.

वत्स प्रल्हाद भद्रं ते प्रयाहिसुतलातलम् ।
नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् । (२२-९)

Matsyāvatāra

In the last canto of eigth skandha Bāgavata narrates the fish incarnation of the Supreme God. At the close of Brahma's day pralaya takes place and the night of Brahmā commencess. At that time a demon by name Hayagriva took away the Vedas. The Supreme God took the form of a fish and brought back the Vedas. Before he took the form of a fish in pralaya water he demonstrated the strength of this form to King Satyavrata who became the Manu of first Manvantara known as Vaivasvata. This king Satyavrata was engaged in the penance on the bank of a river. When he took a handful of water to offer arghya a fish was found in it. He started pouring the water back, so that the fish can go to its place safely. However, the fish appealed to him not to put back and save it from the bigger fishes. He agreed and put it in the water in his kamandalu. The fish outgrew it by the next day and asked for a bigger place. He put it in a large vessel. The fish outgrew this also. Then he put it in a pond. The fish outgrew that also. Finally he put it in the sea. But the fish said you are handing over me to much larger water creatures. By this time the king realised that this is not an ordinary fish. It must be God himself. He prayed it to bestow favour on him. Then the God in the form of fish told him that there will be pralaya soon. You will sea a boat in the pralaya water. You put all kinds of medicinal plants into it. You get into it with the seven

Sages. You will soon see a fish with the horn. You will also see a snake. Tie the fish to the boat by the snake. That fish will bring the vedas back. King Satyavrata faithfully followed these instructions and became the first Manu.

ध्यायन् भगवदादेशं ददृशे नावमागतम् ।
तमारुरोह विप्रेन्द्रै रादायौषधिवीरुधः ।
सोनुध्यातः ततो राज्ञा प्रादुरासीत् महार्णवे
एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः । (२३-४२,४४)
अतीते प्रलयापाये उत्थिताय च वेधसे ।
हत्वासुरं हयग्रीवं वेदान् प्रत्याहरद् हरिः । (२३-५७)

The above brief account of the main events described in eighth skandha of Bhāgavata is intended to enable an average reader to keep a track with the central theme of Bhāgavata. The central theme of Bhāgavata viz. the glory of the Supreme God is interspersed with a number of episodes, long philosophical discourses, profuse prayers, and the discription of the forests, cities, different regions and clans. It becomes difficult for an average reader to identify the links of these with the central theme and also the continuity of the events. The geneologies of different Royal families particularly when the same names are repeated are difficult to be sorted out. Therefore, it was thought that a brief summary of the events and episodes will help to weed through the jungle of information. This is attempted in the above summary. The episodes that are popularly known are briefly stated while those that are not widely known are elaborated a little more. The social and ethical implications of these episodes are transperant. Therefore, these are not particularly commented upon.

I take this opportunity to express my thanks to Sri N. Narasimha Rau, Chairman of Dvaita Foundation for giving me this opportunity to edit Bhāgavata with commentaries.

I record my appreciation of the help given to me by Vidwan Krishnacharya Upadhyaya, Research Scholar at Dvaita Vedanta Foundation.

Mahāmahopādhyāya
Prof. K.T. Pandurangi

ಮುನ್ನುಡಿ

ಮನುವಿಗೆ ತಾರಕವಾದ ಮಂತ್ರ ನಮಗೂ ತಾರಕ

ಶ್ರೀಮದ್ಭಾಗವತ ಅಷ್ಟಮಸ್ಕಂಧದ ಆರಂಭದಲ್ಲಿ ಯಜ್ಞನಾಮಕ ಭಗವಂತನ ಅವತಾರವನ್ನು ಉಲ್ಲೇಖಿಸುತ್ತದೆ.

ಸ್ವಾಯಂಭುವ ಮನುರಾಜನು ತನ್ನ ಮೊಮ್ಮಗನಾದ ಯಜ್ಞನಾಮಕನಾದ ಶ್ರೀಹರಿಯನ್ನು ಈಶಾವಾಸ್ಯಾದಿ ಮಂತ್ರಗಳಿಂದ ಸ್ತೋತ್ರ ಮಾಡುತ್ತಿದ್ದಾನೆ. ಅದೇ ಸಂದರ್ಭದಲ್ಲಿ ದೈತ್ಯರೆಲ್ಲರೂ ಮನುವನ್ನು ತಿನ್ನಲು ಓಡಿ ಬಂದರು. ರುದ್ರದೇವರ ಬಲದಿಂದ ಅವಧ್ಯರಾಗಿ ದರ್ಪಿಷ್ಟರಾಗಿದ್ದರು. ತನ್ನ ಭಕ್ತನಿಗೆ ಅನ್ಯಾಯ ಮಾಡ ಬಯಸಿದ ದೈತ್ಯರನ್ನು ಯಜ್ಞನಾಮಕ ಭಗವಂತ ಸಂಹರಿಸಿದ. ಮನನಶೀಲನಾದ ಮನುವನ್ನು ರಕ್ಷಿಸಿದ. ಮನುವಿಗೆ ಉಪನಿಷತ್ತಿನ ಮಂತ್ರಗಳೇ ತಾರಕವಾದವು. ರಕ್ಷಕವಾದವು.

ಈ ಅಸುರರೇ ನಮ್ಮನ್ನು ನುಂಗಲು ಬಂದಿದ್ದಾರೆ. ಮನುವನ್ನು ನಿಜರೂಪದಿಂದ ನುಂಗಲು ಬಂದರೆ ಇಂದು ಕೆಟ್ಟ ವಿಷಯಗಳಲ್ಲಿ ಸನ್ನಿಹಿತರಾಗಿ ನಮ್ಮನ್ನು ನುಂಗುತ್ತಿದ್ದಾರೆ. ದುರ್ಮಾರ್ಗಕ್ಕೆ ಎಳೆದೊಯ್ಯುತ್ತಿದ್ದಾರೆ, ''ದೈತ್ಯೇಷು ಅಸಂಗಂ ವಿಷಯಾತ್ಮಕೇಷು'' ಎನ್ನುತ್ತದೆ. ಹೀಗೆ ಮನುಜರೆಲ್ಲರೂ ದುಷ್ಟಚಟಗಳಿಗೆ ಬಲಿಯಾಗುತ್ತಿದ್ದಾರೆ. ಈ ದುಶ್ಚಟಗಳೆಂಬ ದೈತ್ಯರ ವಿಷವರ್ತುಲದಿಂದ ಪಾರಾಗುವುದು ಹೇಗೆ? ಚಿಂತೆ ಬೇಡ. ಮನುವಿಗೆ ತಾರಕವಾದ ಮಂತ್ರಗಳೇ ನಮಗೂ ತಾರಕ. ವಿಷಯ ಸನ್ನಿಹಿತರಾದ ದೈತ್ಯರಿಂದ ರಕ್ಷಣೆ ಪಡೆಯಬೇಕಿದ್ದರೆ ಈ ಈಶಾವಾಸ್ಯೋಪನಿಷತ್ತನ್ನೇ ಆಶ್ರಯಿಸಬೇಕು.

ತನ್ನ ಮಂತ್ರಗಳಿಗೆ ತಾನೇ ವ್ಯಾಖ್ಯಾನಿಸಿದ ಸ್ವಾಯಂಭುವ ಮನು-

ಸ್ವಾಯಂಭುವಮನು ತಾನು ಕಂಡ ಮಂತ್ರಗಳನ್ನೇ ಅನುವಾದ ಮಾಡುವ ನೆಪದಿಂದ ಬೇರೆ ರೀತಿಯ ಪದಭೇದಕ್ಕೆ ಅವಕಾಶವಾಗಬಾರದು, ಮತ್ತು ಯಥಾವತ್ತಾಗಿ ವ್ಯಾಖ್ಯಾನಿಸಬೇಕೆಂದು, ಶ್ರುತಿಯಲ್ಲಿ ''ಈಶಾವಾಸ್ಯಂ'' ಎಂದಿರುವುದನ್ನು ಭಾಗವತದಲ್ಲಿ ''ಆತ್ಮಾವಾಸ್ಯಂ'' ಎಂದು ಆಙ್‌ನಿರ್ದೇಶದಿಂದ ಸೂಚಿಸಿದ. ಹಾಗೆಯೇ ''ಮಾಗೃಧಃ'' ಅಪೇಕ್ಷೆ ಬೇಡ'' ಎಂದಿತು ಶ್ರುತಿ. ಯಾರಿಗೆ ಹೇಳಿತು ಹೀಗೆ? ಎಂದರೆ ಅದಕ್ಕೆ ಉತ್ತರವನ್ನು ಸಹ ಭಾಗವತ ನೀಡಿತು, ''ಮನಃ'' ಎಂದು. ಹೇ ಮನಸ್ಸೆ ನೀನು ಬೇರೆಯವರ ಸ್ವತ್ತನ್ನು ಅಪೇಕ್ಷಿಸಬೇಡ. ಹೀಗೆ ಮಂತ್ರದಲ್ಲಿ ''ಮನಃ'' ಎಂಬುವುದನ್ನು ಅಧ್ಯಾಹಾರ ಮಾಡಿಕೊಳ್ಳಿ ಎಂದು ಸ್ವಾಯಂಭುವಮನು ಸೂಚಿಸಿದ ಈ ಭಾಗವತದಲ್ಲಿ,

ಶ್ರೀಮದಾನಂದತೀರ್ಥಭಗವತ್ಪಾದರು ಸ್ವಾಯಂಭುವ ಮನುವಿನ ಅಭಿಪ್ರಾಯ ಬಲ್ಲವರಾಗಿ, ಭಾಗವತೇ ಚಾಯಮರ್ಥ ಏವೋಕ್ತಃ । ಈಶಸ್ಯ ಆವಾಸಯೋಗ್ಯಂ ಈಶಾವಾಸ್ಯಂ ಎಂದು ಮಂತ್ರಕ್ಕೆ ವ್ಯಾಖ್ಯಾನಿಸಿದರು. ಈ ಕಾರಣದಿಂದಾಗಿಯೇ ಅಲ್ಲವೇ; ಇತಿಹಾಸಪುರಾಣಾಭ್ಯಾಂ ವೇದಂ ಸಮುಪಬೃಂಹಯೇತ್'' ಎನ್ನುವುದು. ಹೀಗೆ ವೇದಾರ್ಥ ನಿರ್ಣಯಕ್ಕಾಗಿ ಪುರಾಣ ಇತಿಹಾಸಗಳ ಅಧ್ಯಯನ ಅವಶ್ಯ ಬೇಕು. ಇದಿಲ್ಲವಾದರೆ ವೇದಾರ್ಥ ಅನರ್ಥವಾದೀತು ನಮ್ಮ ಪಾಲಿಗೆ.

ಟೀಕಾಕೃತ್ಪಾದರ ವ್ಯಾಖ್ಯಾನವೇ ಸಮಂಜಸ–

ಇನ್ನು ಈಶಾವಾಸ್ಯಭಾಷ್ಯ ವ್ಯಾಖ್ಯಾನ ಸಮಯದಲ್ಲಿ ಶ್ರೀಮಜ್ಜಯತೀರ್ಥಶ್ರೀಚರಣರು, ''ತಾನ್ ಹತ್ವಾಽವಧ್ಯತಾಂ ಗತಾನ್'' ಎನ್ನುವಲ್ಲಿ ''ತಾನ್'' ಎನ್ನುವುದಕ್ಕೆ ''ರಾಕ್ಷಸಾನ್ ಇತ್ಯಧ್ಯಾಹಾರೇಣ ಪುಲ್ಲಿಂಗೋಪಪತ್ತಿಃ'' ಎಂದರು. ಹಿಂದೆ ''ರಕ್ಷೋಭಿರುಗ್ರೈಃ'' ಎಂದು ನಪುಂಸಕಲಿಂಗ ಪ್ರಕೃತವಾಗಿದೆ. ಮುಂದಿನ ಮಾತಿನಲ್ಲಿ ''ತಾನ್'' ಅವರನ್ನು, ಅಂದರೆ ಯಾರವರು ಎಂಬ ಪ್ರಶ್ನೆ ಅದಕ್ಕೆ ''ರಾಕ್ಷಸಾನ್'' ಎನ್ನುವ ಪ್ರತ್ಯೇಕ ಪುಲ್ಲಿಂಗಪದ ಅಧ್ಯಾಹಾರ ಮಾಡಿಕೊಳ್ಳಿ. ಇದರಿಂದ ಅರ್ಥ ಸಮಂಜಸವಾಗುತ್ತದೆ. ಪುಲ್ಲಿಂಗವೂ ಕೂಡುತ್ತದೆ ಎಂದು ವ್ಯಾಖ್ಯಾನಿಸಿದರು.

ಆದರೆ, ಪುಲ್ಲಿಂಗ ಕೂಡಿಸುವುದಕ್ಕಾಗಿ ''ರಾಕ್ಷಸಾನ್'' ಎಂಬ ಪದ ಅಧ್ಯಾಹಾರ ಬೇಕಿಲ್ಲ. ಅಧ್ಯಾಹಾರವಿಲ್ಲದೆ ಪುಲ್ಲಿಂಗೋಪಪತ್ತಿಯನ್ನು ಹೇಳಬಹುದು, ಹೇಗೆಂದರೆ ''ರಕ್ಷೋಭಿರುಗ್ರೈಃ'' ಎನ್ನುವುದು ಸಮಸ್ತಪದ. ರಕ್ಷಃಸ್ಸು ರಕ್ಷಸಾಂ ವಾ ಅಭಿತೋ ರುಜಂ ಜಗತೋ ರಾತೀತಿ ರಕ್ಷೋಭಿರುಗ್ರಾಃ ತೈಃ'' ಎಂದು ವಿಗ್ರಹಮಾಡುವುದರಿಂದ ಪುಲ್ಲಿಂಗಕ್ಕೆ ಭಂಗವಿಲ್ಲ, ಕಾರಣ ಟೀಕಾಕೃತ್ಪಾದರು ಅಧ್ಯಾಹಾರ ಏಕೆ ಮಾಡಬೇಕಿತ್ತು? ಎಂದು ಕೆಲವರು ಆಕ್ಷೇಪಿಸುವದುಂಟು. ಆದರೆ ಹೀಗೆ ವ್ಯಾಖ್ಯಾನಿಸಿದರೆ ನಿನಗೆ ಅಧ್ಯಾಹಾರ ದೋಷ ತಪ್ಪಿತೇ? ಇಲ್ಲ!

''ಅಶಿತೇಽಪಿ ಲಶುನೇ ನ ಶಾಂತೋ ವ್ಯಾಧಿಃ'' ಬೆಳ್ಳುಳ್ಳಿ ತಿಂದರೂ ಕೆಮ್ಮು ಹೋಗಲಿಲ್ಲ ಎನ್ನುವಂತಾಯಿತಷ್ಟೆ!

ಏಕೆಂದರೆ ಇದೊಂದು ವಿಶೇಷಣವಾಯಿತು. ಈ ವಿಶೇಷಣಕ್ಕೆ ಅನುಗುಣವಾಗಿ ದಾನವೈಃ, ಎಂದಾಗಲಿ ''ಯಾತುಧಾನೈಃ'' ಎಂದಾಗಲಿ ವಿಶೇಷ್ಯ ಅಧ್ಯಾಹಾರ ಮಾಡಲೇಬೇಕು. ಅಧ್ಯಾಹಾರ ಅಷ್ಟೇ ಅಲ್ಲ! ಸುಲಭವಾಗಿ ''ರಕ್ಷೋಭಿಃ'' ಎಂದು ಪ್ರಸಿದ್ಧವಾದ ಪದವಿಭಾಗದಿಂದ ಸುಲಭವಾಗಿ ಅರ್ಥೈಸಲು ಬರುವಾಗ ಅದನ್ನು ತ್ಯಜಿಸಿ ಈ ನಿನ್ನ ಸಮಸ್ತಪದಕಲ್ಪನೆ ಗೌರವವಾಗುವುದಿಲ್ಲವೇ, ಕಾರಣ ಈ ನಿನ್ನ ವ್ಯಾಖ್ಯಾನ ಗುರುಕಲ್ಪನೆಯುಳ್ಳದ್ದು. ಟೀಕಾಕೃತ್ಪಾದರ ವ್ಯಾಖ್ಯಾನ ಋಜುವಾದದ್ದು. ಅವರ ವ್ಯಾಖ್ಯಾನವೇ ಸಮಂಜಸ. ಸಜ್ಜನರು ಟೀಕಾಕೃತ್ಪಾದರ ವ್ಯಾಖ್ಯಾನದಿಂದಲೇ ಆನಂದ ಕಾಣಿರಿ ಎಂದು ಹೇಳುತ್ತಾರೆ ಶ್ರೀ ಸತ್ಯಧರ್ಮರು.

ಹೀಗೆ ಮೇಲಿನ ಈ ಎರಡು ಪ್ರಮೇಯಗಳನ್ನು ತಮ್ಮ ಪ್ರಾಸಂಗಿಕೀ ಕಥಾದಲ್ಲಿ ವಿವರಿಸುವರು.

ಮಾಗೃಧಃ ಕಸ್ಯಚಿದ್ ಧನಂ

ಹೇ ಮನಸ್ಸೆ! ಅಥವಾ, ಹೇ ಜೀವನೇ! ''ಮನನಾನ್ಮನ ಉದ್ದಿಷ್ಟಃ'' ಎಂಬ ಪ್ರಮಾಣದಿಂದ ಜೀವನಲ್ಲಿಯೂ ಮನಃಶಬ್ದವಿದೆಯಲ್ಲವೇ! ಹೀಗೆ ಇಬ್ಬರನ್ನೂ ಸಂಬೋಧಿಸುತ್ತಾನೆ, ಸ್ವಾಯಂಭುವ ಮನು.

ಸ್ಥಾವರ ಜಂಗಮವಾದ ಈ ಎಲ್ಲ ಪ್ರಪಂಚ ಆತ್ಮಾವಾಸ್ಯ. ವ್ಯಾಪ್ತಗುಣನಾದ ಶ್ರೀಹರಿಗೆ ಆವಾಸಯೋಗ್ಯವಾಗಿದೆ. ಕಾರಣ ನೀನು ಆತ್ಮನು ನೀಡಿದ್ದನ್ನು ಉಣ್ಣು.

ಈ ಜಗತ್ತೇ ಅವನದೆಂದಮೇಲೆ ಈ ಧನವಾದರೂ ಅವನನ್ನು ಬಿಟ್ಟು ಬೇರೆ ಯಾರದು? (ಇದಂ ಧನಂ ಚಿದಪಿ ಕಸ್ಯ ತದ್ವ್ಯತಿರೇಕೇಣ, ನ ಕಸ್ಯಾಪಿ) ಯಾರದೂ ಅಲ್ಲ! ಅವನದೇ. ಕಾರಣ ಧನವನ್ನೂ ಬಯಸಬೇಡ.

''ಕಸ್ಯ'' ಸುಖರೂಪನಾದ ಹರಿಯ 'ಧನವನ್ನು,' ಅವನ ಸೌಭಾಗ್ಯವನ್ನು ಅರ್ಥಾತ್ ಅವನ ಸಾಮ್ಯವನ್ನು ಬಯಸಬೇಡ, ''ಸಾಮ್ಯಂ ವಾ ನೈವ ಚಿಂತಯೇತ್.''

''ಕಸ್ಯಚಿತ್'' ಬ್ರಹ್ಮಾದಿಗಳ ಧನವನ್ನೂ ಬಯಸಬೇಡ, ಅವರ ಕಾಮಾನುಗುಣವಾಗಿ ನೀನು ವರ್ತಿಸು. ''ಕಾಮೇನ ಮೇ ಕಾಮ ಆಗಾತ್.''

ಸ್ವಾರ್ಥಕ್ಕಾಗಿಯೂ ''ಕಸ್ಯಚಿತ್'' ರಾಜಾದಿಗಳ ಧನವನ್ನು ಬಯಸಬೇಡ.

ಈ ಎಲ್ಲ ಪ್ರಪಂಚ, ಕಸ್ಯ ಸುಖರೂಪನಾದ, ಮಾಗೃಧಃ ಲಕ್ಷ್ಮಿಯನ್ನು ಬಯಸುವ ಲಕ್ಷ್ಮೀಕಾಂತನಾದ ಶ್ರೀ ಹರಿಯ ಚಿದ್ರೂಪಧನವಿದು. ಕಾರಣ ನೀನು ಬಯಸಬೇಡ, ಅವನು ಕೊಟ್ಟಿದ್ದನ್ನು ಅನುಭವಿಸು.

ಗಜೇಂದ್ರ ಮೋಕ್ಷ

ನಾಲ್ಕನೆಯ ತಾಪಸಮನ್ವಂತರದಲ್ಲಿ ಭಗವಂತನು ತಾಪಸನಾಗಿ ಮಾಡಿದ ಗಜೇಂದ್ರಮೋಕ್ಷವನ್ನು ನಿರೂಪಿಸುತ್ತಾರೆ, ಶುಕಮುನಿಗಳು.

ಕ್ಷೀರಸಮುದ್ರದ ಮಧ್ಯದಲ್ಲಿ ತ್ರಿಕೂಟವೆಂಬ ಪರ್ವತ. ಆ ಪರ್ವತದಲ್ಲಿ ಬಂಗಾರಮಯವಾದ ಶಿಖರ, ರಜತಮಯವಾದ ಶಿಖರ, ಕಬ್ಬಿಣದ ಶಿಖರ, ಆದ್ದರಿಂದಲೇ ಈ ಪರ್ವತಕ್ಕೆ ''ತ್ರಿಕೂಟ ಪರ್ವತ''ವೆಂದು ಹೆಸರು.

ಆಸೀದ್ ಗಿರಿವರೋ ರಾಜನ್ ತ್ರಿಕೂಟ ಇತಿ ವಿಶ್ರುತಃ ।
ದಿಶಶ್ಚ ರೋಚಯನ್ನಾಸ್ತೆ ರೌಪ್ಯಾಯಸಹಿರಣ್ಮಯೈಃ ॥

ಪರ್ವತದಲ್ಲೊಂದು ವರುಣನ ಉದ್ಯಾನವನ. ಅದರ ಹೆಸರು ಋತುಮತ್. ಈ ಉದ್ಯಾನವನ ದೇವಸ್ತ್ರೀಯರ ಕ್ರೀಡಾಸ್ಥಾನ. ಅದರಲ್ಲೊಂದು ಸರೋವರ. ಸರೋವರದಲ್ಲಿ ಮಕರವೊಂದಿತ್ತು. ಉದ್ಯಾನದಲ್ಲಿ ಆನೆಯೊಂದಿತ್ತು. ಈ ಆನೆ ಸುಂದರವನದ ಆಹಾರ ಸೇವನೆಯಿಂದ ಬಲಿಷ್ಠವಾಯಿತು. ತಾನು ಬೆಳೆದಂತೆ ತನ್ನ ಸುಂದರ ಸಂಸಾರವನ್ನು ಬೆಳೆಸಿತು. ಈ ಉದ್ಯಾನದಲ್ಲಿ ಸ್ವಚ್ಛಂದ ವಿಹಾರ ಮಾಡುತ್ತಿರಲು, ಒಂದು ದಿನ ದಿನಕರ ತಾಪಕ್ಕೆ ಗುರಿಯಾಯಿತು. ಬಾಯಾರಿತು. ನೀರಿಗಾಗಿ ಪರಿತಪಿಸಿತು. ಸರೋವರವನ್ನು ಸಮೀಪಿಸಿತು. ನೀರು ಕುಡಿದು ಸ್ನಾನ ಮಾಡಿ ಪರಿವಾರದೊಂದಿಗೆ ಜಲಕೇಳಿಯಲ್ಲಿ ಮೈ ಮರೆಯಿತು.

ಪಪೌ ನಿಕಾಮಂ ನಿಜಪುಷ್ಕರೋದ್ಧೃತಂ ಸ್ವಾತ್ಮಾನಮದ್ಭಿಃ ಸ್ನಪಯನ್ ಗತಕ್ಲಮಃ ।
ಸ್ವಪುಷ್ಕರೇಣೋದ್ಧೃತ ಶೀಕರಾಂಬುಭಿರ್ನಿಪಾಯಯನ್ ಸಂಸ್ನಪಯನ್ ಯಥಾ ಗೃಹೀ ॥

ವಿಷಯ ವಿಷವನ್ನೇ ಅಮೃತವೆಂದು ಸಂತೋಷದಿಂದ ಅನುಭವಿಸುತ್ತಿದ್ದ ಗಜರಾಜನ ಕಾಲನ್ನು ದೈವಪ್ರೇರಿತವಾದ ಮೊಸಳೆಯೊಂದು ಹಿಡಿಯಿತು. ಗಜರಾಜನ ಬಲವೆಲ್ಲ ನೀರಲ್ಲಿ ನೀರಾಗಿ ಹೋಯಿತು. ಕರಿರಾಜ ದಡಕ್ಕೆಳೆದರೆ ಮಕರ ನೀರಿಗೆಳೆಯಿತು. ಹೀಗೆ ಕರಿಮಕರಗಳ ಹೋರಾಟದಲ್ಲಿ ಸಾವಿರ ವರ್ಷಗಳು ಉರುಳಿದವು. ಸುಖಕಾರಣರೆಂದು ತಿಳಿದವರಾರೂ ರಕ್ಷಿಸಲಿಲ್ಲ. ಬಂಧುಗಳೆಲ್ಲರೂ ದೂರಾದರು.

ನ ಮಾಮಿಮೇ ಜ್ಞಾತಯ ಆತುರಂಗಜಾಃ ಕುತಃ ಕರಿಣ್ಯಃ ಪ್ರಭವಂತಿ ಮೋಚಿತುಂ ।
ಗ್ರಾಹೇಣ ಪಾಶೇನ ವಿಧಾತುರಾವೃತೋಽಪ್ಯಹಂ ಚ ತಂ ಯಾಮಿ ಪರಂ ಪರಾಯಣಮ್ ॥

ಮಕ್ಕಳೂ ಬಂದರು-

ಜ್ಞಾತಿಗಳ್ಯಾರು ಇವನನ್ನು ಮಕರದಿಂದ ಬಿಡಿಸಲು ಸಮರ್ಥರಾಗಲಿಲ್ಲ. ಮಕ್ಕಳು ಇಲ್ಲಿಗೆ ಬರಲಿಲ್ಲವೇ? **ಅವರು ಮೋಚನ ಮಾಡಬಹುದಿತ್ತಲ್ಲಾ?** ಇದಕ್ಕುತ್ತರ : ''ಅಂಗಜಾಃ ಆತುಃ'' ಮಕ್ಕಳು ಭೂಮಿಗೆ ಬಂದರು. **ಆದರೂ ಸಾಮರ್ಥ್ಯ** ಸಾಲಲಿಲ್ಲ. ಏಕೆ? ''ಕುತಃ'' ಭೂಮಿಯಿಂದಾಗಿ. ಮಕರ ನೀರಿನಲ್ಲಿ, ಮಕ್ಕಳು ನೆಲದಲ್ಲಿ,

ಹೀಗಾಗಿ ಸಾಮರ್ಥ್ಯ ಕುಗ್ಗಿತು. ಹೀಗೆ ಬಲಿಷ್ಠರಾದ ಮಕ್ಕಳೇ ಅಸಮರ್ಥರಾದಾಗ ಸ್ತ್ರೀಯರ ಪಾಡೇನು? ಸ್ತ್ರೀಯರು ಬೇಡ! ಪುರುಷರು ಪ್ರಯತ್ನಿಸಬಹುದಿತ್ತಲ್ಲಾ? ಅವರೂ ಬಂದಾಯಿತು; ''ಆತುರಾವೃತಃ'' ಆತುರಾಭಿಃ ಆತುರೈಶ್ಚ ಆವೃತಃ'' ನನ್ನನ್ನು ಮೋಚಿಸಲು ಆತುರರಾದ ಸ್ತ್ರೀಪುರುಷರು ಸುತ್ತುವರಿದರು. ಆದರೂ ನನ್ನದು ಈ ದುರ್ದಶೆ. ಈ ಎಲ್ಲ ನನ್ನವರಿಗೆ ಈ ರೀತಿ ಅಸಾಮರ್ಥ್ಯಕ್ಕೆ ಕಾರಣವೂ ಇದೆ. ಅದೇ ನವಿಧಾ; ವಿಧಾ, ನಮ್ಮ ಉಪಭೋಗ್ಯವಾದ ಅನ್ನ, ಅದು ''ನ'' ಇಲ್ಲ. ಆ ಕಾರಣದಿಂದಲೂ ಅಸಾಮರ್ಥ್ಯ ಬಂದಿದೆ. ವಿಧಾ ಗಜಾನ್ನೇ ಋದ್ಧೌ ಚ ಪ್ರಕಾರೇ ರೇಚನೇ ವಿಧೌ' ಎನ್ನುವ ವಿಶ್ವ ಈ ಅರ್ಥಕ್ಕೆ ಪೂರಕ.

ಈ ಕಾರಣದಿಂದ ನಾನು ''ಚತಂ=ಸರ್ವರಿಂದಲೂ ಯಾಚಿತನಾದ ''ಯಾಮಿಪರಂ'' ನಾಶಕರಿಲ್ಲದ, ಇವನನ್ನು ನಾಶಮಾಡುವರಾರೂ ಇಲ್ಲ. ಕಾರಣ ವಿಲಕ್ಷಣನಾದ ಪರಾಯಣನಾದ ಅಕಾರವಾಚ್ಯನಾರಾಯಣನನ್ನು ''ನಮಾಮಿ'' ನಮಿಸುತ್ತೇನೆ. ಹೀಗೆ ನನ್ನ ಜ್ಞಾತಿಗಳಾದ ಮದಗಜಗಳು, ನನ್ನ ಅಂಗಜರು, ಕರಿಣಿಯರು, ಎಲ್ಲರೂ ಬಂದರು ನನ್ನ ದೆಶೆ ಹೀಗಿದೆ. ಕಾರಣ ಶ್ರೀಹರಿಯನ್ನು ಮೊರೆ ಹೋಗುತ್ತೇನೆಂದು ಗಜೇಂದ್ರನು ಮನಸ್ಸಿನಲ್ಲಿ ನಿಶ್ಚಯಿಸಿದ ಎನ್ನುವ ಅರ್ಥ ವಿಶೇಷವನ್ನು ಸತ್ಯಧರ್ಮರು ನಿರೂಪಿಸಿದರು. ವೇದವ್ಯಾಸರೇ ''ನಮಾಮಮೀ'' ಎಂದು ಪದವಿನ್ಯಾಸಡದೆ ''ನಮಾಮಿಮೇ'' ಎಂಬ ಪದನಿಬಂಧದಿಂದ ಸೂಚನೆಯನ್ನು ನೀಡಿರುವರು ಎಂಬ ಮಾತನ್ನು ನುಡಿಯುತ್ತಾರೆ.

ಯಃ ಕಶ್ಚನೇಶೋ ಬಲಿನೋಽಂತಕೋರಗಾತ್ ಪ್ರಚಂಡವೇಗಾದಭಿಧಾವತೋ ಭೃಶಮ್ ।
ಭೀತಂ ಪ್ರಪನ್ನಂ ಪರಿಪಾತಿ ಯದ್ಭಯಾತ್ ಮೃತ್ಯುಃ ಪ್ರಧಾವತ್ಯರಣಂ ತಮೀಮಹಿ ॥

ಮೃತ್ಯುವಿಗೂ ಮೃತ್ಯುವಾದ ಶ್ರೀಹರಿ

~~ಯಾರಿಂದಲೂ ವೇಗಕ್ಕೆ ಅಡೆತಡೆಯಿಲ್ಲ. ಹೀಗಾಗಿ ಪ್ರಚಂಡವೇಗದಿಂದ ಓಡೋಡಿ ಬರುವವ ಅಂತಕ.~~ ''ಅಂತಕ'' ಯಮನೆಂಬ ಉರಗದಿಂದ ಬಹುಭೀತನಾದ ಗಜೇಂದ್ರ ಮಕರವೂ ಕೂಡ ಉರಗದಂತೆ ಕಣ್ಣಿನಿಂದಲೇ ಕೇಳುವುದು. ಕಾರಣ ಮಕರವನ್ನು ಉರಗಶಬ್ದದಿಂದ ಉತ್ಪ್ರೇಕ್ಷಿಸಿದೆ. ಹೀಗೆ ಬಹುಭೀತನಾದ ಗಜೇಂದ್ರ. ಇತರ ಎಲ್ಲರನ್ನೂ ಪರಿತ್ಯಜಿಸಿ (ಭೃಶಂ ಪ್ರಪನ್ನಂ ಇತರಾನುಪೇಕ್ಷ್ಯ) ಶರಣಾಗತನಾದವನನ್ನು ರಕ್ಷಿಸುವವ ಶ್ರೀಹರಿ ಮೃತ್ಯುವಿಗೂ ಮೃತ್ಯುವಾದ ಇವನನ್ನೇ ಮೊರೆ ಹೋಗುವೆನು. ಇದನ್ನೇ-

ಭೀಷಾಸ್ಮಾದ್ವಾತಃ ಪವತೇ ಭೀಷೋದೇತಿ ಸೂರ್ಯಃ ।
ಭೀಷಾಸ್ಮಾದಗ್ನಿಶ್ಚೇಂದ್ರಶ್ಚ ಮೃತ್ಯುರ್ಧಾವತಿ ಪಂಚಮ ಇತಿ ॥

ಶ್ರುತಿ ಹೀಗೆ ಹೇಳುತ್ತದೆ. ಹಾಗೆಯೇ ನರಸಿಂಹಮಂತ್ರದಲ್ಲಿಯೂ ''ಮೃತ್ಯುಮೃತ್ಯುಂ ನಮಾಮ್ಯಹಂ'' ಎಂದಿದೆ. ಕಾರಣ ಇವನಲ್ಲಿ ತನ್ನ ಅರಣಕ್ಕೆ ಶರಣಾಗಿದ್ದಾನೆ.

ಯಾದವ ಕೃಷ್ಣನಿಗೂ ಮೊರೆ ಹೋದ.

ಯಾವ ಕಾಲಿಯನಿಂದ ಯಮುನೆಯ ನೀರು ಅಂತಕ್ಕೆ ನಾಶಕ್ಕೆ ಕಾರಣವಾಯಿತೋ ಅಂತಹ ಉರಗನಿಂದ ಕಾಲಿಯಸರ್ಪದಿಂದ ಭೀತರಾದ, ಪ್ರಪನ್ನರಾದ, ಶರಣಾಗತರಾದ, ತನ್ನ ಗೋಪಜನರನ್ನು ಯಾವ ಕೃಷ್ಣ ರಕ್ಷಿಸಿದನೋ ಆ ಕೃಷ್ಣನನ್ನೇ ಮೊರೆ ಹೋಗುವೆನು.

ಕೃಷ್ಣ ಕೃಷ್ಣೇತಿ ಕೃಷ್ಣೇತಿ ಯೋ ಮಾಂ ಸ್ಮರತಿ ನಿತ್ಯಶಃ ।
ಜಲಂ ಭಿತ್ವಾ ಯಥಾ ಪದ್ಮಂ ನರಕಾದುದ್ಧರಾಮ್ಯಹಮ್ ॥

ಎನ್ನುವ ಮಾತು ಇದನ್ನೇ ದೃಢಪಡಿಸುತ್ತದೆ. ಕೃಷ್ಣ! ಕೃಷ್ಣಾ! ಎಂದು ನಿತ್ಯದಲ್ಲಿಯೂ ಸ್ಮರಿಸುವವನನ್ನು ''ಪದ್ಮ''ಗಜನನ್ನು ಉದ್ಧರಿಸುವಂತೆ ನರಕದಿಂದ ಪಾರುಮಾಡುತ್ತೇನೆ. ಮತ್ತು ಈ ಕೃಷ್ಣನಲ್ಲಿ ಮಕರದ ಜೊತೆಯಲ್ಲಿ ಯುದ್ಧವಾಗದಿರಲೂ ಇವನನ್ನ ಪ್ರಾರ್ಥಿಸುವೆ. (ಅರಣಂ ನಕ್ರಕೃತಯುದ್ಧಾಭಾವಮುದ್ದಿಶ್ಯ ತಮೀಮಹಿ)

ಶ್ರೀಭೂದುರ್ಗೆಯರಿಗೂ ಮೃತ್ಯು-

''ತಮೀಮಹಿ'' 'ತಮೀ' ಎಂದರೆ ದುರ್ಗೆ. 'ತಮೀ ತಮೋಹಿ ದುರ್ಗಾ' ಎನ್ನುವ ಪ್ರಮಾಣದಿಂದ ಸಿದ್ಧವಾದದ್ದಿದು. ಮಹೀ, ಭೂದೇವಿ ಇವರಿಬ್ಬರಿಗೂ ಶ್ರೀಹರಿಯಿಂದ ಭಯ. ಭಯವಷ್ಟೇ ಅಲ್ಲ! ಮೃತ್ಯುವೂ ಕೂಡ. ಇವರಿಗೆ ಅತಿಸಾಮೀಪ್ಯವೇ ಮೃತ್ಯುವಷ್ಟೇ! ಅಥವಾ 'ತಮ' ಎಂದರೆ ಅವ್ಯಕ್ತತತ್ವಳಾದ ದುರ್ಗಾದೇವಿ. ''ಈ'' ಶ್ರೀದೇವಿ ''ಮಹೀ''ಭೂದೇವಿ. ಈ ಮೂವರೂ ಬಲಿಷ್ಠರೇ. ಆದರೂ ಭಗವಂತನಿಂದ ಭಯ, ಮೃತ್ಯು. ಆ ಶ್ರೀಹರಿಯನ್ನು ರಕ್ಷಣೆಗಾಗಿ ಯಾಚಿಸುವೆ.

ತಮಂತು ತಮಸಾ ಸಾರ್ಧಂ ತಮಾ ತಮ್ಯಪಿ ಗೀಯತೇ,
ತಾಮಸೀ ನಿಶಿ ದುರ್ಗಾಯಾಂ ತಾಮಸೋ ಭುಜಗೇ ಖಗೇ ॥

ಎನ್ನುವ ದ್ವಿರೂಪಕೋಶ ಹಾಗೂ ಭಾನುಕೋಶಗಳು ಈ ಅರ್ಥಕ್ಕೆ ಸಂವಾದಿಯಾಗಿ ನಿಂತಿವೆ. ''ಕಃ'' ಬ್ರಹ್ಮದೇವರು, ಈಶಃ=ರುದ್ರದೇವರು, ''ಚನ'' ಈ ಇಬ್ಬರೂ ಸಹ ''ನ ಬಲಿನಃ'' ಬಲಿಷ್ಠರಲ್ಲ. (''ಚನೇತ್ಯಪ್ಯರ್ಥಃ'' ಛಾಂದೋಗ್ಯಭಾಷ್ಯ) ಕಾರಣ ಈ ಶ್ರೀಹರಿಯೇ ರಕ್ಷಣದಾತಾ. ಬೇರೆಯವರಲ್ಲವೆಂದು ಮನಸಾ ಚಿಂತಿಸಿ ಅವನನ್ನೇ ಶರಣು ಹೊಕ್ಕ ಗಜೇಂದ್ರ.

ಏವಂ ವ್ಯವಸಿತೋ ಬುದ್ಧ್ಯಾ ಸಮಾಧಾಯ ಮನೋ ಹೃದಿ ।
ಜಜಾಪ ಪರಮಂ ಜಾಪ್ಯಂ ಪ್ರಾಗ್ಜನ್ಮನ್ಯನುಶಿಕ್ಷಿತಮ್ ॥

ಹೀಗೆ ನಿಶ್ಚಯಿಸಿ ಪ್ರಾಗ್ಜನ್ಮದಲ್ಲಿ ''ಪ್ರಾಗ್ಜನ್ಮ'' ಪ್ರಥಮಜನ್ಮರೆನಿಸಿದ ಬ್ರಾಹ್ಮಣಗುರುವಿನಿಂದ ಉಪದೇಶ ಹೊಂದಿದ ಮಂತ್ರವನ್ನು ಜಪಿಸಿದ ಗಜೇಂದ್ರ.

''ಮನಸ್ಸು ಹೃದಯದಲ್ಲಿ'' ಎನಿದರ ಮರ್ಮ

ಬುದ್ಧಿಹೀನವಾದ ಹಸ್ತಿಜಾತಿಯಲ್ಲಿಯೂ ಹೀಗೆ ನಿಶ್ಚಯಿಸಿದ. ಏನಾಶ್ಚರ್ಯ! ಮೇಲಿನ ಶ್ಲೋಕದಲ್ಲಿ ಮನೋ ಹೃದಿ ಎಂದಿದೆ. ಮನಸ್ಸನ್ನು ಹೃದಯದಲ್ಲಿಡುವುದೆಂದರೇನು? ಇದಕ್ಕುತ್ತರ ಶ್ರುತಿ, ಕೋಶಗಳು ನೀಡುತ್ತವೆ. ''ಹೃದಯಮಾರುಣಯಃ,'' ಹೃತ್ಸ್ನೇಹೇ ಚ ಮನಃ ಸ್ನಿಗ್ಧೇ ಸುಹೃದ್ಬಂಧೌ ಹರಾವಪಿ'' ಎನ್ನುವ ಶ್ರುತಿ ಹಾಗೂ ಕೋಶಗಳು ಶ್ರೀಹರಿಯನ್ನು ''ಹೃದಯ'' ಎಂದವು. ಕಾರಣ ಮನಸ್ಸನ್ನು ''ಹೃದಯದಲ್ಲಿ'' ಹೃನ್ನಾಮಕನಾದ ಶ್ರೀಹರಿಯಲ್ಲಿ ಇಟ್ಟನೆಂದು ಅರ್ಥ.

ಅಥವಾ, ''ಅಹೃದಿ'' ಎಂದು ಪದವಿಭಾಗ. ''ಅಸ್ಯ ಹೃದಿ'' ವಿಷ್ಣುವಿನ ಸ್ನೇಹವಿಷಯದಲ್ಲಿ, ವಿಷ್ಣುವಿನಲ್ಲಿ ಭಕ್ತಿಗಾಗಿ ಮನಸ್ಸಿಟ್ಟ.

ಅಥವಾ ''ಮನಃ'' ಎಂದರೆ ಮನಸ್ಸಿನಲ್ಲಿ. ಸಪ್ತಸು ಪ್ರಥಮಾ. ಅರ್ಥಾತ್ ಮನೋಭಿಮಾನಿಯಾದ ರುದ್ರನಲ್ಲಿ ಮನಸ್ಸಿಟ್ಟ.

ಬುಧ್ಯಭಿಮಾನಿಯಾದ ಸರಸ್ವತಿಯೊಡನೆ ಇರುವ ಬ್ರಹ್ಮದೇವರು ''ಬುಧ್ಯಾಸ.'' ಈ ಬುಧ್ಯಾಸನನ್ನು ರುದ್ರನಲ್ಲಿ ಚಿಂತಿಸಿದ, ''ಹೃದಿ'' ಚಿತ್ತಾಧಿಷ್ಠಾತೃವಾದ ಬ್ರಹ್ಮನಲ್ಲಿ ''ಪರಮಂ ಆಧಾಯ'' ವಿಷ್ಣುವನ್ನು ಅನುಸಂಧಾನಿಸಿ ಜಾಪ್ಯವನ್ನು ಜಪಿಸಿದ. ಬ್ರಹ್ಮಾದಯೋ ವಿವಿಧಲಿಂಗಭಿಧಾಭಿಮಾನಾ ನೈತೇ ಯದೋಪಸಸೃಪುರ್ನಿಖಿಲಾತ್ಮಕತ್ವಾತ್ । ತತ್ರಾಖಿಲಾಮರವರೋ ಹರಿರಾವಿರಾಸೀತ್ । ಬ್ರಹ್ಮಾದಿಗಳ ವಾಚಕವಾದ ವಿಶೇಷಣಗಳಿದ್ದರೂ ಅವರ್‍ಯಾರು ಬರದಿದ್ದಾಗ ಶ್ರೀಹರಿ ಅವಿರ್ಭೂತನಾದ ಎಂಬುವ ಮಾತಿನಲ್ಲಿ ಈ ರುದ್ರಾಂತರ್ಯಾಮಿತ್ವ, ಬ್ರಹ್ಮಾಂತರ್ಯಾಮಿತ್ವ ಅಭಿಪ್ರೇತವಾಗಿದೆ. ಕಾರಣ ಆ ಮಾತಿನ ಮೂಲಕ ''ಮನೋಹೃದಿ'' ಎನ್ನುವ ಶಬ್ದಗಳಿಗೆ ಹೀಗೆ ಅರ್ಥೈಸಿದಾಗ ಅಸಂಗತಿ ಇಲ್ಲವೆನ್ನುವರು.

ಹೀಗೆ ಶ್ರೀಶನಿಲ್ಲದೆ ರಕ್ಷಕರಿಲ್ಲ ಎಂಬ ಜ್ಞಾನಜ್ಯೋತಿ ಬೆಳಗಿತು. ಕರಿರಾಜನ ವದನದಿಂದ ಮಂಗಳಗೀತೆ ಹೊರಹೊಮ್ಮಿತು. ಕರಿರಾಜನ ಮೊರೆಗಾಗಿ ಕಾದುನಿಂದ ಹರಿ ತ್ವರಿತದಿಂದಲಿ ಬಂದ. ಗರುಡಾರೂಢನಾದ ಹರಿಯನ್ನು ಕಂಡು ಕರಿರಾಜನ ಭಕ್ತಿ ಉಕ್ಕೇರಿತು.

ಸೋಽಂತಃ ಸರಸ್ಯುರುಬಲೇನ ಗೃಹೀತ ಆರ್ತೋ
ದೃಷ್ಟ್ವಾ ಗರುತ್ಮತಿ ಹರಿಂ ಖ ಉಪಾತ್ತಚಕ್ರಮ್ ॥
ಉತ್‌ಕ್ಷಿಪ್ಯ ಸಾಂಬುಜಕರಂ ಗಿರಮಾಹ ಕೃಚ್ಛ್ರಾತ್
ನಾರಾಯಣಾಖಿಲಗುರೋ ಭಗವನ್ನಮಸ್ತೇ ॥

ಸರೋವರದಲ್ಲಿ ಬೆಳೆದ ಕಮಲ ಒಂದನ್ನು ಕರಾಗ್ರದಲ್ಲಿ ಎತ್ತಿಹಿಡಿದು ಕಷ್ಟದಿಂದ ಭಕ್ತಿಯಿಂದ ನಾರಾಯಣ! ಅಖಿಲಗುರೋ! ಭಗವನ್! ನಮಸ್ತೇ ಎಂದು ಕೂಗಿ ವಂದಿಸಿದ.

ತಂ ವೀಕ್ಷ್ಯ ಪೀಡಿತಮಜಃ ಸಹಸಾಽವತೀರ್ಯ
ಸಗ್ರಾಹಮಾಶು ಸರಸಃ ಕೃಪಯೋಜ್ಜಹಾರ ।
ಗ್ರಾಹಾದ್ ವಿಪಾಟಿತಮುಖಾದರಿಣಾ ಗಜೇಂದ್ರಂ
ಸಂಪಶ್ಯತಾಂ ಹರಿರಮೂಮುಚದುಸ್ರಿಯಾಣಾಮ್ ॥

ಅವನ ಪ್ರಾರ್ಥನೆ ಮುಗಿಯುವಷ್ಟರಲ್ಲಿ ಭಗವಂತ ಕೆಳಗಿಳಿದು ಬಂದು, ಚಕ್ರದಿಂದ ನಕ್ರನನ್ನು ಕತ್ತರಿಸಿ, ಗಜರಾಜನನ್ನು ರಕ್ಷಿಸಿದ.

ಗರುಡನೂ ಆಯಾಸಗೊಂಡಿದ್ದ-

ಉತ್ತತ್ತಿರಹಿತನಾದ ಹರಿ ಗರುಡನು ಬಳಲಿ ಬೆಂಡಾದುದನ್ನು ಗಮನಿಸಿದ. ಇವನಿನ್ನು ಮುಂದೆ ವೇಗದಿಂದ ಹಾರಲಾರನೆಂಬುದನ್ನು ಗಮನಿಸಿ ಕೆಳಗಿಳಿದ, ಕೂಡಲೇ ಗಜೇಂದ್ರನಲ್ಲಿಗೆ ತಾನು ನಡೆದು ಬಂದನು. (ಅಜಃ ಪಾದಾಭ್ಯಾಂ ಗಚ್ಛನ್, ಅಜಗತಿಕ್ಷೇಪಣಯೋಃ) ಹೀಗೆ ಗರುಡನು ಬಳಲಿದನು ಎನ್ನುವುದನ್ನು ತಿಳಿಸಲು 'ತಂ ಗರುಡಂ ಪೀಡಿತಂ ವೀಕ್ಷ್ಯ' ಎಂದು ಅನ್ವಯ ಮಾಡಬೇಕು. ಹೀಗೆ ಅರ್ಥೈಸಿದಾಗಲೇ ಬೇಗನೇ ಕೆಳಗಿಳಿದ ಎನ್ನುವ ಮಾತು ಸಮಂಜಸವಾಗುತ್ತದೆ. ಇಲ್ಲವಾದರೆ ಭಗವಂತನೇಕೆ ಕೆಳಗಿಳಿದ ಎಂಬ ಪ್ರಶ್ನೆ ಕಾಡುತ್ತದೆ. ಸಿಂಹಾಚಲಮಾಹಾತ್ಮ್ಯ ಹೀಗೆ ಹೇಳುತ್ತದೆ-

ತ್ರಾಹೀತಿ ವ್ಯಾಹರಂತಂ ತ್ರಿದಶರಿಪುಸುತಂ ತ್ರಾತುಕಾಮೋ ರಹಸ್ಯೇ
ವಿಸ್ರಸ್ತಂ ಪೀತವಸ್ತ್ರಂ ನಿಜಕಟಿಯುಗಲೇ ಸವ್ಯಹಸ್ತೇನ ಗೃಹ್ಣನ್ ।

ವೇಗಶ್ರಾಂತಂ ನಿತಾಂತಂ ಖಗಪತಿಮಮೃತಂ ಪಾಯಯನ್ನನ್ಯಪಾಣೌ
ಸಿಂಹಾದ್ರೌ ಶೀಘ್ರಪಾತಕ್ಷಿತಿಪಿಹಿತಪದಃ ಪಾತು ಮಾಂ ನಾರಸಿಂಹಃ ॥

ನನ್ನನ್ನು ಸಲಹು ಎಂದು ಮೊರೆಯಿಡುವ ತ್ರಿದಶರಿಪುಸುತನನ್ನು ರಕ್ಷಿಸಬಯಸಿದ ಹರಿ, ತನ್ನ ಎಡಗೈಯಿಂದ ಸೊಂಟದಿಂದ ಜಾರಿದ ಪೀತಾಂಬರವನ್ನು ಪಿಡಿದು, ಮತ್ತೊಂದು ಕೈಯಿಂದ ವೇಗದಿಂದ ಬಹಳ ಬಳಲಿದ ಗರುಡನಿಗೆ ಅಮೃತಪಾನ ಮಾಡಿಸುತ್ತಾ ಸಿಂಹಾದ್ರಿಯಲ್ಲಿ ಶೀಘ್ರದಲ್ಲಿ ಪಾದವೂರಿದ ನಾರಸಿಂಹ ರಕ್ಷಿಸಲಿ. ಅಲ್ಲಿಯಂತೆ ಇಲ್ಲಿಯೂ ಗರುಡ ವೇಗದಿಂದ ಬಳಲಿದ್ದ ಎಂದೆನ್ನುವರು ಸತ್ಯಧರ್ಮರು.

ಅಮೃತಪಾನವಲ್ಲ ಜಲಪಾನ

ಅದಲ್ಲದೆ ಗರುಡನಿಗೆ ಅಮೃತಪಾನವೆಂದರೆ ಜಲಪಾನವಾಗಲಿ, ಘೃತಪಾನವನ್ನಾಗಲಿ ಮಾಡಿಸಿದ ಎನ್ನಬೇಕೆ, ಹೊರತು ಅಮೃತವನ್ನಲ್ಲ. ಏಕೆಂದರೆ ಭಾರತದ ಆದಿಪರ್ವದಲ್ಲಿ ಅಮೃತಪಾನವಿಲ್ಲದೆಯೂ ನಾನು ಅಜರಾಮರನಾಗಬೇಕೆಂದು ಗರುಡ ವರ ಬೇಡಿದನು. ಅದಕ್ಕೆ ಶ್ರೀಹರಿ ಹಾಗೇ ಆಗಲಿ ಎಂದು ವರ ವಿತರಿಸಿದ್ದಾನೆ.

ಅಜರಶ್ಚ ಅಮರಶ್ಚ ಸ್ಯಾಮಮೃತೇನ ವಿನಾಽಪ್ಯಹಮ್ ।
ಏವಮಸ್ತ್ವಿತಿ ತಂ ವಿಷ್ಣುರುವಾಚ ವಿನತಾಸುತಮ್ ॥

ಹೀಗಾಗಿ ಅಮೃತಪಾನ ಎಂದರೆ ಜಲಪಾನವನ್ನು ಮಾಡಿಸಿದನೆಂದರ್ಥೈಸಬೇಕು.

ಅಥವಾ ಶ್ರೀಹರಿಯ ಸಂಚಾರದಿಂದ ಪಾವಿತ್ರ್ಯವನ್ನು ಪಡೆದ ಭೂಸ್ಪರ್ಶಮಾತ್ರದಿಂದಲೇ ಕರಿಮಕರಗಳ ದುಷ್ಟದೇಹದಿಂದ ವಿಮುಕ್ತಿಯಾದೀತು ಎನ್ನುವವನಾಗಿ ಕೂಡಲೇ ತಾನೇ ಕೆಳಗಿಳಿದು ಬಂದ, ಎಂದಾಗಲಿ ಅರ್ಥೈಸಲು ಕಾರಣ ನೀಡುತ್ತಾರೆ.

ದಯಾಸಮುದ್ರನ ಭಕ್ತವಾತ್ಸಲ್ಯವನ್ನು ಕಂಡ ದೇವತೆಗಳು ಸಂತೋಷದಿಂದ ದೇವನಿಗೆ ಹೂಮಳೆಗರೆದು ವಂದಿಸಿದರು, ತುತಿಸಿದರು.

ಯಾರಿವರು ಕರಿಮಕರಗಳು

''ಹಾಹಾ'' ''ಹುಹೂ'' ಎಂಬ ಗಂಧರ್ವರಿದ್ದರು. ಇಚ್ಛಾರೂಪಿಗಳಾದ ಇವರಿಗೆ ವಿನೋದದಲ್ಲಿ ಆಸಕ್ತಿ. ಇವರ ವಿನೋದ ಮಿತಿಮೀರಿತು. ತಮ್ಮ ವಿನೋದಕ್ಕೆ ಒಂದು ದಿನ ಮುನಿಗಳನ್ನು ಉಪಯೋಗಿಸಿಕೊಂಡರು.

ಗಂಗಾತೀರದಲ್ಲಿ ''ದೇವಲ''ರೆಂಬ ಮುನಿಗಳು ತಪೋನಿರತರಾಗಿದ್ದರು. ಗಂಧರ್ವರು ಇಲ್ಲಿಗೂ ಬಂದರು. ವಿನೋದಕ್ಕಾಗಿ ದೇವಲರನ್ನು ಹೆದರಿಸಬೇಕೆಂದು ಬಯಸಿದರು. 'ಹುಹೂ' ಮೊಸಳೆಯಾದ. ಗಂಗೆಯಲ್ಲಿ ಬಂದು ಫೂತ್ಕರಿಸಿದ. ದೇವಲರು ಧ್ಯಾನದಿಂದ ಎದ್ದರು. ಮೊಸಳೆಯನ್ನು ನೋಡಿ ದಡಕ್ಕೆ ಓಡಿಬಂದರು. ದಡಕ್ಕೆ ಬಂದಾಗ ಅಲ್ಲಿ ''ಹಾಹಾ'' ಆನೆಯಾಗಿ ನಿಂತಿದ್ದ. ದೇವಲರನ್ನು ಹಿಡಿದು ಆಟವಾಡಿಸಿದ. ದೇವಲರು ಧ್ಯಾನದೃಷ್ಟಿಯಿಂದ ಇವರ ಕುದೃಷ್ಟಿಯನ್ನು ಕಂಡರು. ಹುಹೂವಿಗೆ ಮೊಸಳೆಯಾಗೆಂದರು. ಹಾಹಾನಿಗೆ ರಾಜನಾಗಿ ಆನೆಯಾಗೆಂದರು. ದೇವಲರನ್ನು ಹಾಹಾ ಆನೆಯಾಗಿ ಸೊಂಡಿಲಿನಿಂದ ಹಿಡಿದು ಮೇಲೆ ಕೆಳಗೆ ಉಯ್ಯಾಲೆಯಂತೆ ಆಟವಾಡಿಸಿದ. ಆಗ ದೇವಲರಿಗೆ ಒಂದು ರೀತಿಯ ಅವ್ಯಕ್ತ ಆನಂದವಾಗಿತ್ತು. ಆನಂದದ ಫಲದಿಂದ ರಾಜನಾಗಿ ಆನೆಯಾಗೆಂದರು. ಹೀಗಾಗಿ ಹಾಹಾ ಗಂಧರ್ವ ಇಂದ್ರದ್ಯುಮ್ನರಾಜನಾದ, ಪಾಂಡ್ಯದೇಶವನ್ನು ಧರ್ಮದಿಂದ

ಆಳಿದ. ಕೊನೆಗೆ ತಪಸ್ಸಿಗಾಗಿ ಕಾಡಿಗೆ ಹೊರಟ. ಕಾಡಿನಲ್ಲಿರುವಾಗ ಒಂದು ದಿನ ಅಗಸ್ತ್ಯರು ಬಂದರು. ಪೂಜಾಸಕ್ತನಾದ ರಾಜ ಋಷಿಗಳನ್ನು ಕಂಡರೂ ಗೌರವಿಸಲಿಲ್ಲ. ಸತ್ಕರಿಸದ ರಾಜನಿಗೆ ಪ್ರಾಣಿಯಾಗೆಂದು ಶಪಿಸಿ ನಡೆದರು.

ಈ ಗಜೇಂದ್ರಮೋಕ್ಷವನ್ನು ಅವಶ್ಯವಾಗಿ ಮುಂಜಾವಿನಲ್ಲಿ ಹಾಡಬೇಕು. ಇದರಿಂದ ದುಃಸ್ವಪ್ನಗಳು ದೂರವಾಗುತ್ತವೆ. ಶ್ರೇಯಸ್ಸೂ ದೊರೆಯುತ್ತದೆ. ಅಂತ್ಯಕಾಲದಲ್ಲಿ ನಿರ್ಮಲಜ್ಞಾನ ನೀಡುತ್ತಾನೆ ಶ್ರೀಹರಿ.

ಎರಡು ಮೂರು ಅಧ್ಯಾಯಗಳಲ್ಲಿ ಹೇಳಿದ ಗಜೇಂದ್ರ ಮೋಕ್ಷವನ್ನು ದ್ವಿತೀಯಸ್ಕಂಧದಲ್ಲಿ ಎರಡು ಶ್ಲೋಕಗಳಲ್ಲಿ ಸಂಗ್ರಹಿಸಿರುವರು ವ್ಯಾಸರು. ಈ ಮಂತ್ರಗಳಿಂದ ಹರಿಯನ್ನು ಪ್ರಾತಃಕಾಲದಲ್ಲಿ ನೆನೆದರೆ ಭವದಲ್ಲಿ ಅತಂತ್ರರಾದ ನಮ್ಮನ್ನು ಉದ್ಧರಿಸಿ ಸ್ವತಂತ್ರರನ್ನಾಗಿಸುತ್ತಾನೆ. ಮೋಕ್ಷ ನೀಡುತ್ತಾನೆ.

ಅಂತಃ ಸರಸ್ಯುರುಬಲೇನ ಪದೇ ಗೃಹೀತೋ
ಗ್ರಾಹೇಣ ಯೂಥಪತಿರಂಬುಜಹಸ್ತ ಆರ್ತಃ ।
ಆಹೇದಮಾದಿಪುರುಷಾಖಿಲ ಲೋಕನಾಥ
ತೀರ್ಥಶ್ರವಃ ಶ್ರವಣಮಂಗಲನಾಮಧೇಯ ॥
ಸ್ಮೃತ್ವಾ ಹರಿಸ್ತಮಣಣಾರ್ಥಿನಮಪ್ರಮೇಯ-
ಶ್ಚಕ್ರಾಯುಧಃ ಪತಗರಾಜಭುಜಾಧಿರೂಢಃ ।
ಚಕ್ರೇಣ ನಕ್ರವದನಂ ವಿನಿಪಾಟ್ಯ ತಸ್ಮಾತ್
ಹಸ್ತೇ ಪ್ರಗೃಹ್ಯ ಭಗವಾನ್ ಕೃಪಯೋಜ್ಜಹಾರ ॥

ರೈವತಮನ್ವಂತರ

ಐದನೆಯ ಮನು ತಾಪಸ ಸಹೋದರ. ಅವನು ರೈವತನು. ಈ ರೈವತಮನ್ವಂತರದಲ್ಲಿ ಶುಭ್ರಾವಿಕುಂಠ ದಂಪತಿಗಳಲ್ಲಿ ವಿಕುಂಠನಾಮಕನಾಗಿ ಅವತರಿಸಿದನು ಭಗವಂತನು. ಈ ವಿಕುಂಠನಾಮಕ ಶ್ರೀಹರಿಯು ತನ್ನ ಮಡದಿಯಾದ ರಮಾದೇವಿಯಿಂದ ಪ್ರಾರ್ಥಿತನಾಗಿ ಅವಳ ಇಚ್ಛೆಯನ್ನು ನೆರವೇರಿಸುವುದಕ್ಕಾಗಿ ''ವೈಕುಂಠ'' ಲೋಕವನ್ನು ನಿರ್ಮಿಸಿದನು. ಆರನೆಯ ಮನ್ವಂತರ ಚಾಕ್ಷುಷ. ಈ ಚಾಕ್ಷುಷ ಮನ್ವಂತರದಲ್ಲಿ ಅಜಿತನಾಮಕ ಭಗವಂತನ ಅವತಾರವಾಯಿತು. ಅಜಿತನಾಮಕ ಭಗವಂತನೇ ಅಮೃತ ಪ್ರಾಪ್ತಿಗಾಗಿ ದೇವದಾನವರಿಂದ ಅವರಲ್ಲಿ ತಾನು ಪ್ರೇರಕನಾಗಿ ನಿಂತು ಆ ಸಮುದ್ರಮಥನವನ್ನು ಮಾಡಿಸಿದನು.

ಇಂದ್ರ ದೂರ್ವಾಸರನ್ನು ಅವಮಾನಿಸಿದ.

ಒಮ್ಮೆ ದೂರ್ವಾಸರು ಸಂಚರಿಸುತ್ತಾ ಓರ್ವ ವಿದ್ಯಾಧರ ಸ್ತ್ರೀಯನ್ನು ಕಂಡರು. ಅವಳ ಬಳಿ ಒಂದು ಸುಂದರವಾದ ಹೂಮಾಲೆಯಿತ್ತು. ಆ ಮಾಲೆಯನ್ನು ಕೇಳಿಪಡೆದರು. ತಾವು ಪಡೆದ ಮಾಲೆಯನ್ನು ಮೌಲಿಯಲ್ಲಿ ಧರಿಸಿ ಬರುವಾಗ ಗಜಾಧಿರೂಢನಾದ ದೇವೇಂದ್ರ ಎದುರುಗೊಂಡ. ದೂರ್ವಾಸರು ತಮ್ಮ ಬಳಿಯಿದ್ದ ಮಾಲೆಯನ್ನು ದೇವೇಂದ್ರನಿಗೆ ಕೊಟ್ಟರು. ದೇವೇಂದ್ರ ಆ ಮಾಲೆಯನ್ನು ಆನೆಯ ಮೇಲೆ ಹಾಕಿದನು. ಆನೆ ಮಾಲೆಯನ್ನು ಕೆಳಗೆ ಹಾಕಿ ಕಾಲಿನಿಂದ ಹೊಸಕಿತು. ಇದನ್ನು ಕಂಡ ದೂರ್ವಾಸರು ಕೋಪಗೊಂಡರು.

ದೇವೇಂದ್ರ! ನಾನು ಕೊಟ್ಟ ಮಾಲೆಯನ್ನು ಪ್ರಸಾದವೆಂದು ಸ್ವೀಕರಿಸುವ ಬದಲು, ನೆಲಕ್ಕೆ ಹಾಕುವ ಉದ್ಧಟತನವನ್ನು ಪ್ರದರ್ಶಿಸಿದ್ದೀಯಾ! ನಿನ್ನ ಸ್ಥಾನದ ಮದವನ್ನು ದಮನ ಮಾಡುತ್ತೇನೆ. ಸ್ಥಾನ ಭ್ರಷ್ಟನಾಗೆಂದು ಶಪಿಸಿದರು. ದುರ್ವಾಸರ ದುರ್ವಾಕ್ಯಕ್ಕೆ ಬೆದರಿದ ದೇವೇಂದ್ರ ಒಡನೆಯೇ ಆನೆಯಿಂದ ಕೆಳಗಿಳಿದ.

ದೂರ್ವಾಸರ ಪಾದಗಳಿಗೆರಗಿದ. ಕ್ಷಮೆಯಾಚಿಸಿದ. ದುರ್ವಾಸರು ಕ್ಷಮಿಸಲಿಲ್ಲ. ದೇವೇಂದ್ರ! ''ತಪ್ಪು ಮಾಡುವುದು ಕ್ಷಮೆ ಕೇಳುವುದು ನಿನಗೆ ಅಭ್ಯಾಸವಾಗಿ ಹೋಗಿದೆ. ನಾನು ನಿನ್ನನ್ನು ಖಂಡಿತ ಕ್ಷಮಿಸುವುದಿಲ್ಲ'' ಎಂದು ನಡೆದೇ ಬಿಟ್ಟರು. ದೊಡ್ಡವರಲ್ಲಿ ಮಾಡಿದ ಸಣ್ಣ ಅಪರಾಧದಿಂದ ದೇವೇಂದ್ರನ ತ್ರಿಲೋಕಾಧಿಪತ್ಯವೇ ನಾಶವಾಯಿತು.

ದುರ್ವಾಸರ ಶಾಪ ದೈತ್ಯರಿಗೆ ತಿಳಿಯಿತು. ದೈತ್ಯರು ದೇವತೆಗಳ ಮೇಲೆ ಆಕ್ರಮಣ ನಡೆಸಿದರು. ದೇವತೆಗಳು ಸೋತು ಓಡಿದರು. ಅಂದಿನಿಂದ ಯಜ್ಞಯಾಗಾದಿಗಳು ನಶಿಸಿದವು.

ಅತ್ತಕಡೆ ದೈತ್ಯರ ಅಟ್ಟಹಾಸ. ಇತ್ತಕಡೆ ದೇವತೆಗಳು ಚಿಂತಾಕ್ರಾಂತರಾದರು. ದಾರಿ ತೋರದೆ ಚತುರ್ಮುಖನ ಬಳಿ ಸಾಗಿದರು. ಹೀಗೆ ದುರ್ವಾಸರ ಶಾಪ ಅಮೃತಮಥನಕ್ಕೆ ನಾಂದಿಯಾಯಿತು ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನು. ಇಂದ್ರಾದಿಗಳು ನಿರ್ಬಲರಾದುದನ್ನು ಕಾಂತಿಹೀನರಾದುದನ್ನು, ಹಾಗೆಯೇ ಇಡೀ ಜಗತ್ತೇ ಅಮಂಗಲ ವಾದುದನ್ನು ನೋಡಿದನು. ದೇವತೆಗಳ ಪ್ರಾರ್ಥನೆಗೆ ಓಗೊಟ್ಟ ಬ್ರಹ್ಮದೇವ ದೇವರ ಬಳಿ ಸಾಗೋಣವೆಂದ. ಶರಣಾಗತ ವತ್ಸಲನಾದ ಭಗವಂತನ ಬಳಿ ಎಲ್ಲರೂ ನಡೆದರು. ಅಲ್ಲಿ ಭಗವಂತ ಕಾಣಿಸಲಿಲ್ಲ. ಬ್ರಹ್ಮದೇವರು ಆಗಮ ಪ್ರತಿಪಾದ್ಯನಾದ ಶ್ರೀಹರಿಯನ್ನು ಅದ್ಭುತವಾಗಿ ಸ್ತೋತ್ರ ಮಾಡಿದರು. ಎಲ್ಲ ದೇವತೆಗಳೂ ಸ್ತುತಿಸಿದರು.

ನಮಸ್ತುಭ್ಯಮನಂತಾಯ ದುರ್ವಿತರ್ಕ್ಯಾತ್ಮಕರ್ಮಣೇ ।
ನಿರ್ಗುಣಾಯ ಗುಣೇಶಾಯ ಸತ್ವಸ್ಥಾಯ ಚ ಸಾಂಪ್ರತಮ್ ॥
ಅಜಾಯ ಜನ್ಮಸ್ಥಿತಿಸಂಯಮಾಯ ಗುಣಾಯ ನಿರ್ವಾಣಸುಖಾರ್ಣವಾಯ ।
ಅಣೋರಣಿಮ್ನೇಽಪರಿಗಣ್ಯಧಾಮ್ನೇ ಮಹಾನುಭಾವಾಯ ನಮೋನಮಸ್ತೇ ॥

ಅಜಿತ ಅಭಯ ನೀಡಿದ

ಅಜಿತನಾಮಕ ಹರಿ ಪ್ರತ್ಯಕ್ಷನಾದ. ಅವನ ಪ್ರಭೆಗೆ ಕೋಟಿಸೂರ್ಯರು ಸಾಟಿಯಾಗರು. ಕಣ್ಕೋರೈಸುವ ಕಾಂತಿಯ ಕಂಡ ಅನಿಮಿಷರೂ ಕಣ್ಮುಚ್ಚಿದರು. ಬ್ರಹ್ಮರುದ್ರರು ಸರ್ವಾಭರಣಭೂಷಿತನಾದ ಶ್ರೀಹರಿಯನ್ನು ಸಾಷ್ಟಾಂಗವೆರಗಿದರು. ಸರ್ವಜ್ಞನಾದ ಶ್ರೀಹರಿಗೆ ಬಂದ ಕಾರ್ಯವನ್ನು ವಿಜ್ಞಾಪಿಸುವುದೇನು ಎಂದರು.

ಅಜಿತ ನಾಮಕ ಹರಿಯು ಅಜಾದಿಗಳ ಆಂತರ್ಯವನ್ನು ಅರಿತು ಅವರಿಗೆಲ್ಲ ಅಭಯದಾನ ಮಾಡಿದ. ಬ್ರಹ್ಮಾದಿಗಳೇ! ನಾನು ಹೇಳಿದಂತೆ ಮಾಡಿರಿ. ನಿಮಗೆ ಮಂಗಳವಾಗುವುದು.

ಅರಯೋಽಪಿ ಹಿ ಸಂಧೇಯಾಃ ಸತಿ ಕಾರ್ಯಾರ್ಥಗೌರವೇ ।
ಅಹಿಮೂಷಕವದ್ದೇವಾ ಹ್ಯರ್ಥಸ್ಯ ಪದವೀಂ ಗತೈಃ ॥

ಬ್ರಹ್ಮಾದಿದೇವತೆಗಳಿಗೆ ಶ್ರೀಹರಿ ಕಥೆಯೊಂದನ್ನು ಹೇಳಿದ. ಒಬ್ಬ ಹಾವಾಡಿಗ ಹಾವೊಂದನ್ನು ಬುಟ್ಟಿಯಲ್ಲಿ ಹಾಕಿಟ್ಟಿದ್ದನು. ಉಸಿರಾಟಕ್ಕಾಗಿ ಸ್ವಲ್ಪ ಜಾಗ ಬಿಟ್ಟಿದ್ದನು. ಬಂಧನದಲ್ಲಿದ್ದ ಸರ್ಪ ಬಹಳ ನೊಂದಿತ್ತು. ಒಂದು ದಿನ ಹಾವಿಗೆ ಆಹಾರವೆಂದು ಇಲಿಯೊಂದನ್ನು ಬುಟ್ಟಿಯೊಳಗೆ ಹಾಕಿದನು. ಹಸಿದ ಹಾವು ಮೂಷಿಕವನ್ನು ಕೂಡಲೇ ತಿನ್ನಲಿಲ್ಲ. ವಿಚಾರಮಾಡಿತು. ಈ ಇಲಿಯನ್ನು ತಿಂದರೂ ಹಾವಾಡಿಗನ ಬಂಧನ ತಪ್ಪುವುದಿಲ್ಲ. ಅದಕ್ಕಾಗಿ ಒಂದು ಉಪಾಯವನ್ನು ಹೂಡಬೇಕು. ಇಲಿಯನ್ನು ತಿನ್ನಬೇಕು. ಬಂಧನವೂ ತಪ್ಪಬೇಕೆಂದು ಆಲೋಚಿಸಿ, ಇಲಿಯೊಂದಿಗೆ ಸ್ನೇಹ ಬೆಳೆಸಿತು. ಹಿತಶತ್ರುವನ್ನು ನಂಬಿದ ಇಲಿಗೆ ಸರ್ಪ ಹೇಳಿತು, ''ನಾನು ಹೆಡೆ ಬಿಡಿಸಿ

ಕೊಡುತ್ತೇನೆ. ನೀನು ನನ್ನ ತಲೆಯ ಮೇಲೇರಿ ಬಿದಿರಿನ ಕಡ್ಡಿಯನ್ನು ಕಡಿದುಹಾಕು. ಅನಂತರ ಇಬ್ಬರೂ ಹೊರಗೆ ಹೋಗಬಹುದು'' ಎಂದಿತು.

ಇಲಿ ಹಾಗೆಯೇ ಮಾಡಿತು. ಕೂಡಲೇ ಸರ್ಪ ಇಲಿಯನ್ನು ಮೆದ್ದು ಹೊರಹೋಯಿತು. ಈ ಕಥೆಯೇ ನಿಮಗೆ ಮಾರ್ಗದರ್ಶಕ. ನೀವೂ ಸ್ವಲ್ಪಕಾಲ ದೈತ್ಯರೊಡನೆ ಸಂಧಿ ಮಾಡಿಕೊಳ್ಳಿ. ಅಮೃತಪ್ರಾಪ್ತಿಯ ನೆಪದಿಂದ ಒಟ್ಟಿಗಿರಿ. ಅಮೃತ ಸಿಕ್ಕಮೇಲೆ ಜಯ ನಿಮಗೇ ಸರಿ ಎಂದು ಹೇಳಿ ಶ್ರೀಹರಿ ಅಂತರ್ಧಾನನಾದ.

ಸಮುದ್ರಮಥನ

ದೇವತೆಗಳೆಲ್ಲರೂ ಸ್ವರ್ಗಕ್ಕೆ ನಡೆದರು. ದೇವತೆಗಳನ್ನು ಕಂಡ ದೈತ್ಯರು ಜಗಳಕ್ಕೆ ಕಾಲ್ಕೆರೆದು ಬಂದರು. ಆ ಸಮಯದಲ್ಲಿ ದೈತ್ಯನಾಯಕ ಬಲಿ ಅವರನ್ನು ತಡೆದ. ''ಸ್ವಲ್ಪಕಾಲ ಸುಮ್ಮನಿರಿ. ಅವರೇಕೆ ಬಂದಿರುವರು, ವಿಚಾರ ಮಾಡೋಣ'' ಎಂದ ಬಲಿ. ಅಜಿತನ ಉಪದೇಶದಂತೆ ಮಹೇಂದ್ರನು ನಯವಾಗಿ ಮಾತನಾಡಿದನು. ಅಮೃತಪ್ರಾಪ್ತಿಯ ಆಮಿಷ ಒಡ್ಡಿದರು. ದೈತ್ಯರೆಲ್ಲರೂ ಅಂಗೀಕರಿಸಿದರು.

ಮಂದರ ಪರ್ವತವನ್ನು ಕಡಗೋಲನ್ನಾಗಿ ಮಾಡಲು ನಿಶ್ಚಯಿಸಿದರು.

ತತಸ್ತೇ ಮಂದರಗಿರಿಂ ಅಂಜಸೋತ್ಪಾಟ್ಯ ದುರ್ಮದಾಃ ।
ನದಂತ ಉದಧಿಂ ನಿನ್ಯುಃ ಶಕ್ತಾಃ ಪರಿಘಬಾಹವಃ ॥

ಆಮೇಲೆ ದೇವದಾನವರು ಸೇರಿ ಪೂರ್ಣವಾಗಿ ಮಂದರವನ್ನು ಕಿತ್ತಿ ಸಮುದ್ರಕ್ಕೆ ಒಯ್ದರು.

ಆದಿಪರ್ವದ ವಿರೋಧವಿಲ್ಲ.

ಮಂದರಪರ್ವತವನ್ನು ಎತ್ತಲಸಾಧ್ಯವಾದ ದೇವಸಮೂಹ ಹರಿಬ್ರಹ್ಮರೆಡೆಗೆ ಬಂದು ನೀವಿಬ್ಬರು ಸೇರಿ ನಮ್ಮ ಹಿತಕ್ಕಾಗಿ ಮಂದರ ಪರ್ವತ ಉದ್ಧರಣದಲ್ಲಿ ಪ್ರಯತ್ನಶೀಲರಾಗಿರಿ ಎಂದು ಪ್ರಾರ್ಥಿಸಿದರು. ಹಾಗೆ ಬ್ರಹ್ಮದೇವರು ಪ್ರಾರ್ಥಿಸಿದರು. ಸರಿಯೆಂದು ಶ್ರೀಹರಿಯು ಆ ಮಂದರವನ್ನು ಕಿತ್ತಿದನು ಎಂದು ಆದಿಪರ್ವತದಲ್ಲಿ ಹೇಳಿದೆ. ಇಲ್ಲಿ ಭಾಗವತದಲ್ಲಿ ದೇವದಾನವರು ಪರ್ವತವನ್ನು ಎತ್ತಿ ಸಿಂಹನಾದ ಗೈಯುತ್ತ ಸಮುದ್ರಕ್ಕೆ ನಡೆದರು ಎಂದಿದೆ. ಭಾಗವತ ಮಹಾಭಾರತಗಳಿಗೆ ವಿರೋಧ ಉಂಟಾಯಿತಲ್ಲಾ? ಎಂದರೆ ನಿಜ! ಆದರೆ, ದೇವತೆಗಳು ಸಮುದ್ರಕ್ಕೆ ಗಿರಿಯನ್ನು ಒಯ್ದರು, ಎನ್ನುವುದಕ್ಕೆ ಮುಂಚೆಯೇ ನಡೆದಿರುವ ಕಥಾಭಾಗವನ್ನು ಭಾಗವತದಲ್ಲಿ ಸೇರಿಸಿಕೊಳ್ಳಬೇಕು. ಹೀಗಾಗಿ ವಿರೋಧ ಬರುವುದಿಲ್ಲ. ಅನುಕ್ತಿ ದೋಷವಲ್ಲ. ಇದಕ್ಕೆ ಸಮ್ಮತಿಯಾಗಿ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದ ಶ್ಲೋಕಗಳನ್ನು ಹೇಳುವರು ಶ್ರೀಚರಣರು.

ಮಂಥನ ಆರಂಭವಾಯಿತು. ವಿಷ ಉತ್ಪನ್ನವಾಯಿತು. ಆ ವಿಷ ಸಂಹಾರಕ್ಕಾಗಿ ರುದ್ರಪ್ರಾರ್ಥನೆ. ಆಗ ರುದ್ರದೇವರು ವಿಷಪಾನ ಮಾಡಿದರು.

ಪದ್ಮಪುರಾಣಕ್ಕೂ ಗೌರವ :

ತತಃ ಕರತಲೀಕೃತ್ಯ ವ್ಯಾಪಿ ಹಾಲಾಹಲಂ ವಿಷಮ್ ।
ಅಭಕ್ಷಯನ್ ಮಹಾದೇವಃ ಕೃಪಯಾ ಭೂತಭಾವನಃ ॥

ಈ ಶ್ಲೋಕಕ್ಕೆ ಮೇಲುನೋಟಕ್ಕೆ ಮಹಾದೇವ ವಿಷಪಾನಗೈದನೆಂದು ಕಾಣುವದು. ಇಷ್ಟೇ ಅರ್ಥವೆಂದಿಟ್ಟು

ಕೊಂಡರೆ, ಹಾಲಾಹಲಂ, ವಿಷಂ, ಎನ್ನುವ ಎರಡು ಪದಗಳೇಕೆ? ಯಾವುದಾದರೂ ಒಂದು ಸಾಕಲ್ಲವಾ? ಎಂದು ಸಂದೇಹ ಬರುತ್ತದೆ. ಕಾರಣ ಈ ಸಂದೇಹ ಮಂದೀಕರಿಸಲು ''ತತಃ'' ಎನ್ನುವುದಕ್ಕೆ ಆವೃತ್ತಿ, ಅರ್ಥಾಂತರಗಳನ್ನು ಮಾಡಿಕೊಂಡು ಅನ್ವಯ ಮಾಡಬೇಕು. ತತಃ, ಸತಿಯ ಅನುಮೋದನಾನಂತರದಲ್ಲಿ (ವ್ಯಾಪಿ) ಕೈ ಪೂರ್ಣ ತುಂಬಿದ ವಿಷವನ್ನು ರುದ್ರಪಾನಗೈದ. ತತಃ, ಆಮೇಲೆ, ''ವ್ಯಾಪಿ,'' ಉಕ್ಕೇರುತ್ತಿರುವ, ಹಾಲಾಹಲವನ್ನು ''ತತಃ'' ವಾಯುದೇವರು ಪಾನ ಮಾಡಿದರು. ವಿಶ್ವಕೋಶವು ''ತತ'' ಶಬ್ದಕ್ಕೆ

ತತಂ ವೀಣಾದಿವಾದ್ಯೇ ಚ ಪವಮಾನೇ ತತಃ ಪುನಃ ||

ಪವಮಾನ ಎಂಬರ್ಥವನ್ನು ಹೇಳುತ್ತಿದೆ. ಕಾರಣ ಹೀಗೆ ಅನ್ವಯಾರ್ಥ ಮಾಡಿದಾಗ, ಹಾಲಾಹಲ ವಿಷ ಶಬ್ದಗಳಲ್ಲಿ ಒಂದೇ ಸಾಕು ಎನ್ನುವ ಪ್ರಶ್ನೆಗೆ ಅವಕಾಶವಿಲ್ಲ. ಅಷ್ಟಲ್ಲದೆ ಪದ್ಮಪುರಾಣ, ವಾಯುದೇವರೇ ವಿಷಪಾನ ಮಾಡಿದರು ಎನ್ನುತ್ತಿದೆ. ಈ ಪದ್ಮಪುರಾಣಕ್ಕೂ ಗೌರವ ನೀಡಿದಂತಾಗುತ್ತದೆ.

ಲಕ್ಷ್ಮಿಯ ಆವಿರ್ಭಾವ

ದೇವದಾನವರು ಮತ್ತೆ ಮಥನ ಮುಂದುವರಿಸಿದರು. ಕಾಮಧೇನು, ಉಚ್ಚೈಶ್ರವ, ಐರಾವತ, ಪಾರಿಜಾತ ಮುಂತಾದ ವಸ್ತುಗಳು ಉದ್ಭವಿಸಿದವು. ಬ್ರಾಹ್ಮಣರು, ಇಂದ್ರ ಮೊದಲಾದವರು ಅವುಗಳನ್ನು ಸ್ವೀಕರಿಸಿದರು. ಮತ್ತೆ ಸಮುದ್ರಮಥನ ನಡೆದಾಗ ಲಕ್ಷ್ಮಿಯು ಆವಿರ್ಭವಿಸಿದಳು.

ತತಶ್ಚಾವಿರಭೂತ್ ಸಾಕ್ಷಾಚ್ಛ್ರೀರಮಾ ಭಗವತ್ಪ್ರಿಯಾ ।

ಆಮೇಲೆ ಭಾಗವತ ಮುಂದುವರಿಯುತ್ತ ದೇವದಾನಮಾನವರು ಅವಳಲ್ಲಿ ಅನುರಕ್ತವಾದರು ಎನ್ನುತ್ತದೆ. ''ತಸ್ಯಂ ಚಕ್ರುಃ ಸ್ಪೃಹಾಂ ಸರ್ವೇ ಸಸುರಾಸುರಮಾನವಾಃ.''

ದೇವತೆಗಳು ಎಂದಿಗೂ ಜಗನ್ಮಾತೆಯನ್ನು ಬಯಸುವವರಲ್ಲ. ಕಾರಣ ಪದಚ್ಛೇದ ಮಾಡಿ ವ್ಯಾಖ್ಯಾನಿಸುವರು ಸತ್ಯಧರ್ಮರು-

''ಅಸಸುರಾಸುರಮಾನವಾಃ'' ಎಂದು ಪದವಿಭಾಗ ತೋರಿಸುವರು. ದೇವತೆಗಳಿಂದ ಸಹಿತರಾಗದ ಅಸುರರು, ಹಾಗೂ ಅಸಜ್ಜನರು ಲಕ್ಷ್ಮಿಯನ್ನು ಬಯಸಿದರು.

ಅಥವಾ ''ಸಸೈನ್ಯಂ ರಾವಣಂ ಹತ್ವಾ'' ಎನ್ನುವಲ್ಲಿ ಸೈನ್ಯದೊಟ್ಟಿಗೆ ರಾವಣನ ಹನನವಲ್ಲ. ಸಂಹಾರವಾದದ್ದು ಕೇವಲ ರಾವಣನದೇ, ಆದರೂ ಹೇಗೆ ಸೈನ್ಯ ಜೊತೆಯಲ್ಲಿತ್ತೋ ಹಾಗೆ ದೇವತೆಗಳು ಜೊತೆಯಲ್ಲಿದ್ದರಷ್ಟೇ! ಹೊರತು ಲಕ್ಷ್ಮಿಯನ್ನು ಬಯಸಲಿಲ್ಲ ಎಂದೇ ಅರ್ಥೈಸಬೇಕು ಎನ್ನುವ ಅಭಿಪ್ರಾಯ ಶ್ರೀಚರಣರದು.

ಜ್ಞಾನಿಗಳಿಗೂ ಮೋಹಕವಾಗುವ ಸೌಂದರ್ಯ ಲಕ್ಷ್ಮೀದೇವಿಯಲ್ಲಿತ್ತು ಎನ್ನುವುದನ್ನು ಸೂಚಿಸಲು ''ಸುರ'' ಪದವೆನ್ನುತ್ತಾರೆ, ಛಲಾರಿ ಆಚಾರ್ಯರು.

ಆಮೇಲೆ ರಮಾದೇವಿಯು ಇತರ ದೇವತೆಗಳಲ್ಲಿ ದೋಷಗಳನ್ನು ಎಣಿಸಿ ನಿರ್ದೋಷನಾದ ಭಗವಂತನನ್ನು ವರಿಸಿದಳು. ಆಮೇಲೆ ಶ್ರೀಹರಿಯು ಧನ್ವಂತರೀ ರೂಪನಾಗಿ ಅಮೃತಕಲಶವನ್ನು ಹಿಡಿದು ಬಂದನು. ಅದನ್ನೇ ದೈತ್ಯರು ಅಪಹರಿಸಿದರು.

ತೇಷಾಂ ಸತ್ಯಾಚ್ಚಾಲನಾರ್ಥಂ ಹರಿರ್ಧನ್ವಂತರಿರ್ವಿಭುಃ ।
ಸಮರ್ಥೋಽಪ್ಯಸುರಾಣಾಂ ತು ಸ್ವಹಸ್ತಾದಮುಚತ್ಸುಧಾಮ್ ॥

ಮೊದಲು ಮಾಡಿದ ಪ್ರತಿಜ್ಞೆ. ಎಲ್ಲರೂ ಸೇರಿ ಅಮೃತ ಕುಡಿಯುವದೆಂದು,'' ಆದರೆ ಆ ಮಾತಿಗೆ ಚ್ಯುತಿಯನ್ನು ತರುವುದಕ್ಕಾಗಿ ದೈತ್ಯರು ಅಮೃತಕಲಶ ಅಪಹರಿಸಿದಾಗ ತಾನು ಸುಮ್ಮನಿದ್ದ ಶ್ರೀಹರಿ. ಹೊರತಾಗಿ ಅಸಾಮರ್ಥ್ಯದಿಂದಲ್ಲ.

ಶ್ರೀಹರಿ ಮೋಹಿನೀರೂಪನಾಗಿ ದೈತ್ಯರನ್ನು ವಂಚಿಸಿದ. ಈ ವಂಚನೆಯು ದೈತ್ಯರೇ ತೋರಿದ ದಾರಿ. ಮೊದಲು ತಾವು ಕಸಿದುಕೊಂಡರಷ್ಟೇ! ಆದರೆ ದೇವರು ಅವರಿಂದ ಕಸಿದುಕೊಂಡು ದೇವತೆಗಳಿಗೆ ಅಮೃತ ಕುಡಿಸಿದ. ದೇವದಾನವರು ಸೇರಿಕೊಂಡು ಸಮದೇಶ ಸಮಕಾಲಗಳಲ್ಲಿ ಮಥನ ಮಾಡಿದರು. ಆದರೆ ಅಮೃತಪಾನ ಮಾತ್ರ ದೇವತೆಗಳಿಗೆ. ಏಕೆಂದರೆ ದೇವತೆಗಳು ಭಗವಂತನ ಪಾದಕಮಲಗಳನ್ನು ಆಶ್ರಯಿಸಿದ್ದರು. ದೈತ್ಯರು ಪಾದಕಮಲವಾಶ್ರಯಿಸಲಿಲ್ಲ. ಅಮೃತವನ್ನೇ ಹೊಂದಲಿಲ್ಲ, ಇದೆಲ್ಲವೂ ಭಗವಂತನ ಇಚ್ಛೆಯಂತೆ ನಡೆಯುವದು.

ಏವಂ ಸುರಾಸುರಗಣಾಃ ಸಮದೇಶಕಾಲ-
ಹೇತ್ವರ್ಥಯೋಗಗತಯೋಽಪಿ ಫಲೇ ವಿಕಲ್ಪಾಃ ।
ತತ್ರಾಮೃತಂ ಸುರಗಣಾಃ ಫಲಮಂಜಸಾಽಽಪುಃ
ಯತ್ಪಾದಪಂಕಜರಜಃಶ್ರಯಣಾನ್ನದೈತ್ಯಾಃ ॥

ದೈತ್ಯರ ಆಕ್ರಮಣ ದೇವತೆಗಳ ಪಲಾಯನ

ಶುಕಾಚಾರ್ಯರು ಏಳು ಮನ್ವಂತರಗಳನ್ನು ನಿರೂಪಿಸಿ ಎಂಟನೆಯ ಮನ್ವಂತರ, ಹಾಗೆ ಇನ್ನುಳಿದ ಎಲ್ಲ ಮನ್ವಂತರಗಳನ್ನು ಪರೀಕ್ಷಿತನಿಗೆ ನಿರೂಪಿಸಿದರು. ಪರೀಕ್ಷಿತ ಶುಕಾಚಾರ್ಯರನ್ನು ಕೇಳಿದ. ಪೂರ್ಣನಾದ ಶ್ರೀಹರಿ ವಾಮನನಾಗಿ ಬಂದು ಬಲಿಯ ಬಳಿ ಮೂರು ಹೆಜ್ಜೆ ಭೂಮಿಯನ್ನೇಕೆ ಬೇಡಿದ. ಅದಕ್ಕೆ ಶುಕರು ಉತ್ತರಿಸಿದರು. ಹರಿಯ ಕರುಣೆಯಿಂದ ದೇವತೆಗಳೆಲ್ಲರೂ ಅಮೃತಪಾನ ಮಾಡಿ ಜಯಗಳಿಸಿದ್ದಾರೆ. ದಾನವರು ದೇವತೆಗಳ ವಿರುದ್ಧ ಪುನಃ ಕದನಕ್ಕೆ ಅಣಿಯಾದರು. ಏನಾದರು ಮಾಡಿ ದೇವತೆಗಳನ್ನು ಸೋಲಿಸಬೇಕೆಂದು ಆಲೋಚಿಸಿದರು. ದುಃಖದಿಂದ ಬಲಿಯನ್ನು ಮುಂದೆ ಮಾಡಿಕೊಂಡು ಶುಕಾಚಾರ್ಯರಲ್ಲಿಗೆ ಬಂದರು. ಶುಕಾಚಾರ್ಯರು ದೈತ್ಯರನ್ನು ಎತ್ತಿ ಕಟ್ಟಿದರು. ವಿಶ್ವಜಿದ್ಯಾಗ ಮಾಡಿ ದೈತ್ಯರಿಗೆ ಸಿಂಹಬಲ ಬರುವಂತೆ ಮಾಡಿದರು. ದೈತ್ಯರು ಇಂದ್ರಪುರಿಯತ್ತ ಸಾಗಿದರು. ಆಕ್ರಮಣ ಆರಂಭಿಸಿದರು. ದೇವತೆಗಳು ಚಿಂತಾಕ್ರಾಂತರಾದರು. ಬಲಿ ಬಂದುದನ್ನು ತಿಳಿದ ದೇವೇಂದ್ರ ನೊಂದು ಬೃಹಸ್ಪತ್ಯಾಚಾರ್ಯರ ಬಳಿ ಬಂದ. ಪ್ರಾರ್ಥಿಸಿದನೂ ಕೂಡ. ಬೃಹಸ್ಪತ್ಯಾಚಾರ್ಯರು ಜಯಿಸಲು ಸಾಧ್ಯವಿಲ್ಲ. ಆದ್ದರಿಂದ ನೀವೆಲ್ಲ ನಿಮ್ಮ ಜಾಗಬಿಟ್ಟು ಭೂಗತರಾಗಿರಿ. ಇದೇ ಒಳ್ಳೆಯದು, ಎಂದರು.

ತಸ್ಮಾನ್ನಿಲಯಮುತ್ಸೃಜ್ಯ ಯೂಯಂ ಸರ್ವೇ ತ್ರಿವಿಷ್ಟಪಮ್ ।
ಯಾತ ಕಾಲಂ ಪ್ರತೀಕ್ಷಂತೋ ಯತಃ ಶತ್ರೋರ್ವಿಪರ್ಯಯಃ ॥

ಬೃಹಸ್ಪತ್ಯಾಚಾರ್ಯರ ಸಲಹೆಯಂತೆ ದೇವತೆಗಳು ಸ್ವರ್ಗಬಿಟ್ಟು ನಡೆದರು. ಒಬ್ಬೊಬ್ಬರು ಒಂದೊಂದು ಕಡೆ ಅಡಗಿ ಹೋದರು.

ಇತ್ತ ದೈತ್ಯರು ದೇವಲೋಕವನ್ನು ಆಕ್ರಮಿಸಿದರು. ಬಲಿಯನ್ನೇ ಸ್ವರ್ಗಾಧಿಪತಿಯನ್ನಾಗಿ ನಿಯಮಿಸಿದರು. ಮೂರು ಲೋಕವನ್ನು ವಶೀಕರಿಸಿಕೊಂಡರು.

ದೇವತೆಗಳು ಪುನಃ ಭಗವಂತನನ್ನೇ ಮೊರೆ ಹೊಕ್ಕರು. ಶ್ರೀಹರಿ ಅಭಯದಾನ ಮಾಡಿದ ತಾನೇ ಅವತರಿಸುವುದಾಗಿ ಹೇಳಿದ.

ಅದಿತಿಯು ದುಃಖಗೊಂಡಳು. ಅದಿತಿಗೆ ಕಶ್ಯಪರು ಪಯೋವ್ರತ ಮಾಡಲು ಆದೇಶಿಸಿದರು.

ಫಾಲ್ಗುನಸ್ಯಾಮಲೇ ಪಕ್ಷೇ ದ್ವಾದಶಾಹಂ ಪ್ರಯೋವ್ರತಃ ।
ಅರ್ಚಯೇದರವಿಂದಾಕ್ಷಂ ಭಕ್ತ್ಯಾ ಪರಮಯಾನ್ವಿತಃ ॥
ನಮಸ್ತುಭ್ಯಂ ಭಗವತೇ ಪುರುಷಾಯ ಮಹೀಯಸೇ ।
ಸರ್ವಭೂತನಿವಾಸಾಯ ವಾಸುದೇವಾಯ ಸಾಕ್ಷಿಣೇ ॥

ವಾಮನ ಪ್ರಾದುರ್ಭಾವ

ಭಾದ್ರಪದಮಾಸ ದ್ವಾದಶೀ ಅಭಿಜಿನ್ಮುಹೂರ್ತದಲ್ಲಿ ಶ್ರೀಹರಿ ವಾಮನ ಅವತರಿಸಿದ.

ಶ್ರೋಣಾಯಾಂ ಶ್ರವಣದ್ವಾದಶ್ಯಾಂ ಮುಹೂರ್ತೇಽಭಿಜಿತಿ ಪ್ರಭುಃ ।
ಸರ್ವೇ ನಕ್ಷತ್ರತಾರಾದ್ಯಾಶ್ಚಕ್ರುಸ್ತಜ್ಜನ್ಮ ದಕ್ಷಿಣಮ್ ॥

ಕಶ್ಯಪರು ವಾಮನನಿಗೆ ಉಪನಯನ ಮಾಡಿದರು. ಸೂರ್ಯ ಸಾವಿತ್ರೀಯನ್ನು ನೀಡಿದ. ಒಬ್ಬೊಬ್ಬ ದೇವತೆಗಳು ಒಂದೊಂದು ನೀಡಿದರು. ಕುಬೇರ ಭಿಕ್ಷಾಪಾತ್ರೆ ನೀಡಿದ. ಉಮಾದೇವಿ ಭಿಕ್ಷೆ ನೀಡಿದಳು. ಹೀಗೆ ಬ್ರಹ್ಮವರ್ಚಸ್ವಿಯಾದ ಬಾಲಬ್ರಹ್ಮಚಾರಿ ವಾಮನ ಬಲಿಯ ಯಾಗಶಾಲೆ ಪ್ರವೇಶಿಸಿದ. ಬಲಿ ಪಾದ ಪೂಜೆಗೈದ. ತಲೆಮೇಲೆ ಪ್ರೋಕ್ಷಿಸಿಕೊಂಡ. ಹೇ ಬ್ರಹ್ಮನ್! ಸ್ವಾಗತವು ನಿಮಗೆ. ನಾನೇನು ಮಾಡಬೇಕು ಹೇಳಿ! ಎಂದ ಬಲಿರಾಜ, ನಿನಗೇನು ಬೇಕು ಬೇಡು. ನಾ ನೀಡುವೆ ಎಂದು ಗರ್ವದಿಂದ ಬೀಗಿದ. ವಾಮನ ಹೇಳಿದ ಮಾತು ಇಷ್ಟೇ, ನಾನು ಬ್ರಾಹ್ಮಣ. ನನಗೆ ಸ್ವಲ್ಪ ಭೂಮಿ ಸಾಕು. ಅದು ನನ್ನ ಮೂರು ಪಾದದಷ್ಟೇ!

ತಸ್ಮಾತ್ ತ್ವತ್ತೋ ಮಹೀಮೀಷದ್ ವೃಣೇಽಹಂ ವರದರ್ಷಭ ।
ಪದಾನಿ ತ್ರೀಣಿ ದೈತ್ಯೇಂದ್ರ ಸಮ್ಮಿತಾನಿ ಪದಾ ಮಮ ॥

ಸರಿಯೆಂದ ಬಲಿರಾಜ, ವಿಂಧ್ಯಾವಲಿಯನ್ನು ಕರೆದ. ಕೃಷ್ಣಾರ್ಪಣ ಪೂರ್ವಕ ನೀರಧಾರೆ ಬಿಟ್ಟ. ವಾಮನ ಬೆಳೆದ, ತ್ರಿವಿಕ್ರಮನಾದ.

ತದ್ವಾಮನಂ ರೂಪಮವರ್ಧತಾದ್ಭುತಮ್ ।

ಭೂಮಿ ಆಕಾಶಗಳನ್ನು ಅಳೆದ. ಮಹೋಲೋಕ ತಪೋಲೋಕವನ್ನು ಮೀರಿ ಭಗವಂತನ ಪಾದ ಬೆಳೆಯಿತು.

ಬ್ರಹ್ಮದೇವ ತ್ರಿವಿಕ್ರಮನ ಪಾದಪೂಜೆ ಮಾಡಿದ. ಭಗವಂತನ ಈ ವಿಜಯವನ್ನು ಋಕ್ಷರಾಜನಾದ ಜಾಂಬವಂತ ಜಯಘೋಷದ ಮೂಲಕ ಎಲ್ಲೆಡೆ ಸಾರಿದ.

ಇತ್ತಕಡೆ ಬಲಿಭೃತ್ಯರಾದ ದೈತ್ಯರೆಲ್ಲ ಸಿಡಿಮಿಡಿಗೊಂಡರು. ಯಜ್ಞದೀಕ್ಷಿತನಾದ ತಮ್ಮ ಒಡೆಯನ ಅವಸ್ಥೆಯನ್ನು ಕಂಡರು. ''ಈ ಬ್ರಹ್ಮಚಾರಿ ವಂಚನೆ ಮಾಡುತ್ತಿರುವ. ದೇವಕಾರ್ಯ ಸಾಧಿಸಲು ಬಂದವನಿವ'' ಎಂದು ಪರಸ್ಪರ ಮಾತನಾಡಿಕೊಂಡರು. ಯುದ್ಧಸನ್ನದ್ಧರಾದರು. ವಿಷ್ಣುಭೃತ್ಯರು ಇವರನ್ನು ತಡೆದರು. ಮಹಾಪರಾಕ್ರಮಿಗಳಾದ ನಂದ, ಸುನಂದ, ಜಯ, ವಿಜಯ, ವಿಷ್ವಕ್ಸೇನ, ಗರುಡ, ಇವರೆಲ್ಲ ತಮ್ಮೆದುರಿಗೆ ಬಂದವರೆಲ್ಲರನ್ನೂ ಸಂಹರಿಸಿದರು. ಆಗ ಬಲಿರಾಜ ತನ್ನವರನ್ನೆಲ್ಲ ಯುದ್ಧ ಮಾಡಬೇಡಿರೆಂದು ತಡೆದನು. ಆ ಭಗವಂತನನ್ನು ಮೀರಿ ನಡೆಯಲು ಯಾರಿಗೂ ಸಾಧ್ಯವಿಲ್ಲ. ಇಂದು ಆ ಭಗವಂತ ನಮಗೆ ಪ್ರತಿಕೂಲನಾಗಿರುವ. ಕಾರಣ ಯುದ್ಧಬೇಡ. ಹೇಳಿರುವುದನ್ನು ಕೇಳಿದ ದಾನವರು ರಸಾತಲಕ್ಕೆ ನಡೆದರು.

ಅನಂತರ ಪಕ್ಷಿರಾಜ ಗರುಡ ಭಗವಂತನ ಅಭಿಪ್ರಾಯ ತಿಳಿದು ವಾರುಣಪಾಶದಿಂದ ಬಂಧಿಸಿದನು.

ಅಥ ತಾರ್ಕ್ಷ್ಯಸುತೋ ಜ್ಞಾತ್ವಾ ವಿರಾಟ್ ವಿಭುಚಿಕೀರ್ಷಿತಮ್ ।
ಬಬಂಧ ವಾರುಣೈಃ ಪಾಶೈಃ ಬಲಿಂ ಸೂತ್ಯೇಽಹನಿ ಕ್ರತೋಃ ॥

ವಾರುಣಪಾಶದಿಂದಲೇ ಬಂಧನವೇಕೆ?

ನಾಗಪಾಶ, ಕಾಲಪಾಶ, ವರುಣಪಾಶ ಹೀಗೆ ಅನೇಕ ಪಾಶಗಳಿರುವಾಗ ವಾರುಣಪಾಶದಿಂದಲೇ ಏಕೆ ಪಕ್ಷಿರಾಜ ಬಲಿರಾಜನನ್ನು ಕಟ್ಟಿಹಾಕಿದ? ಇತರ ಪಾಶಗಳನ್ನು ಬಳಸದೇ ಇದನ್ನೇ ಉಪಯೋಗಿಸಲು ಕಾರಣವೇನು? ಹಾಗೆನ್ನಬೇಡ. ಬಲಿರಾಜ ಸ್ವಯಂ ನಾಗಾಂತಕ, ಕಾರಣ ನಾಗಪಾಶ ಉಪಯೋಗವಿಲ್ಲ. ಇನ್ನು ಕಾಲಪಾಶ ಹಾಕೋಣವೆಂದರೇ, ಅದೂ ಸಾಧ್ಯವಿಲ್ಲ. ಏಕೆಂದರೇ ಇವನು ಚಿರಂಜೀವಿಯಲ್ಲವೇ!

ಅಶ್ವತ್ಥಾಮಾ ಬಲಿರ್ವ್ಯಾಸಃ ಹನೂಮಾಂಶ್ಚ ವಿಭೀಷಣಃ ।
ಕೃಪಃ ಪರಶುರಾಮಶ್ಚ ಸಪ್ತೈತೇ ಚಿರಜೀವಿನಃ ॥

ಹೀಗಾಗಿ ಕಾಲಪಾಶದ ಆಟವೂ ಇವನಲ್ಲಿ ನಡೆಯುವುದಿಲ್ಲ. ಕಾರಣ ವಾರುಣಪಾಶದಿಂದ ಬಂಧನ.

ಆ ಎರಡು ಪಾಶಬೇಡ, ನಿಜ! ವಾರುಣಪಾಶವನ್ನು ಬಿಟ್ಟು ಬೇರೆ ಯಾವುದಾದರೂ ಆಗಬಹುದಲ್ಲ! ಈ ವರುಣಪಾಶವೇ ಏಕೆ? ನಿನಗೆ ನಿಶ್ಚಯ ಇಲ್ಲದಿರುವುದರಿಂದ ಹೀಗೆ ಮಾತನಾಡುವಿ. ನೀನು ಈ ವರುಣಪಾಶವನ್ನೇ ಏಕೆ ಬೇಡವೆನ್ನುವೆ? ಎಂದು ನಾನೂ ನಿನ್ನನ್ನು ಕೇಳಲು ಬರುತ್ತದೆ. ಕಾರಣ ಸುಮ್ಮನಿರು.

ಹಾಗಲ್ಲ! ತಾವು ದೊಡ್ಡವರು. ನಮ್ಮಲ್ಲಿ ದಯಾ ಮಾಡಬೇಕು. ಹಾಗಾ! ಸರಿ! ಕೇಳು. ನಿನ್ನ ಪ್ರಶ್ನೆ ಚೆನ್ನಾಗಿದೆ! ಸುಮ್ಮನೆ ಮನ ಬಂದಂತೆ ಉತ್ತರಿಸುವುದು ಸರಿಯಲ್ಲ. ಕಾರಣ ಕ್ಷಣ ಹೊತ್ತು ತಾಳಿಕೋ. ಯಾಕಿಷ್ಟು ಅವಸರ! ಬಲಿರಾಜ, ತಾನು ದಾನ ನೀಡವಲ್ಲಿ ನೀರಧಾರೆ ಎರೆದಿದ್ದ. ಆದರೆ ಅದನ್ನು ಪೂರ್ಣಮಾಡಲಾಗಲಿಲ್ಲವಷ್ಟೇ! ಕಾರಣ ಯಾವ ನೀರಿನಿಂದ ಬಲಿರಾಜ ಕೃಷ್ಣಾರ್ಪಣವೆಂದಿದ್ದನೋ, ಆ ನೀರಿಗೆ ಅಭಿಮಾನಿಯಾದ ವರುಣನ ಪಾಶ ಹಾಕುವುದು ಸಮುಚಿತವಲ್ಲವೇ! ಎಂದು ಉತ್ತರಿಸಲು ಬರುತ್ತದೆ. ಕಾರಣ ವರುಣ ಪಾಶ ಹಾಕಿದ್ದು ಸಮಂಜಸವೆಂದು, ಒಳ್ಳೆಯ ಸಾಹಿತ್ಯಿಕ ಮಾತಿನಿಂದ ಶ್ರೀಚರಣರು ಸಂದೇಹ ಪರಿಹರಿಸಿರುವರು. ಅಷ್ಟಲ್ಲದೆ ಬೇರೆಯವರು- ''ಕಳ್ಳಕಾಕರನ್ನು ಕಟ್ಟಲು ಹಗ್ಗವನ್ನು ಬಳಸುವಾಗ ಕಟ್ಟಿರುವುದು ಮತ್ತಷ್ಟು ಬಿಗಿಯಾಗಲೆಂದು ನೀರನ್ನು ಹಾಕುತ್ತೇವೆ. ಆದರೆ ಆ ಹಗ್ಗವೇ ನೀರಿನದಾದರೆ ಮತ್ತಷ್ಟು ಕಗ್ಗಂಟಾಗಬಹುದಲ್ಲವೇ? ಅದು ಇನ್ನಷ್ಟು ಕಗ್ಗಂಟಾಗುತ್ತದೆ, ಈ ಕಾರಣ ವಾರುಣಪಾಶವನ್ನು ಹೇಳಿದ್ದು. ಕಾರಣ ''ಕೆಂಗಣ್ಣಿನಿಂದ ನೀನು ನೋಡಬೇಡ'' ಎಂದು ಹೇಳುವ ಸಮಾಧಾನವನ್ನು ಹೇಳಿದ್ದಾರೆ.

ಅನಂತರ ಭಗವಂತನಾಡಿದ. 'ತೃತೀಯಮುಪಕಲ್ಪಯ''. ಮಾರನೆಯದಕ್ಕೆ ಸ್ಥಳವೆಲ್ಲಿ. ಬಲಿರಾಜ ಅಂಜಲಿಲ್ಲ. ಮೂರನೆಯಪಾದ ನನ್ನ ತಲೆಮೇಲಿಡು. ನಾನು ಬೇರಾವುದಕ್ಕೂ ಬೆದರುವನಲ್ಲ. ಬ್ರಾಹ್ಮಣರ ಅವಗ್ರಹಕ್ಕೆ ಬಹುಭೀತನಾಗಿರುವೆ. ಎಂದು ಬಲಿರಾಜ ನುಡಿಯುತ್ತಿರಲು, ಪ್ರಲ್ಹಾದರಾಜರು ಆಗಮಿಸಿದರು. ಸ್ತುತಿಸಿದರು ಕೂಡ!

ತ್ವಯ್ಯೆವ ದತ್ತಂ ಪದಮೈಂದ್ರಮೂರ್ಜಿತಂ
ಹೃತಂ ತ್ವಯ್ಯೆವಾದ್ಯ ತದೇವ ಶೋಭನಮ್ ।
ಮನ್ಯೇ ಮಹಾನಸ್ಯ ಕೃತೋऽಪ್ಯನುಗ್ರಹೋ
ವಿಭ್ರಂಶಿತೋ ಯಚ್ಛ್ರಿಯ ಆತ್ಮಮೋಹನಾತ್ ॥

ಹಾಗೇ ವಿಂಧ್ಯಾವಳೀ, ಬ್ರಹ್ಮದೇವರು ಭಗವಂತನನ್ನು ತುತಿಸಿದರು.

ಶ್ರೀಹರಿ ನಲ್ಮೆಯಿಂದ ನುಡಿದ. ''ಅನುಗ್ರಹಿಸುವಾಗ ಸಂಪತ್ತನ್ನು ಅಪಹರಿಸುವೆ.''

ಬ್ರಹ್ಮನ್ ಯಮನು ಗೃಹ್ಣಾಮಿ ತದ್ವಿತ್ತಂ ವಿಧುನೋಮ್ಯಹಮ್ ॥

ಹೇ ಬಲಿರಾಜ! ಗುರುಗಳಾದ ಶುಕ್ರಾಚಾರ್ಯರು ನಿಂದಿಸಿದರೂ ನಿನ್ನ ಸತ್ಯವ್ರತವನ್ನು ಬಿಡಲಿಲ್ಲ. ನೀನು ಸಾವರ್ಣಿಮನ್ವಂತರದಲ್ಲಿ ಇಂದ್ರಪದವಿಯನ್ನೇರು. ಅಲ್ಲಿಯವರೆಗೆ ಸುತಲದಲ್ಲಿರು. ನಿನ್ನನ್ನು ಅಲ್ಲಿ ನನ್ನ ಸುದರ್ಶನ ರಕ್ಷಿಸುತ್ತದೆ. ನಾನು ಅಲ್ಲಿಯೇ ಇರುವೆ. ನನ್ನನ್ನು ನಿತ್ಯದಲ್ಲಿ ನೋಡು. ನಿನ್ನ ಆಸುರ ಭಾವ ದೂರಾಗಲಿ ಎಂದು ಶ್ರೀಹರಿ ನುಡಿದನು. ಹಾಗೆ ಪ್ರಲ್ಹಾದರಾಜರಿಗೂ ಶ್ರೀಹರಿ ಹೇಳಿದ- ಹೇ ವತ್ಸ ಪ್ರಲ್ಹಾದ! ಸುತಲಕ್ಕೆ ಹೊರಡು! ಮೊಮ್ಮಗನ ಜೊತೆಯಲ್ಲಿ ಸುಖವಾಗಿರು. ಗದಾಪಾಣಿಯಾಗಿರುವ ನನ್ನನ್ನು ನಿತ್ಯದಲ್ಲೂ ಕಾಣುವನಾಗು.'' ಹೀಗೆ ಅಜ್ಜ ಮೊಮ್ಮಗ ಸುತಲದಲ್ಲಿ ವಾಸಿಸಿದರು. ಹೀಗೆ ವಾಮನ ಬಲಿಯಿಂದ ಭಿಕ್ಷೆ ಬೇಡಿ ಸೋದರ ಮಹೇಂದ್ರನಿಗೆ ಸ್ವರ್ಗ ನೀಡಿದ. ಈ ವಾಮನ ಕಥೆಯನ್ನು ಕೇಳುವವನಿಗೆ ತನ್ನ ಮನೆಯನ್ನೇ ಕೊಡುವನು ಶ್ರೀಹರಿ. ವಾಮನ ವಾಮನ ಭಾಮನ ವಂದೇ.

ಜಿಹ್ಮಮೀನಂ ನತೋऽಸ್ಮಿ

ಗಂಗಾತಡಿಯಲ್ಲಿ ಕುಳಿತ ಪರೀಕ್ಷಿದ್ರಾಜ ಗಂಗೆಯಲ್ಲಿ ತೇಲಾಡುವ ಮೀನಗಳನ್ನು ಕಂಡು ಮೊದಲವತಾರನಾದ ಮತ್ಸ್ಯನನ್ನು ಸ್ಮರಿಸಿ ಅವನ ಚರಿತೆಯನ್ನು ಕೇಳಿದನು. ಅದಕ್ಕೆ ಶುಕರು ಸತ್ಯವ್ರತರಾಜನಿಗೆ ಅನುಗ್ರಹಿಸಿದ ಮೀನನಾಗಿ ಮೆರೆದ ಶ್ರೀಹರಿಯ ಮಹಿಮೆ ತಿಳಿಹೇಳಿದರು. ಈ ಪ್ರಸಂಗದಲ್ಲಿ ಶ್ರೀಧರಾದಿಗಳು ಮಾಡಿದ ವ್ಯಾಖ್ಯಾನ ಸಮಂಜಸವಲ್ಲ, ಎಂದೆನ್ನುತ್ತಾ ಎರಡು ಸಂಪ್ರದಾಯಗಳನ್ನು ಹೇಳುತ್ತಾರೆ- ಮತ್ಸ್ಯಾವತಾರಗಳು ಎರಡು ಎನ್ನುವರು ಕೆಲವರು. ಒಂದೇ ಎನ್ನುವರು ಕೆಲವರು. ಎರಡೂ ಯುಕ್ತವೇ. ಎರಡೂ ರೀತಿಯಾದ ಮಾತುಗಳುಂಟು. ಜನ ಏನಾದರಾಡಲಿ, ನನಗೆ ದುಃಖವೂ ಇಲ್ಲ. ಸಂತೋಷವೂ ಇಲ್ಲ. ಏಕೆ ಗೊತ್ತೇ? ಪ್ರಮೇಯವೇ ಅಷ್ಟೊಂದು ದುರೂಹವಾಗಿದೆ.

ಪ್ರತಿನಂದಂತು ನಿಂದಂತು ನಾನಾ ನಾನಾ ವಿಧಾ ಜನಾಃ ।
ಪ್ರಮೇಯಸ್ಯ ದುರೂಹತ್ವಾದ್ ಹರ್ಷಾಮರ್ಷೌ ನ ನಸ್ತತಃ ॥

ಎಂದು ಶ್ಲೋಕ ಮಾಡುತ್ತಾರೆ ಶ್ರೀಸತ್ಯಧರ್ಮರು.

ಕೊನೆಯಲ್ಲಿ ಶ್ರೀಶುಕಾಚಾರ್ಯರು ಮಾಯಾಮತ್ಸ್ಯನಾದ ಶ್ರೀಹರಿಯನ್ನು ವಂದಿಸುತ್ತಾ ಈ ಅಷ್ಟಮಸ್ಕಂಧಕ್ಕೆ ಮಂಗಲ ಹಾಡುತ್ತಾರೆ.

ಪ್ರಲಯಪಯಸಿ ಧಾತುಃ ಸುಪ್ತಶಕ್ತೇರ್ಮುಖೇಭ್ಯಃ
ಶ್ರುತಿಗಣಮಪನೀತಂ ಪ್ರತ್ಯುಪಾದತ್ತ ಹತ್ವಾ ।
ದಿತಿಜಮಕಥಯಚ್ಚ ಬ್ರಹ್ಮ ಸತ್ಯವ್ರತಾಯ
ತಮಹಮಖಿಲಹೇತುಂ ಜಿಹ್ಮಮೀನಂ ನತೋಽಸ್ಮಿ ॥

ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಪರಮಪೂಜ್ಯ ಶ್ರೀ ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು ಈ ಗ್ರಂಥ ಪ್ರಕಾಶನಕ್ಕೆ ತಮ್ಮ ಗ್ರಂಥ ಭಂಡಾರದಲ್ಲಿರುವ ಶ್ರೀಸತ್ಯಧರ್ಮತೀರ್ಥರ ವ್ಯಾಖ್ಯಾನದ ಹಸ್ತಪ್ರತಿಯನ್ನು ನೀಡಿರುವರು. ಇದು ನಮ್ಮ ಭಾಗ್ಯ. ಮತ್ತು ನನ್ನ ಏಳಿಗೆಗೆ ಸರ್ವವಿಧದಿಂದಲೂ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿರುವರು. ಹಾಗೂ ಅಧ್ಯಾತ್ಮಿಕಸಾಧನೆಗೆ ತೊಡಗಿಸಿ, ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಶಾಸ್ತ್ರದ ಪಾಠಪ್ರವಚನಗಳ ಮೂಲಕ ಶಾಸ್ತ್ರಸೇವೆಯನ್ನು ಮಾಡಿಸಿ ನಿರ್ವ್ಯಾಜವಾದ ಅಭಿಮಾನದಿಂದ ಅನುಗ್ರಹಿಸುತ್ತಿರುವ ಈ ಮಹಾಗುರುಗಳಿಗೆ ಅನಂತ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳ ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಯನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶಾಸ್ತ್ರಗ್ರಂಥಗಳನ್ನು ಉಪದೇಶಿಸಿ ಸಾಧನ ಮಾರ್ಗದಲ್ಲಿ ತೊಡಗಿಸಿ ಸ್ವರೂಪೋದ್ಧಾರಗೈಯ್ದ ಸುಧಾವಿಶಾರದರಾದ ಶ್ರೀ ಗುತ್ತಲಾಚಾರ್ಯರಿಗೆ (ಶ್ರೀ ರಂಗಾಚಾರ್ಯ ಗುತ್ತಲ) ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಈ ಗ್ರಂಥಗಳ ಸಂಪಾದನೆಯ ಕಾರ್ಯದಲ್ಲಿ ನನ್ನನ್ನು ತಮ್ಮ ಜೊತೆಯಲ್ಲಿ ನಿಯೋಜಿಸಿ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿರುವ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಶ್ರೀ ಪ್ರೊ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿಯವರಿಗೆ ಕೃತಜ್ಞತಾ ಪೂರ್ವಕ ನಮನಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ನನಗೆ ಈ ಸಾಧನಶರೀರವನ್ನಿತ್ತು ನನ್ನನ್ನು ಸಾಧನಮಾರ್ಗಕ್ಕೆ ತೊಡಗಿಸಿದ ಮಾತಾಪಿತೃಗಳಿಗೆ (ಶ್ರೀಮತಿ ಶಿಲಾಬಾಯಿ ಶ್ರೀ ಪ್ರಲ್ಹಾದಾಚಾರ್ಯ ಉಪಾಧ್ಯಾಯ) ನನ್ನ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಕೊನೆಯಲ್ಲಿ ಸರ್ವಪ್ರೇರಕನಾದ ಮುಖ್ಯಪ್ರಾಣಪತಿ ಶ್ರೀಹರಿಯನ್ನು ಸ್ಮರಿಸಿ ಅವನ ಪರಮಪವಿತ್ರ ಚರಣಕಮಲಗಳಲ್ಲಿ ಅನಂತನಮನಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ವಿದ್ವದನುಚರಃ
ಕೃಷ್ಣಾಚಾರ್ಯ ಪ್ರ. ಉಪಾಧ್ಯಾಯ

श्रीमद्भागवतस्य विषयानुक्रमणिका

अष्टमः स्कन्धः (अनुवृत्तः)

षष्ठोऽध्यायः

सप्तमोध्यायः

अष्टमोऽध्यायः

नवमोध्यायः

विंशोऽध्यायः

एकविंशोध्यायः

द्वाविंशोऽध्यायः

अष्टमस्कन्धस्य श्लोकानुक्रमणिका

द
